Government Oriental Library Series

Bibliotheca Sanskrita No. 39

*Edited under the supervision of Mr. A. Mahadeva Sastri, B.A., M.R.A.S., Curator, Government Oriental Library, Mysore*

# श्रीमद्ब्रह्मसूत्रभाष्यम्

## श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितम्

### श्रीमज्जयतीर्थ–व्यासतीर्थ–राघवेन्द्रतीर्थानां टीकाभिस्समलंकृतम्

# THE BRAHMASUTRA BHASHYA

OF

## SRI MADHVACHARYA

WITH

## GLOSSES OF SRI JAYATIRTHA, SRI VYASATIRTHA AND SRI RAGHAVENDRATIRTHA

## Vol. I

EDITED BY

R. RAGHAVENDRACHARYA

*First Pandit, Government Oriental Library, Mysore*

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJA OF MYSORE

MYSORE:

PRINTED AT THE GOVERNMENT BRANCH PRESS

1911

# अवतरणिका.

अथेह सुविदितमिदं सर्वेषां, "लोको भिन्नरुचिः" इत्युक्तरीत्या लोकानां स्वस्वाभिमतेषु भिन्नभिन्नविषयेषु बुभुत्सा तदनुरोधिनी अधिजिगांसा च वरीवर्तीति. तत्रापि मुमुक्षूणां कस्मिंश्चन महानुभावे पुरुषविशेषे निरर्गल आदरः तत्प्रवर्तिते समयएवाधिजिगांसा च प्रतायत इत्यपि. तेष्वपौरुषेयं वेदमेव मूलप्रमाणमास्थाय तदनुसारिणां पौरुषेयग्रन्थानामपि प्रामाण्यमुपयन्तो नैकआस्तिकशिरोमणयो वेदार्थनिर्णयाय श्रीमद्भगवद्बादरायणप्रणीतानि ब्रह्मसूत्राणि शरणीकृत्य तेषां भाष्यादिकं निर्माय स्वस्वसिद्धान्तान् प्रत्यतिष्ठिपन्. तदेवं निर्मितानि श्रीमद्ब्रह्मसूत्राणां भाष्याणि श्रीमदानन्दतीर्थभगवत्पादाचार्याणां भाष्यनिर्माणसमये एकविंशतिरवर्तन्तेति केभ्यश्चन वाक्येभ्योऽवसीयते. तत्रानेकेषु सम्प्रदायप्रवर्तकाभावेन खिलीभावमुपगतेष्वपि द्वैताद्वैतविशिष्टाद्वैतसमयबोधका भाष्यादयस्साम्प्रतमपि समुचितप्रचारा एव वर्वृततीति महतो मोदस्य हेतुरेषः.

समयप्रतिष्ठापकास्सर्वेपि सिद्धान्तस्य प्रतिष्ठां स्वपक्षसाधनपरपक्षबाधनहेतुकतया द्विविधां, स्वपक्षसाधनं साधकबाधकभावाभावव्युत्पादनभेदेन, परपक्षबाधनं च बाधकसाधकभावाभावव्युत्पादनभेदेन द्विविधमास्थिताः, स्वग्रन्थेषु स्वपक्षसाधनं परपक्षबाधनं चाकार्षुः. एवं द्वैतसिद्धान्तप्रतिष्ठाया अपि भाष्यकृद्विष्टीकाकारैश्च कृतत्वेपि प्रतिसूत्रं स्वपक्षपरपक्षयोर्युक्तायुक्ताविचारस्य अविक्षेपेण संग्रहेण च कुत्राप्यकरणात् श्रीमद्भाष्यटीकायाः तत्त्वप्रकाशिकाया व्याख्याव्याजेन तन्निर्वहणाय श्रीतात्पर्यचन्द्रिकानाम्ना एकः प्रबन्धो निरमायि श्रीमद्विद्यातीर्थश्रीमच्चरणैः. तस्य गहनार्थत्वाच्छ्रीमद्वी राघवेन्द्रतीर्थपूज्यचरणैः श्रीमत्केशवाचार्यप्रभृतिभिश्च व्याख्यानानि

निरमायिषत. तस्यास्य सव्याख्यस्य तात्पर्यचन्द्रिकाग्रन्थस्य अवश्यसंग्राह्यतां दुर्मिलतां चालोचयतामनेकेषां द्वैतिनामितरमतीयानां च महाशयानां सूचनामङ्गीकृत्य एतद्राजकीयप्राच्यकोशालयाधिकारिभिः श्रीमद्ब्रह्मसूत्रभाष्य-तत्त्वप्रकाशिका-तात्पर्यचन्द्रिका-प्रकाशानां बहुकोशसाहाय्येन संशोध्य मुद्रणमुपक्रान्तम् ॥

तत्र भाष्यकाराणां श्रीमदानन्दतीर्थभगवत्पादाचार्याणां टीकाकृतां श्रीजयतीर्थपूज्यपादानां च चरित्रादिकं सुप्रसिद्धं, श्रीमध्वविजयजयतीर्थविजयादिभ्यः प्रचारवद्भ्यो ग्रन्थेभ्यः सुबोधं चेति, तात्पर्यचन्द्रिकाप्रकाशकृतोः श्रीमद्व्यासतीर्थराघवेन्द्रतीर्थपूज्यचरणयोश्चरितादिकं संग्रहेणात्र निबध्यते ॥

इतस्संवत्सरत्रिंशत्याः प्राक् कौ चनानपत्यौ द्विजदम्पती तीर्थयात्रापरायणौ कर्णाटकदेशमाजग्मतुः. एकदा पतिर्मृतइव निश्चेष्टोऽभवत्. तं मृतं विज्ञाय तत्पत्नी तदनुगमनाय महतामाज्ञामादित्सन्ती तदा श्रीमदानन्दतीर्थभगवत्पादीयवेदान्तसाम्राज्यपदमाधितिष्ठतः तत्रभवतः श्रीमद्ब्रह्मण्यतीर्थपूज्यपादान् यदा ववन्दे, तदैव तन्मुनिवदनात् 'पुत्रवती भव' इति वाणी निरयात्. तदनु सा निजपतेस्तादात्विकीं स्थितिं विज्ञाप्यापि 'त्वद्भर्ता जीवन्नस्ति, तवाद्यः पुत्रस्सपदि अस्मभ्यमभ्यर्पणीयः' इति प्रत्यभाष्यत यतितिलकैः. तथैव तया प्रसूतः प्रथमशिशुः यतिकुलतिलकनिदेशानुवार्तीभिः पुरुषैर्भूस्पर्शमन्तरेणैव सौवर्णभाजने परिगृह्य मठमनायि, समवर्ध्यत च श्रीहरिसमर्पितदुग्धपूर्वकेण, समस्कारि च यथावत् तत्तद्व्यसि, संप्रादायि च वराश्रमोऽस्मै, समार्प्यत चासौ विद्याभ्यासाय श्रीमच्छ्रीपादराजापरनामभ्यः श्रीमल्लक्ष्मीनारायणतीर्थाभिधयतिपतिभ्यः; यदुपदिष्टविद्याकन्दलं तादात्विकानेकदुर्वादिविजयेन विद्वज्जीवातुभूतानेकप्रबलप्रबन्धरचनेन च सफलयन् अयं महाकीर्तिसम्पन्नः संवृत्तः ॥

श्रीमद्वेङ्कटाचलक्षेत्रे श्रीश्रीनिवासस्य पूजां महाजनैरर्थितोऽयं द्वादशवत्सरानकार्षीत्. तल्लक्षणतया अधुनाऽप्येतन्माठाधिपतीनां वेङ्कटाचलप्राप्तिसमये अनितरसाधारणी मर्यादा अनुवर्तते. किञ्चास्य दिगन्तवितते वालिष्ठवादिविजयपाण्डित्याद्यतिशयाः श्रीमद्वादिराजतीर्थविजयीन्द्रतीर्थप्रभृतयो महानुभावाअपि शिष्यास्तमभूवन्निति, अद्याप्येतदीयग्रन्थाध्यायिनएव जनाः पाण्डितीपरमकाष्ठात्वमश्नुवत इति चानन्यसाधारणोऽस्य विद्याविभवः. अपि च श्रीमदानन्दतीर्थभगवत्पादेभ्य आरभ्य अस्मात्पूर्वमनन्तरं चानेकैर्महत्तमैरधिष्ठितस्याप्येतदधिष्ठितमठोत्तंसस्य भरतखण्डस्य भरतनाम्नैव एतन्नाम्ना घटितएव प्रतायते 'श्रीमद्व्यासराजमठः' इति व्यवहारः स्थेमानमापन्नः. किं च तादात्विकस्य तुंगातीरविराजमानगजगह्वर (आनेगोंदि) पुराधिराजस्याचिरसमापतत्कुट्टयोगभयेन निजराज्यमन्यायत्तं चिकीर्षोः तात्कालिकसमयानुसारेण हस्तिहस्तार्पितमालिकायां हस्तिना एतद्यतिवरगळेऽर्पितायां महाजनानामर्थनया कं चिदनेहसं राज्यमयमधितिष्ठन्विततार बहूनि भूप्रभृतीनि नैकेभ्यो विप्रवरेभ्यः. उपलभ्यन्ते चाधुनापि तदीयानि दानशासनानि तत्रतत्र. तेषु श्रीमतः कृष्णराजमहाराजात् हानुगल्लदेशे वंकापुरवेण्ठये स्थितं व्यासपुरापरनामकं गौरापुरग्रामं प्रतिगृह्य तेनैव राज्ञा तद्ग्रामे वृत्तिवि" भागं कारयित्वा मठीयश्रीरामचन्द्राय वृत्तिपञ्चकं निधायान्याः वृत्तीः ब्राह्मणेभ्यः प्रादादिति प्रतिपादयदेकं ताम्रशासनं श्रीमद्भैसुमहाशयप्रकाशितेषु शिवमोग्गादेशशासनेषु पञ्चाशीतितमं शासनं सर्वेषां सुलभमस्ति.

तत्रादौ चन्द्रवंशप्रभवं श्रीमत्कृष्णराजमहाराजं कैश्चन श्लोकैः प्रस्तुत्य दानकालसम्प्रदानादिनिर्देश एवं कृतः—

शकाब्दे शालिवाहस्य सहस्रेण चतुश्शतैः ।
नवाभ्यधिकया चत्वारिंशता गणिते क्रमात् ॥

सर्वजित्नामके वर्षे मासि कार्तिकनामनि ।
शुक्लपक्षे च पुण्यायामुत्थानद्वादशीतिथौ ॥
तुङ्गभद्रानदीतीरे त्वङ्गत्कल्लोलशीतले ।
सन्निधौ विट्ठलेशस्य सर्वसम्पद्विधायिनि ॥
श्रीमत्परमहंसाख्यपरिव्राजे महात्मने ।
मध्वाचार्यमताम्भोजमार्तण्डायिततेजसे ॥
ब्रह्मण्यतीर्थशिष्याय ब्रह्मनिर्मलमूर्तये ।
व्यासतीर्थयतीन्द्राय विद्वद्दिन्दीवरेन्दवे ॥
वंकापुरमहाग्रामवेण्ठये विहितस्थितिम् ।
श्रीमद्व्यासपुराभिख्यामपरां सम्पाश्रितम् ॥
गौरापुराभिधं ग्रामं सर्वसस्योपशोभितम् ।
कृष्णरायमहारायो माननीयो मनस्विनां ।
सहिरण्यपयोधारापूर्वकं दत्तवान्मुदा ॥

इत्यादिना । तदेतच्छासनबलेनास्य यतिकुलतिलकस्य जीवितकालः शालिवाहनशकवत्सराणां पञ्चदशशतान्तर्वर्तीति निर्णयोऽपि लभ्यतइत्यलम् ॥

एतत्पित्रोर्जन्मभूमिः हैदराबादुदेशान्तर्गतमानवीनाट्टदन्तर्गणितः कोट्टनकल्लुनामा ग्रामइति वदन्ति ॥

अथ श्रीमद्राघवेन्द्रतीर्थश्रीचरणानां अभिजनदेशः आन्ध्रदेशान्तर्वर्ती विजयनगरम्. श्रीमती गोपिकाम्बा श्रीमद्वेङ्कटाचलेशितुः प्रसादेनासुं प्रासूत. श्रीमद्वेणीवेङ्कटभट्टनामकोऽसौ श्रीमतीं सरस्वत्यम्बाभिदां परिणीय तस्यां श्रीलक्ष्मीनारायणाख्यं तनयमभलत, यश्च श्रीमद्भाष्यटीकाविवरणादिना स्थेमानमश्नुते भूतले. तदन्वसौ गुरुवर्यः श्रीमत्सुधीन्द्रतीर्थश्रीचरणेभ्योऽधीतविद्यः परिगृहीतपारिव्राज्यश्च तत्रतत्रानेकान् दुर्वादिनो विजित्य नैकानतिप्रौढान्मन्दोपकारकांश्च प्रबन्धाननन्यसुकरान्विरचय्य समार्जितातिवि-

शदयशाः अद्यापि निजवृन्दावनसेविनां समीहितपूरणादिना सुस्पष्टमहिमा विराजतेतराम्. एतदीयानि चरितानि सुबहूनीति अत्र तत्सर्वसंग्रहो दुष्करइति विरम्यते. एतदुपज्ञस्य चन्द्रिकाव्याख्यानस्य प्रकाशइत्याभिधा.

अत्र सम्मुद्रयमाणानां भाष्यादीनां विशेषः किञ्चिदुपवर्ण्यते. भाष्ये तावत्सूत्रार्थवर्णनं सूत्रानुकारिभिरन्यूनानतिरिक्तैः पदैः क्रियते. अनन्तरं स्वोक्तार्थः श्रुत्युदाहरणेन दृढीक्रियते. तथोदाहृतश्रुत्यर्थोऽपि इतिहासपुराणादिवचनैः युक्त्या च स्फुटीक्रियते. न किमप्यनुपयुक्तमप्रामाणिकं च स्वकपोलकल्पितं वर्णयित्वा ग्रन्थविस्तृतिः क्रियतइत्ययमतिशयोऽस्य तद्विवेचनवतां सुविदितस्सम्यगुपश्लोकितश्च श्रीमति मध्वविजये—

उक्तमुक्तमभिधेयमुत्तमं वेदवाक्य मनुवादयन्मुहुः ।
व्यञ्जयत्स्मृतिवचोभिरञ्जसा तस्य चार्थमतियुक्तयुक्तिमत् ॥
बालसङ्गमपि बोधयद्भृशं दुर्निरूपवचनं च पण्डितैः ।
अप्रमेयहृदयं प्रसादवत् सौम्यकान्ति च विपक्षभीषणम् ॥

इत्यादिना. बालदृष्ट्या सुबोधार्थत्वेऽपि पण्डितदुर्निरूपहृदयत्वाद्गाम्भीर्यादिगुणयुक्तं चेदमिति यथोक्तभाष्यलक्षणसम्पत्तिरत्र सुविशदा,

सूत्रार्थो वर्ण्यते यत्र पदैस्सूत्रानुकारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥ इति.

भाष्यस्य प्राचीनटीकान्तरसत्त्वेपि सङ्कृतिसंशयबीजादिसहिताधिकरणशरीरस्य साकल्येन सुबोधशैल्या निरूपणं भाष्यगताशेषव्याख्येयांशव्याख्यानं, भाष्यातिरिक्तमूलान्तराणामपि क्वया चन संङ्कृत्या अर्थवर्णनं चात्र नातिविस्तृतग्रन्थेन क्रियतइति सर्वजनीनत्वान्मुमुक्षीयतचन्द्रिकाव्याख्येयत्वाच्च तत्त्वप्रकाशिकैवात्र सङ्कलिता.

चन्द्रिकायां तु "इमां व्याकरिष्ये यथामति" इति प्रतिज्ञानुरोधेन तत्त्वप्रकाशिकाव्याख्यानं मूलटीकान्तरप्रतिपादितास्पष्टार्थस्फुटीकरणं च

क्रियते. पर तु टीकाव्याख्यानं न सर्वत्र प्रतिवाक्यग्रहणपूर्वकं क्रियते. केवलं प्रथमाधिकरणमात्रे कतिपयग्रन्थपर्यन्तमेव तथा विवरणं क्रियते. उपन्यासरूपेणैव प्रायस्सर्वटीकार्थनिरूपणं पूर्वपक्षसिद्धान्तप्रमेयादिनामविक्षेपेण सुबोधत्वाय क्रियते. यथोक्तं ग्रन्थकृद्भिरेव—

उपन्यासमुखेनैव टीकार्थोऽपि निरूप्यते ।
पूर्वपक्षादिमेयानामविक्षिप्तत्वसिद्धये ॥

इति. अवश्यव्याख्येयटीकावाक्यानामक्षरार्थस्तु प्रायस्तत्तदधिकरणान्ते संग्रहेण उच्यते. द्वितीयाध्याये तु तत्रतत्रैव टीकाक्षरार्थवर्णनमुपन्यासश्च संक्षिप्य क्रियतइतीदं व्याख्यानवैचित्र्यमेतद्ग्रन्थस्य.

प्रतिज्ञाता परपक्षपरीक्षा तु जिज्ञासाधिकरण एव स्वरीत्या अधिरणारम्भात्प्राक् कृता. अनन्तराधिकरणेषु तु स्वपक्षं निरूप्यैव 'अन्ये तु, परे तु' इत्यादिनिर्देशपूर्वकमद्वैतिपक्षं 'केचित्' इति निर्देशेन विशिष्टाद्वैतिपक्षं चानूद्य क्रियते. अयं ग्रन्थो द्वितीयाध्यायसमाप्तिपर्यन्तमेव विरचितः. तदुत्तराध्यायद्वयस्थानेनैवक्रमेण व्याख्यानसमापनं तु तन्मठपरम्परायां श्रीमद्व्यासतीर्थश्रीमच्चरणेभ्यो दशमैः "दशमो मत्सम." इति तेषामेव वचनेनादावेव संसूचितानुभावैस्तत्तादृशैः श्रीमद्रघुनाथतीर्थपूज्यचरणैः व्यधायि. तद्ग्रन्थस्य शेषचन्द्रिकानाम्ना व्यवहारो वरीवर्ति.

प्रकाशे तु चन्द्रिकास्थावश्यव्याख्येयाशेषपदवाक्यार्थनिरूपणं, अपेक्षितशास्त्रान्तरप्रमेयविशदीकरणं, तत्रतत्र तादात्विकैः पक्षान्तरानुयायिभिः श्रीमदप्पय्यदीक्षितप्रभृतिभिरद्वैतिनां शैवानां च पक्षमवलम्ब्योद्भावितानां स्वपक्षदोषाणां समाधानं चेत्यादिकं निपुणतरं क्रियते; कोशाश्चास्य यथेष्टं लभ्यन्तइत्यस्यैव मुद्रणमारब्धम्.

तदेतद्भाष्यादिप्रबन्धचतुष्टयस्य प्रकाशनपूर्वभाविसंशोधनं एतत्कोशालयसम्बन्धीनि C.235,C.1001,C.995,B.41, सङ्ख्याङ्कितानि, गरळपुरी

(नंजिनगुड्) मठादानीतमेकं, मामकीनं चापरमिति षट् चन्द्रिकाया', एतत्कोशालयसम्बन्धीनि C.936, C.955, C.90, सङ्ख्याङ्कितानि, गरळपुरी (नंजिनगुड् मठसम्बन्ध्येकं, मुळवागलुस्थलादानीतमेकं, मामकीनं चान्यदिति षट् प्रकाशस्य च पुस्तकानि, कानिचिद्भाष्यतत्त्वप्रकाशिकापुस्तकानि चाश्रित्य समाहितमनसा मया यथामति व्यधायि. तत्रतत्रावश्यसंग्राह्यग्रन्थान्तरस्थविषयसंग्रहोऽपि मया तत्तत्पुटाधोभागे टिप्पणरूपेण विरचितः. यदि के चन प्रामादिका दोषा उपलभ्येरन्, ते महद्भिः क्षम्यन्तामित्यर्थयते,

सज्जनानुग्रहाभिलाषी,

रायपाळ्य राघवेन्द्राचार्यः.

# विषयसूची.


| अधिकरणसङ्ख्या. | विषयनिर्देशः. | पुटसङ्ख्या. |
|---|---|---|
| १ | मङ्गलाचरणादि . . . . | १— २० |
| ,, | ब्रह्मसूत्राणां व्याख्येयत्वसमर्थनम् . | २०— २८ |
| ,, | अद्वैतिगीत्या भामत्युक्ताधिकरणपरीक्षा . . | २९— ३७ |
| ,, | ,, विवरणोक्ताधिकरणपरीक्षा . | ३७— ४० |
| ,, | विशिष्टाद्वैत्यधिकरणपरीक्षा . . . | ४०— ४५ |
| ,, | स्वरीत्या आद्याधिकरणस्य संगतिः . | ४६— ५१ |
| ,, | ,, पूर्वपक्षः . . | ५२— ८१ |
| ,, | ,, सिद्धान्तः . | ८२— ९० |
| ,, | प्रणवस्यादिसूत्रावयवत्वसमर्थनम् . . | ९०— ११० |
| ,, | अद्वैत्युक्ताथशब्दार्थपरीक्षा . . | १११—१४१ |
| ,, | विशिष्टाद्वैत्युक्ताथशब्दार्थपरीक्षा . | १४२—१४६ |
| ,, | स्वरीत्या अथशब्दस्य अधिकारानन्तर्यार्थ-त्ववर्णनम् . . . | १४६—१४८ |
| ,, | अथातश्शब्दयोस्सूत्रादाववश्यप्रयोज्यत्व-समर्थनम् . . . | १४९—१५३ |
| ,, | ब्रह्मविद्याधिकारस्वरूपनिरूपणम् . . | १५३—१५७ |
| ,, | स्वरीत्या अतश्शब्दार्थवर्णनम् . . | १५८—१७६ |
| ,, | भामत्युक्तातश्शब्दार्थपरीक्षा . . | १७६—१७८ |
| ,, | विवरणोक्तातश्शब्दार्थपरीक्षा . | १७८—१७९ |
| ,, | विशिष्टाद्वैत्युक्तातश्शब्दार्थपरीक्षा . | १८०—१८१ |

| अ. सं. | विषयनिर्देशः | पृ. सं. |
|---|---|---|
| १ | विषयफलयोः, स्वरीत्या ब्रह्मातश्शब्दलभ्यत्व-वर्णनम् . | १८१— |
| ,, | ,, भामत्युक्तजिज्ञासापदलभ्यत्व-परीक्षा . . | १८२— ८३ |
| ,, | ब्रह्मशब्दस्य स्वरीत्या विष्णुवाचित्वम् . | १८३— ८९ |
| ,, | ,, अद्वैत्युक्तदेशकालवस्त्वपरिच्छिन्नार्थकत्वपरीक्षा . | १८६—१९२ |
| ,, | 'ब्रह्मजिज्ञासा' इति समासशोधनम् . | १९३—१९७ |
| ,, | जिज्ञासाशब्दस्य स्वरीत्या विचारार्थकत्वम् . | १९७—२०१ |
| ,, | ,, पञ्चपादीविवरणोक्तविचारशक्त्यसम्भवपरीक्षा . | २०१—२०६ |
| ,, | ,, विशिष्टाद्वैत्युक्तविचाररूढ्यसम्भवपरीक्षा . . | २०७—२१० |
| ,, | ,, स्वरीत्या विचारे रूढिसमर्थनेन इच्छार्थकत्वस्य प्रकृते असम्भववर्णनम् . | २१०—२११ |
| ,, | ,, भामत्युक्तविचाराक्षेपकत्वपरीक्षा . . . | २११—२१३ |
| ,, | ,, कौमुद्युक्तेच्छाविचारोभयपरत्वपरीक्षणम् . . . | २१४—२१५ |
| ,, | पूर्वतन्त्रेणैतच्छास्त्रस्य गतार्थताशङ्कासमाधानयोरद्वैत्युक्तयोः परीक्षा . . | २१५—२१६ |
| ,, | स्वरीत्या पूर्वतन्त्रस्य वेदैकदेशविषयकत्वेन अस्यशास्त्रस्य सर्ववेदविषयकत्वेनागतार्थत्ववर्णनम् . . . . | २१६—२१७ |
| ,, | ब्रह्मणः प्रसिद्धचप्रसिद्धिभ्यां विचार्यत्वासम्भवशङ्कासमाध्योरद्वैत्युक्तयोः परीक्षा . | २१७—२२० |

| अ. सं. | विषयनिर्देशः | पृ. सं. |
|---|---|---|
| | भास्करोक्तकारणविषयकविप्रतिपत्त्यसम्भव-वर्णनम् . . . | २२३— |
| ,, | आपाततः प्रसिद्धत्वेपि ब्रह्मणः सगुणत्वनिर्गुणत्वादिना विप्रतिपन्नत्वात्स्वरीत्या विचार्यत्वसम्भववर्णनम् . . . | २२८— |
| ,, | ब्रह्मशब्दस्य विष्णुपरत्वसमर्थननाधिकरणोपसंहार . . . | २२४—२३० |
| २ | द्वितीयाधिकरणस्य संगतिसंशयौ . . | २३१—२३२ |
| ,, | पूर्वपक्षः . . | २३३—२४६ |
| ,, | सिद्धान्तः . . | २४६—२६६ |
| ,, | सुधोक्ताधिकरणनिरूपणम् . | २६७—२७२ |
| ,, | मामत्युक्ताधिकरणपरीक्षा . . | २७२—२७४ |
| ,, | विशिष्टाद्वैत्यधिकरणपरीक्षा . . . | २७५—२७९ |
| ,, | नवीनोपालम्भप्रतिक्षेप. . . . | २७९—२८० |
| ,, | यादवप्रकाशाधिकरणपरीक्षा . . . | २८०— |
| ,, | "जन्मादि" इत्यस्य अद्वैतिविशिष्टाद्वैत्यभिमतोत्पत्तिस्थितिभङ्गमात्रार्थकत्वपरीक्षा | २८१—२८२ |
| ,, | स्वरीत्या सृष्ट्याद्यष्टकार्थत्वम् . . | २८२—२९२ |
| ,, | जन्मादिहेतुत्वसमुदायस्य लक्षणत्वमिति विशिष्टाद्वैत्याशयपरीक्षा . . . | २९३—२९८ |
| ,, | अद्वैत्यभिमतस्वरूपतटस्थलक्षणभेदपरीक्षा . | २९८—३१५ |
| ,, | जन्मादिकरणत्वलक्षणाद्वैजात्यसाधकत्वेन सत्यत्वादिलक्षणानां विशिष्टाद्वैत्यभिमतातिशयपरीक्षा . . . | ३१६—३२० |
| ,, | एतदधिकरणभाष्यतत्त्वप्रकाशिकाग्रन्थष्टीकाक्षेरार्थवर्णनं च . . . | ३२०—३२५ |

| अ. सं. | विषयनिर्देशः | पु. सं. |
|---|---|---|
| ३ | तृतीयाधिकरणस्य सङ्गतिः . . | ३२६— |
| ,, | ,, स्मृत्याधकिरेणन गतार्थताशङ्का . | ३२६—३३० |
| ,, | ,, तत्समाधानानि | ३३०—३४१ |
| ,, | ,, संशयपूर्वपक्षौ | ३४२—३५० |
| ,, | ,, सिद्धान्तः | ३५०—३५२ |
| ,, | ,, नवीनाधिक्षेपपरिहारः . | ३५३—३५६ |
| ,, | "शास्त्रयोनित्वात्" इत्यस्य अद्वैत्यभिमतषष्ठीत-त्पुरुषत्वस्य तदधिकरणस्य च परीक्षा | ३५६—३६७ |
| ,, | विशिष्टाद्वैत्यधिकरणपरीक्षा . . . | ३६७—३६९ |
| ,, | अद्वैत्यभिमतवर्णकान्तरपरीक्षा . . | ३६९—३७१ |
| ,, | यादवप्रकाशाधिकरणपरीक्षा . . . | ३७१—३७२ |
| ,, | शैवभाष्योक्ताधिकरणपरीक्षा . . | ३७२—३७४ |
| ,, | एतदधिकरणभाष्यतत्त्वप्रकाशिकाग्रन्थौ टीकाक्ष-रार्थवर्णनं च. . . . | ३७५—३८३ |

हरिः ॐ

# श्रीमद्ब्रह्मसूत्रभाष्यं

## श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

श्रीजयतीर्थविरचितटीकया तत्त्वप्रकाशिकाख्यया,

श्रीव्यासतीर्थविरचित–तत्त्वप्रकाशिकातात्पर्यचन्द्रिकया,

श्रीराघवेन्द्रतीर्थविरचितेन तात्पर्यचन्द्रिकाप्रकाशेन च

समलंकृतम्.

हरिः ओम्.

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मक-

श्रीलक्ष्मीहयग्रीवाय नमः.

ब्रह्मसूत्रभाष्यम्

**नारायणं गुणैस्सर्वैरुदीर्णं दोषवर्जितम् ।**

**ज्ञेयं गम्यं गुरूंश्चापि नत्वा सूत्रार्थ उच्यते ॥**

तत्त्वप्रकाशिका

शुद्धानन्दोरुसंविद्द्युतिबलबहुलौदार्यवीर्यादिदेहं

चिन्तासन्तापलेपोद्भवमृतिमुखरा शेषदोषातिदूरम् ।

सद्भिर्वैराग्यभक्तिश्रुतिमतिनियतध्यानजज्ञानयोगा-

द्रम्यं वन्दे मुकुन्दाभिधममलमलं ब्रह्म वेदान्तवेद्यम् ॥

तात्पर्यचन्द्रिका

अस्पृष्टदोषगन्धाय कल्याणगुणसिन्धवे ।

नमोनमो भक्तमुक्तिदायिने शेषशायिने ॥

प्रकाशः

समस्तगुणसम्पूर्णं सर्वदोषविवर्जितम् ।

ज्ञानिप्रियतमं वन्दे मुक्तिदं कमलापतिम् ॥

शर्वादिसर्वगीर्वाणनिर्वाणगतिहेतवः ।

पूर्णप्रज्ञपदाम्भोजपांसवः पान्तु नस्सदा ॥

विधूतदुर्मतध्वान्तो विशदीकृतपद्धतिः ।

यस्सज्जनानुज्जहार जयतीर्थरविं भजे ॥

प्रकाशः

पदवाक्यप्रमाणज्ञान् सम्प्रदायार्थकोविदान् ।
व्यासतीर्थमुनीन् सेवे दुर्वादिफणिपक्षिपान् ॥
अस्मद्देशिकपादानां प्रणम्य चरणाम्बुजम् ।
तात्पर्यचन्द्रिकाव्याख्यां विधास्यामि यथामति ॥

तत्त्वप्रकाशिकाव्याख्याव्याजेनाधिसूत्रं प्रवर्तमानेषु ग्रन्थेषु दुर्गमार्थान् सुगमान् विधित्सुर्व्यासतीर्थमुनिः प्रारिप्सितग्रन्थपरिसमाप्त्याद्यर्थं अध्यायचतुष्टयोक्तगुणविशिष्टदेवतानतिरूपं मङ्गलं विदधाति—**अस्पृष्टेति**। असम्बद्धदोषलेशायेति द्वितीयाध्यायार्थः, "गन्धो गन्धक आमोदे सम्बन्धे लेशगर्वयोः" इत्यभिधानात् । यं दोषलेशोऽपि न स्पृशति तस्मा इति यावत् । बहुव्रीहेर्दोषगन्धपदान्तत्वेन गन्धपदान्तत्वाभावात् "अल्पाख्यायाम्" इतीत्वं न भवति । कल्याणानां 'गुणा ना' धर्माणां सिन्धुरिव 'सिन्धुः' आश्रय इति आद्याध्यायार्थः । सत्त्वादीनां श्रुत्यादौ गुणत्वप्रसिद्धेः मतान्तरे दुःखादीनां गुणत्वेनोक्तेश्च तद्व्युदासाय—**कल्याणेति** । आद्यार्थस्यादौ वाच्यत्वेऽपि द्वितीयार्थस्याद्यार्थे हेतुत्वादादावुक्तिः । कल्याणधर्मत्वोपपादकत्वाद्वा, सदोषत्वे तस्यायोगात् । विघ्नादिदोषनिवृत्तेरादावपेक्षितत्वाद्वा, "तं यथा यथोपासते" इत्यादेः । 'भक्तेभ्यः' भक्त्युपलक्षितवैराग्यश्रवणमननादिमाधनवद्भ्यः 'मुक्तिदायिने' इत्येनेन तृतीयचतुर्थार्थोक्तिः । 'नमोनमः' इत्यादराद्विरुक्तिः । "नमस्स्वस्ति" इत्यादिना चतुर्थी । एवंविधश्च नारायण इति सूचयति—**शेषशायिन इति** ॥ प्रतिपा-

चन्द्रिका

शमयन् भवसन्तापं रमयन् साधुचातकान् ।
कृष्णमेघः कृपादृष्टिवृष्ट्या पुष्णातु मामपि ॥
श्रीमदानन्दतीर्थार्यपादपङ्कजरेणवः ।
पवित्रयन्तु मां नित्यं पापपाटनपण्डिता ॥
शारदावासवदनशारदाम्बुरुहान् मुहुः ।
पद्मनाभमुनीन् वन्दे सर्वशास्त्रविशारदान् ॥
मिथ्यासिद्धान्तदुर्ध्वान्तविध्वंसनविचक्षणः ।
जयतीर्थाख्यतरणिः भासतामे हृदम्बरे ॥
कंसध्वंसिपदाम्भोजसंसक्तो हंसपुङ्गवः ।

प्रकाशः

यदेवतां नत्वा सूत्रकर्तुः कृपादृष्टिमात्मन्याशास्ते—**शमयन्निति** । 'कृष्णमेघः' वेदव्यासाख्यमेघः 'पुष्णातु' ज्ञानभक्त्यादिभिः, भवसन्ता पशान्तिविशिष्टस्वरूपानन्दानुभवलक्षणरमणदानेन वा पुष्टं करोतु। तस्य मेघत्वोपपादनं विशेषणद्वयेन । इष्टदेवतात्वाद्वसुदेवसुतः कृष्णोऽपि ग्राह्यः ॥ भाष्यकर्तुश्चादिगुरोः पादरेणुभ्यः कामान्तरं याचते—**श्रीमदिति** । कथं तेषां पवित्रीकरणशक्तेत्यत उक्तं—**पापेति** । 'भजकानां' इति शेषः ॥ प्राचीनटीकाकर्तॄन् नमति—**शारदेति** । सरस्वत्यावासभूतं वदनाख्यशरत्कालसम्बन्धिपङ्कजं येषां तान् । एतदुपपादयति—**सर्वेति** । गुरुत्वात् बहुवचनम् ॥ व्याख्येयग्रन्थकर्तुर्हृद्यावासं प्रार्थयते—**मिथ्येति** । तस्य तरणित्वोपपादकमेतत् ॥ यतः स्वस्य पारमहंस्यं तस्य गुरोः हृद्यावासमर्थयते—**कंसेति** ।

चन्द्रिका

ब्रह्मण्यगुरुराजाख्यो वर्ततामम मानसे ॥
पदवाक्यप्रमाणाब्धिविक्रीडनविशारदान् ।
लक्ष्मीनारायणमुनीन् वन्दे विद्यागुरून् मम ॥
श्रीमद्भाष्यस्य टीका या जयतीर्थार्यनिर्मिता ।
गम्भीरा निर्मला चेमां व्याकरिष्ये यथामति ॥
सूत्रे भाष्येऽनुभाष्ये च सन्न्यायविवृतौ तथा ।
टीकासु च यदस्पष्टं तच्च स्पष्टीकरिष्यते ॥

प्रकाशः

'कसध्वंसी' कृष्णः तस्य पादाख्याम्बुजानुरक्तः परमहंसाश्रमीत्यर्थः ॥ स्वस्य विद्योपदेष्टृन् नमति—**पदेति** । इदं तु गुरुत्वे शक्त्युपपादकम् । 'पदं' शब्दशास्त्रं, 'वाक्यं' मीमांसायुग्मं, 'प्रमाणं' तर्कशास्त्रं, बहुवचनं प्राग्वत् ॥ एवं मङ्गलनिचयमारचय्य शिष्यमनस्समाधानार्थं चिकीर्षितं प्रतिजानीते—**श्रीमदिति** । तत्त्वप्रदीपभ्रान्तिं निरस्यति—**जयतीर्थेति** । 'या जयतीर्थार्यनिर्मिता तामिमां' इत्यन्वयः । व्याख्याने हेतुमाह—**गम्भीरेति** । 'गाम्भीर्यं' गहनार्थत्वम् । 'निर्मलत्वं' च असङ्गतार्थवर्णनादिशून्यत्वम् ॥ स्वप्रवृत्तेः फलान्तरमाह—**सूत्र इति** । निरुपपदसूत्रशब्दस्य ब्रह्मसूत्र एव मुख्यत्वात् 'सूत्रे' इत्यवादि । एवं 'भाष्ये' इत्यपि । 'अनुभाष्ये' अनुव्याख्याने । चशब्दादणुभाष्ये च । **टीकास्विति** । त्रिविक्रमपण्डिताचार्यकृता तत्त्वप्रदीपाख्या, अनुव्याख्या-

चन्द्रिका

प्रतिसूत्रं प्रकाश्येते घटनाघटने मया ।
स्वीयान्यपक्षयोस्सम्यग्विदांकुर्वन्तु सूरयः ॥

ग्रन्थादौ मङ्गलमाचरति—**शुद्धेति** । .....

प्रकाशः

नटीका न्यायसुधा, पद्मनाभाचार्यकृता सन्न्यायरत्नावली च, न्याय-विवरणटीका च, तत्त्वप्रकाशिका चेत्येतासु* टीकास्वित्यर्थः । स्वप्रवृत्तेरन्यत्फलमाह—**प्रतिसूत्रमिति** । स्वपरपक्षयोर्यथाक्रमं घटनाघटने विदांकुर्वन्तु जानन्तु । यद्यपि स्वस्येदमित्यर्थे अणि कृते स्वशब्दस्य द्वारादिषु पाठेन "द्वारादीनां च" इति सूत्रेण वकारात्पूर्वमैजागमेनौकारे सति सौवेति भाव्यम् । तथाऽपि स्वस्मै हितमित्यर्थे "प्राक्क्रीताच्छः" इति छप्रत्यये स्वीयेति साध्विति ज्ञेयं, चतुर्थस्य द्वितीयपादे "गहादिभ्यश्च" इत्यत्र दुर्घटवृत्तौ तथैवोक्तेः । ननु भाष्यव्याख्यार्थं प्रवृत्तस्य भगवतो जयतीर्थमुनेः सैव कार्या, किमाद्यपद्येन, मङ्गलाचरणस्यापि "अथाविद्या" इति भाष्यव्याख्यारम्भे माङ्गलिकस्य 'अथ' इत्यस्य प्रयोक्ष्यमाणतया सिद्धत्वादित्यत आह—**ग्रन्थादाविति** । तस्य तु कृत्यं वक्ष्यत इति भावः । मङ्गलमाचर्य ग्रन्थे निबध्नातीत्यर्थः । मङ्गलपदोपादानेन तस्य प्रारिप्सितपरिसमाप्त्यादिहेतुतया तदनुष्ठानस्य शिष्टाचारपरम्पराप्राप्तत्वेनावश्यकत्वं सूचितं, 'ग्रन्थादौ' इत्युक्त्या च मङ्गलस्य ग्रन्थाङ्गत्वं च । भाष्यव्या-

*त्येवमाद्यासु" इत्यपि पाठो दृश्यते.

चन्द्रिका

.....इदं च पद्यं भाष्यस्थाद्यश्लोकविवरणरूपत्वात्तद्वदेव वक्ष्यमाणादिसूचकत्वेन व्याख्येयम्। आनन्दादेश्शुद्धत्वं सान्ततत्वसातिशयत्वादिराहित्यम्। 'लेपः' पुण्यपापसम्बन्धः।

प्रकाशः

ख्यानरूपं चेदं, अतो नानुपयुक्तकथनमित्याह—**इदं चेति**। यद्वा—'ब्रह्म वन्दे' इत्यनेनैव मङ्गलस्य चीर्णत्वात्किं विशेषणैः कृत्यमित्याशङ्क्य व्याख्येयपद्यगतविशेषणकृत्यानीव अत्रापि ध्येयानीत्याह—**इदं चेति**। वक्ष्यमाणाध्यायार्थसूचकत्वेनेत्यर्थः। आदिपदेन नारायणशब्दान्वाख्यानपरत्ववत् तत्पर्यायब्रह्मशब्दान्वाख्यानपरत्वसूचकत्वेन तस्यैव वन्द्यत्वोपपादकत्वेन चेति ग्राह्यम्। यद्वा—अधिकार्यादिचतुष्टयसूचकत्वेनेत्यर्थः। "तथा ह्यादिसूत्रे भगवनः" इत्याद्यपद्यव्याख्या सर्वाऽप्यत्र यथायोगमनुसन्धेयेति भावः। आद्यार्थस्य 'गुणैस्सर्वैरुदीर्णम्' इत्यस्य विवरणं 'शुद्ध' इत्यादि। तत्र यदि शुद्धत्वं दुःखासम्भिन्नत्वं, तदा 'चिन्तादिदोषदूरम्' इत्यनेन गतार्थमत आह—**आनन्दादेरिति**। द्वितीयार्थस्य "दोषवर्जितम्" इत्यस्य विवृतिः—'चिन्ता' इति। तत्र चिन्तासन्तापाभ्यां 'लेपः' सङ्ग इति भ्रान्तिं निराह—**लेप इति**। तृतीयार्थस्य 'ज्ञेयं' इत्यस्य विवृतिः—'सद्भिः' इत्यादि। तत्र 'श्रुत्या' श्रवणेन जाता या मतिः तया 'नियतं' तद्विषय एव नियमितं यत् 'ध्यानं' आलोचनात्मकं मननं तज्जनितनिरन्तरानुस्मृतिरूपज्ञा-

तत्त्वप्रकाशिका

याच्ञामन्दरलोलिताद्यत उदैद्विद्येन्दिरा निर्जरै-
र्जातो भारतपारिजातसुतरुः सद्ब्रह्मसूत्रामृतम् ।
आसीत्तन्त्रपुराणसन्मणिगणो जातः शुकेन्दुस्सदा
सोऽयं व्याससुधानिधिर्भवतु मे भूत्यै सतां भूतिदः ॥

चन्द्रिका

'श्रुतिमती' श्रवणमनने। 'नियतध्यानं' स्वयोग्योपासनम्। 'ज्ञानं' साक्षात्कारः, स एव 'योगः' उपायः। 'अमलं' मुमुक्षूपास्यं न तु परमत इव मुकुन्दाभिधं मन्दोपास्यम् ॥ व्याचिख्यासितभाष्यमूलसूत्रप्रामाण्यं सूचयन् मङ्गलान्तरमाचरति–**याच्ञेति** । अत्र 'यत उदैद्विद्येन्दिरा' इत्यादिना वक्तानुकूल्यं, 'निर्जरैः' इत्यादिना श्रोत्रानुकूल्यं, 'याच्ञा' इत्यादिना प्रसङ्गानुकूल्यं च दर्शयता "वक्तृश्रोतृप्रसक्तीनां यदाप्तिरनुकूलता" इत्यनुव्याख्यानोक्ता आप्तिमूलता सूत्राणां सूचिता।

प्रकाशः

नलक्षणध्यानादिति भ्रान्तिं निराह—**श्रुतिमती** इति। **योगउपाय** इति । "योगस्सन्नहनोपाय" इत्यभिधानादिति भावः । ननु 'अमलं' निर्दोषमित्यर्थश्चेत् चिन्तेत्यादिना गतार्थं, अत आह—**अमलमिति** । मायारूपमलरहितं, "निर्विशेषं परं ब्रह्म" इत्याद्युक्त्या परमते मायिन एव मन्दोपास्यत्वात् । यद्वा—न विद्यते मलं संसाराख्यं यस्मादित्यर्थः। 'मुमुक्षूपास्यम्' इति पर्यवसितव्याख्यानम्, संसारनिवर्तकस्यैव तदुपास्यत्वादिति भावः। ननु ग्रन्थादाववश्यकार्यस्य मङ्गलस्य कृतत्वात्किं द्वितीयपद्येन। यदि "श्रेयांसि बहुविघ्नानि" इति मङ्गलान्तरस्य कार्यता, तदा "व्यासो भवतु मे भूत्यै" इत्येतावता पूर्तेः किं विशेषणैः कृत्यमित्यत आह—**व्याचिख्यासितेति** । एतेन सूत्रप्रामाण्यसूचनं विशेषणकृत्यमित्युक्तं भवति। 'व्याचिख्यासित' इ-

तत्त्वप्रकाशिका

स्वान्तध्यान्तनिकृन्तने जितमहावैकर्तनांशुव्रजं
निर्दोषं जितचन्द्रचन्द्रिकमलं तापत्रयोन्मूलने।
गाम्भीर्यं जितसिन्धुराजममितं भाष्यं यदास्याम्बुजा-
दाविर्भूतममन्दबोधभगवत्पादान् प्रपद्येऽथ तान्॥

चन्द्रिका

ब्रह्मसूत्रपदेन ब्रह्मपरश्रुतिव्याख्यानरूपत्वात् श्रुतिमूलत्वं, न्यायव्युत्पादकत्वाद्युक्तिमूलत्वं च सूचितम्॥ भाष्यस्य व्याख्येयत्वप्रयोजकं सफलत्वगम्भीरत्वादि दर्शयन् भाष्यकृतं प्रणमति—**स्वान्तेति**। वैक-

प्रकाशः

त्युक्त्या तत्सूचनमपि नानुपयुक्तमित्याह। **ब्रह्मपरेति**। 'ब्रह्मसूत्र' इत्यत्र तन्त्रेण 'ब्रह्मणः' विष्णोः सम्बन्धि यत् 'ब्रह्म' श्रुतिजातं तस्य 'सूत्राणि' न्यायनिबन्धनात्मकवाक्यानीत्युक्तं भवति। यद्वा—'ब्रह्मणः' श्रुतिजातस्य 'सूत्रं' तन्निर्णायकन्यायनिबन्धनात्मकशास्त्रमित्यर्थः। श्रुतिजातस्य ब्रह्मपरत्वं च वास्तवमित्यभिप्रेत्येति ध्येयम्। 'न्याय' इति 'सूत्र' इत्युक्तिलब्धोऽर्थः॥ ननु भाष्यव्याख्याने तत्कर्तृप्रसादस्यावश्यकतया तत्प्रणामस्य कार्यत्वेऽपि न विशेषणकृत्यमित्यत आह—**भाष्यस्येति**। ध्वान्तशब्दिताज्ञाननिवर्तकत्वतापत्रयोन्मूलकत्वरूपं फलवत्त्वम्। गाम्भीर्यं आपाततोऽप्रतीयमानहृदयत्वम्। आदिपदेनामितशब्दितबह्वर्थत्वग्रहः। **प्रणमतीति**। यद्यपि 'प्रपद्ये' इति प्रपत्तिरेव श्रुता, तथाऽपि नमनादिनैव सा भवतीति तथोक्तम्। धातूनामनेकार्थत्वान्नमनार्थत्वमुपेत्य वा एवमुक्तम्। ध्वान्तनिवर्तकत्वाद्यविशेषे कथं जितत्वमित्यत-

तत्त्वप्रकाशिका

श्रीमध्वसंसेवनलब्धशुद्धविद्यासुधाम्भोनिधयोऽमला ये ।
कृपालवः पङ्कजनाभतीर्थाः कृपालवस्स्यान्मयि नित्यमेषाम् ॥
श्रीमद्रमारमणसद्गिरिपादसङ्घिव्याख्यनिनाददलिताखिलदुष्टदर्पम्
दुर्वादिवारणविदारणदक्षदीक्षमक्षोभ्यतीर्थमृगराजमहं नमामि ॥
अथ तत्कृपया ब्रह्मसूत्रभाष्यं यथामति ।
व्याकुर्वे श्रीमदानन्दतीर्थार्यमुखनिस्सृतम् ॥
गङ्गासङ्गेन नैर्मल्यं रथ्याद्विर्लभ्यते यथा ।
वाचो विशुद्धिमिद्धचर्थं सङ्गम्यन्ते गुरोर्गिरः ॥

चन्द्रिका

र्तनांशुव्रजादेः स्वान्तध्वान्तनिकृन्तनादावशक्तत्वादेव भाष्येण जितत्वम् ॥ गङ्गासङ्गेन यथा रथ्याद्विः नैर्मल्यं लभ्यते, तथा मदीयाया वाचो

प्रकाशः

आह—**वैकर्तनेति । स्वान्तेति** । भाष्यस्य तु शक्तत्वाद्विशेष इति भावः । उभयत्रादिपदेन चन्द्रचन्द्रिकायास्तापत्रयोन्मूलनेऽशक्तत्वात्समुद्रस्य चामितत्वाभावादिति ग्राह्यम् । यद्वा—काकोलूकवत् परस्परं युद्धलब्धजयाभावात् कथं तेन जितत्वं तेषामित्यत आह—**वैकर्तनेति** । एवकारेण लौकिकं जयं प्रत्याह ॥ 'वाचो विशुद्धिमिद्धचर्थं' इत्यत्र वाचः कर्तुरश्रवणात् 'गुरोः' इत्यस्यैवात्राप्यन्वये 'गुरोर्वाचो विशुद्धचर्थं गुरोर्गिरो मिथः सङ्गम्यन्ते' इत्यस्यायोगात्, गिरां सङ्गतत्वासङ्गतत्वाभ्यां सङ्गतिकरणासम्भवाच्च * इत्याशङ्क्य दृष्टान्तांशं स्फुटीकुर्वन्नपेक्षितपूर्वोत्तरार्धं द्वेधा व्याचष्टे—**गङ्गासङ्गेनेति** ।

* 'इत्याशङ्क्य' इत्यतः प्राक् 'कथमेतत्' इति साध्यमुपस्कार्यम् ॥

तत्त्वप्रकाशिका

अथविद्यापटलपिहितनयनैरन्यैरन्यथा व्याख्यातानि ब्रह्मसूत्राणि यथावद्व्याचिख्यासुर्भगवानाचार्यवर्यः प्रारिप्सितभाष्यस्य कैवल्याद्यखि

चन्द्रिका

विशुद्धिसिद्ध्यर्थं गुरोर्गिरः मदीयया वाचा 'सङ्गम्यन्ते' व्याख्या नव्याख्येयभावेन सम्बध्यन्तइत्यर्थः । यद्वा—गुरोर्गिरः परस्परं 'सङ्गम्यन्ते' सम्बद्धतया प्रकाश्यन्तइत्यर्थः ॥ **अथाविद्येति** । प्रति-

प्रकाशः

**रथ्याद्विरिति** । "द्वित्रिभ्यां पद्दन्मूर्धसु" इति निर्देशात् ज्ञापकात् "ऋक्पूरब्धूपथामानक्षे" इति समासान्तोऽनित्य इति भावः । **यद्वेति** । 'मदीयया वाचा' इत्यनुकर्षः । अस्मिन् पक्षे वाचो गीर्भिः सङ्गतिरार्थकीति न दृष्टान्तानानुगुण्यम् ॥ ननु 'अथाविद्या' इत्यत्राथशब्दो न मङ्गलार्थः, तस्य कृतत्वात् । नाप्यानन्तर्यार्थः, कस्याप्यर्थस्य भाष्ये पूर्वं अप्रकृतत्वात्, भाष्यकृन्नमनस्य टीकाकृत्कृतव्याख्याप्रतिज्ञानन्तर्ययोगात् । नाप्यारम्भार्थः, 'आरभ्यते' इत्यनुक्ताऽप्यारब्धे इदमनेनारब्धमिति ज्ञातुं शक्यत्वात् । 'व्याकुर्वे' इत्युक्त्यैव व्याख्या प्रारभ्यत इत्यस्य लाभाच्च । प्रश्नाद्यर्थकत्वशङ्काऽनवकाशाच्च व्यर्थ इत्यत आह—**अथाविद्येतीति** । यद्यपि 'प्रतिग्रन्थव्याख्यानमारभ्यते' इत्यनुक्ताऽपि तस्मिन्नारब्धेऽनेन प्रतिग्रन्थव्याख्या आरब्धेति ज्ञातुं शक्यम् । तथाऽपि शिष्यमनस्समाधानार्थं प्रतिग्रन्थव्याख्यानमारभ्यत इति वक्तुमथशब्दः प्रायोजीति ध्येयम् । ननु भाष्यस्याखिलफलसाधनतासिद्धिः कथं नमस्कारमात्रात्स्यादित्यत आह—

तत्त्वप्रकाशिका

लफलसाधनतासिद्ध्यर्थं निरन्तरायपरिसमाप्त्याद्यर्थं च नारायणनमस्कारं ग्रथयति ग्रन्थारम्भं च प्रतिजानीते—**नारायणमिति**। अत्र निरुपपदसूत्रशब्देन ब्रह्मसूत्रमुच्यते, तस्य मुख्यार्थाभिधायकत्वात्, तेषां च तादृशत्वात्। वक्ष्यमाणमेव सूत्रार्थं श्रोतृशेमुषीमनुकूलयिष्यन्नादौ प्रस्तावयितुं विशेषणचतुष्टयेनेष्टदेवतां विशिनष्टि। तथाहि—आदिसूत्रे भगवतः प्रसत्त्या पुरुषार्थो भवतीति सूचितेऽधिकारिणः शङ्कोन्मिषति पुरुषान्तरेऽनुपलभ्यमानं पुरुषार्थप्रदत्वं तस्य चेत् कीदृशोऽसाविति। तां निवारयदाद्याध्यायस्यार्थो **गुणैः सर्वैरुदीर्णमिति**, तत्र हि अपर्यायानन्तशब्दानां महायोगवृत्त्या हरौ समन्वयसमर्थनद्वारा सर्वगुणोदीर्णतैव वर्ण्यते। स च युक्त्यादिभिरुक्तसमन्वये निरोधिते दोषवानपि स्यादित्याशङ्कां परिहरतो द्वितीयाध्यायस्यार्थो **दोषवर्जितमिति**, तत्र युक्त्यादीनामाभासत्ववर्णनेन निर्दोषत्वस्यैव भाषितत्वात्। एवंविधस्य च प्रसादः कया विधया भविष्यतीत्याशङ्कां पूरयतः तृतीयस्या-

चन्द्रिका

ग्रन्थव्याख्याप्रारम्भार्थोऽथशब्दः। **फलसाधनतासिद्ध्यर्थमिति**। समङ्गलस्यैव सफलत्वादिति भावः। **भगवतः प्रसत्त्या पुरुषार्थो भवतीति सूचित इति**। भगवत्प्रसादस्य मोक्षहेतुत्वेऽनशब्देन

प्रकाशः

—**समङ्गलस्येति**। अतश्शब्देनोक्तत्वात् कथं सूचनमित्यत आह—**भगवदिति**। ननु भाष्ये आदौ वक्ष्यमाणार्थकथनस्य श्रोतृ-

तत्त्वप्रकाशिका

र्थो **ज्ञेयमिति,** तत्र विरक्तचादिभिस्तत्प्रसन्त्यर्थं तस्य ज्ञेयताया: कथितत्वात् । प्रसन्नश्च कीदृशं पुमर्थं प्रयच्छतीत्याशङ्कां पूरयतः तुरीयस्यार्थो **गम्यमिति,** तत्र ज्ञानिनो भगवत्प्राप्तिलक्षणमोक्षस्योदितत्वात् । अथ वा—नैतत् नारायणपदं देवदत्तादिपदवत्साङ्केतिकं भवति, किन्तु विशिष्टगुणानप्याचष्टे इत्याशयवान् पदचतुष्टयेन तन्निर्वक्ति । तथा हि—दोषारशब्दयोरभिन्नार्थत्वात् नञश्च विरुद्धार्थवाचित्वात् दोषविरुद्धा गुणा नारा:, तदाश्रयो नारायणः । नञोऽभावार्थत्वात् अराश्रयो न भवतीति वा

चन्द्रिका

संक्षिप्योक्ते इत्यर्थः । **विशिष्टगुणानप्याचष्टे इति** । नारायणशब्दस्य विशिष्टगुणवाचकत्वप्रदर्शनं च तस्य ब्रह्मशब्दसमानार्थत्वात् शास्त्रार्थवाचकत्वाच्च नारायण एव शास्त्रार्थ इति दर्शयितुम् । **न रीयत इति** । नञुपपदात् "रीङ् क्षये" इत्यस्माद्धातोः करणे डप्रत्यये प्रज्ञादित्वात् स्वार्थिकेऽण्प्रत्यये च कृते

प्रकाशः

बुद्ध्यानुकूल्यरूपफलवत्त्वेऽपि नारायणशब्दान्वाख्यानस्य न किञ्चित्फलमत आह—**विशिष्टेति**। 'न रीयतेऽनेन' इत्यत्र डप्रत्यये कृते 'नरं' इति स्यात्, 'नारं' इति कथमत आह—**नरीयत इतीति**। औणादिके डप्रत्यये टिलोपे च 'नरं' इति भवति। ततः "प्रज्ञादिभ्यश्च" इति स्वार्थिकाण्प्रत्यये "तद्धितेष्वचामादेः" इत्यादिवृद्धौ "यस्येति च" इत्यकारलोपे वक्ष्य-

तत्त्वप्रकाशिका

नारायणः । नरसम्बन्धित्वात्, नरीयतेऽनेनेति वा, न अरमणं येनेति वा, निर्दोषवेदोत्पन्नत्वाद्वा नारं ज्ञानं, विषयतया तदाश्रयत्वाच्च नारायणः । अरविधुरत्वादरतिरहितत्वात्क्षयरहितत्वाद्वा नाराः

चन्द्रिका

नारमिति रूपसिद्धिरिति द्रष्टव्यम् । **'अरमणं'** दुःखम् । **निर्दोषवेदोत्पन्नत्वादिति** । निर्दोषवेदवाचकात् नारशब्दात् "तस्येदम्" इत्यणि

प्रकाशः

माणरीत्या नलोपाभावे च 'नारं' इति सिद्धमित्यर्थः । अरमणं रमणाभाव इति भ्रान्तिं निराह—**अरमणमिति** । 'नारं' इत्यनेन कथं निर्दोषवेदोत्पन्नत्वस्य लाभ इत्यत आह—**निर्दोषेति** । न विद्यन्ते अरा दोषा निरर्थकत्वादयो यस्य सोऽयं नारो वेदः । ततोऽणि "यस्येति च" इति लोपे 'नारं' इति सिद्धम् । सम्बन्धश्च जन्यजनकभाव इति भावः । ननु नारशब्दात् "वृद्धिर्यस्याचामादिस्तद्वृद्धम्" इति वृद्धसंज्ञायां "वृद्धाच्छः" इति छप्रत्यये 'नारीयं' इति भाव्यम्, कथं 'नारं' इति । सत्यं; "वा नामधेयस्य वृद्धसंज्ञा" इति वा, "ओर्गुणः" इत्यत्र गुणग्रहणेन ज्ञापनात् "संज्ञापूर्वको विधिरनित्यः" इति वा 'नारं' इति साधु । अत एव तृतीयस्य द्वितीयपादे "स्पृहिगृहिपतिदयि" इति सूत्रे 'श्रद्धालुः' इत्यत्र "श्रद्धौ" इति द्विर्वचनमाशङ्क्य "संज्ञापूर्वको विधिरनित्यः" इति द्विर्वचनं नेत्युक्तं मञ्जर्याम् । ननु 'अरायणो न' इत्यादिव्युत्पत्तौ नञो नलोपे

तत्त्वप्रकाशिका

मुक्ताः, तदाश्रयो नारायणः। नगनाकादिशब्दवदयं शब्दो ज्ञातव्यः। अथ वा—नारायणस्यैव नम्यत्वोपपादकमेतत्। यो हि बहुगुणो विदोषः शास्त्रज्ञेयोऽधीतशास्त्रगम्यः स वन्द्यो भवति।

चन्द्रिका

कृते नारशब्दो वेदजन्यज्ञानवाचीति भावः। **नगनाकादिशब्दवदिति।** ननु—"नभ्राण्नपात्" इत्यादिसूत्राभ्यां नाकनगशब्दयोर्नलोपाभावउक्तः, नारायणशब्दे तु नेति, कथं तद्दृष्टान्तीकरणमिति चेत्, मैवम्, 'स्त्रैणार्थः' इत्यत्र "स्त्रीपुंसाभ्यां" इत्यादिना विहितस्य नञो नलोपाभावार्थं "नलोपो नञः" इति सूत्रे 'रात्रेः कृति विभाषा"

प्रकाशः

नुटि च सति अनरायणेति भाव्यमित्याशङ्क्योक्तं मूले "नगनाकादिशब्दवत्" इति, तत्राक्षिपति—**नन्विति**। "नभ्राण्नपान्नवेदा नासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या" इति सूत्रेण नाकशब्दस्य, "नगोऽप्राणिष्वन्यतरस्याम्" इति सूत्रेण नगशब्दस्य नलोपाभावो निपातित इत्यर्थः। नगनाकादौ यथा सौत्रत्वात्साधुत्वमेवमिहापि सौत्रत्वादेव समाधानमिति टीकाशय इत्यभिप्रेत्य सौत्रत्वप्रकारं दर्शयति—**मैवमित्यादिना**। स्त्रीशब्दात् हिताद्यर्थे "स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्" इति नञ्प्रत्यये 'स्त्री नञ्' इति स्थिते ञित्त्वादादिवृद्धौ णत्वे च 'स्त्रैण' इतिरूपं, ततोऽर्थशब्देन समासे 'स्त्रैणार्थ' इति भवति। तत्र "नलोपो

चन्द्रिका

इत्यतोऽनुवृत्ताया विभाषायाः व्यवस्थितविभाषात्वस्य न्यास एवोक्तत्वेन नारायण इत्यत्रापि नलोपाभावाद्युपपत्तेः । यद्वा—नसमानञः" इति नलोपे कार्ये णत्वस्यासिद्धतया नलोपे "तस्मान्नुडचि" इति नुटि कृते 'स्त्रायनर्थ' इति प्राप्नोति । तत्र "रात्रेः कृति विभाषा" इत्यव्यवहितपूर्वसूत्राद्विभाषापदमनुवर्त्य नञो नलोपो भवति विभाषेति षष्ठे तृतीयपादे व्याख्यातम् । तर्ह्यनश्व इत्यादावपि रूपद्वयं प्राप्नोति । अतः क्वचिन्नित्यं स्यात् क्वचिन्नैव स्यादिति व्यवस्थितविकल्प इति वृत्तिव्याख्यानं न्यास एवोक्तं नास्माभिर्यतितव्यमित्यर्थः । आदिपदेन नुडभावग्रहः । ननु विभाषापदानुवृत्तौ "नभ्राण्नपात्" इत्यादिसूत्रं व्यर्थं, तत्रापि उक्तरीत्या समाधानसम्भवात् प्रपञ्चनस्यागतिकगतित्वात् । परिगणनत्वे प्राप्तः स एव दोषः । अतो ज्ञायते नात्र तदनुवृत्तिरस्तीत्यनुशयेनाह—**यद्वेति** । अस्मिन् पक्षे "नभ्राट्" इत्यादिस्तु नञ्स्वरार्थं नञ्समास इति भावः । मञ्जर्यां तु नञ्प्रत्ययस्य नलोपमाशङ्क्य प्रत्ययत्रित्वस्य वृद्धिस्वरयोश्चरितार्थत्वात् निपातत्रित्वस्या चरितार्थत्वात् निपातस्यैव नञो "नलोपो नञः" इति सूत्रे ग्रहणं, न प्रत्ययनञः इत्येकं समाधिमुक्त्वा, उत्तरपदाधिकारवशात्पूर्वपदस्य नञ इत्याक्षेपात्प्रत्ययनञोऽपूर्वपदत्वान्न नलोप इत्युक्तम् । तन्मते विभाषापदाननुवृत्तेस्तदनुरोधेन वाऽऽह—**यद्वेति** ।

चन्द्रिका

सोऽस्तु । अत्र "पूर्वपदात्संज्ञायामगः" इति णत्वं, ल्युटः टित्करणसामर्थ्येन अयनशब्दोधिकरणे त्रिलिङ्ग इति पुंलिङ्गत्वं च

प्रकाशः

"अमानोनाः प्रतिषेधे" इति निषेधार्थकनञ्शब्देन "सुप्सुपा" इति समासः । तथा च नञोऽभावान्न नलोपः । अत एव कौमुद्यां 'नैकधा' इत्यादौ नसमास इत्युक्तमिति भावः । समासस्थले सत्यप्यैकपद्ये "रषाभ्यां नो णः समानपदे" इत्यत्र विवक्षितस्य समानमेव पदं समानपदं न तु पूर्वोत्तरपदव्यवहारभागित्येवंरूपसमानपदत्वस्याभावात्कथं णत्वमित्यतः सुधोक्तमाह—**अत्रेति** । ननु "नपुंसके भावे क्तः" इति 'नपुंसके' इत्यनुवर्तमाने "ल्युट्च" "कारणाधिकरणयोश्च" इति ल्युटो विधानेन 'नारायणं' इति नपुंसकलिङ्गेन भाव्यमित्यत आह—**ल्युट इति** । ल्युटः टित्करणं हि "टिड्ढाणञ्" इत्यादिना ङीबर्थम् । यदि ल्युडन्तस्य क्लीबत्वमेव, तर्हि स्त्रीत्वाभावात् तन्निमित्तकङीबर्थं टित्करणमनर्थकम् । तेन ज्ञायते लिङ्गान्तरमस्तीति सामान्यतो ज्ञापनात्पुल्लिङ्गतोपपत्तिरित्यर्थः । 'अधिकरणे' इति प्रकृताभिप्रायेण । अत एव महाभाष्ये—"भूवादयो धातवः" इत्यत्र 'कोसावनुमानो नाम' इति करणे पुल्लिङ्गप्रयोगः । यद्यपि वृत्तौ "करणाधिकरणयोः" इति सूत्रे 'नपुंसके' इत्यस्यानुवृत्तेरनुक्तेः 'इध्मप्रव्रश्चनः' इत्युदाहरणे पुल्लिङ्गोक्तेश्च 'नपुंसके' इति नानुवर्तते इत्येव सुवचम् । तथाऽपि तदननुवृत्तिरेव टित्करणेन ज्ञाप्यत इत्येवमुक्तमित्यदोषः । वृत्तिकारस्यापीदमेव बीजमित्युक्तं भवति । भाष्ये गुरुदेवतासमुच्चायकचशब्दसत्त्वात् 'अपि' इत्यस्य वैयर्थ्यं निरसितुं टीकायां "स्वस्य गुरुदेवताभेदे" इत्याद्युक्तम् । तत्र 'यद्यपि' इत्यादेरन्वयाभावात् प्रकारा-

तत्त्वप्रकाशिक

देवतानतिसमनन्तरं गुरूनपि नमति—**गुरूंश्चेति** । "गुरोर्नाम न गृह्णीयाच्छिष्यो भार्या पतेरपि" इत्यतो न तन्नाम जग्राह । स्वस्य गुरुदेवताभेदेऽरुचिं सूचयत्यपिपदेन । यद्यपि गुरुर्न देवताभिन्नः, तथाऽपि विशेषानुग्रहार्थं पृथङ्नतिरिति । अनेनैव शास्त्रस्याधिकारिविषयप्रयोजनसम्बन्धाश्च श्रोतृप्रवृत्त्यङ्गभूताः सूचिताः ज्ञातव्याः । तत्स्मरणस्य महाफलहेतुत्वाच्च । तदुक्तं—

अधिकारं फलं चैव प्रतिपाद्यं च वस्तु यत् ।
स्मृत्वा प्रारभतो ग्रन्थं करोतीशो महत्फलम् ॥ इति ॥

नमस्काराधिकार्यादिग्रथनसूचने शिष्यशिक्षार्थम् । तथा हि—**ज्ञे-**

चन्द्रिका

द्रष्टव्यम् । "पृथङ्नतिरिति" इत्यत्रेतिशब्दस्य "इत्यरुचिं सूचयति" इति पूर्वेणान्वयः । विघ्नाभावस्य नमस्कारेणैव सिद्धेर्ग्रथनं व्यर्थम्, एवमधिकार्यादिसूचनस्य प्रवृत्त्यङ्गतया कर्तव्यत्वेऽपि न महाफलार्थं तत्कार्यं, तत्स्मरणेनैव फलसिद्धेरित्यत आह—**नमस्काराधिकार्यादिग्रथनसूचने इति ॥**

प्रकाशः

र्थकेतिशब्देनान्वयमाह—**पृथगिति** ।

नमस्कारस्य विघ्नोत्सारणार्थं अधिकार्यादिसूचनस्य प्रवृत्त्यर्थं कार्यतया फलस्य स्पष्टत्वात् फलोक्तिरयुक्तेत्यत आह—**विघ्नाभाव**

तत्त्वप्रकाशिका

यत्वगम्यत्वयोर्ज्ञातृगन्तृसापेक्षत्वात् तद्योग्यस्तदिच्छुरेवाधिकारी सूचितः । नारायण एव विषयः । तज्ज्ञानगमने प्रयोजनम् । यथायोग्यं सम्बन्ध इति ॥ ननु यदुपादेयं तदेवानन्यार्थतया व्याख्येयम् । यच्च प्रमाणत्वे सतीष्टसाधनताऽवबोधकं प्रायस्तदेवोपादेयम् । अतः कथं ब्रह्मसूत्राणां व्याख्येयत्वोपयोग्युपादे

चन्द्रिका

**अनन्यार्थतयेति** । प्रातीतिकार्थान्तरपरं न भवतीत्यनेन प्रकारेणेत्यर्थः । **प्रायस्तदेवोपादेयमिति** । अप्रमाणत्वादिना निश्चितस्यापि ख्यात्याद्यर्थं व्याख्यानदर्शनात् 'प्रायः' इत्युक्तम् । "अथेष्टानिष्ट" इति भाष्ये 'अथ' इत्यस्य अवतारानन्तरमेव न तु परोपदेशमपेक्ष्य येन स्वतस्सा-

प्रकाशः

**स्येति** । 'तत्कार्यं' अधिकार्यादिसूचनं कार्यं । 'तत्स्मरणेनैव' अधिकार्यादिस्मरणेनैव । स्मरणस्यान्यथाऽपि सम्भवादिति भावः ॥ "अनन्यार्थतया व्याख्येयं" इत्यत्र स्वप्रयोजनतया व्याख्येयमिति भाति । तदयुक्तं, व्याख्यनस्यान्यार्थत्वादित्यतोऽर्थमाह—**प्रातीतिकेति** ॥ "अनेन प्रकारेण" इति तृतीयार्थः । प्रायःपदव्यावर्त्यस्य दुर्गमत्वादाह—**अप्रमाणत्वादिनेति** ॥ "अथेष्ट" इतिभाष्ये अथशब्दस्य मङ्गलप्रश्नाद्यर्थकत्वायोगादानन्तर्यार्थत्वे चातिशयाभावेन वैयर्थ्यमित्यत आह—**अथेत्यस्येति** । अतएव प्रमेयदीपिकायां "व्यासोऽवत-

**द्वापरे सर्वत्र ज्ञाने आकुलीभूते तन्निर्णयाय ब्रह्मरुद्रेन्द्रादिभिरर्थितो भगवान् नारायणो व्यासत्वेनावततार । अथेष्टानिष्टप्राप्तिपरिहारेच्छूनां तद्योगमविजानतां तज्ज्ञापनार्थं वेदमुत्सन्नं व्यञ्जयंश्चतुर्धा व्यभजत् चतुर्विंशतिधैकशतधा सहस्रधा द्वादशधा च ।**

तत्त्वप्रकाशिका

यतायै प्रामाण्यादीत्याशङ्कां परिहर्तुं सूत्रागतिक्रममाह—**द्वापर इति** । 'सर्वत्र' इतिसार्वत्रिकपुरुषोक्तिः । 'ज्ञाने' सम्यग्ज्ञाने 'आकुलीभूते' किमिदमदो वेति सन्दिग्धे अन्यदेवेति मिथ्यादृष्टिदुष्टे च । आकुलीभावसमर्थनाय द्वापरग्रहणम् । 'तद्योगं' इष्टप्राप्त्यनिष्टपरिहारोपायम् । "वेदमुत्सन्नं" इत्यादेः अपपाठादिना तिरोहितं प्रागेव चतुर्धा विभक्तं वेदं ऋङ्निगदादिरूपं व्यक्तीकृत्येकैकस्मादेकैको भाग इति चतुर्धा व्यभजदेकैकं चावान्तरमृगादिवेदं चतुर्विंशत्यादिशाखाभेदेन व्यभजदित्यर्थः । तदुक्तम्—

ऋचस्तु ऋच उद्धृत्य ऋग्वेदं कृतवान् प्रभुः ।
यजूंषि निगदाच्चैव तथा सामानि सामतः ॥ इति ॥

चन्द्रिका

र्वज्ञत्वं न स्यादित्यर्थः । "वेदमुत्सन्नमित्यादेः" इत्यस्य 'इत्यर्थः' इति वक्ष्य-

प्रकाशः

तार । ततश्चेष्टानिष्टप्राप्तिपरिहार" इति भाष्यगतस्य 'ततश्च' इत्यस्यावतारानन्तरमेवेत्यर्थ उक्त इति भावः । एतेन "अथ अनन्तरमेव" इति तत्त्वप्रदीपवाक्यं विवृतं भवति । "वेदमुत्सन्नं" इत्यादेरन्वयाभावादाह—**वेदमुत्सन्नमित्यादेरित्यस्येति** ॥ "अवान्तरवेदादि" इत्यस्य दुर्गम-

तदर्थनिर्णयाय ब्रह्मसूत्राणि चकार । तच्चोक्तं स्कान्दे—

तत्त्वप्रकाशिका

अवान्तरवेदादिविभागकथनं च ज्ञानाकुलीभावसमर्थनार्थं, "चक्रे वेदतरोश्शाखा दृष्ट्वा पुंसोऽल्पमेधसः" (श्रीमद्भागव. १....) इत्यादेः । अयं भावः—वाक्यप्रामाण्यं तावत् निर्दोषतया सम्भवति । निर्दोषता चापौरुषेयतया आप्तिमूलतया च । आप्तिश्च वक्तृनिर्दोषतैव । आप्तिमूलत्वात् ब्रह्मसूत्राणां प्रामाण्यसिद्धिः, प्रमादाज्ञानसंशयविपर्ययाणां नारायणावतारे व्यासेऽसम्भवात् भगवत्त्वादेव, विप्रलम्भकत्वस्य च श्रोतृदोषनिबन्धनस्य तदभावेनाभावनिर्णयात्, ज्ञानायोग्यताया ब्रह्मादिश्रोतृत्वभावात्, अपहासस्य च प्रसङ्गदोषनिबन्धनस्य तदभावेनाभावनिर्णयात्, अज्ञाननिर्हरणस्य च प्रसक्तत्वेन प्रसङ्गदोषाभावात्, आप्तिमूलत्वेनैव प्रामाण्यसिद्धौ सुतरां श्रुतिनिर्णायकत्वेन श्रुतियुक्तिमूलत्वात् । इष्टानिष्टप्राप्तिपरिहारसाधनवेदनहेतुवेदनिर्णायकत्वेनेष्टसाधनावबोधकत्वं च सिद्ध्यति । अतो ब्रह्मसूत्राणामत्युपादेयत्वात् व्याख्येयतेति । उक्तमेवार्थं प्रमाणेन स्थापयति—**तच्चेति** । 'स्थितं' यथोत्पन्नं तथैव । 'अन्यथा

चन्द्रिका

माणेनान्वयः । **अवान्तरवेदादिविभागकथनमिति** । स्वत एव ऋङ्निगदादिरूपादेकैकस्मात् महावेदादुद्धृतस्यावान्तरस्य ऋगादिवेदस्य चतु-

प्रकाशः

त्वाद्भेधाऽर्थमाह—**स्वत एवेति** । "तदल्पाक्षरत्वम्" इत्यत्र विवक्षिता-

नारायणाद्विनिष्पन्नं ज्ञानं कृतयुगे स्थितम् ।
किञ्चित्तदन्यथा जातं त्रेतायां द्वापरेऽखिलम् ॥
गौतमस्य ऋषेश्शापात् ज्ञाने त्वज्ञानतां गते ।
सङ्कीर्णबुद्धयो देवा ब्रह्मरुद्रपुरस्सराः ॥
शरण्यं शरणं जग्मुर्नारायणमनामयम् ।
तैर्विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः ॥
अवतीर्णो महायोगी सत्यवत्यां पराशरात् ।
उत्सन्नान् भगवान् वेदानुज्जहार हरिस्स्वयम् ॥
चतुर्धा व्यभजत्तांश्च चतुर्विंशतिधा पुनः ।
शतधा चैकधा चैव तथैव च सहस्रधा ॥

तत्त्वप्रकाशिका

जातम्' इदमदो वेति सन्दिग्धं अन्यदेवेति मिथ्यादृष्टिदुष्टं च। 'अखिलं अन्यथा जातं' कालतो भागद्वयस्यान्यथात्वं युक्तं, न सर्वस्येत्यतो विशेषकारणं चाह—**गौतमस्येति**। 'अज्ञानतां' अज्ञानमिति प्रतीतिविषयतां सन्देहगोचरतां च। ब्रह्मादिबुद्धिसङ्कीर्णता नाम सज्ज्ञानानुक्रोशयुक्ततैव, नाज्ञानादिमिश्रत्वम्, गौतमशापस्य स्वहतगोनिर्मातृमात्रविषयत्वात्, कालाभिभवशून्यत्वाच्च तेषाम्। लोकस्य च सम्प्रदायप्रवर्तकाभावेन कालतश्चाज्ञानप्राप्तिः। तदुक्तमन्यत्र—"नष्टधर्मज्ञानलोककृपालुभिर्ब्रह्मरुद्रेन्द्रादिभिः" इत्यादि।

प्रकाशः

र्थासिद्धिरेव अल्पाक्षरत्वमिति भाति। तच्चायुक्तमिति विवक्षितपूर-

कृष्णो द्वादशधा चैव पुनस्तस्यार्थवित्तये ।
चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा ॥
अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥

तत्त्वप्रकाशिका

'तस्य' वेदस्य । बहुवचनप्रयोगेऽपि नार्थभेदः शङ्कनीय इति भावेनैकवचनम् । वेदनिर्णयाय सूत्रान्तरैरलं किमेभिरित्यत आह—**येषामिति** । किं तत्सूत्रत्वं यदाञ्जस्यं ब्रह्मसूत्राणामित्यत आह—**अल्पेति** । यावदक्षरतां विना विवक्षितार्थासिद्धिः तदल्पाक्षरत्वम् । एवं च भवितुमर्हतीत्यवचनमसन्दिग्धत्वम् । विशिष्टार्थता सारवत्त्वम् । बहुशाखानिर्णायकत्वं विश्वतोमुखत्वम् । व्य-

चन्द्रिका

र्विंशत्यादिशाखाभेदेन । आदिपदेन शाखानां चोपशाखाभेदेन कथनमित्यर्थः । यद्वा—महावेदस्य अवान्तरवेदत्वेन आदिपदेन चतुर्विंशत्यादित्वेन च विभागकथनमित्यर्थः । **तदल्पाक्षरत्वमिति** । यावदक्षरतां विना विवक्षितार्थासिद्धिस्तदर्थप्रतिपादनाय ततोऽधिकाक्षरानुपादानं अल्पाक्षरत्वमित्यर्थः । **बहुशाखानिर्णायकत्वमिति** । सद्व्याक-

प्रकाशः

रणेन अर्थमाह—**यावदिति** ॥ यदि बहुशाखानिर्णायकत्वं विश्वतोमुखत्वं, तर्हि शब्दान्वाख्यानपरे महाव्याकरणसूत्रे देवमीमांसासूत्रादौ चाव्याप्तिरित्यत आह—**सद्व्याकरणेति** । 'अल्पाक्षरं' इत्य-

**निर्विशेषितसूत्रत्वं ब्रह्मसूत्रस्य चाप्यतः ।**
**यथा व्यासत्वमेकस्य कृष्णस्यान्ये विशेषणात् ॥**
**सविशेषणसूत्राणि ह्यपराणि विदो विदुः ।**

तत्त्वप्रकाशिका

र्थाक्षरादिराहित्यं अस्तोभत्वम् । अपशब्दादिदैवैधुर्यं अनवद्यत्वम् । एतच्च सूत्रत्वं कुतो ब्रह्मसूत्राणामाञ्जस्येनेत्यतआह—**निर्विशेषितेति** । यतो ब्रह्मसूत्राणां मुख्यसूत्रत्वं, अत एव निर्विशेषितसूत्रत्वमप्यस्ति पुराणादावन्यथा तन्न स्यादित्यर्थः । यद्यत्र निर्विशेषितं तत्तत्र मुख्यं यदमुख्यं तद्विशेषितमित्येतत्कुत्र दृष्टमित्यत आह—**यथेति** । यथा कृष्णस्य निर्विशेषितव्यासत्वं, अत एव तन्मुख्यं, अन्ये द्रौण्यादयोऽमुख्याः ततश्च विशेषणाद्व्यासाः, तथा निर्विशेषितत्वान्मुख्यसूत्रत्वं ब्रह्मसूत्राणामित्यर्थः । अन्यसूत्राणामपि मुख्यसूत्रत्वात्किं विशिष्याभिधीयते ब्रह्मसूत्राणामेवेत्यत आह—**सविशेषणेति** । अन्यसूत्राणां सविशेषणत्वात् न मुख्यत्वमिति भावः । एतदुपपादनायैव 'अन्ये विशेषणात्' इति प्रागेव

चन्द्रिका

रणसूत्रादेरपि बहुशाखागतपदार्थनिर्णायकत्वात् नाव्याप्तिरिति ज्ञेयम् । **व्यर्थाक्षरादिराहित्यमिति** । अर्थाप्रतिपादकत्वेऽपि साम्नि स्तोभाक्षराणां

प्रकाशः

नेनैव व्यर्थाक्षरराहित्यस्य लाभात् 'अस्तोभम्' इति व्यर्थमित्यतोऽभिप्रायमाह—**अर्थेति** । 'कारणान्तरसम्भवात्' इत्यस्य "मुख्यस्य निर्वि-

**मुख्यस्य निर्विशेषेण शब्दोऽन्येषां विशेषतः ॥**
**इति वेदविदः प्राहुः शब्दतत्त्वार्थवेदिनः ।**
**सूत्रेषु येषु सर्वेऽपि निर्णयास्समुदीरिताः ॥**

तत्त्वप्रकाशिका

दृष्टान्त उक्तः । निर्विशेषणसविशेषणत्वाभ्यां कुतो मुख्यामुख्यत्वे, दृष्टान्ते कारणान्तरसम्भवादित्यत आह—**मुख्यस्येति** । 'मुख्यस्य' मुख्यस्यैव । अस्त्वेतत्सूत्रत्वमञ्जसा ब्रह्मसूत्राणां तथाऽपि वेदार्थनिर्णयाय सूत्रान्तरैरलं किमेभिरित्यस्य कथमनेन परिहार इत्यतआह—**सूत्रेष्विति** । यत्सूत्रधर्मतयोक्तं विश्वतोमुखत्वं, तद्यदा ब्रह्मसूत्राणामेवाञ्जसा भवति, तदा तेषामेव सर्वशाखानिर्णायकत्वं भवेदतोऽन्यसूत्रेभ्योऽतिशयेन निर्णायकत्वात्तद्वचनं युक्तमिति भावः । अन्येषामपि द्वित्रशाखानिर्णायकत्वात्कथमेषां सर्वनिर्णा-

चन्द्रिका

ऋगक्षराव्याप्तगानभागपरिपूरणायेव प्रयोजनान्तराय अक्षराप्रयोग इत्यर्थः । **कारणान्तरसम्भवादित्यत आहेति** । 'मुख्यस्य' इति मूलग्रन्थे मुख्यस्य निर्विशेषणशब्दवाच्यत्वे "इति वेदविदः प्राहुः" इत्यनेन वेदस्य वृद्धव्यवहारस्य च प्रमाणीकृतत्वात् तेन शङ्कायाः

प्रकाशः

शेषेण" इत्यनेन कथमुत्तरमित्यतः, उत्तरार्धेन तल्लब्धमित्याह—**मुख्यस्येतीति** । **वेदस्येति** । अस्यार्थस्य वेदोक्तत्वाभावे तद्विदामेतदुक्तेरयोगात् 'वेदस्य प्रमाणीकृतत्वात्' इत्युक्तम् ॥ "शब्दजा-

**शब्दजातस्य सर्वस्य यत्प्रमाणश्च निर्णयः ।**
**एवंविधानि सूत्राणि कृत्वा व्यासो महायशाः ॥**
**ब्रह्मरुद्रादिदेवेषु मनुष्यपितृपक्षिषु ।**
**ज्ञानं संस्थाप्य भगवान् क्रीडते पुरुषोत्तमः ॥ इत्यादि ॥**

तत्त्वप्रकाशिका

यकत्वमन्यथा तद्वैयर्थ्यमित्यत आह—**शब्देति** । 'सर्वस्य शब्द-जातस्य निर्णयः' इति सर्वैः शब्दसमूहैः क्रियमाणो निर्णयः । 'यत्प्रमाणो' यन्मूलकः । अन्येषां निर्णायकत्वेऽपि ब्रह्मसूत्राणाम स्त्येव सर्वशाखानिर्णायकत्वम् । तन्निर्णयस्य ब्रह्मसूत्रमूलत्वेन व्याख्यान-रूपत्वात् । श्रुतिमूलकस्मृतिवदवैयर्थ्योपपत्तेरिति भावः । 'एवं विधानि' इत्युपसंहारः । 'सूत्रेषु' इत्यादेः 'एवंविधानि' इत्यनेनान्वयः । 'ब्रह्म-रुद्रादिदेवेषु' 'ज्ञानं संस्थाप्य' इत्यनेन पूर्वस्थितस्यैव विशेषयुक्त्यादि-भिर्दृढीकरणं किञ्चिदप्राप्तलाभश्चोच्यते, "जानन्तोऽपि विशेषार्थ-ज्ञानाय स्थापनाय वा । पृच्छन्ति साधवः" इत्यादेः । "एवं ज्ञानं

चन्द्रिका

परिहार इति भावः । **शब्दसमूहैः क्रियमाण इति** । 'शब्दजा-तस्य' इति षष्ठी कर्तरि न तु कर्मणीत्यर्थः ॥

प्रकाशः

तस्य" इति षष्ठ्यन्तेन कथमस्यार्थस्य लाभ इत्यत आह—**शब्द-जातस्येति** । "कर्तृकर्मणोः कृति" इति कर्तरि षष्ठीति भावः । शब्दानां करणत्वेऽपि अवान्तरव्यापारापेक्षया कर्तृत्वमिति ध्येयम् ॥

तत्त्वप्रकाशिका

पुनः प्रापुः" इत्यादेश्चायमेवार्थः । विरिञ्चेतरेषां तिरोहितलाभो वा । यत आहुः "ब्रह्मणस्तु प्रायो नाप्रतिभासितम्" इत्यादि । तदेवमत्युपादेयत्वाद्व्याख्येयानि ब्रह्मसूत्राणीति स्थितम् ॥

चन्द्रिका

परोक्ते दूष्य एवांशो मितैश्शब्दैरनूद्यते ।
दूषणं चापि हनुमद्भाष्यसूचितमुच्यते ॥

प्रकाशः

"तत्रादिसूत्रस्येदं सङ्गत्यादि" इत्यत्रेदंशब्देन परोदीरितसङ्गत्यादिकमयुक्तमिति टीकायां सूचितम् । तद्विवरीतुं प्रतिजानीते—**परोक्त** इति । इदं तु शिष्यमनस्समाधानाय । उत्तरार्धेन दूषणानां परमास्तोक्तिमूलत्वेन बलवत्तामाह । तत्र "हनुशब्दो ज्ञानवाची" इति स्मृतेः हनुः ज्ञानम् ।

भूमनिन्दाप्रशंसासु भवन्ति मतुबादयः ।
संसर्गेऽस्तिविवक्षायां नित्ययोगेऽतिशायने ॥

इत्युक्तेर्भूमार्थे मतुप् । पूर्णबोध इत्यर्थः । यद्वा—तस्य हनुमदैक्यात् तथोक्तिः । संज्ञापूर्वकविधेरनित्यत्वात् हनुशब्दे "शरादीनां च" इति न दीर्घः । "संज्ञायाम्" इति सूत्रेण मतुपो मकारस्य वत्वाभावो यवादित्वादित्युक्तं धातुवृत्तौ । चोऽवधारणे । सूचितमेवेत्यर्थः । **भाष्येति** अनुभाष्यादिकं च ग्राह्यम् । भाष्ये अधिकरणशरीरस्यास्पष्टत्वात्तद्विवरणपरयोर्वाचस्पत्यविवरणयोः स्पष्टत्वेनादौ वाचस्पत्यो-

चन्द्रिका

तत्र भामत्युक्तमधिकरणं—प्रत्यगात्मन एव ब्रह्मत्वात्तस्य चाहमिति प्रकाशमानत्वेनासन्दिग्धत्वान्न विषयत्वम् । नाप्यविद्यानिवृत्तिः प्रयोजनम् । उक्तरीत्या आत्मनि भासमानेऽपि तदनिवृत्तेः । नच वाच्यमहंप्रत्ययः स्थूलोऽहं कर्ता भोक्ता दुःखीति गृह्णाति तद्विपरीतश्च वेदान्तप्रतिपाद्यः सन्दिग्ध इति विषयादिसिद्धिरिति । वेदान्तानामध्ययनविध्यापादितप्रयोजनवदर्थावबोधानामपि प्रबलाहंप्रत्ययबाधितत्वेन जपमात्रोपयोगित्वेन अविवक्षितार्थत्वादुपचरितार्थत्वाद्वा । तथा च वेदान्तविचारोऽनारब्धव्य इति पूर्वः पक्षः । सिद्धान्तस्तु—वेदान्तवाक्यैः ज्ञानानन्दैकरसाद्वितीयोदासीनस्वभाव आत्मा उपक्रमादिभिः प्रतिपाद्यते । न च क्रियासमभिहारेणेदृगात्म-

प्रकाशः

क्तं अधिकरणप्रकारं दूषयितुमनुवदति—**तत्रेति** । दूष्येषु मध्य इत्यर्थः। **प्रत्यगात्मन एवेति** । अतिरिक्तब्रह्मसत्त्वे मानाभावादिति भावः । **न विषयत्वमिति** । न हि स्फीतालोकमध्यमध्यासीनं कश्चिज्ज्ञिज्ञासत इति भावः । नाविवक्षितार्थत्वं वेदान्तानामाशङ्कितुं शक्यम्। "स्वाध्यायोऽध्येतव्यः" इत्यध्ययनविधेर्दृष्टार्थत्वेन तेन सर्वस्य वेदस्य फलवदर्थावबोधनपरत्वापादनस्य "अथातो धर्मजिज्ञासा" इत्यत्र निर्णीतत्वादित्यत आह—**अध्ययनेत्यादि** । अविवक्षितार्थत्वे अध्ययनं व्यर्थमित्यत आह—**जपमात्रेति** । **क्रियासमभिहारेण** पौनःपुन्येन । ज्ञानानन्दादिस्वरूपमात्मतत्त्वमभिदधानानि अतएव

चन्द्रिका

तत्त्वमभिदधति* तत्पराणि सन्ति युक्तमुपचरितार्थानीति वक्तुम् । प्रत्यक्षं तु सम्भावितदोषमपौरुषेयेण निर्दोषेणागमेन बाध्यते । तेन वेदान्तवेद्यः शुद्धोऽहंप्रत्ययो न भातीति विषयादिसिद्धिरिति—तन्न । तथा हि शुद्धो न भातीति कोऽर्थः । किमात्मस्वरूपे किञ्चिद्भाति किञ्चिन्न भातीति । किं वाऽऽत्मस्वरूपमेव न भातीति । यद्वाऽनात्माऽपि भातीति । आद्ये अभासमानोंशः शरीरादिभ्यो भेदो वा कर्तृत्वभोक्तृत्वाद्यभावो वा ब्रह्मात्मभेदो वा

प्रकाशः

तत्र तात्पर्यवत्त्वेन विद्यमानानीत्यर्थः । प्रत्यक्षबाधाद्युक्तमित्युक्त* मित्यतआह—**प्रत्यक्षं त्विति** । शुक्तिरूप्यादौ व्यभिचारदर्शनादिति भावः । बाधकत्वे हेतुः—**निर्दोषेणेति** । तत्र हेतुः—**अपौरुषेयेणेति** । नन्वत्र—"शुद्धो न भाति" इत्यादिना सिद्धान्तांशस्यैवाग्रे दूष्यत्वेन तावन्मात्रमेवानुवदनीयं, न तु पूर्वपक्षोऽपि । तथा च—"परोक्ते दूष्य एवांशः" इति प्रतिज्ञाव्याकोप इति चेन्न, सिद्धान्तस्य पूर्वपक्षसापेक्षत्वेन तदननुवादे सिद्धान्तमात्रानुवादायोगात् । यद्वा सिद्धान्ते दूषिते पूर्वपक्षोऽपि दूषितप्राय इत्यभिप्रेत्य तदनुवादः] "निर्विशेषे स्वयं भाते किमज्ञानावृतं भवेत्" इत्यनुव्याख्यानं हृदि कृत्वाऽनूदितं दूषयति—**तन्नेति** । चतुर्विधोऽप्यभासमानोंऽशः आत्मभिन्नोऽभिन्नो वा, आद्ये सत्यो मिथ्या वा इति विकल्पान् हृदि नि-

*बाधादयुक्तमित्युक्तमित्यपि पाठः,

चन्द्रिका

द्वितीयमात्राभावो वा । आत्मभिन्नस्सत्यश्चेदपसिद्धान्तः । अभावद्वैतं त्वन्यत्र निरस्तम् । मिथ्या चेन्न तत्त्वावेदकशास्त्रवेद्यः । आत्म-

प्रकाशः

धाय क्रमेण निरस्यति—**आत्मभिन्न इति** । यद्यप्यात्मस्वरूपे अभासमानोंशः क इति विकल्पितेष्वात्मभिन्नत्वकल्पो नावकल्पते । तथाऽपि तत्राप्यस्ति दूषणमित्यभिप्रेत्येदम्, अभासमानस्य च नात्मस्वरूपत्वमिति युक्तिसूचनाय वेति ध्येयम् । ननु भेदः, अन्योन्याभावः अभेदोऽपि भेदाभाव एवेति, चतुर्णामभावरूपत्वेनात्मभिन्नानामपि सत्यत्वे न काऽपि हानिः, भावद्वैतस्यैवाद्वैतविरोधित्वात् । उक्तं च—"अभावरूपा धर्माः नाद्वैतं निघ्नन्ति" इति । इत्यत आह—**अभावद्वैतं त्विति** । यद्वा—भेदाभेदयोर्भावत्वेऽपि अतिरिक्तकल्पद्वयविषयकशङ्कासमाधानार्थमिदमिति ध्येयम् । **अन्यत्रेति** । न्यायामृते अंशित्वादिहेतुभङ्गे । उपलक्षणमेतत् । एतावता वेदतन्मीमांसयोः द्वितीयाभावादिपरत्वमेव स्यात्, न त्वखण्डात्मपरत्वमित्यात्मविद्यात्वं भग्नं स्यात् । तथा च 'अथातो द्वितीयाभावादिजिज्ञासा' इत्येव सूत्रविन्यासस्स्यात्, न तु "ब्रह्मजिज्ञासा" इतीत्यपि ध्येयम् । द्वितीयं निराह—**मिथ्येति** । आत्मभिन्नो द्वितीयाभावादिर्मिथ्या चेदित्यर्थः । अन्यथा अतत्त्वावेदकं शास्त्रं प्रसज्येतेति भावः । अभेदपक्षस्तु आत्मस्वरूपमेव न भाति इति द्वितीयपक्षेऽन्तर्भूतः । तथा च तत्र स्वप्रकाशत्वेनाभानायोगात् इति वक्ष्य-

चन्द्रिका

मात्रत्वे तु द्वितीयपक्षान्तर्भावः । तथाऽपि कल्पितेन भेदेनागृहीत-इव भातीति चेन्न, तत्त्वतो गृह्यमाणेऽधिष्ठाने भेदकल्पनाया अ-गृहीतत्वारोपस्य चायोगात् । न च मिथ्याभूतेनापि तेनोपल-क्षित आत्मा शास्त्रवेद्यः, स च सत्य इति वाच्यम् । स्वप्र-काशत्वेन नित्यसिद्धात्मावबोधनार्थमुपलक्षणोक्त्ययोगात् । उपलक्षण एव तात्पर्ये चाप्रामाण्यापातात् । अत एव न द्वितीयः । तस्य स्वप्रकाशत्वेनाभानायोगात् । स्वप्रकाशस्याप्यविद्यावशादभानेऽविद्या-

प्रकाशः

माण एव दोषोऽत्रापि प्रसरतीति भावेनाह—**आत्ममात्रत्वे त्विति** । ननु द्वितीयाभावादिरात्माभिन्न एव । न चोक्तदोषः । भातस्यापि तस्याविद्यकभेदेनाभातत्वारोपसम्भवादिति शङ्कते—**तथाऽपीति** । आत्म-मात्रत्वेन गृहीतत्वेऽपीत्यर्थः । 'अधिष्ठाने' आत्मनीत्यर्थः । **भेदेति**। आत्मना द्वितीयाभावादेरित्यर्थः । तन्मूलाज्ञानस्यासम्भवादिति भावः। द्वितीयाभावादिरात्मातिरिक्तो मिथ्येति पक्षे उक्तदोषोद्धारमाशङ्क्य नि-रस्यति—**न चेति** । यद्यप्येषा शङ्का "मिथ्या चेत्" इति ग्रन्था-नन्तरमेव कार्या । तथाऽपि आत्ममात्रं न शास्त्रवेद्यं, येन द्वितीय-पक्षोक्तदोषस्स्यादिति अभेदपक्षोक्तदोषपरिहारार्थोऽपि भवतीति न दोषः। आत्मन्येव तात्पर्यमुपलक्षण एव वेति विकल्प्य क्रमेण निरस्यति—**स्वप्रकाशत्वेनेति** । आत्मस्वरूपमेव न भातीति द्वितीयं निराह—**अत एव न द्वितीय इति** । तथा च न विषयत्वमिति भावः । भाना-

चन्द्रिका

देर्दुःखादेश्च प्रकाशो न स्यात् । तस्य चैतन्यप्रकाशाधीनप्रकाशत्वोपगमात् । एतेन—स्वप्रकाशत्वात्स्फुरति चैतन्यम् । अविद्यावृतत्वाच्च न स्फुरति । न च विरोधः । स्फुरणस्य तात्त्विकत्वादस्फुरणस्यातात्त्विकत्वात् । एवं च न कोऽपि दोषः, स्फुरत्त्वादज्ञानादिसाधकत्वस्य, अस्फुरत्त्वाद्विषयत्वस्य च सम्भवादिति निरस्तम् । स्फुरत्यस्फुरणारोपायोगस्योक्तत्वात् । न च स्वरूपचितः प्रकाशेऽपि तस्याज्ञानाविरोधित्वात् विरोधिन्याश्च वृत्तेरभावेन अविद्यावृतत्वात्सन्दिग्धत्वमिति युक्तम् । स्वरूपचितोऽज्ञानाविरोधित्वे त-

प्रकाशः

भानयोरुक्तदोषद्वयपरिहारमनूद्य अतिदेशेन दूषयति—**एतेनेति** । गृहीते अगृहीतत्वारोपायोगेनेत्यर्थः । न कोऽपि दोष इत्युक्तमेव विशदयति—**स्फुरत्त्वादिति** । एतेनेत्युक्तमेव व्यवहितत्वाद्विशदयति—**स्फुरतीति** । ननु शुद्धचितो भानेऽप्यविद्यावृतत्वेन विषयता युज्यते, तस्या अज्ञानसाधकत्वेन तदनिवर्तकत्वात्, अन्तःकरणवृत्तेः तन्निवर्तिकाया अद्याप्यभावात् । एकविषयकयोः वृत्तिचितोरज्ञानविरोधित्वाविरोधित्वे घटविषयकयोः सौरालोकज्ञानयोस्तमोविरोधित्वाविरोधित्ववद्युक्ते इत्याशङ्क्य निराह—**न चेति** । 'तद्वेद्ये' चिद्वेद्ये । तथा च नात्मन्यावृत्तत्वमिति भावः । न च सुखाद्यपि वृत्तिप्रतिबिम्बितचिता वेद्यं, न केवलया । केवला तु नाज्ञानविरोधिनीति वाच्यम्। सुखादेः ज्ञातैकसत्त्वाभावापातादिति भावः । किञ्च—

चन्द्रिका

द्वेद्ये दुःखादावज्ञानप्रसङ्गात्, त्वन्मतेऽयं घट इत्यपरोक्षवृत्तेरपि घटाद्यवच्छिन्नचिद्विषयत्वाच्च । श्रवणादिजनितसंस्कारसहकृतान्तःकरणवृत्तिनाश्यत्वे च, मिथ्यारूप्यादौ तददर्शनात्, सत्ये भ्रमरादिध्याननिवर्त्यकीटत्वादौ च तद्दर्शनादज्ञानस्य सत्यत्वं स्यात् । न तृतीयः, अनात्मनोऽधिकस्य भानेऽप्यात्मनोऽसन्दिग्धत्वेनाविषय-

प्रकाशः

वृत्तिसामान्यस्याज्ञानविरोधित्वम् उत वृत्तिविशेषस्य । आद्येऽपि किं परोक्षवृत्तेरुतापरोक्षवृत्तेः । नाद्यः, त्वन्मते नित्यातीन्द्रिये परोक्षवृत्तौ सत्यामप्यज्ञानानिवृत्तेः । द्वितीये त्वात्मविषया सेदानीमप्यस्तीत्याह—**त्वन्मत इति** । न च घटावच्छिन्नचैतन्यविषया वृत्तिरज्ञानविषयचिदविषया सती तदज्ञानाविरोधिनीति वाच्यम् । दण्डी चैत्र इति वृत्त्या चैत्राज्ञानानिवृत्त्यापातात् । द्वितीयं निरस्यति—**श्रवणादीति** । अन्वयव्यतिरेकपूर्वं सत्यत्वमाह—**मिथ्येति** । 'तददर्शनात्' तादृशवृत्तिनाश्यत्वाऽदर्शनात् । उपलक्षणं चेदम् । भ्रमकालीनाऽपरोक्षज्ञानानधिकविषयज्ञानेन कारणान्तरजन्येनाप्यज्ञाननिवृत्तावतिप्रसङ्गात्, अनधिकविषये श्रवणादिवैयथर्याच्चेत्यपि ध्येयम् । **सत्य इति** । अधिष्ठानसमसत्ताके इत्यर्थः । 'सत्यत्वं' अधिष्ठानसमसत्त्वम् । तृतीये अङ्गुलिद्वयवदात्मानात्मानावेकज्ञाने भासेते उत तादात्म्येचनेति विकल्पौ हृदि कृत्वा क्रमेण निराह—**अनात्मन इति** । आत्मनो भानेऽपि शास्त्राविषयत्वं संजाघटीती-

चन्द्रिका

त्वतादवस्थ्यात् । अधिष्ठाने तत्त्वतः स्फुरति अनात्मारोपायोगाच्च । एतेन—यथा षड्जादयः गान्धर्वशास्त्राभ्यासात्प्रागपि स्फुरन्तः तद्रूपेणानुल्लिखिता न श्रोत्रेण व्यज्यन्ते, व्यज्यन्ते च शास्त्रवासितेन तेन, एवं वेदान्तवाक्यजन्यब्रह्मैक्याकारवासनावासितान्तःकरणेन तद्भावाभिव्यक्तिः न प्रागिति भामत्युक्तं निरस्तम् । तत्र प्रागस्फुरतः पश्चाच्च स्फुरतः षड्जत्वादिजातिभेदस्येव प्रकृते तस्याभावात् । एतेनैव—"तत्त्वमसि" इति वाक्यात् यद्यप्यात्मनो ब्रह्मत्वं ज्ञातम् । तथाऽपि वादिविप्रतिपत्त्या संशयात् तत्र जिज्ञासेति भामत्युक्तं निरस्तम् । चिन्मात्रे धर्मि-

प्रकाशः

त्याशङ्कामुक्तातिदेशेनानूद्य निरस्यति—**एतेनेति** । शास्त्रगम्यात्मनो निश्चितत्वेनेत्यर्थः । 'तद्रूपेण' षड्जत्वादिना रूपेण । 'तेन' श्रोत्रेण । 'तद्भावाभिव्यक्तिः' ब्रह्मभावाभिव्यक्तिः । दृष्टान्तवैषम्यमाह—**तत्रेति** । ननु यथा घटे निश्चितेऽपि तज्ज्ञाने प्रामाण्यसन्देहेऽपि सः, तथाऽत्रापीत्याशङ्कां निरस्यति—**एतेनैवेति** । जातिविशेषाभावेनैवेत्यर्थः । एवं च अहंप्रत्यये शुद्धो न भातीत्येतदयुक्तमिति स्थितम् ॥ यदप्यवादि प्रत्यक्षं सम्भावितदोषमपौरुषेयेणागमेन बाध्यते इति । तदपि नेतिं भावेन,

यजमानप्रस्तरत्वं यथा नार्थश्रुतेर्भवेत् ।
ब्रह्मत्वमपि जीवस्य प्रत्यक्षस्याविशेषतः ॥

चन्द्रिका

णि निश्चिते तन्मात्रैक्ये संशयायोगात् । युक्तं च अपौरुषेयस्याप्यागमस्य शङ्कितताप्पर्यभ्रमरूपदोषस्य "यजमानः प्रस्तरः" इत्यादेरिव प्रत्यक्षविरोधेन प्रतीतार्थप्रच्यावनम् । उक्ता च त्वयाऽपि "तत्त्वमसि" इतिवाक्ये प्रत्यक्षाविरोधाय लक्षणा । तस्मात्परमते स्वरूपमात्रस्य स्वप्रकाशत्वेन नित्यसिद्धत्वात् अन्यस्य चाज्ञानकल्पितत्वेन अज्ञानविषयत्वायोगेन अज्ञानासम्भवात् अज्ञातो

प्रकाशः

इत्यनुव्याख्यानसूचितदूषणेन निरस्यति—**युक्तं चेति** । किञ्चेति चार्थः। **यजमान इति** । आद्यस्य चतुर्थे तत्सिद्धिपेटिकायां "यजमानः प्रस्तरः" इत्यत्राभेदस्य बाधात्प्रस्तरशब्दलक्षिते स्रुग्धारणादौ कार्ये यजमानलक्षणगुणो विधीयत इति प्राप्ते यजमानस्य प्रस्तरवत्सूक्तवाकेन प्रहरणादेककपालवच्च सर्वहुतकरणात्सर्वतन्त्रपरिलोपापातात् यजमानकार्यकरत्वं प्रस्तरेऽप्यस्तीति सिंहश्चैत्र इतिवद्गौण्या वृत्त्याऽयमभेदव्यपदेश इत्युक्तम् । तद्वदिहाप्युपचरितार्थत्वामिति । **त्वयाऽपीति** । सर्वज्ञत्वाल्पज्ञत्वाविशिष्टयोरभेदस्य बाधेन चिन्मात्रलक्षणाया अङ्गीकारादिभावः ।

अतोऽधिकारिविषयफलयोगादिवर्जितम् ।
अनन्तदोषदुष्टं च हेयं मायामतं शुभैः ॥

इत्यनुव्याख्यानं हृदि कृत्वोपसंहरति—**तस्मादिति** । **अन्यस्य चेति**। "पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः ।" इति विवरणोक्तेरिति भावः । **अज्ञानासम्भवादिति** । आवरणभू-

चन्द्रिका.

विषयः अज्ञाननिवृत्तिः फलं अज्ञानी चाधिकारी न युक्त इति शास्त्रमनारम्भणीयमेवेति, भामतीमतं तावदयुक्तम् । एतेन—न प्रत्यग्ब्रह्मैक्यं विषयः, कर्तृत्वादेर्विरुद्धधर्मस्य सत्यत्वेनैक्यायोगात् । नापि तन्निवृत्तिः प्रयोजनं, ज्ञानस्याज्ञानमात्रनिवर्तकत्वेन सत्यस्य ज्ञानान्नि-

प्रकाशः

ताज्ञानस्याव्रियमाणेन व्याप्तत्वात् व्यापकाऽसम्भवे व्याप्यासम्भवादितिभावः । त्रयाणां निरासे सम्बन्धोऽपि निरस्तप्राय एवेति तन्नोक्तम् । उक्तं च—" योगः शशनृशृङ्गयोः " इति । विवरणमतमप्युक्तातिदेशेन निराह—**एतेनेति** । आत्मभिन्नस्सत्यश्चेदपसिद्धान्त इत्यादिदूषणजातेनेत्यर्थः । तथा हि—ब्रह्मैक्यं हि विषय इति सिद्धान्त्यभिमतम् । तच्चात्मस्वरूपमुत भिन्नम् । आद्ये तस्य स्वप्रकाशत्वेन शास्त्रवैयथर्यम् । न च भेदभ्रमनिरासार्थं शास्त्रम् । अधिष्ठानप्रकाशं विना भेदभ्रमस्यैवायोगात् । स्वरूपे प्रकाशमानेऽप्यज्ञानविरोधिवृत्त्यन्तराभावाद्भ्रम इति त्वयुक्तम् । तद्वेद्येदुःखादावज्ञानप्रसङ्गात् । द्वितीये सत्यत्वेऽपसिद्धान्तः । अभावत्वेऽप्यभावद्वैतस्यान्यत्र निरासात् । मिथ्यात्वे तु न तत्त्वावेदकशास्त्रवेद्यतेत्यादि । **प्रत्यगिति** । जीवब्रह्मैक्यमित्यर्थः । विश्वकर्तृत्वसर्वज्ञत्वादेर्ब्रह्मधर्मस्याऽसर्वकर्तृत्वाल्पज्ञत्वादेर्जीवधर्मस्य सत्यत्वादित्यर्थः । यद्वा—कर्तृत्वभोक्तृत्वदुःखित्वादिजीवधर्मस्य ब्रह्मधर्मविरुद्धस्य सत्यत्वादित्यर्थः । 'तन्निवृत्तिः' कर्तृत्वभोक्तृत्वादिबन्धनिवृत्तिः । **ज्ञानस्येति** । यद्विषयकं हि ज्ञानं तद्विषयकमज्ञानमेव साक्षान्निवर्तयति । यदि कर्तृत्वा-

चन्द्रिका

वृत्त्ययोगादिति प्राप्ते, सत्यम् कर्तृत्वभोक्तृत्वादिप्रपञ्चस्य सत्यत्वे विषयादिर्न सिद्ध्यतीति । प्रपञ्चस्तु मिथ्यैव । अत एव भाष्येऽध्यास-वर्णनमिति विवरणाभिप्रेतमधिकरणमपि निरस्तम् । कर्तृत्वादिवि-शिष्टस्य सम्भावितदोषेणातत्त्ववेदकेन प्रत्यक्षानुमानादिना मिथ्याभेदे गृहीतेऽपि तात्त्विकाभेदे मानान्तरविरोधाभावेन तत्त्वंपदमुख्यार्थ-

प्रकाशः

दिकमज्ञानकार्यं तदा तद्द्वारा तन्निवर्तकं स्यात् । न हि तत्तथेत्यर्थः । 'सत्यस्य' अज्ञानाकार्यस्येति व्याख्येयम् । 'मिथ्यैव' आविद्यक एवेत्य-र्थः । तथा च कर्तृत्वादिविरुद्धधर्माणां मिथ्यात्वेनैक्यस्य विषयत्वं, अ-ज्ञानकार्यत्वेन च ज्ञानान्निवृत्तियोगेन कर्तृत्वादिबन्धनिवृत्तिः फलमिति भावः । **अतएवेति** । यतः कर्तृत्वादेर्मिथ्यात्वे विषयादिसिद्धिरत इत्यर्थः । अन्यथा "अस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके यु-ष्मत्प्रत्ययगोचरस्य तद्धर्माणां च अध्यासः" इत्यारभ्य "मिथ्याप्रत्य-यरूपः कर्तृत्वभोक्तृत्वप्रवर्तनः सर्वलोकप्रत्यक्षः" इत्यन्तभाष्यं व्य र्थमेव स्यादिति भावः । यदुक्तं विषयादिसिद्ध्यर्थमध्यासवर्णनं भाष्य इति, तदप्ययुक्तमिति भावेन, "बन्धमिथ्यात्वं नैवमुक्तिरपेक्षते" इत्यनु-व्याख्यानं हृदि कृत्वा दूषणान्तरं चाह—**कर्तृत्वादीति** । 'विशि-ष्टस्य' इति मिथ्याभेदे गृहीतेऽपीत्यन्वयः । मिथ्यात्वे हेतुः—**अतत्त्वा-वेदकेनेति** । तत्र हेतुः **सम्भावितेति** । न केवलं विशिष्टाभेदे बाधका-भावः, प्रयोजनं चास्तीऽत्याह । **तत्त्वंपदेति** । युक्तं च विशिष्टैक्य-

चन्द्रिका

त्वाय तल्लक्षिते चिन्मात्रे भेदाप्रसक्त्या तत्त्वमसिवाक्यार्थैक्यार्थाय च विशिष्टस्यैव निर्दोषया श्रुत्या तात्त्विकाभेदबोधनसम्भवेन विषयार्थमध्यासस्यावक्तव्यत्वात् । न च विरुद्धधर्मस्य सदा सत्त्वे भेदस्तात्त्विक एव स्यादिति वाच्यम् । अस्याप्यनुमानस्य श्रुतिविरुद्धत्वेनातात्त्विकविषयत्वात् । नापि प्रयोजनार्थं तदुक्तिः । सेत्व-

प्रकाशः

मेवेत्याह—**तल्लक्षित** इति । तत्त्वंपदलक्षित इत्यर्थः । यत्र हि भेदः प्रसक्तः, तत्रैव तन्निषेधरूपोऽभेदो बोधनीयः । नहि चिन्मात्रे भेदः प्रसक्तः, येन तत्राभेदबोधनं सार्थकं, किन्तु विशिष्ट एवेति । 'विशिष्टस्य' कर्तृत्वादिविशिष्टस्य । विशिष्टाभेदे बाधकं शङ्कते—**न चेति** । तथा च तत्त्वावेदकप्रत्यक्षादिमानविरोध इति भावः । **अस्येति** । सदातनविरुद्धधर्मकत्वात् तात्त्विकभेदवन्तौ जीवपरावित्यनुमानस्येत्यर्थः । "तत्परत्वात्परत्वाच्च" इति त्वयैवोक्तेरिति भावः । 'तदुक्तिः' अध्यासोक्तिः । **सेत्विति** ।

सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति ।

इत्यादिस्मृतेरिति भावः । पापस्य सेत्वज्ञानकार्यत्वे हि तज्ज्ञानमज्ञाननिवृत्तिद्वारा तन्निवर्तकं स्यात् । न च तत्तथा । तथा च तद्वदेवात्राप्यज्ञानाकार्यस्य विरुद्धधर्मस्य ज्ञानेन निवृत्तिसम्भवान्न तदर्थं तस्य मिथ्यात्ववर्णनमित्यर्थः । ननु सेतुदर्शनस्यापि न साक्षात्पापनिवर्तकत्वं, किन्तु स्वजन्यादृष्टद्वारा । साक्षान्निवर्तकत्वेऽपि न ज्ञानत्वेन, किन्तु विहितक्रियात्वेन । ज्ञानत्वेन ज्ञाननिवर्त्यत्वं त्वज्ञानस्यैव । अतः कर्तृत्वादे-

चन्द्रिका

ज्ञानाकार्यस्यापि पापस्य सेतुज्ञानान्निवृत्तेः । विस्तृतं चैतदन्यत्र । तस्मान्न विवरणमतमपि युक्तम् । केचित्तु—वृद्धव्यवहारेण कार्य एव शब्दानां व्युत्पन्नतया सिद्धे ब्रह्मणि वेदान्तानामप्रामाण्यात्

प्रकाशः

राविद्यकत्वायाध्यासवर्णनं युक्तमित्यत आह—**विस्तृतमिति** । न्यायामृते ज्ञाननिवर्त्यत्वान्यथाऽनुपपत्तिभङ्ग इत्यर्थः । रामानुजमतमनूद्य निराचष्टे—**केचित्त्विति** । वृद्धव्यवहारादन्येन शब्दानामादौ व्युत्पत्त्यभावात्, वृद्धेन च गामानयेति वाक्ये प्रयुक्ते, प्रयोज्यवृद्धेन च गव्यानीतायां, पार्श्वस्थो बालो गवानयनप्रवृत्तिर्ज्ञानपूर्वा प्रवृत्तित्वात् मत्प्रवृत्तिवत्, ज्ञानं च सहेतुकमित्यन्यस्य हेतोरदर्शनाद्वाक्यमेव हेतुत्वेन गृहीत्वा, पश्चादावापोद्वापक्रमेण कार्य एव शब्दानां व्युत्पत्तिं प्रत्येतीति कार्य एव वाक्यानां प्रामाण्यम् । ब्रह्म तु सिद्धरूपमिति सिद्धे व्युत्पत्त्यभावेन वेदान्ताः न ब्रह्म बोधयितुं शक्ता इत्यप्रमाणम् । अतस्तदर्थनिर्णायकमिदं शास्त्रं नारम्भणीयमितिपूर्वपक्षाशयः । सिद्धान्तस्य तु—नैवं बालानां प्रथमं कार्ये व्युत्पत्तिग्रहः । एतावदनुसन्धानाशक्तत्वात् । किन्तु सिद्ध एव । तथाहि—मातापित्रादीनङ्गुल्या निर्दिश्य, इयं ते अम्बा, अयं ते तातः, इत्यम्बादिशब्देषु केन चिदाप्तेन प्रयुक्तेषु सत्सु, तत्र तेषां शब्दानां व्युत्पत्तिमवधारयति । न हि निखिललोकविदितशब्दार्थसम्बन्धावधारणप्रकारापनोदो युज्यते । अतो ब्रह्मणि सिद्धरूपेऽपि बोधमापादयितुं शक्ता वेदान्ता इति विचारशास्त्रमिदमारभ्यमेव । उक्तं च—

चन्द्रिका

विचारो नारम्भणीय इति प्राप्ते अम्बाताताद्यानङ्गुल्या निर्दिश्य अम्बाताताद्यशब्देषु प्रयुक्तेषु बालानां तेषु तच्छब्दानां प्रथमव्युत्पत्तिदर्शनात् ब्रह्मणि वेदान्तानां प्रामाण्यसम्भवात् तद्विचार आरब्धव्य इति सिद्धान्त इत्याहुः । तत्र ब्रूमः—अथ कर्मविचारानन्तरं अतः कर्मणां विचारितत्वादेव ब्रह्मविचारः कर्तव्य इति हि तव सूत्रार्थः । न चात्र अथशब्दादिना कार्ये व्युत्पत्तिनिरासः प्रतीयते । न च सौत्रपदनिरस्यैर्हेतुभिस्सूत्रावतारिकारूप-

प्रकाशः

कार्ये व्युत्पत्तिराद्या नियतमिति गिरस्तत्परा एव सर्वाः
नान्या वेदेऽपि नीतिस्तत उपनिषदामूषरप्रायतैव ।
नातस्तद्वेद्यमीमांसनमुचितमिति प्रत्यवस्थीयमाने
सिद्धे व्युत्पत्तिमाद्यां बहुमुखमवयन् ब्रह्म जिज्ञास्यमाह ॥

इति ॥ कर्मविचारानन्तरं तत एव हेतोर्ब्रह्मविचारः कर्तव्यः इति तदीयभाष्यं हृदि कृत्वाऽऽह—**अथेति** । "एतत्सर्वं तर्कशास्त्रे ब्रह्मतर्के हि विस्तरात् । उक्तम्" इत्यादिनाऽनुव्याख्याने कार्ये व्युत्पत्तिनिरासेन सिद्धे व्युत्पत्तेरतःशब्दार्थत्वेनोक्तत्वात् सुधायामपि पूर्वपक्षे कार्ये व्युत्पत्तेरुक्तत्वाद्वक्ष्यमाणं दूषणं न लगतीत्यत उक्तं—इति हि तव सूत्रार्थ इति । तथा च तद्रीत्या वक्ष्यमाणं दूषणमिति ध्येयम् । **न चात्रेति** । यदि कर्मविचाराद्याक्षेपेण पूर्वपक्षः क्रियेत तर्हीवैतद्घटेत नान्यथेति भावः । सूत्रपदानिरस्योप्यगत्या क्रियेत इत्यत आह—**न चेति** । कोऽयं

चन्द्रिका

पूर्वपक्षसम्भवे हेत्वन्तरेण स युक्तः । न च विधिवाक्यस्थस्यास्य ब्रह्मशब्दस्य स्वप्रधाने सिद्धे व्युत्पत्तिरद्यापि सिद्धा । येन तत्प्रयोगात् सा सूच्येत । किञ्च—"अथातो धर्मजिज्ञासा" इत्यादि "अनावृत्तिश्शब्दात्" इत्यन्तं विंशतिलक्षणमेकं शास्त्रमिति वदता त्वया चतुर्लक्षणी देवमीमांसा द्वादशलक्षण्याः कर्ममीमांसाया उत्तरा, ब्रह्ममीमांसायास्तु पूर्वेति स्वीकृतत्वेन सिद्धे व्युत्पत्त्यभावे सिद्धरूपदेवर्ग्मिांसाऽनुपपत्तेस्तस्यास्तत्रैव सिद्धत्वात्पुनरिह सिद्धे व्युत्पत्त्यभावेन

प्रकाशः

नियम इत्यत उक्तम्—**अवतारिकेति** । अन्यथाऽसङ्गतिस्स्यादिति भावः । **सम्भव इति** । अस्मद्रीत्येति भावः । ननु यथा भवन्मते जीवभेदकगुणपूर्तिवाचिब्रह्मपदप्रयोगाद्विषयसिद्धिस्तथा मन्मतेऽपि सिद्धब्रह्मवाचिब्रह्मपदप्रयोगात्सिद्धे व्युत्पत्तिर्ज्ञायत इत्यत आह—**न चेति** । ब्रह्मशब्दस्य "विजिज्ञासस्व" इति लोड्वाच्यकार्यान्वितब्रह्मपरत्वेन सिद्धे व्युत्पत्तेरलाभात् । सूत्रे च श्रुत्यनुसरणाय कर्तव्यपदाध्याहाराच्च । यद्यत्र लिङादिविधिप्रत्ययरहितं ब्रह्मपदोपेतं विषयवाक्यं स्यात् सूत्रे च कर्तव्यपदाध्याहारो न स्यात् तदा सा सूच्येत न ह्येवमिति भावः । ननु कार्ये व्युत्पत्तेरनिरासे सिद्धे ब्रह्मणि प्रामाण्यायोगात्तन्निरासकस्यान्यस्याभावाद्भवद्भिरप्यस्मिन्नेव सूत्रे तन्निरासादगत्याऽत्रैव पूर्वपक्षः कृत इत्यत आह—**किञ्चेति** । **विंशतिलक्षणमिति** । लक्षणशब्दोऽध्यायपर्यायः । पूर्वतन्त्रे द्वादश लक्षणानि । देवमीमांसायां चत्वारि । उत्तरस्यां चत्वारि

चन्द्रिका

पूर्वपक्षो न युक्तः । अत एव सिद्धान्तोऽप्ययुक्तः त्वद्रीत्या सिद्धे व्युत्पत्तेरतश्शब्दादिनाऽबोधनात् । विचारकर्तव्यताहेत्वर्थेनातश्शब्देनोक्तस्य अथशब्दादिना सूचितस्य च तत्र हेतुत्वसम्भवे तद्विप-

प्रकाशः

चेत्यर्थः । अत एवेत्युक्तं हेतुं विशदयति—**त्वद्रीत्येति** । अगतिं परिहरति—**विचारेति** । 'हेत्वर्थेन' । हेतुबोधकेन । **सम्भव इति** । वक्ष्यमाणदिशेति भावः । "तत्र" विचारकर्तव्यतायाम् । त्वन्मते कर्मविचारस्यैव ब्रह्मविचारं प्रति हेतुत्वोक्त्या सिद्धे व्युत्पत्तेर्हेतुत्वस्यातःशब्देनाबोधनादिति भावः । यदाह कश्चित्—

परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् ।
नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् ॥

इति मुण्डकवाक्यमुदाहृत्येदं शास्त्रमारम्भणीयं न वा? तदर्थं ब्रह्मज्ञानाय तद्विचाराङ्गभूतगुरूपसत्ति "परीक्ष्य लोकान्" इत्यादिवाक्यं विधातुं शक्नोति न वेति तदर्थं ब्रह्म विचारार्हं नेति सन्देहे "अयमात्मा ब्रह्म" इत्यादिश्रुत्या जीवस्यैव ब्रह्मत्वात्तस्य चाहंधीसिद्धत्वेनासन्दिग्धतया विचारानर्हत्वात् । न चेयं श्रुतिरहंधीसिद्धेन विशिष्टेन अभेदं न बोधयति किन्तु चिन्मात्रेण तच्चेदानीमावृतत्वात्सन्दिग्धमिति वाच्यम् । श्रुतावयमिति प्रत्यक्षसिद्धं विशिष्टमेव परामृश्य ब्रह्मत्वोपदेशात् "मुष्टिलोपात् सङ्घचालोपस्तद्गुणत्वात्स्यात्" इति दाशमिकाधिकरणन्यायेन प्राथमिकेदंशब्दस्वारस्यानुरोधेन चरमब्रह्मशब्दस्य देहबृंहणादिना कथं चि-

प्रकाशः

त्तस्मिन्नेव नेयत्वात् । न च "ध्यायतीव" इत्यादिश्रुतेः कर्तृत्वादिकं मिथ्येति युक्तम् । प्रत्यक्षविरोधेन श्रुतेः पारतन्त्र्यमात्रपरत्वात् । अस्तु वा चिन्मात्रैक्यं तथाऽपि तस्य निर्विशेषत्वेन शब्देन प्रतिपादनासम्भवान्न तदयमात्मेत्यादिवाक्यबोध्यं किन्तु विशिष्टैक्यमेव तच्चासन्दिग्धं ब्रह्मणो जीवान्यत्वेऽपि तस्य साकल्येन ज्ञानासम्भवात् । एकदेशज्ञानं जातमपि न मोक्षहेतुः स्यादतो ब्रह्मणोऽविचार्यत्वाद्रूपसत्तिमिदं वाक्यं न विदधातीति शास्त्रमेतन्नारम्भणीयमिति प्राप्ते "त्रिषु धामसु यद्भोज्यं भोक्ता भोग्यश्च यद्भवेत् । तेभ्यो विलक्षणस्साक्षी चिन्मात्रोऽहं सदाशिवः" । "ज्ञाज्ञौ द्वावजावीशानीशौ" इत्यादिश्रुतिभिः भेदस्याप्यावेदनेन द्विविधवाक्यदर्शनेन सन्दिग्धत्वसम्भवाद्विचारार्हं ब्रह्मेति शास्त्रमारम्भणीयमिति सिद्धान्त इति । यथोक्तम्—"आत्मा ब्रह्मेत्यधीतः स्फुरति स तु सदा निर्विशेषस्स चेत्स्यात्तस्यातीतस्य बुद्धेस्सरणिमिह नयैः का परिच्छेदवार्ता" इत्यादि—तन्न यद्वतन्यायैः सूत्रनिबद्धैर्यद्वाक्यार्थो निर्णीयते तत्र तस्यैवोदाहरणत्वयोग्यतया 'परीक्ष्य' इति वाक्यस्यातथात्वेनानुदाहरणत्वात् । न हि "अथातो ब्रह्मजिज्ञासा" इति सूत्रे 'परीक्ष्य' इति वाक्यगततद्वाक्यार्थनिर्णायकन्यायनिबन्धनमस्ति । न वाऽत्र सूत्रे स्थित्वा सर्वतीर्थकरैरेतद्वाक्यार्थो निर्णीयते । यदपि—क्लेशेनास्य सूत्रेणैकार्थतां व्युत्पाद्योदाहरणत्वकथनम्—तदपि न । साक्षाज्जिज्ञासावाक्यस्य जिज्ञासापदाद्युपतस्यैवोदाहरणत्वसम्भवे क्लेशायोगात् समानार्थत्वमात्रेणोदाहरणत्वायोगाच्च । निर्णेयार्थकस्यैवोदाहरणत्वात् ।

चन्द्रिका

रीतायाः सिद्धे व्युत्पत्तेस्तत्र हेतुत्वायोगात् । तदेवं मतान्तरीयमधि-

प्रकाशः

पूर्वपक्षोऽप्ययुक्तः । 'अयमात्मा ब्रह्म' इत्यादौ ब्रह्मत्वं यादृशं तादृशं निरङ्कुशं वा । नाद्यः ब्रह्मैक्यासिद्धेः । न द्वितीयः प्रत्यक्षबाधात् । न हि मायावादिमत इव प्रत्यक्षमतत्त्वावेदकमिति पूर्वपक्षिणो मतम् । तस्य बलवत्त्वेन 'ध्यायतीव' इत्यादेरन्यार्थवर्णनात् । 'अयमात्मा' इत्यभेदवाक्यं पश्यतः पूर्वपक्षिणस्तद्भेदावेदकवाक्यादावान्ध्यस्यायुक्तत्वेन सर्वसामञ्जस्याय चन्द्रिकोक्तदिशाऽद्वैतिरीत्यित्युक्तस्यैवानुसरणीयत्वाच्च । किञ्च—जीवस्याहंधीसिद्धत्वेऽपि देहादिविविक्तत्वादिना सन्दिग्धत्वात् तेन रूपेण जिज्ञासासम्भवेन शास्त्रानारम्भासिद्धेश्च । अन्यथा त्वन्मतेऽप्यग्रे जीवविचारो न स्यात् । यदपि—अस्तु वा इत्यादिना चिन्मात्रैक्यमङ्गीकृत्य "अयमात्मा" इत्यादिवाक्याबोध्यत्ववर्णनं—तदप्यचारु । तस्य तादृशागमवाक्यं विनाऽङ्गीकारायोगेन आगमेन तदप्रतिपादनोक्तेर्व्यर्थत्वात् । याऽपि ब्रह्मणो जीवान्यत्वमुपेत्य यथावत्तस्यापरिच्छेद्यत्वोक्तिः साऽप्ययुक्ता । सूत्रे तस्यासमाधानात् । ब्रह्मणः साकल्येनापरिच्छेद्यमहामहिमत्वबोधकवचनसहस्रबलेनागत्या तस्य यथायोग्यमेकदेशपरिज्ञानस्यैव मुक्तिहेतुत्वस्य कल्प्यत्वात् । सिद्धान्तोऽप्ययुक्तः त्वदुक्तसन्देहोपपादकन्यायस्य सूत्रे केनापि पदेनाप्राप्तेरित्याद्यूह्यम् । ननु टीकाव्याख्यार्थं प्रवृत्तस्य आदावेव किं परमतंनिरासेनेत्यतः तदुपयोगं दर्शयन् टीकामवतारयति—तदेवमित्यादिना । आदिसूत्रस्य इतिपदं हित्वा इदंशब्दप्रतीकग्रहणं

तत्त्वप्रकाशिका

तत्रादिसूत्रस्येदं सङ्गत्यादि । अत्र ब्रह्मजिज्ञासायाः कर्तव्यत्वसमर्थनादस्ति शास्त्रसङ्गतिः । अन्यथा शास्त्रस्यानारम्भणीयत्वप्रसङ्गादेतत्समर्थनीयम् । अध्यायपादसङ्गतिस्त्वानन्दमयाधिकरणमारभ्यैव गवेषणीया ।

चन्द्रिका

करणमयुक्तमिति हृदि निधाय स्वमतेन अधिकरणमारचयति— **तत्रेदमित्यादिना** । **अध्यायपादसङ्गतिस्त्विति** । यद्यप्येतदधिकरणाभावे शास्त्रस्येव तदेकदेशयोरध्यायपादयोरप्यारम्भासम्भवः तथाऽपि सिद्धे शास्त्रारम्भे पुनरध्यायाद्यारम्भाक्षेपस्यानेनासमाधाना-

प्रकाशः

तु मतान्तरीयाधिकरणमयुक्तमिति ग्रन्थकर्तुर्हृदयमिति ज्ञापनाय । अस्य सूत्रस्य समन्वयाद्यशेषविचारहेतुत्वात्कथमध्यायाद्यसङ्गतिरित्याक्षिप्य सङ्गतिशब्दस्यार्थद्वयमभिप्रेत्य समाधत्ते—**यद्यपीत्यादिना** । **औपोद्घातकीति** । अनेन टीकायां शास्त्रसङ्गतिरित्यस्य शास्त्रेणैवौपोद्घातकीत्यर्थ उक्तः । ननु विचारकर्तव्यतासमर्थनेन शास्त्रारम्भसिद्धावपि समन्वयाध्यायो नारम्भणीय इति शङ्काया जीवभेदकगुणपूर्तिवाचिब्रह्मशब्देन समाधानमस्ति । अन्यथा पूर्त्यर्थकसमन्वयानारम्भः स्यात् । तथाच कथमध्यायसङ्गतिरिति चेन्न । तथा सत्युक्तरीत्याऽविरोधाध्यायारम्भप्रयोजकत्वस्यापि सत्त्वेन ततो व्यावृत्तस्याद्याध्यायेन सङ्गत्यन्तरस्याभावात् पदचतुष्टयद्वारैव अध्यायचतुष्टयारम्भप्रयोजकत्वेन तदात्मकशास्त्रारम्भप्रयोजकत्वात् । 'अस्य च न शास्त्रसङ्गत्यतिरिक्ताध्यायसङ्गतिरस्ति'

चन्द्रिका.

च्छास्त्रेणेव न ताभ्यामौपोद्घातिकी सङ्गतिरित्यर्थः । यद्वा—यथा "तद्विजिज्ञासस्व" इत्यादि ब्रह्मविचारविधायकवाक्यार्थनिर्णायकन्यायव्युत्पादकत्वात् ब्रह्मविचाररूपेण शास्त्रेणान्तर्भावलक्षणा सङ्गतिः न तथा अध्यायपादाभ्यां समन्वयाप्रतिपादकत्वादित्यर्थः। यथोक्तं—"सङ्गतिस्तावद्विविधा अन्तर्भावलक्षणा आनन्तर्यलक्षणा च" इति । अत एवोक्तं सुधायाम्—"अत एवास्य सूत्रस्य न शास्त्रबहिर्भावः" इति । एतेन "प्रथमसूत्रस्य समन्वयाद्यशेषविचारहेतुत्वाच्छास्त्रप्रथमाध्यायप्रथमपादसङ्गतयः" इति कल्पतरूक्तं निरस्तम् । द्वितीयाद्यध्यायतो व्यावृत्तस्य शास्त्रसङ्गत्यतिरिक्तस्य प्रथमाध्यायादिना सङ्गतिविशेषस्यानुक्तत्वेन अध्यायपादपीठत्वमात्रस्य न्याय्यत्वात् । एतेनैव—श्रोतव्यादिवाक्यानां स्वार्थे समन्वयस्य तद्द्वारेण विचार्यमाणवेदान्तवाक्यानामपि ब्रह्मणि

प्रकाशः

इति सुधाऽनुसारेण सङ्गतिपदमन्यथा व्याचष्टे—**यद्वेति । न्यायेति।** अधिकारिप्रयोजनविषयसत्त्वरूपन्यायव्युत्पादकत्वादित्यर्थः । **यथोक्तमिति** । सुधायामाद्यस्य तृतीयपादे उक्तमित्यर्थः । अत्रान्तर्भावसङ्गतिः टीकाऽभिमतेत्यत्रोपष्टम्भकमाह—**अत एवोक्तमिति । अत एवास्येति** । जिज्ञासाविधायकवाक्यार्थनिर्णायकन्यायव्युत्पादकत्वादेवेत्यर्थः । टीकास्थतुशब्दसूचितं परमतदूषणं व्यनक्ति—**एतेनेति** । औपोद्घातकीसङ्गतिर्नेत्यर्थकथनेनेत्यर्थः । एतच्छब्दार्थं व्यनक्ति—**द्वितीयाध्यायत इति । एतेनैवेति** । औपोद्घातिकी

चन्द्रिका

समन्वयस्य च निमित्तत्वादाद्यं सूत्रं समन्वयेन सङ्गतम्—इति विवरणोक्तं निरस्तम् । तत्तद्वाक्यस्य स्वार्थे समन्वयप्रतिपादनमात्रेण समन्वयाध्यायसङ्गतौ तृतीयाध्यायादेरपि समन्वयसङ्गतिप्रसङ्गात् । विचारकर्तव्यताप्रतिपादनेन ब्रह्मणि समन्वयनिमित्तत्वस्येवाविरोधादिनिमित्तत्वस्यापि सत्त्वेन द्वितीयादितो व्यावृत्तस्य प्रथमेन सङ्गतिविशेषस्यासिद्धेश्च पादसङ्गत्यनुक्तेश्च । ननु तथाऽपि आनन्दमयाधिकरणमारभ्येति कथं, समन्वयसूत्रे साक्षात्समन्वयोक्तेः "समन्वयसूत्रेणाध्यायशेषस्य प्रपञ्च्यप्रपञ्चकभावसङ्गतिः" इति सुधाग्रन्थाच्च तत्राध्यायसङ्गतेस्सत्त्वात् । ईक्षत्यधिकरणे समन्वया-

प्रकाशः

सङ्गतिः अन्तर्भावलक्षणा वा सङ्गतिर्नेत्यर्थकथनेनेत्यर्थः । **स्वार्थ इति** । श्रोतव्यादिवाक्यस्य ब्रह्मज्ञानाय वेदान्तविचारः कर्तव्य इति विचारकर्तव्यतारूपस्वार्थप्रतिपादकत्वरूपसमन्वयस्येत्यर्थः । स्वार्थे समन्वयेन समन्वयाध्यायसङ्गतिरिति पक्षमतिप्रसङ्गेन दूषयित्वा ब्रह्मणि वेदान्तसमन्वयस्य च निमित्तत्वादितीममंशमपि दूषयति—**विचारेति** । एवमपि पादसङ्गतिर्नोक्तेत्याह—**पादेति** । आद्याधिकरणत्रयस्याध्यायाद्यसङ्गतिमङ्गीकृत्य आनन्दमयाधिकरणमारभ्येत्येतत्सुधाविरुद्धमिति भावेनाक्षिपति—**नन्विति** । **तत्रेति** । समन्वयाधिकरणे अध्यायान्तर्भावसङ्गतेः सत्त्वादित्यर्थः । नन्वीक्षत्यधिकरणे ब्रह्मणोऽवाच्यत्वात्कथं तत्र शास्त्रयोनित्वमिति चोद्यमेव निरस्तम्, अत एव सूत्रे अशब्दमवाच्यं नेत्येवोक्तमित्याशङ्कां निर-

चन्द्रिका

साधारणहेतुवाच्यत्वसमर्थनेन तस्मिन्नपि तस्यास्सत्त्वात् । न च ईक्षतौ वचनवृत्त्या जगत्कारणत्वादिना शास्त्रैकजन्यप्रमागोचरत्वरूप-शास्त्रयोनित्वेऽवाच्यत्वरूपं बाधकमुद्भूतम्, न तु समन्वयहेतुरुक्त इति वाच्यम् । "तदभावे कुतोऽन्वयः" इत्यनुव्याख्याने वाच्यत्वस्य समन्वयहेतुत्वेनोक्तत्वादिति । उच्यते—वैदिकशब्दानां ब्रह्मण्युपक्रमादिलिङ्गप्रमाणकः शक्तितात्पर्यलक्षणस्सम्बन्धः समन्वयः । स च न समन्वयसूत्रव्युत्पाद्यः, तत्र तत्प्रमाणस्यानुक्तेः । किन्तु व्युत्पादयिष्यमाणः शास्त्रयोनित्वे हेतुत्वेन सिद्धवदुपन्यस्तः । ईक्षतावावाच्यत्वप्रयुक्ता समन्वयासम्भवाशङ्कैव निरस्ता, समन्वयस्तु न

प्रकाशः

स्यति—**न चेति** । 'कारणत्वादिना' इति प्रकारे तृतीया । अनेन प्रकारेण शास्त्रजन्यप्रमागोचरत्वेत्यर्थः । **तदभाव इति** । शब्दगोचरत्वाभाव इत्यर्थः । **शास्त्रयोनित्व इति** । शास्त्रजन्यप्रमाविषयत्वे साध्ये "समन्वयात्" इत्येनेनोपक्रमादिप्रमाणकशक्तितात्पर्यलक्षणसम्बन्धः सिद्धवदुपन्यस्त इत्यर्थः । इदं तु सुधोक्तं सूत्रार्थमभिप्रेत्येति ध्येयम् । प्रपञ्चप्रपञ्चकभावकथनसुधावाक्यं तु हेतुविवरणाभिप्रायमितिभावः । **असम्भवाऽशङ्केति** । वाच्यत्वं समन्वयसम्भावकमेवोक्तम् । न तूपक्रमादिभिः स व्युत्पादितः । नापि तत्रोपक्रमादिहेतुर्निरूपितः । 'तदभावे कुतोऽन्वयः' इत्यनुव्याख्यानं तु कुतोऽन्वयसम्भावनेत्येवंपरम् । अत एवेक्षतौ पूर्वपक्षटीकायां 'तच्च वाच्यत्व एव सम्भवति' इति सम्भवशब्दप्रयोग इति भावः । यद्यप्य-

तत्त्वप्रकाशिका

ततोऽर्वाक्तनानामधिकरणानामध्यायपादपीठत्वात् । प्रथमाधिकरणत्वा-

चन्द्रिका

व्युत्पादित इति, न तयोरध्यायपादाभ्यामन्तर्भावलक्षणा सङ्गतिः । यद्वा—आनन्दमयाधिकरणमारभ्य सङ्गतिद्वयं । ततोऽर्वाक् समन्वयेक्षत्योः पादमात्रेण सङ्गत्यभावः, अन्येषु त्वध्यायेनापीति सङ्गत्योरभावः पञ्चाधिकरणीसाधारणः । अत एवाध्यायपादसङ्गतिरिति समुदायैकवचनं प्रयुक्तमिति । **अध्यायपादपीठत्वादिति** । पञ्चाधिकरण्याः समन्वयविशेषाप्रतिपादकत्वादध्यायाद्यन्तर्भावासम्भवेऽ-

प्रकाशः

ध्यायसङ्गतिरेव पूर्वपक्षिता, तथाऽपि यथा न पादेन सङ्गतिस्तथाऽध्यायेनापीति दृष्टान्ततया 'अध्यायपादाभ्यां' इति तदुक्तिः । उत्तरप्रस्थानानुरोधात्परिहारान्तरमाह—**यद्वेति**। पञ्चाधिकरणीति। "द्विगोः" इतिङीप् । उक्तार्थे टीकासम्मतिमाह—**अत एवेति** । यतोद्वैरूप्यं पञ्चस्वधिकरणेष्वत एवेत्यर्थः । यदि 'अध्यायपादसङ्गती' इति द्विवचनप्रयोगस्स्यात्तदा पञ्चस्वधिकरणेषु ते न स्त इति धीस्स्यात्। सङ्गतिरित्युक्तौ तु, ततोऽर्वाक्त्रिषूभयसङ्गत्यभावः द्वयोः पादमात्रसङ्गत्यभाव इति ज्ञातुं शक्यत इति सङ्गतिद्वयसमुदायाभिप्रायेणैकवचनं प्रयुक्तमित्यर्थः । ननु पीठत्वं नामाधारत्वम् । न हि पञ्चाधिकरण्या अध्यायपादाधारतास्तीत्यतः, पीठवत्पीठमितिभावेन तदुपपादयति—**पञ्चाधिकरण्या इति** । यद्वा—पञ्चाधिकरण्या अध्यायाद्यनन्तर्भावे तदादौ निवेशो न युक्त इत्याशङ्कानिरासाय **प्रवृत्तोऽयं ग्रन्थ इत्यभिप्रेत्य व्याचष्टे—पञ्चाधिकरण्या इति ।**

तत्त्वप्रकाशिका

च्छ्रुतिविचारस्याद्याप्यनारब्धत्वान्नाधिकरणश्रुतिसङ्गती चाप्रारिप्सितत्वा

चन्द्रिका

पि विचारकर्तव्यतायाः प्रथमप्रतिपाद्यत्वात् वक्ष्यमाणक्रमेण चतुरधिकरण्याः बह्वक्रमत्वात्तदनन्तरमेव समन्वये आकाङ्क्षोदयात्तदाकाङ्क्षोत्थापकतया, समन्वयाध्यायस्य तदादिनामपादस्य चादौ निवेशो युक्त इत्यर्थः । **नाधिकरणश्रुतिसङ्गती इति** । पूर्वाधिकरणतद्विषयवाक्याभ्यां सङ्गती नेत्यर्थः । एतेन—अध्ययनविधिना सामान्यतः प्रयोजनवदर्थावबोधपरतां नीतैर्विशेषतश्च सन्दिह्यमानैः वेदान्तैः विचाराकाङ्क्षैराक्षेपादस्याधिकरणस्य श्रुतिसङ्गतिः इति कल्पतरूक्तं निरस्तम् । श्रुतिमूलत्वातिरिक्तायाः श्रुतिसङ्गतेरनुक्तत्वादिति ॥

प्रकाशः

**वक्ष्यमाणेति** । प्रत्यधिकरणं वक्ष्यमाणरीत्या ईक्षत्यधिकरणस्यादिभागे वा वक्ष्यमाणरीत्या युक्तक्रमत्वादित्यर्थः । उत्तराधिकरणेन तयोः सत्त्वात्कथं न स्त इत्यत आह—**पूर्वेति** । एतस्य स्पष्टत्वाट्टीकायामेतदुक्तिरयुक्तेत्याशङ्क्य, परमतप्रतिक्षेपस्तत्फलमिति भावेनाह—**एतेनेति** । सङ्गत्यभावकथनेनेत्यर्थः । "स्वाध्यायोऽध्येतव्यः" इत्यस्य दृष्टार्थत्वेन स्वाध्यायाध्ययनेन फलवदर्थावबोधं भावयेत् इत्यर्थस्य पूर्वतन्त्रे निर्णीतत्वेन वेदान्तानामपि स्वाध्यायशब्दवाच्यत्वेन वेदान्ताध्ययनेन फलवदर्थावबोधं भावयेदित्यर्थपर्यवसानादर्थज्ञानं च विना विचारं न सम्भवतीति विचाराक्षेपादित्यर्थः । **विशेषत इति** । कीदृशार्थावबोधः सम्पाद्य इति सन्दिह्यमानैरित्यर्थः । शिष्यमनस्समाधानायाधिकरणरचनाप्रकारमाह—

तत्त्वप्रकाशिका

चित्तसङ्गतशास्त्रे प्रवर्तनीया ब्रह्मजिज्ञासा विषयः । कर्तव्या न वेति सन्दे-

चन्द्रिका

सन्देहबीजपूर्वस्य टीकादावेव कीर्तनात् ।
अस्माभिः पूर्वपक्षश्च सिद्धान्तश्च विविच्यते ॥
उपन्यासमुखेनैव टीकार्थोऽपि निरूप्यते ।
पूर्वपक्षादिमेयानामविक्षिप्तत्वसिद्धये ॥

अत्र वेदार्थनिर्णायकन्यायग्रथनात्मकमिदं शास्त्रमनारम्भणीयमुतारम्भणीयमिति चिन्ता ॥ तदर्थं न्यायानुसन्धानरूपविचारो न कर्तव्य

प्रकाशः

**सन्देहेति** । सन्देहस्य यद्बीजं कारणं तदेव पूर्वं यस्य तस्येत्यर्थः । शास्त्रादिसङ्गतिफलादिः पूर्वशब्दार्थः । आदिपदाद्ग्राह्ये। ननु व्याख्यानाय प्रवृत्तस्य किमनेनेत्यत आह—**उपन्यासेति** । तत्र हेतुमाह—**पूर्वपक्षेति** । **अत्रेति** । एतदधिकरण इत्यर्थः । 'शास्त्रम्' इत्यन्तं विषयः । अत्र सर्वत्र पूर्वोक्ता पूर्वपक्षकोटिः पश्चात्तनी सिद्धान्तकोटिरित्यवसेयम् । यद्यपि टीकायां "जिज्ञासा विषय" इत्येवोक्तं, न तु शास्त्रम् । तथाऽपि सुधायां किमिदमारम्भणीयं न वेति शास्त्रं विषयतया स्वीकृत्य, तादर्थ्येन जिज्ञासा कर्तव्या न वेत्युक्तत्वात्, टीकायामपि "प्रारिप्सिततया चित्तसङ्गतशास्त्रे प्रवर्तनीया" इत्येनन, प्रथमतश्शास्त्रएव कर्तव्यत्वादिकोटिकसन्देहस्य सूचितत्वात् पूर्वपक्षोपसंहारे च "अतो न ब्रह्मजिज्ञासा कर्तव्येति नैतच्छास्त्रमारस्भणीयम्" इति जिज्ञासाया अकर्तव्यत्वस्य शास्त्रानारम्भे हेतुत्वोक्त्या शास्त्रानारम्भोपसंहाराच्चै-

चन्द्रिका

उत कर्तव्य इति । तदर्थं विचारविधेः विषयादिकं न सम्भवति उत सम्भवतीति । तदर्थं विषयभूतं ब्रह्म किं प्रत्यगर्थभूतजीव एव उत तदन्यदिति । यदि ब्रह्म प्रत्यगर्थ एव, तदा तस्य निश्चितत्वेन विषयाद्यसम्भवाच्छास्त्रमनारम्भणीयमिति पूर्वपक्षे फलफलिभावः । यदि तु ब्रह्म प्रत्यगर्थादन्यत्, तदा प्रत्यगर्थस्य जीवस्य निश्चितत्वेऽपि ब्रह्मणो विषयत्वसम्भवात् शास्त्रमारम्भणीयमिति सिद्धान्ते फलफलिभावः । एवमुत्तरत्रापि फलफलिभाव ऊह्यः ।

प्रकाशः

वमुक्तम् । जिज्ञासायाः साक्षाद्विषयत्वोक्तिस्तु टीकायां, सूत्रे तस्या एव प्राधान्येनोपादानात् । सूत्रे च श्रुत्यनुसारात्सैवोपात्ता । भाष्ये च तस्या एव कर्तव्यत्वसमर्थनाच्चेति । 'इदम्' प्रारिप्सिततया चित्तसङ्गतम् । 'वेदार्थ' त्यादि तु वक्ष्यमाणनिर्विषयत्वरूपहेतुविशदीकरणायेति ध्येयम् । पूर्वपक्षादिप्रमेयस्य निष्कृष्टतया द्वयारोहाय तदर्थचिन्तामाह—**तदर्थमिति** । यद्यप्ययं सन्देहो न ग्रन्थकर्तुः, सर्वज्ञत्वात्तस्य । नापि परस्य, शास्त्रस्यैवानाकलनात् । तथाऽपि शास्त्रनिर्वृत्त्यनन्तरं तद्दृष्ट्वा परस्संदिहीतेति तदीयसन्देहप्रदर्शनमेतदिति सुधायामेवोक्तम् । 'विचारविधेः' 'तद्विजिज्ञासस्व' इत्यादिविधेरित्यर्थः । 'विषयादि' इत्यादिपदेन फलाधिकारिसम्बन्धा ग्राह्याः । **विषयभूतं ब्रह्मेति** । विचारविधौ ब्रह्मपदश्रवणान्निर्धारणोक्तिः । पूर्वपूर्वकोटिद्वयं प्रत्युत्तरोत्तरकोटिद्वयस्य हेतुत्वमाह—**यदीति** । ननु 'तदर्थं विषयभूतं ब्रह्म' इत्यत्र, तदर्थं प्रयोजनभूतो मोक्षश्च कर्मसाध्यः किं ज्ञानसाध्यः, यदि कर्मसाध्यः, तदा ज्ञानहेतुविचारो न क-

तत्त्वप्रकाशिका

हः । उभयविधव्यापारदर्शनं सन्देहबीजम् । न कर्तव्येति पूर्वः पक्षः । अधिकारिविषयप्रयोजनसम्बन्धशून्यत्वात् । न तावद्ब्रह्म विषयः ।

चन्द्रिका

यत्र त्वस्पष्टः तत्र वक्ष्यते । पूर्वपक्षस्तु—न शास्त्रमारम्भणीयं, न्यायानुसन्धानात्मकविचाररूपजिज्ञासाया एवाकर्तव्यत्वात् । तदकर्तव्यत्वं च निर्विषयत्वादिहेतुभ्यः । तत्र तावद्विषयत्वेन अभिमतं ब्रह्म न जीवचैतन्याद्भिन्नम् । मानाभावात् । कर्मकाण्डस्य

प्रकाशः

र्तव्यः, यदि ज्ञानसाध्यः, तदा विचारः कर्तव्य इति, साऽपि कुतो नोपदर्शितेति चेत्, विषयचिन्तोक्त्यैव सोक्तप्रायेति वा, स्पष्टत्वाद्वा, "विद्यैव तु" इत्यादावग्रे तद्विचारस्य सेत्स्यमानत्वाद्वा सा नोक्ता । यद्वा—यथा कर्मसाध्यत्वे विचारो व्यर्थः तथा ज्ञानसाध्यत्वेऽपि, वक्ष्यमाणरीत्या ज्ञाने सत्यपि तदभावात्सा नोक्तेति । वस्तुतस्तु—ब्रह्मपदव्यावर्त्यपूर्वपक्षेऽतःपदव्यावृत्त्यौपयिकत्वात्सा न वाच्यैवेति । पूर्वपूर्वस्योत्तरोत्तरफलत्वं व्यञ्जयन् पूर्वपक्षटीकां विवरीतुमाह—**पूर्वपक्षस्त्विति** । **निर्विषयत्वादीति** । विषयप्रयोजनाधिकारिसम्बन्धशून्यत्वरूपेभ्यष्टीकोक्तेभ्यश्चतुर्भ्यो हेतुभ्य इत्यर्थः । तत्राद्यहेतुमुपपादयितुं विषयभूतं ब्रह्म जीवाद्भिन्नमभिन्नं वेति विकल्पौ हृदि कृत्वाऽऽद्यं निरस्यति—**तत्रेति** । मानाभावमुपपादयितुं प्रत्यक्षानुमानयोस्तत्राप्रवृत्तेः, प्रवर्तमानो वेदश्च कर्मकाण्डो ब्रह्मकाण्ड इति द्विविध इति हृदि निधायाद्यं निराह—**कर्मकाण्डस्येति** । द्वितीये त्वाह—**वेदान्तैरिति** । 'अद्वैतिरित्या' इति

तत्त्वप्रकाशिका

असन्दिग्धत्वात् । प्रमाणाभावेन जीवव्यतिरिक्तस्य ब्रह्मणोऽभावात् । जीवस्य च स्वप्रकाशत्वात् । न हि कश्चित्प्रकाशमानेऽर्थे सन्दि-

चन्द्रिका

कर्मपरत्वात् वेदान्तैश्चोपक्रमोपसंहारादिभिरद्वैतिरीत्याऽखण्डप्रत्यगात्ममात्रप्रत्यायनात्, तस्य चाहमिति स्वप्रकाशतया भासमानत्वात्,

प्रकाशः

प्रतिपादनाच्छेशायोक्तम् । अनेन 'प्रमाणा भावेन' इत्यादिटीका विवृता । यद्यप्यत्र कृत्स्नस्यापि वेदस्य कार्यपरत्वान्न जीवातिरिक्तब्रह्मणि मानमित्यपि वक्तुं शक्यम्, सुधायां तथैवोक्तेः । तथाऽपि सौत्रब्रह्मपदेन जीवभेदकपरेण व्यावर्त्यपूर्वपक्षस्यावश्यकतयैवमुक्तम् । सुधायां तथा प्रवृत्तेर्गतिर्वक्ष्यते । ननूपक्रमादिभिर्वेदान्तानामखण्डप्रत्यगात्मपरत्वसमर्थनपरस्य कस्यचिच्छास्त्रस्यानङ्गीकारे तत्सिद्धिरेव न स्यात् । तदङ्गीकारे तु तादृशं शास्त्रमङ्गीकृत्य विषयाभावेन पुनस्तस्यानारम्भणीयत्वेन पूर्वपक्षो व्याहत इति चेन्मैवम् । तादृशशास्त्रानङ्गीकारेऽपि वेदान्तानामुपक्रमादिभिर्वस्तुतः आपाततो जातां जीवचैतन्यमात्रपरत्वप्रतीतिमुपेत्य पूर्वपक्षसम्भवेन व्याघाताप्रसक्तेः । जीवस्य' इत्यादेरर्थः 'तस्य च' इति । प्रत्यगात्मन इत्यर्थः । तथा चासन्दिग्धत्वान्न शास्त्रवेद्यतेति भावः । एतेन—अभिन्नमिति द्वितीयोऽपि निरस्तः । ननु तस्य भानेऽपि ततोऽन्यदेव जडं वेद्यं स्यादित्यत आह—**अन्यस्य चेति** । अन्यथा शास्त्रस्यातत्त्ववेदकत्वेनाप्रामाण्यं स्यादिति भावः । यत्तु—अहमित्यात्मनि भासमानेऽपि वेदान्तवेद्यं शुद्धं न भातीति मूर्खप्रलपनं तन्न—"अहं प्रत्यये

चन्द्रिका.

अन्यस्य च सत्यस्याभावात् । आत्मनश्च स्वप्रकाशत्वे तत्प्रकाशः

प्रकाशः

शुद्धो न भातीति कोऽर्थः" इत्यादिना भामतीमतनिरासप्रस्ताव एवास्य निरासात् । यदपि—स्वप्रकाशस्याप्यविद्यावशादभानमिति । यच्च—स्वप्रकाशत्वात्स्फुरतीत्यादिचोद्यं, तदपि तत्रोक्तरीत्यैव निरसनीयम् । अत एवास्य पूर्वं प्रपञ्चः । एतेनाक्षस्य बलवत्त्वात्तद्बाधिता वेदान्ताः नाखण्डचैतन्यं वेदयितुमलमिति निरस्तम् । 'अद्वैतिरीत्या' इत्युक्तत्वात्तन्मते तस्य दुर्बलत्वात् । यत्तु—सिद्धान्तिमते ब्रह्मतर्कस्य मीमांसाङ्गत्वात्तत्र चाक्षप्राबल्यं सिद्धमिति मूर्खप्रलपनं, तदप्येतेनैव निरस्तम् । अद्वैतिमते तदभावात्तदाच्छादनेनापि पूर्वपक्षसम्भवाच्च । अत एव तत्सिद्धप्रामाण्याच्छादनेन पूर्वपक्षोऽग्रे स्फुटः । अत्र यद्यपि यद्यहंधीविरुद्धं शुद्धं प्रत्यगात्मानं बोधयेयुर्वेदान्तास्तर्हि बाधितार्था न विचार्या इत्यपि पूर्वपक्षयितुं शक्यम् । अत एव सुधायां 'नन्वहं कर्ता भोक्ता दोषसंसर्गी चाहंप्रत्यये प्रकाशते । तद्विपरीतस्तु श्रुतिप्रतिपादितः प्रतिपत्तव्योऽतो जिज्ञासेति चेदेवं तर्हि जरद्गवादिवाक्यवत्पावकशैत्यानुमानवच्च प्रतीतिविरोधेन श्रुतिजिज्ञासयोराभासतापातः' इत्युक्तम् । तथा च बाधितार्थत्वेन निर्विषयत्वं सूपपादम् । 'शुद्धो न भातीति कोऽर्थः' इत्याद्यनुसन्धानेन असन्दिग्धत्वोपपादनक्लेशोऽपि नास्ति । अक्षप्राबल्यं चानुकूलितं भवति । तथाऽप्यद्वैतिरीत्या प्रवृत्तन्यायविवरणानुसारिटीकारीत्यैवमुक्तम् । सुधायास्तु कथमपि न विचार आरम्भणीय इत्यभिप्रायः । 'न चात्मनः स्वप्रकाशत्वे विवदितव्यम्' इत्यादिटीकां विवृणोति—**आत्मनश्चे-**

तत्त्वप्रकाशिका

ग्धे । न चात्मनस्स्वप्रकाशत्वे विवदितव्यम्, अहमित्यनुभवात् । न चायं मानसोऽनुभवः, तस्यापि ज्ञायमानत्वेनानुभवान्तरान्वेषणेऽनवस्थानात् । कस्य चिदनुभवस्य स्वप्रकाशत्वे स्वात्मन एव तत्।

चन्द्रिका

किं तार्किकरीत्या मानसानुभवेन, किं वा प्राभाकररीत्या स्वप्रकाशसंविदाश्रयतया । नाद्यः, तस्यापि परप्रकाश्यत्वेन अनवस्थानात् । कस्य चिदनुभवस्य स्वप्रकाशत्वे च लाघवादात्मन एव तदस्तु । न च ज्ञानं जिज्ञासितग्राह्यं, जिज्ञासा च न सर्वत्रेति नानवस्थेति वाच्यम् । ज्ञानस्य सुखदुःखादिवत् जिज्ञासाभावेऽप्यनुभावात् । अन्यथा जिज्ञासाया ज्ञानाख्यधर्मिज्ञानसाध्यत्वानु-

प्रकाशः

ति । **तार्किकेति** । अनेन 'न चायं मानसः' इत्यादिस्तार्किकमतनिरासपर इत्युक्तं भवति । 'प्राभाकर' इत्येतत्—'न च स्वप्रकाशसंविदाश्रयतया' इत्यस्य विवरणम्। 'तस्यापि' इत्यादेरर्थः—**तस्यापीति**। 'ज्ञानान्तरान्वेषणेन' इति शेषः। 'कस्यचित्' इत्यादेर्युक्तिं वदन्नर्थमाह—**कस्यचिदिति** । 'जिज्ञासायामेव' इति शङ्काग्रन्थं विवृणोति—**न चेति । न सर्वत्रेति** । धर्मिज्ञानाद्यभावादिनेति भावः । 'अनुभवविरोधात्' इति हेतुवाक्यं विवृणोति—**ज्ञानस्येति** । घटज्ञानानन्तरं घटज्ञानं ज्ञास्यामीतीच्छाया अभावेऽपि घटं जानामीत्यनुभवादित्यर्थः । अनुभवे विवदमानं प्रति बाधकमाह—**अन्यथेति** । जिज्ञासितग्राह्यत्व इत्यर्थः । जिज्ञासा हि ज्ञानेच्छा । सा यद्विषयिणी तज्ज्ञान-

तत्त्वप्रकाशिका

जिज्ञासायामेवानुभवोऽनुभूयत इति न वाच्यम्, अनुभवविरो-

चन्द्रिका

भवादनवस्था स्यात् । न च जिज्ञासा न ज्ञानधर्मिका, किन्तु अहं ज्ञानी न वा घटो ज्ञातो न वेत्यात्मादिधर्मिकैवेति वाच्यम् । तादृशजिज्ञासाया अननुभवात् । ननु न ज्ञानमात्रमजि-

प्रकाशः

साध्या, धर्मिज्ञानसाध्यत्वात्तस्याः । धर्मी चेह ज्ञानमेव । तथा च धर्मिभूतज्ञानस्य ज्ञाने सति जिज्ञासा, तच्च ज्ञानं जिज्ञासापूर्वं, सा च ज्ञानपूर्वेति पूर्वपूर्वजिज्ञासा–ज्ञानव्यक्तिपरम्परया त्वदभिमतजिज्ञासितग्राह्यत्वमपि न स्यादिति मूलक्षतेरनवस्थेत्यर्थः । 'ज्ञानसाध्यत्वानुभवात्' इत्युक्तचाऽनवस्थानिरासाय ज्ञानपूर्वकत्वानङ्गीकारे 'अनुभवविरोधात्' इत्यपि टीकागतहेतुवाक्यार्थ उक्तो भवति । अर्थान्तरमपि वक्तुमुक्तदोषपरिहाराय शङ्कामुद्भावयति—**न चेति । न ज्ञानधर्मिकेति** । तथा च न ज्ञान–जिज्ञासाव्यक्तिपरम्परयाऽनवस्थेति भावः । आत्मादिधर्मिकजिज्ञासायाश्चात्मादिज्ञानपूर्वकत्वेऽप्यात्मादिज्ञानस्य जिज्ञासापूर्वकत्वाभावान्नानवस्था, ज्ञानवत्तस्य जिज्ञासितग्राह्यत्वाभावादिति भावः । अत्र यद्यप्यहं 'ज्ञानीति जिज्ञासे, घटो ज्ञात इति जिज्ञासे' इत्येवात्मादिधर्मिकजिज्ञासाऽभिनयो युक्तः, न तु संशयाभिनयः । तथाऽपि यद्धर्मिकः संशयस्तद्धर्मिकैव जिज्ञासा युक्तेति युक्तिं सूचयितुं संशयप्रदर्शनमित्यदोषः । 'न वा' इत्यनन्तरं 'संशयवज्जिज्ञासाऽप्यात्मादिधर्मिकैव' इति योज्यम् । **अननुभवादिति ।**

तत्त्वप्रकाशिका

धात् । न ह्यज्ञायमानज्ञानसद्भावे किञ्चिन्मानम् । न च स्वप्रकाशसंविदाश्रयतयाऽऽत्माऽवभासत इति युक्तम्, औत्तरिकानुस्मृतिसिद्धसौषुप्तिकानुभवाभावप्रसङ्गात् । न हि सुषुप्तावात्मातिरिक्ता संविदस्तीति सम्भवति । संविदात्मकत्वाच्चात्मनो न* संविदाश्र-

चन्द्रिका

ज्ञासितग्राह्यम्, येनानवस्था । नापि जिज्ञासितग्राह्यम्, येनानुभवविरोधः । किन्तु किञ्चित् ज्ञानं कदाऽपि न ज्ञायत एवेति न कोऽपि दोष इति चेत् न, कदाऽप्यज्ञायमानज्ञानस्यासत्त्वापातात् । न द्वितीयः, सुषुप्तावात्मातिरिक्तज्ञानाभावादात्मानुभवाभावेनैतावन्तं कालं सुखं सुप्तोऽस्मीत्यौत्तरिकानुस्मृत्यनुपपत्तेः । किञ्च—आत्मन औत्तरिकानुस्मृत्यन्यथाऽनुपपत्त्या संविद्रूपत्वान्न संविदाश्रयत्वम् । अस्तु वा तार्किकादिरीत्या अहमर्थप्रकाशः । तथाऽपि प्रत्यगा-

प्रकाशः

एतेन—इत्थं नानुभवः, किन्तु अन्यथैवेत्येवमुक्तौ अनुभवविरोधः इति टीकार्थं उक्तो भवति । 'न हि' इति वाक्यस्य प्रकृतोपयोगादर्शनाच्छङ्कापूर्वं तद्वाक्यं विवृणोति—**नान्विति** । 'न च स्वप्रकाश' इत्यादि विवृणोति—**न द्वितीय इति** । 'औत्तरिक' इत्यादि विवृणोति—**सुषुप्ताविति । ज्ञानाभावादिति** । मनस उपरतत्वादिति भावः । 'संविदात्मकत्वाच्च' इति वाक्यं युक्तिं सूचयन् विवृणोति—**किञ्चेति । अन्यथाऽनुपपत्त्येति** । आत्मातिरिक्तज्ञानाभावादिति भावः । यथाटीकं वर्णयित्वा सुधावाक्याभिप्रायं वक्तुं कल्पान्तरमाह—**अस्तु**

*'न संविद इव संविदाश्रय' इति च पाठः,

चान्द्रिका

त्मनोऽसन्दिग्धत्वादविषयता । टीकायां तु न्यायविवरणानुसारेण वस्तुस्थितिप्रदर्शनाय स्वप्रकाशतोक्ता । अत एव सुधायां—"स्वप्रकाशतया वा स्वप्रकाशज्ञानाश्रयतया वा मानसप्रत्यक्षवेद्यतया वा सिद्धत्वेन" इत्युक्तम् । एतेन—कर्मकाण्डस्येव ब्रह्मकाण्डस्याप्यर्थनिर्णयायायं विचार आवश्यक इति निरस्तम् । धर्मवद्ब्रह्मकाण्डार्थस्यात्मनः परप्रकाश्यत्वाभावात् । एतेनैव—जीवचैतन्यस्वरूपस्यासन्दिग्धत्वेऽपि देहादिभिन्नत्वानन्दाद्यात्मकत्वादिना सन्दिग्धत्वाद्विषयता । अन्यथा सिद्धान्तेऽपि उत्तरत्र जीवविचारो न युक्तस्स्यादिति निरस्तम् । सिद्धान्त इव पूर्वपक्षे जीवचैतन्यातिरि-

प्रकाशः

वेति । तर्हि टीकाविरोध इत्यत आह—**टीकायां त्विति** । "जीवव्यतिरिक्तेश्वराभावात्तस्य च स्वप्रकाशत्वान्न जिज्ञास्यता" इति न्यायविवरणानुसारेणेत्यर्थः । 'वस्तुस्थिति' इति न्यायविवरणेऽपि तथोक्तेरभिप्रायोक्तिः । 'अस्तु वा' इत्यस्य मूलमाह—**अत एवेति**। अनेन पूर्वोत्तरप्रस्थानाविरोध **उक्तो** भवति । प्रकारान्तरेण विचारकर्तव्यत्वमाशङ्क्य निरस्यति—**एतेनेति** । 'एतेन' विषयाभावेन । एतच्छब्दार्थं व्यनक्ति—**धर्मवदिति** । ननु जीवस्यासन्दिग्धत्वेऽपि देहादिविविक्तत्वेन विचार्यता स्यादेव । अत एव सुधायां जन्मादिसूत्रे—"जीवस्य स्वरूपतः प्रसिद्धत्वेऽपि देहादितोऽतिविविक्ततया न प्रसिद्धिः" इत्युक्तमित्याशङ्कां निरस्यति—**एतेनैवेति** । 'अद्वैतिरीत्या' इत्युक्तत्वेनेत्यर्थः । **उत्तरत्रेति** । "ज्ञोऽत एव" इत्यादौ द्वि-

चन्द्रिका

रूपस्य देहादिभिन्नत्वादेः सत्यत्वाभावात् । केचित्तु—जीवस्याकारान्तरेण सन्दिग्धतया विचारसम्भवेऽपि सिद्धान्त्यभिमतजीवान्यब्रह्मविचाराक्षेप इत्याहुः । तन्न, न्यायविवरणविरोधात् । तावता शास्त्रानारम्भासिद्धेश्च । सिद्धचैतन्यमात्रबोधने श्रुतेरनुवादकत्वं च,

प्रकाशः

तीये । **सत्यत्वाभावादिति** । अन्यथा अतत्त्वावेदकं शास्त्रं स्यादिति भावः । जन्मादिसूत्रे च नाद्वैतिरीत्या पूर्वपक्ष इति सुधाशय इति भावः । ननु कुत एवम् । "जीवस्य स्वरूपतः" इत्यादिसुधाऽनुसारात् अत्रापि जीवविचारो नाक्षेप्यः । किन्तु जीवस्य कथंचिद्विचार्यत्वेऽपि सिद्धान्त्यभिमतजीवान्यब्रह्मविचारो न सम्भवति, तस्यैवाभावादित्येवात्र पूर्वपक्षोऽस्तु । अत एव सुधायामाद्यसूत्रे "ईश्वरविषया जिज्ञासा भविष्यतीति चेन्न । तस्यैवाभावात्" इत्युक्तमित्याशङ्कामुद्धृत्य च निरस्यति—**केचित्त्विति** । न्यायविवरणे 'तस्य स्वप्रकाशत्वान्न जिज्ञास्यता' इत्युक्त्या जीवस्य सर्वथाऽविचार्यत्वोक्तेरिति भावः । तथा च न्यायविचरणानुसारिटीकायां न तथा वर्णनं युक्तमिति । न्यायविवरणमपि तथैव कथंचिद्योज्यतामित्यत आह—**तावतेति** । जीवान्यब्रह्मविचाराक्षेपमात्रेणेत्यर्थः । अत एव सुधायामाद्यसूत्रे जीवविचारोऽपि प्रत्याख्यात इति भावः । नन्वेवं वेदान्तानां सिद्धचैतन्यमात्रपरत्वे प्रागुक्तरीत्या ज्ञातज्ञापकत्वेन अप्रामाण्यं स्यात् । न च तद्युक्तम्, अपौरुषेयत्वेनादोषत्वात् । अतोऽतिरिक्तब्रह्मपरत्वमकामेनापि वाच्यमिति, तद्विषयकत्वेन विचार आरम्भणीय इत्याशङ्क्य वैदिकदृष्टान्तेन तदुपपादयति—सि-

चन्द्रिका.

वायुक्षेपिष्ठादिवाक्यवद्विद्वद्वाक्यवच्च न्यायप्राप्तत्वात् सह्यम् । वेदा-

प्रकाशः

द्धेति । वायुक्षेपिष्ठादिवाक्यवदिति । "वायुर्वै क्षेपिष्ठा देवता, वायुमेव स्वेन भागधेयेनोप धावति, स एवैनं भूतिं गमयति" इत्याद्यर्थवादवाक्यस्य, क्षिप्रगामी वायुः स्वोचितेन भागेन तोषितो भागप्रदाय ऐश्वर्यं प्रयच्छतीति मानान्तरप्राप्तक्षिप्रगामित्वादिरूपार्थानुवादकत्वं यथा, तद्वदित्यर्थः । अत एवाद्ये अध्याये "आम्नायस्य क्रियार्थत्वात्" इति द्वितीयपादीयाद्याधिकरणेऽर्थवादानां भारतादिवद्भूतान्वाख्यानमात्रपर्यवसितानां अक्रियार्थत्वेनाप्रामाण्यमाशङ्क्य, चेतनप्रवर्तनारूपस्य विधेः प्रवृत्तिप्रतिबन्धकालस्यादिव्यावर्तनेन प्रवर्तनाशक्त्युत्तम्भनायापेक्षितस्य प्राशस्त्यस्य लक्षणया समर्पणेन, विध्येकवाक्यतया प्रामाण्यमित्युक्तमिति भावः । ननु वायुक्षेपिष्ठादिवाक्यस्य लक्षिते तात्पर्यविषयीभूते प्राशस्त्येऽर्थे न मानान्तरावगतिरिति, न तत्परत्वेऽनुवादकत्वम् । वेदान्तानां तु तात्पर्यविषयस्य शुद्धस्य स्वप्रकाशतया सिद्धत्वेन तत्परत्वेऽनुवादकत्वमेवेति दृष्टान्तो विषम इति चेन्न । वायुक्षेपिष्ठत्वांशस्यैव दृष्टान्तत्वेनाभिमतत्वात् । अत एव* अरुच्या विद्वदित्युदाहरणान्तरम् । अत एव "अग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेत्" इत्यत्राग्नेः पवमानत्वरूपगुणवदत्र वायोः क्षेपिष्ठत्वरूपगुणविधानं किं न स्यादित्याशङ्क्याव्यावर्तनाय, विध्युद्देशबहिर्भावप्रदर्शनरूप न्यायस्य, तद्बहिर्भावेऽपि "एतमेव सन्तं वायवे नियुत्वत आलभेत" इतिवद्वाक्यान्तरेण देवतागुणविधानं किं न स्यादित्याशङ्काऽपनुत्तये विधायकाख्याताश्रवणन्यायस्य चापेक्षणात् 'न्यायप्राप्तत्वात्' इत्युक्तम् ।

*"अरुच्या" इति क्वचिन्नास्ति.

प्रकाशः

**विद्वदिति**। "य एवं विद्वान् पौर्णमासीं यजते। य एवं विद्वानमावास्यां यजते" इति वाक्ययोर्विद्वत्पदयुक्तत्वेन विद्वद्वाक्यशब्दितयोर्दर्शपूर्णमासशब्दितप्रकृताग्नेयादित्रिकद्वयानुवादकत्वं यथा, तथेत्यर्थः। तथा हि—द्वितीयेऽध्याये "प्रकरणं तु पौर्णमास्यां रूपावचनात्" इति द्वितीयपादीयतृतीयाधिकरणे "य एवं विद्वान्" इति वाक्यद्वयमुदाहृत्य, किं पौर्णमास्यमावास्याशब्दितापूर्वकर्मद्वयविधायकम्, किं वा "यदाग्नेयोऽष्टाकपालोऽमावास्यायांच पौर्णमास्यां चाच्युतो भवति" "अग्नीषोमीयमेकादशकपालं पौर्णमासे प्रायच्छत्" "उपांशुयाजमन्तरा यजति" "ऐन्द्रं दध्यमावास्यायाम्" "ऐन्द्रं पयोऽमावास्यायाम्" इति प्रकृतस्याग्नेयादित्रिकद्वयस्यानुवादकमिति संशये, "सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यम्" इति वाचनिकस्य ध्रौवाज्यस्य द्रव्यस्य "वार्त्रघ्नी पौर्णमास्यामनूच्येते, वृधन्वती अमावास्यायाम्" इति वाक्याभ्यां पौर्णमास्यमावास्यासंज्ञकयोः कर्मणोर्वार्त्रघ्नादिशब्दितानां "अग्निर्वृत्राणि जङ्घनत्" इत्यादिमन्त्राणां विधानान्मान्त्रवर्णिक्या देवतायाश्च लाभादनुवादकत्वे वैयर्थ्यादपूर्वकर्मद्वयविधायकमित्याशङ्क्य, कथञ्चिद्द्रव्यलाभेऽपि 'वार्त्रघ्नी' इत्यादिवाक्यद्वयस्याज्यभागयोर्लिङ्गक्रमाभ्यां पर्वद्वयेऽप्यव्यवस्थया प्राप्तानां मन्त्राणां व्यवस्थाऽर्थत्वेन मन्त्रवर्णाद्देवताया अलाभात्, "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इति फलवाक्यगतयोर्दर्शपूर्णमासपदयोः प्रसिद्धार्थत्वसम्पादनेन प्रकृताग्नेयादित्रिकद्वयानुवादकस्य सफलत्वात्समुदायद्वयानुवाद इति सिद्धान्तितम्। तत्र यथा

प्रकाशः

देवताऽभावादिन्यायप्राप्तमनुवादत्वं, तथा वेदान्तानां 'अन्यस्य सत्यस्या भावात्' इत्यादिन्यायप्राप्तमनुवादकत्वं सह्यमित्यर्थः । यत्तु—वायुक्षेपिष्ठादिवाक्यस्य विद्वद्वाक्यस्य चानुवादकत्वेऽपि विध्यपेक्षितप्राशस्त्यसमर्पणेनाद्यस्य, फलवाक्यगतदर्शपूर्णमासपदप्रसिद्धार्थत्वसम्पादनेन द्वितीयस्य फलवत्त्वान्न वैयर्थ्यम्। वेदान्तानां शुद्धचैतन्यमात्रबोधनेनानुवादकत्वे तु न किञ्चित्फलमिति वैषम्यकथनं, तन्न, वेदान्ताध्ययनस्यादृष्टार्थत्वेनार्थप्रतिपादने फलाभावकथनस्यानुचितत्वात् । अन्यथोत्कर्षसमजात्युत्तरत्वापत्तेः । अत एव तदध्ययनं जपार्थमित्यग्रे स्पष्टम् । दृष्टे सत्यदृष्टायोगाद्वायुक्षेपिष्ठादौ प्राशस्त्यादिफलमुक्तमिति। एतेन—प्रमाणशिखामणीनां वेदान्तानां सिद्धबोधकत्वं सह्यं चेत्तदा पौरुषेयस्यास्य शास्त्रस्य सुतरां तत्सह्यमिति निर्विषयत्वेनानारम्भणीयत्वमयुक्तमिति मूर्खप्रलापो निरस्तः । तत्रेवात्रापि कस्यचिज्ज्ञातार्थज्ञापकस्य पौरुषेयस्य प्रेक्षावदुपादेयस्यादर्शनात्। अत एव 'श्रुतेः' इत्युक्तम् । किञ्च—श्रुतेस्तथात्वेऽपि पौरुषेयस्य न तद्युक्तम् । उक्तं च सुधायाम्—

"प्रीत्या मोक्षपरत्वाच्च तात्पर्यं नैव दूषणे। तद्विरोधे न मानत्वम्" इत्यनुव्याख्यानव्याख्याऽवसरे "पुरुषो हि परप्रयोजनेन प्रयुक्तो वाक्यमुच्चारयंस्तदीयहिताहितप्राप्तिपरिहारानुगुणार्थमेव वदेत् । तद्विरुद्धं तु वदन्ननवधेयवचनः स्यात् । अपौरुषेयं तु स्वभावादेवार्थं प्रतिपादयति, प्रत्यक्षादिवदेव" इति । "शक्तिश्चैवान्विते स्वार्थे" इत्येतद्व्याख्याऽवसरे चोक्तम्, "पुरुषदोषोऽयं, यत् ज्ञातज्ञापनाय शब्दोच्चारणम्" इत्यादि । वस्तुतस्तु—न्यायनिबन्धनात्मकत्वाच्छास्त्रस्य

चन्द्रिका

न्ताध्ययनं तु जपार्थमस्तु । एवं च यथाअर्थवादाधिकरणे अपौरुषेयत्वेऽप्यर्थवादानां अक्रियार्थत्वेन विध्येकवाक्यत्वाभावादानर्थक्यमिति भाट्टमते पूर्वः पक्षः । प्राभाकरमते च—अर्थवादानां विध्येकवाक्यत्वेऽपि हेतुसमर्पकत्वात् हेतुसापेक्षचोदनानामप्रामाण्यमिति पूर्वः पक्षः । यथा वा परमते—शास्त्रयोनित्वे कारणवाक्यमनुमानप्राप्तकारणानुवादीति, ईक्षत्यधिकरणे च साङ्ख्यस्मृतिप्राप्तकारणा-

प्रकाशः

सन्दिग्धएव न्यायप्रवृत्तेः, असन्दिग्धे तत्फलाभावान्नेदमारम्भणीयमित्युक्तौ न कोपि दोषः। किञ्च—"आत्मा ब्रह्मेत्यधीतः स्फुरति स तु सदा" इत्यादि वदता त्वयाऽप्यक्षागमयोरेकविषयत्वमुपेत्यैव, विचारशास्त्रस्य निर्विषयत्वेनानारम्भस्य पूर्वपक्षितत्वेन स्वव्याहतत्वाच्चेति । नन्वध्ययनविधिना कृत्स्नस्य वेदस्यार्थज्ञानपर्यन्तत्वस्य व्यवस्थापनात्, वेदान्तेष्वर्थज्ञानस्यान्यतो लाभात्तदध्ययनं व्यर्थमित्यत आह—**वेदान्तेति**। दृष्टस्यायोगाज्जपद्वाराऽदृष्टमेव फलमिति भावः । अपौरुषेयतया प्राप्तप्रामाण्यानां कथमेवं ज्ञातज्ञापकत्वेनाविचार्यत्वमित्यतः पूर्वपक्षप्रमेयं दृष्टान्तपूर्वकमुपपादयन्नुपसंहरति—**एवं चेति** । विषयाभावे सतीत्यर्थः । **अपौरुषयत्वेऽपीति** । तर्कपादान्त्याधिकरणन्यायेनेति भावः । '**अक्रियार्थत्वेन**' धर्माधर्मावबोधकत्वेन । **भाट्टमत इति**। दर्शितः पूर्वपक्षः । **प्राभाकरमते चेति** । चोदनाप्रामाण्यनिरूपणस्याध्यायार्थतया सर्वेष्वधिकरणेषु तदप्रामाण्यपर्यन्ताः पूर्वपक्षा इति अर्थवादानां विध्येकवाक्यतामुपेत्य, यस्माद्वायुः क्षेपिष्ठा देवता, तस्माद्वायव्यश्चेतालम्भः कार्य इति हेतुसमर्पकतयाऽन्वयाद्धेतुसापेक्षत्वेन चोदनानामप्रामाण्यमित्यर्थः । '**चोदनानां**' विधिवाक्यानाम् । **अनुमानेति** । कार्यत्वाद्यनुमानेत्यर्थः । **ईक्षत्यधिकरण इति** । "सदेव

चन्द्रिका

नुवादीति पूर्वः पक्षः । तथेहापि स्वतस्सिद्धप्रत्यगात्मानुवादका वेदान्ता न विचार्या इति पूर्वः पक्षः । यद्वा—प्रमाणभूतवेदान्तवाक्यगतिर्न पूर्वपक्षिणा वाच्या, तदाच्छादनेन तत्प्रवृत्तेः । किन्तु प्रमेयस्य ब्रह्मणोऽद्वैतिरीत्या स्वप्रकाशप्रत्यगात्माभेदान्न विचा-

प्रकाशः

सोम्येदमग्रे" इत्यादिवाक्यप्रतीतं जगत्कारणं किं ब्रह्मोत प्रधानमिति सन्देहे, "बहु स्याम्" इति बहुभावश्रवणात्प्रधानमेव । तथा च साङ्ख्यस्मृतिसिद्धजगत्कारणानुवादीनि कारणवाक्यानीतिपूर्वपक्षो यथेत्यर्थः ।

यत्तु—वेदान्तानां चैतन्यज्ञापकत्वेऽपि प्रामाण्यमङ्गीकृत्य विचारशास्त्रस्य चैतन्यविषयत्वे ज्ञातज्ञापकत्वेनाप्रामाण्यवादो गुरुनातिविषयस्य शिष्यनत्यविषयत्ववादमनुकरोतीति कस्य चित्प्रलपनं, तत्तुच्छम्, अनुक्तोपालम्भात् । न हि वेदान्तानां चैतन्यबोधकत्वेऽप्यनधिगतार्थत्वेन प्रामाण्यमुपेत्य विचारशास्त्रस्याधिगतार्थत्वेनाप्रामाण्यमुक्तम् । किन्तु—वेदान्तानां तद्विचारशास्त्रस्य च शुद्धबोधकत्वे निश्चितार्थतयार्थज्ञानाय प्रेक्षावदनुपादेयत्वमेव । अत एव स्वतस्सिद्धप्रत्यगात्मानुवादका वेदान्ता न विचार्या इत्युक्तम् । वस्तुतस्तु—वेदान्तानामगत्या चैतन्यबोधकत्वेन याथार्थ्यरूपप्रामाण्यसम्भवेऽपि स्वार्थस्य निश्चिततया तत्र सन्देहविपर्ययोरभावेन तन्निरासकविचारशास्त्रानपेक्षणात्, विचारशास्त्रमिदं न कर्तव्यमिति युक्तः पन्थाः । **तदाच्छादनेनेति** । न च 'न च तदाच्छादनेन' इत्यग्रेतनग्रन्थविरोध इति वाच्यम्, तत्रोक्तबाधक-

चन्द्रिका

र्यतेति प्रमेयाश्रयणेनैव पूर्वः पक्षः । अत्र चाद्ये पक्षे प्रमाणभूतवेदविचाररूपेणापि विचारस्याकर्तव्यताऽभिप्रेता । द्वितीये तु प्रमेयभूतब्रह्मविचाररूपेणैव ॥ केचित्तु—वेदमात्रस्य कार्यपरत्वान्न जीवादन्यत् ब्रह्मास्ति । जीवस्त्वसंदिग्ध इति पूर्वपक्ष इत्याहुः । तन्न-प्राभाकररीत्या पूर्वपक्षकरणे न्यायविवरणे आत्मनः स्वप्रकाशत्वोक्तयोगात् । जीवस्य देहादिभिन्नत्वेन विचार्यत्वसम्भवेन शास्त्रा-

प्रकाशः

स्यात्राभावात् । स्पष्टतायै पक्षयोर्भेदमाह—**अत्रेति** । ननु सुधायां—"आगमस्तु कार्यनिष्ठो न निष्पन्न*रूपमीश्वरं शक्नोत्यवगमयितुम्" इत्यादिना वेदस्य कृत्स्नस्य कार्यपरत्वान्नेश्वरे मानमित्युक्तत्वेन प्राभाकररीत्या पूर्वपक्ष उक्तः । "प्रमाणाभावेन" इतिटीकायां स्वोक्तो हेतुरप्येवंरूपेण विवृत इति भाति । अत्रतूच्यते चिन्मात्रपरत्वादित्यद्वैतिरीत्या इति तद्विरुद्धम् । एवं च वेदान्तानां अननुवादकत्वं चानुकूलितं भवतीत्याशङ्कां सुधावाक्यतात्पर्यापरिज्ञानविजृम्भितां बाधकोक्तिपूर्वमभिप्रायकथनेन निरस्यति—**केचित्त्विति** । **स्वप्रकाशत्वेति** । तन्मते वृत्तेरेव स्वप्रकाशत्वेनात्मनस्तदभावादितिभावः। ननु तत्र स्वप्रकाशत्वं वास्तवाभिप्रायेणोक्तम्, न तु तन्मतत्वेन । अत एव सुधायां 'स्वप्रकाशसंविदाश्रयतया वा' इत्युक्तम् । न तु तत्रैव भार इत्याशङ्क्य बाधकान्तरमाह—**जीवस्येति** । यदि प्राभाकररीत्या पूर्वपक्षः, तर्हि तन्मते अद्वैतिमत इव देहादिभिन्नत्वादेर्मिथ्यात्वाभावेन, जीवस्यासन्दिग्धत्वेपि देहादिभिन्नत्वस्य सत्यस्य विष-

* 'स्वरूपम्' इत्यपि पाठः ।

चन्द्रिका.

नारम्भासिद्धेश्च । सुधायां त्वनुव्याख्याने सिद्धे व्युत्पत्त्यादेरतइंशब्दार्थत्वेनोक्तत्वात् तद्व्यावर्त्यपूर्वपक्षे कार्ये व्युत्पत्तिरुक्ता । इह तु टीकायां न्यायविवरणोक्तब्रह्मशब्दव्यावर्त्यपूर्वपक्ष उच्यत इति, नेह

प्रकाशः

यस्य सम्भवेन निर्विषयत्वेन शास्त्रनारम्भो न सिद्धः स्यादित्यर्थः । ननु सुधायां—"नन्वात्मा शरीराद्यतिरिक्तोऽहमित्यसन्दिग्धाविपर्यस्त-*साक्षिप्रतीत्यैव निश्चीयत इति चेदेवं तर्हि तत एव न जिज्ञास्यः" इत्युक्त्या देहादिभिन्नत्वस्यापि निश्चितत्वेन तेनाप्यविचार्यत्वात् शास्त्रानारम्भसिद्धिरिति चेन्न, प्राभाकरमते तथाऽनङ्गीकारात् । वास्तवाभिप्रायेण वा देहाद्विविक्तत्वेनात्मनो ज्ञानाज्ञानाभ्यामविचार्यत्वमिति भावेन वा सुधोपपत्तेः । अत एव सुधायां जन्मादिसूत्रे—"जीवस्य स्वरूपतः प्रसिद्धत्वेऽपि देहादितोऽतिविविक्ततया न प्रसिद्धिः" इति तेन रूपेण सन्दिग्धत्वोक्तिस्स्पष्टेति भावः । आनन्दाद्यात्मकत्वाणुत्वमहत्त्वादिना विचार्यत्वसम्भवाच्च । एवं बाधकमुक्त्वा सुधाकूतमाह—**सुधायांत्विति** । सैव रीतिरत्राप्य श्रीयतामित्यत आह—**इहत्विति** । अद्वैतिरीत्या अभेद एव ब्रह्मशब्दव्यावर्त्य इति भावः । ननु यद्यद्वैतिरीत्या पूर्वपक्षः, तर्हि नानुवादकत्वं वेदान्तानां, पूर्वं शुद्धगोचरान्तःकरणवृत्तेरभावात् । स्वप्रकाशत्वेपि स्वरूपज्ञानविषयत्वस्य कर्तृकर्मत्वविरोधेन अनङ्गीकारात् ज्ञातज्ञापकत्वाभावात् । अन्यथा भामतीमते जिज्ञासाधिकरणसिद्धान्तानुन्मेषः स्यात् । तथा च अननुवादकत्वं वेदान्तानामभ्युपेत्यैव

* 'साक्षात्प्रतीत्या' इत्यपि पाठः ।

चन्द्रिका

सा वक्तव्या ॥ अन्ये तु—आत्मनः स्वतस्सिद्धत्वेऽपि प्रमाणतस्सिद्ध्यभावात्, तत्सिद्ध्यविषयत्वाद्वा, तत्प्रत्यायकानां वेदान्तानां नानुवादकतेत्याहुः । तदपि न, तत एवात्मनो विषयत्वस्यापि सम्भ-

प्रकाशः

पूर्वपक्षो वाच्य इत्युत्तानदृशां चोद्यमुद्भाव्य बाधकोक्त्या निरस्यति—**अन्येत्विति** । **'स्वतस्सिद्धत्वेऽपि'** स्वरूपज्ञानविषयत्वेपीत्यर्थः । **तत्सिद्धीति** । स्वरूपसिद्धीत्यर्थः । **तत एवेति**। आत्मनोऽज्ञातत्वादेवेत्यर्थः । ननु तन्मतेऽवेद्यत्वं स्वप्रकाशत्वमित्यङ्गीकाराच्छ्रुतितन्मीमांसयोर्निर्विषयत्वं युज्यते । अत एवोत्तरत्र—

यत्सत्यं नैव तद्वेद्यं यद्वेद्यं तच्च नैव सत् ।
इति ते समयस्तत्र कुत्रार्थे शास्त्रमानता ॥

इति भवतामेव वचनम् । अत एव मायावादखण्डनटीकायाम् 'अवेद्यत्वं स्वप्रकाशत्वम्' इत्यङ्गीकारादद्वैदान्तानां वैयर्थ्यमित्युक्तम् । तथा च चैतन्यादन्यस्यासत्यत्वाच्चैतन्यस्य च सत्यस्यावेद्यत्वान्निर्विषयत्वेन वेदान्तानामविचार्यतया, नेदं शास्त्रमारम्भणीयमित्येव पूर्वपक्षः साधीयानितिचेन्न, टीकायामात्मनः स्वप्रकाशत्वेन असन्दिग्धत्वोपपादनविरोधात् । अवेद्यत्वे चैतन्यमवेद्यमित्यादिव्यवहारस्य स्वक्रियाविरोधेनायोगाच्च । कथं तर्ह्यनुवादकत्वसमर्थनमितिचेत् । अयमाशयः—यदुक्तं 'स्वतस्सिद्धत्वेऽपि प्रमाणवृत्त्यभावात्' इति, तन्न, अनुवादकत्वे हि ज्ञातमात्रज्ञापकत्वं तन्त्रं, न तु सजातीयप्रमाणेन । तथा च स्वरूपज्ञानविषयत्वेन सिद्धशुद्धपरत्वेऽनुवादकत्वं स्यादेव । अन्यथा

प्रकाशः

वायुक्षेपिष्ठादीनामनुवादकत्वं न स्यात् । परमते शास्त्रयोन्याद्यधिकरणपूर्वपक्षायोगापाताच्च । यदपि 'तत्सिद्ध्यविषयत्वात्' इति, तदपि न, मामहं जानामीत्यनुभवविरोधात् । अन्यस्य च मिथ्यात्वेन तद्विषयत्वे भ्रान्तित्वापत्तेः, मुक्तौ तदभावेन तद्विषयत्वायोगाच्च, स्वरूपविषयत्वावश्यंभावात् । अन्यथा स्वरूपचितो ज्ञानत्वस्य दुर्घटत्वात् । विस्तृतं चैतज्जडत्वहेतुभङ्गे । ननु तर्हि नेयमद्वैतिरीतिः, तन्मते स्वरूपचितः स्वविषयत्वानङ्गीकारात् । तथा च कथं 'अद्वैतिरीत्या' इत्युक्तिरिति चेदत्राहुः । न सर्वांशे अद्वैतिरीति रिति तस्याभिप्रायः, किन्तु वेदान्तानां चिन्मात्रपरत्वएव । अत एव पूर्वं तथैवोक्तम् । स्वप्रकाशसिद्धत्वोक्तिस्तु सिद्धान्तिदिशा वा न्यायप्राप्ततया वा वास्तवाभिप्रायेण वा युक्ता । अत एव सुधायां त्रेधापि सिद्धत्वमुक्तम् । अत एव चोत्तरत्र, श्रवण विधेः विचारविधित्वमद्वैत्यभिमतं प्रत्याख्याय, मननविधेर्विचारविधित्वमुपेत्य गतिर्वीक्ष्यते । अन्यथा श्रवणविधेरेव सा वक्तव्या स्यात् । ननु चैवं प्राभाकररीत्या वेदस्य कार्यपरत्वमुपेत्य, स्वप्रकाशत्वोक्तेर्वास्तवत्वादिभाववर्णनं क्रियताम् । एवं च सुधानुकूलिता भवति । अननुवादकत्वं चानुगृहीतं भवति । तथाच कृत्स्नस्य वेदस्य कार्यपरत्वेन जीवान्यब्रह्मणि मानाभावाज्जीवचैतन्यस्य च सिद्धान्तिदिशा वस्तुतो न्यायतो वा स्वप्रकाशत्वान्न जिज्ञास्येतेति पूर्वपक्षो युक्त इति चेन्न, एतावता अतश्शब्दव्यावर्त्यपूर्वपक्षलाभेऽपि ब्रह्मशब्दव्यावर्त्यपूर्वपक्षालाभात् । कार्यपरत्वनिरासस्य ब्रह्मशब्देनालाभात् ।

चन्द्रिका

वेन निर्विषयत्वपूर्वपक्षायोगात् । नापि जिज्ञासायाः प्रयोजनमस्ति,

प्रकाशः

न च जीवान्यब्रह्मानङ्गीकाराद्ब्रह्मशब्दव्यावर्त्योऽपि पूर्वपक्षः सेत्स्यतीति वाच्यम्, एवं तर्हि जीवस्य देहादिभिन्नत्वेन विचार्यत्वसम्भवेन शास्त्रानारम्भासिद्धेश्चेत्युक्तत्वादिति । यद्वा—परैरपि स्वव्यवहारनिर्वाहकत्वं शुद्धचितोऽङ्गीकृतं तद्व्यवहारहेतुत्वमेव तद्विषयत्वमिति वा, "चित्सुखेन तत्स्वभावस्यापि स्फुरणस्य तद्विषयत्वमित्युक्तत्वेन" इत्यादिना न्यायामृते स्वप्रकाशत्वभङ्गादौ, स्वविषयत्वस्य चितोपि चित्सुखमतत्वेनोक्ततया, तद्रीत्या तद्विषयत्वमिति वा पूर्वपक्ष्याशयः । यथोक्तं भावप्रकाशिकायां ग्रन्थकृतैव "अनतिरेके स्वप्रकाशत्वादात्मनः सिद्धसाधनता" इत्येतद्व्याख्यावसरे—"यद्यपि परैः स्वग्रन्थेषु 'स्वप्रकाशात्ममात्रस्य स्वतस्सिद्धिसम्भवेन' इति, 'स्वतसिद्धतायामपि तदुपपत्तेः' इति, 'विज्ञानमेव स्वप्रकाशस्वभावं प्रकाशते' इति, 'स्वभावभेदादेव च स्वात्मनि व्यवहारं कुर्यात्' इति च तत्र तत्र वदद्भिः स्वप्रकाशस्यात्मनः स्वकर्मत्वाभावेपि स्वजन्यव्यवहारविषयत्वयोग्यत्वलक्षणा स्वतस्सिद्धिरिष्यते। तादृशात्माभिन्नाद्वैतं बोधयतः शास्त्रस्य सिद्धसाधनत्वं पररीत्यैव वक्तुं शक्यम्" इत्यादि । तथा चैवं निष्कर्षः—अद्वैतिरीत्या वेदान्तानां अखण्डप्रत्यगात्मपरत्वं, प्रत्यगात्मनश्च स्वप्रकाशसिद्धत्वं सिद्धान्त्यभिमताद्यभिप्रायेणेति, निर्विषयत्वादितिहेतुर्युक्त एवेति । निष्प्रयोजनत्वादिति हेतुमादिपदोक्तं समर्थयते—**नापीति** । अभ्यु-

तत्त्वप्रकाशिका

यतया प्रतीतिः। अतः स्वप्रकाशात्मानतिरिक्तस्य ब्रह्मणोऽसन्दिग्धत्वान्न विषयत्वं सम्भवति । न च जिज्ञासायाः प्रयोजनमस्ति, ज्ञायमानेऽपि ब्रह्मणि तदनुपलम्भात् । विषयप्रयोजनाभावान्न ब्रह्मजिज्ञासायामधिकारी विद्यते । अत एव न सम्बन्धः । अतो

चान्द्रिका

प्रत्यग्रूपे ब्रह्मणि अहमिति ज्ञायमानेऽपि मोक्षानुपलम्भात् । विषयाद्यभावादेव नाधिकारी, नापि सम्बन्धः ॥ ननु कथं तर्हि 'श्रोतव्यः' इति विचारविधानम् । न च तदाच्छादनेन पूर्वः पक्षः,

प्रकाशः

दयस्य कर्मादिलब्धूपायसाध्यत्वान्मोक्ष एव जिज्ञासाफलत्वेन वाच्यः। सचन साक्षात्तत्फलं, श्रुतत्यागाश्रुतकल्पनापत्तेः । किन्तु ज्ञानद्वारा । तस्मिंश्च ज्ञाने सत्यपीदानीं मोक्षानुपलम्भान्न जिज्ञासाफलमित्यर्थः । एतेन 'न च जिज्ञासायाः' इत्यादिटीका विवृता । 'विषयाद्यभावात्' इति हेतुरुत्तरसाध्यद्वयेऽप्यन्वेति । तेन 'विषय' इत्यादिटीका विवृता । एवं जिज्ञासाया निर्विषयत्वादिनाऽकर्तव्यत्वमुक्त्वा, सुधावाक्यं विवरीतुं तद्विधीनां गतिद्वयं वक्तुमाक्षिपति—नन्विति । परैरश्रवणविधेर्विचारविधित्वमङ्गीकृतम् । तद्वीत्या वा, श्रवणादिरूपजिज्ञासा कर्तव्येति सिद्धान्तटीकातात्पर्यापरिज्ञानिनो वाऽऽशङ्केति तदुदाहृतम् । ननु यथा प्रमाणभूतवेदान्तवाक्यगतिमनुक्त्वा तदाच्छादनेन पूर्वपक्षः, तथेहाप्यस्तु । अत एव टीकायां तस्य गत्यनुक्तिरित्याशङ्क्य निरस्यति—न चेति । 'न्यायः' विषयादिः।

चन्द्रिका

विचारविधिवाक्यार्थनिर्णायकन्यायव्युत्पादकत्वादस्याधिकरणस्य तदाच्छादनायोगादिति चेन्न, वक्ष्यमाणरीत्या श्रवणस्य विचाररूपत्वाभावात्। "मन्तव्यः सोऽन्वेष्टव्यः" इत्यादेश्च ब्रह्मपरतयाऽभिप्रेतवाक्यमध्यस्थतया "विष्णुरुपांशु यष्टव्यः" इत्यादिवत् कृत्यप्रत्ययस्या-

प्रकाशः

अत्रैव प्रमाणभूतवेदान्तवाक्यप्रामाण्याच्छादने बाधकाभावादिति भावः। एतेन—विचारविधेराच्छादनस्य निरासात्प्रमाणभूतवेदान्तवाक्याच्छादनमपि न युक्तमिति, कस्यचिन्मूर्खस्य प्रलपनं दूरीकृतं बोध्यम्। **वक्ष्यमाणेति**। जिज्ञासापदार्थनिरूपणप्रस्ताव इति भावः। ननु "मन्तव्यः सोऽन्वेष्टव्यः सविजिज्ञासितव्यः" इत्यादौ "तव्यत्तव्यानीयरः" इति विधौ स्मृततव्यप्रत्ययान्तस्य, तथा "आत्मन्येवात्मानं पश्येत्" इत्यादिलिङन्तस्य, "तद्विजिज्ञासस्व" "तमेवैकं जानथ" इत्यादिलोऽन्तस्य च विधायकत्वसम्भवादित्याशङ्क्य तव्यप्रत्ययान्तस्य गतिं तावदाह—**मन्तव्य इति**। 'इत्यादेः' इति षष्ठ्यन्तस्य 'मध्यस्थतया' इत्यनेनान्वयः। ब्रह्मपरत्वेन प्रसिद्धबृहदारण्यकच्छान्दोग्याद्युपनिषन्मध्यगतत्वेन वा, तत्तदवान्तरप्रकरणगतब्रह्मवाक्यगतत्वेन वा बाधकेन तव्यप्रत्ययस्य विधिशक्तिप्रतिबन्धात्, "अर्हे कृत्यतृचश्च" इत्यर्हार्थे कृत्यप्रत्ययस्य विधानात्, "कृत्याः प्राङ्ण्वुलः" इति कृत्यसंज्ञकस्य तव्यस्यार्हार्थत्वसम्भवात्। तत्र **दृष्टान्तो—विष्णुरिति**। द्वितीयाध्याये द्वितीयपादे "पौर्णमासीवदुपांशुयाजः स्यात्" इति चतुर्थेऽधिकरणे "नामि वा एत-

चन्द्रिका

हार्थित्वेनाप्युपपत्तेरविधायकत्वात् । नापि "आत्मन्येवात्मानं पश्येत्"

प्रकाशः

द्यङ्गस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजति विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्योऽजामित्वाय अग्नीषोमावुपांशु यष्टव्यावजामित्वाय" इति दर्शपूर्णमासयोः श्रुतं वाक्यमुदाहृत्य, "उपांशुयाजमन्तरा यजति" इत्ययं किं "विष्णुरुपांशु यष्टव्यः" इत्यादिवाक्यविहितयागत्रयसमुदायानुवादः उत स्वतन्त्रयागविधिः इति संशये, देवताया अलाभेन यागविधित्वायोगात्, तव्यप्रत्ययान्तविष्णवादिवाक्यविहितयागत्रयसमुदायानुवाद इति प्राप्ते, आग्नेयाग्नीषोमीयपुरोडाशद्वयनैरन्तर्यकृतस्य जामितादोषस्य वाक्योपक्रमे उपन्यासात्, पुरोडाशयोरन्तराले किञ्चिद्विधास्यते इत्यवगमात्, आग्नेयाग्नीषोमीयपुरोडाशयाज्यानुवाक्यायुगलयोर्मध्ये वैष्णवप्राजापत्याग्नीषोमीययाज्यानुवाक्यायुगलानां शाखाभेदेनाम्नानात्, क्रमविनियुक्तमन्त्रवशेन देवताया लाभात्, अन्तराशब्दघटितमेव वाक्यं विधायकम् । अजामित्वप्रशंसा च तत्रैवावकल्पते । विष्णवादिवाक्यं तु, जामितादोषोपक्रमतन्निर्हरणान्तैकवाक्यमध्यस्थतया विधित्वे प्रतीतैकवाक्यताभङ्गप्रसङ्गादर्थवादः । तव्यप्रत्ययस्त्वर्हार्थ इति सिद्धान्तितम् । तद्वदत्राप्युपक्रमोपसंहारैकरूप्यावगतैकवाक्यतानिर्वाहायार्हार्थो न विधिस्तव्यप्रत्यय इति भावः । ननु तव्यस्यार्हेऽपि स्मरणात्तदन्तमविधायकमस्तु, लिङाद्यन्तं तु स्यादेव विधिरित्याशङ्क्य निरस्यति—**नापीति** । "पश्येत्" इत्यत्र प्रकृतिभाग-

चन्द्रिका

इति, "तद्विजिज्ञासस्व" इति वा विधिः, मुख्यार्थयोर्ज्ञानेच्छयोरविधेयत्वात् । विधौ च लक्षणाया अन्याय्यत्वात् । अनयोरपि ब्रह्मपरतया "यदभिधारयेद्रुद्रायास्ये पशून् निदध्यात्"* इतिवत्, लिङो

प्रकाशः

स्य ज्ञानं, "विजिज्ञासस्व" इत्यत्र च सन्प्रत्ययस्येच्छा मुख्योऽर्थः । "धातोः कर्मणः समानकर्तृकादिच्छायां वा" इति सन्विधानादिति भावः । ननु मुख्यार्थाभ्यां ज्ञानेच्छाभ्यां विचारं लक्षयित्वा तद्विधिरभ्युपगम्यतामित्यत आह—**विधौ चेति** । अतएव शबरस्वामिना "न विधौ परः शब्दार्थः" इत्युक्तमिति भावः। **ब्रह्मपरतयेति** । ब्रह्मतात्पर्यकत्वेनेत्यर्थः । **यदभिधारयेदिति** । दशमे "पूर्वैश्च तुल्यकालत्वात्" इत्यष्टमपादीयपञ्चमाधिकरणे त्र्यम्बकनामकपुरोडाशानधिकृत्य "अभिधार्या नाभिधार्या इति मीमांसन्ते । यदभिधारयेद्रुद्रायास्ये* पशून्निदध्याद्यन्नाभिधारयेन्न रुद्रायास्ये * पशून्निदध्यात् । अथो खल्वाहुरभिधार्या एव" इति चातुर्मास्येषु श्रुतं वचनमुदाहृत्य, किमभिधारणानभिधारणयोः विकल्पः उताभिधारणमेवेति संशये, "अभिधार्याः" इति विधिः । "यदभिधारयेत्" इति विध्यन्वयानर्हनिन्दाश्रवणाच्च "नाभिधार्याः" इति प्रतिषेधः । अतस्तयोर्विकल्पः । सति चैवं प्रयोगदशायामन्यतरपरिग्रहायापतन्ती मीमांसा "मीमांसन्ते" इत्यनूद्यत इति प्राप्ते, मीमांसावरुद्धत्वेनाद्यः "अभिधार्याः" इत्येष न विधिः । अन्त्यस्त्वनन्यपरत्वाद्विधिः । आद्यवाक्यं तु तच्छे-

* 'पशूनभिदध्यात्' इति मुद्रितमीमांसापुस्तकेषु पाठः.

चन्द्रिका.

विधिशक्ति प्रतिबन्धाच्च। एतेन—"तस्माद्ब्राह्मणः पाण्डित्यम्" इत्यादेरपि विचारविधित्वं निरस्तम् । विचारस्य ज्ञानहेतुताया अन्व-

प्रकाशः

षत्वादर्थवादः । तत्समभिव्याहारात् "यदभिघारयेत्" इति निन्दाश्रवणमपि, "अभिघार्या एव" इत्यस्य विधेः शेषत्वात्तत्रार्थवादः, एवमिदमभिघारणं प्रशस्तम्, यत्सन्तमपि दोषमविगणय्य कर्तव्यमित्येवं, निन्दाया अपि प्रशस्ततरत्वज्ञापनार्थत्वात्। तस्मादभिघारणमेव न विकल्प इति सिद्धान्तितम्। अत्र "अभिघारयेत्" इति लिङो विधिशक्तिः, अभिघारणविधौ प्राशस्त्यसमर्पणपरत्वेन यथा प्रतिबध्यते, तथा "पश्येत्" इति लिङो विधिशक्तिः ब्रह्मपरत्वेन प्रतिबध्यत इत्यर्थः। ननु "तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्" इत्यादौ, श्रवणं लब्ध्वा 'बाल्येन' मननेन 'तिष्ठासेत्' स्थातुमिच्छेत् मननं कुर्यादिति, अस्ति विचारविधिरित्यत आह—**एतेनेति** । ब्रह्मपरतया विधिशक्ति प्रतिबन्धादित्युक्तत्वेनेत्यर्थः । विचारविधित्वेन शङ्कार्हस्य सर्वस्यापि वाक्यस्य साधारणं दूषणमाह—**विचारस्येति** । गान्धर्वादिविचारस्य षड्जादिज्ञानहेतुत्वदर्शनादिति भावः । **विधीति** । अप्राप्त एव विध्यपेक्षेति भावः । नन्वपूर्वविधेरयोगेऽपि, यथा "व्रीहीनवहन्ति" इत्यादौ नखविदलनादिसाधनान्तरप्रयुक्तपाक्षिकत्वनिवृत्तिफलकनियमविधिः, यथा च "अश्वाभिधानीमादत्ते" इत्यादावन्यनिवृत्तिफलकपरिसङ्ख्याविधिः, तथा विचारेणैव ब्रह्मज्ञानं

चन्द्रिका

यव्यतिरेकप्राप्तत्वेन विध्यनपेक्षणाच्च । नियमपरिसङ्ख्ययोश्चा-

प्रकाशः

सम्पादयेदिति नियमादिविधिस्स्यादित्यत आह—**नियमेति** । सत्यं, यदि तत्रैव ब्रह्मज्ञाने विचारवत् साधनान्तरमपि स्यात्। न च तदस्ति, रूपादिहीनस्यात्मनः प्रत्यक्षाद्यविषयतया शब्दैकगम्यत्वादित्यर्थः । नन्वपूर्वसाधनेषु व्रीहिषु नखविदलनादेरप्राप्तावपि व्रीहिमात्रे तत्प्राप्तया " व्रीहीनवहन्ति " इति यथा नियमः, तथा निर्विशेषात्मनि मानान्तराप्राप्तावपि आत्ममात्रे तत्प्राप्त्या नियम इति चेन्न, " व्रीहीन् " इत्यत्र व्रीहिशब्दोऽपूर्वीयद्रव्यपरः, न तु व्रीहिपरः, अन्यथा यवेष्ववघात औपदेशिको न स्यात्, नीवारेषु च व्रीहिरूपद्वाराभावेनातिदिष्टो बाध्येत, इति नवमे स्थापितत्वेनापूर्वीयद्रव्य एव नखविदलनादिप्राप्तेर्वाच्यत्वात् । किञ्च—व्रीहिसामान्य इवापूर्वीयेष्वपि व्रीहिषु नियमादृष्टाजनकस्यापि नखविदलनस्य सम्भवोस्ति । इह च निर्विशेषसविशेषरूपविशिष्टद्वयानुगते विशेषाभावादिद्वारा वेदान्तवेद्ये चिन्मात्रे मानान्तरप्राप्तिर्नेति कथं नियमादिविधिः । तदेतदुक्तम्—**शब्दैकगम्यतयेति** । ननु च यथा मन्त्रार्थज्ञानस्य तन्मूलककल्पसूत्रात्मीयग्रहणकवास्यादिप्राप्तया पक्षेऽप्राप्तमन्त्रसाध्यत्वं नियम्यते ' मन्त्रैरेव स्मृतिस्साध्या ' इति, तथा वेदान्तमूलकस्त्रीशूद्रसाधारणस्मृतिपुराणादिप्राप्तया पक्षेऽप्राप्तविचारपरिपूरणार्थो नियम इति चेन्न, विना विचारं स्वातन्त्र्येण स्मृतिपुराणादिना तज्ज्ञानासिद्ध्या साधनान्तरत्वासिद्धेर्न नि-

चन्द्रिका

त्मनश्शब्दैकगम्यतया साधनान्तरप्राप्त्यभावेनायोगात् । एतेन—अन्यपरतया प्रतीतस्यापि "उपरि हि देवेभ्यो धारयति" इत्यादेरिव "तद्विजि-

प्रकाशः

यमविधिः । तदेतदाह—**साधनान्तरेति** । एतेन—श्रुत्यादिविचारस्यापातप्रतीतब्रह्मतदन्यज्ञानसाधनत्वे प्राप्ते, "इत्यश्वाभिधानीमादत्ते" इतिवदेकस्योभयसम्बन्धप्राप्तावन्यसम्बन्धनिवृत्तिफलकपरिसङ्ख्येति निरस्तम्, श्रुत्यादिना आपाततोऽन्यप्रतीतावपि श्रुत्यादिविचारस्यान्यज्ञानसाधनत्वाप्राप्तेरित्यलमियता ॥ ननु "उपरि हि देवेभ्यो धारयति" इत्यादेरधोधारणस्तुतिपरतया प्रतीयमानस्यापि विधिपरत्वं यथा, तथा "तद्विजिज्ञासस्व" इत्यादेः ब्रह्मपरतया प्रतीयमानस्यापि तदस्त्वित्याशङ्कां निरस्यति—**एतेनेति** । ब्रह्मपरत्वकथनेन, ज्ञानहेतुतया विचारप्राप्तिकथनेन चेत्यर्थः । तृतीयेऽध्याये "विधिस्तु धारणेऽपूर्वत्वात्" इति चतुर्थपादीयपञ्चमाधिकरणे "अधस्तात्समिधं धारयन्ननुद्रवेत्, उपरि हि देवेभ्यो धारयति" इति मृताग्निहोत्रे श्रुतं वाक्यमुदाहृत्य, "उपरि हि देवेभ्यः" इति किं जीवदग्निहोत्रे उपरिधारणाविधिः उतानुवादः इति सन्देहे, सर्वमभ्यर्हितं द्रव्यं प्रच्छाद्यैव देशान्तरं नेतव्यमित्याच्छादनस्याचारप्राप्तत्वात्, हविर्गार्हपत्यादाहवनीयं नीयमानमाच्छादनसाधनमपेक्षत इति, तत्रोच्यमानं उपरि समिद्धारणं दृष्टार्थतालाभादाच्छादनार्थं विज्ञायत इति, अधस्ताद्धारणस्य स्तुत्यर्थतयाऽनुवाद इति प्राप्ते, "स्रुग्दण्डेन समिधमुपसङ्गृह्य" इति श्रवणाद्दण्डप्रदेशे धार्यमाणया

चन्द्रिका

ज्ञासस्व" इत्यादेरपि विधित्वमस्त्विति निरस्तम् । प्रकृतस्य त्वत्पक्षे वस्तुतोऽन्यपरत्वात् । तद्वत्प्रकृते अप्राप्तेरभावाच्च । नाप्यध्ययनविधेरर्थज्ञानपर्यन्ततया तदाक्षिप्तो विचार इति युक्तम्, स्वमते तस्य नित्यत्वेन अर्थज्ञानपर्यन्तत्वायोगात् । यद्वा-स्वर्गकामाधिकरणपूर्व-

प्रकाशः

समिधा हविःप्रच्छादनायोगात्तद्धारणस्याऽदृष्टार्थत्वेनार्थवशादप्राप्तमुपरिधारणमत्र विधीयत इति सिद्धान्तितम् । एतच्छब्दार्थं द्वेधा विवृणोति—**प्रकृतस्येति** । "उपरि हि" इति वाक्यस्यान्यपरतया प्रतीतावपि न वस्तुतोऽन्यपरत्वम्, विचारवाक्यस्य तु वस्तुतो ब्रह्मपरत्वेन वैषम्यादित्यर्थः ॥ ननु "स्वाध्यायोऽध्येतव्यः" इत्यध्ययनविधेः स्वाध्यायाध्ययनेन फलवदर्थज्ञानं भावयेदित्यर्थज्ञानपर्यन्तत्वस्य निर्णीतत्वात्, स्वाध्यायस्यार्थज्ञानकरणत्वं विचारमन्तरा न सम्भवतीत्याक्षेपात् विचारस्यावश्यकतेत्याशङ्क्य, विवरणाभिमतं परिहारमाह—**नापीति** । **स्वमत** इति । अद्वैतिमते "स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च" इति सूत्रे तदीयभाष्ये तस्य नित्यत्वोक्तेरिति भावः ॥ एवं विचारवाक्यानामभ्युपेत्य मानत्वं गतिरुक्ता । अधुना सौत्रातश्शब्देन वेदप्रामाण्यस्यापि सूचनात्तदनुरोधेनाप्रामाण्येनैव पूर्वपक्षमाह—**यद्वेति** । षष्ठे "द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्धः" इत्याद्याधिकरणे "स्वर्गकामो यजेत" इत्यादिषु फलभोक्तृत्वरूपाधिकारोऽस्तुचत नेति विशये,

चन्द्रिका

पक्षे, विश्वजिदधिकरणपूर्वपक्षे च, फलाभावेन नियोज्याभावेन वा "स्वर्गकामो यजेत" "विश्वजिता यजेत" इत्यादिवाक्यमिवोक्तरीत्या विषयाद्यभावेनोपपत्तिविरोधात् "तद्विजिज्ञासस्व" इत्यादिकमप्रमाणम्।

प्रकाशः

प्रत्ययोपात्तभावनाया भाव्याकांक्षायामेकपदश्रुत्या धात्वर्थस्य भाव्यत्वेनान्वये, पदान्तरोपात्तस्वर्गस्य वाक्यप्रमाणकान्वययोगात्, लोकप्रयोगात्स्वर्गशब्दितस्य चन्दनादेः क्रियासाधनत्वोपपत्तेः, साधने चार्जनप्राप्तकामानुवादसम्भवाच्च याग एव भाव्यो न फलमिति, फलाभावादप्रमाणमेवमादीति प्राप्ते, पदश्रुतेरपि प्रबलया प्रत्ययश्रुत्या भावनाया विध्युपरोधात्तस्य च चेतनप्रवर्तनारूपस्य पुमर्थभाव्यतां विनाऽनुपपत्तेः, फले च कामनास्वारस्यात्स्वर्गशब्दस्य प्रतिवचनत्वेन चन्दनादिषु गौणत्वादत्र तद्ग्रहणे मानाभावाच्च, स्वर्ग एव भाव्यो न याग इति, अस्त्यधिकार इति सिद्धान्तितम्। तथा चतुर्थे "चोदनायां फलाश्रुतेः कर्ममात्रं विधीयेत न ह्यशब्दं प्रतीयते" इति तृतीयपादीयपञ्चमाधिकरणे "विश्वजिता यजेत" इत्येवमादिषु फलमस्ति नेति संशये, फलस्याश्रवणात् यागभाव्यताप्रतिपादनेन वाक्यस्य परिपूर्णतयाऽध्याहारानपेक्षणाच्च नास्ति फलमिति पुरुषप्रवृत्त्ययोगेन विध्यानर्थक्यादप्रमाणमेवमादीति प्राप्ते, चेतनप्रवर्तनात्मकविध्यवरुद्धायां भावनायामपुमर्थस्य यागस्यान्वययोगात्तदंशे वाक्यस्य साकाङ्क्षत्वात्तत्पूरणाय फलपदाध्याहारादस्ति विश्वजिदादीनां फलमिति सिद्धान्तितम्। अत्रोभयत्रापि यथाऽप्रामाण्यपर्यवसायी पूर्वपक्षः, तथा "तद्विजिज्ञासस्व" इत्यादावपी-

चन्द्रिका

अत एव, उक्तं विचारविधायकवाक्यानां गतिद्वयमभिप्रेत्य सुधायां 'त-

प्रकाशः

त्यर्थः । भट्टमते स्वर्गकामशब्दस्य फलसमर्पकता, प्राभाकरमते नियोज्यपुरुषसमर्पकतेत्युभयाभिप्रायेण "फलाभावेन नियोज्याभावेन च" इत्युक्तम् । विचारवाक्यानां गतिद्वयस्य टीकायामनुक्तेः कथमेवमित्यत आह—**अत एवेति** । 'उक्तम्' इति गतिद्वयविशेषणम् । 'अस्माभिः' इति शेषः । वाक्यानां प्रामाण्येपि लिङ्ङादीनामविधायकत्वमप्रामाण्यमेव वेत्युक्तं गतिद्वयमित्यर्थः । सुधावाक्यस्यायमाशयः—विचारवाक्यगतलिङ्ङादीनां चन्द्रिकोक्तदिशा विधिशक्तिप्रतिबन्धेनाविधायकत्वादिति वा, तत्र वक्ष्यमाणदिशा विषयाद्यभावेनाप्रामाण्येनाप्युपपत्तेरिति वेति । अत एव, तत्र पूर्वपक्षोपसंहारे—"तदेवं विषयाद्यनुबन्धविधुरत्वान्न जिज्ञासा कर्तव्या, तद्विधयोऽपि न प्रमाणम्" इत्युक्तमितिभावः । यद्वा—"श्रुत्यर्थस्य" इत्यादिवाक्योपादानमुपलक्षणम्, "तद्विधयोऽपि न प्रमाणम्" इत्यपि वाक्यं ग्राह्यम् । तथा चाद्यवाक्येनाद्या गतिः, उपसंहारवाक्येन द्वितीया गतिरुक्ता भवतीतिभावः । यद्वा—अन्त्यानुसारादाद्यस्यार्थद्वयमाद्यानुसारादन्त्यस्याप्यर्थद्वयम् । प्रामाण्यपक्षे 'तद्विधयो न प्रामाणं' न विचारविधायका इत्यर्थ इति भावः । यद्यपि "विना विचारं श्रुत्यर्थस्य" इत्याद्येव सुधावाक्यम् । तथापि "ननु तद्विजिज्ञासस्व" इति शङ्काग्रन्थे सैव श्रुतिरुपात्तेति प्रकृतत्वाद्बुद्धिसौकर्याय "तद्विजिज्ञासस्व इति श्रुत्यर्थस्य" इत्याद्यनुवादः कृत इति न दोषः ॥ ननु सुधा-

# ओं अथातो ब्रह्मजिज्ञासा ओम्

तत्त्वप्रकाशिका

न ब्रह्मजिज्ञासा कर्तव्येति नैतच्छास्त्रमारम्भणीयमिति । एवं प्राप्ते सिद्धान्तयत्सूत्रमुपन्यस्यति—**अथेति** । ग्रन्थादौ मङ्गलाचरणस्याव-

चन्द्रिका

द्विजिज्ञासस्व इति श्रुत्यर्थस्याद्याप्यनिर्णीतत्वेन' इत्युक्तम् । केचित्तु—"तद्विजिज्ञासस्व" इत्यादिकं जीवात्मनो विचारविधायकं, न तु ब्रह्मण इति सुधाभिप्राय इत्याहुः । तन्न, जीवस्यासन्दिग्धत्वप्रतिपादकन्यायविवरणविरोधस्य, विचारमात्राक्षेपकपूर्वपक्षानानुगुण्यस्य चोक्तत्वात् । तदेतदभिप्रेत्योक्तं न्यायविवरणे—"जीवव्यतिरिक्तेश्वराभावात् तस्य च स्वप्रकाशत्वात् न जिज्ञास्यता" इति । एवं प्राप्ते सिद्धान्तितं भगवता सूत्रकारेण, "ओं अथातो ब्रह्मजिज्ञासा"

प्रकाशः

वाक्यस्य नायं भावः, वक्ष्यमाणदिशा विषयाद्यभावेनाप्रामाण्येनाप्युपपत्त्या श्रुत्यर्थो न निर्णीत इति । किं तर्हि, जीवविचारविधायकत्वेनाप्युपपत्त्या, ब्रह्मविचारविधायकत्वेनानिर्णीतत्वादित्येव । उपसंहारवाक्यमपि, ब्रह्मविचारविधायकं नेत्यभिप्रायम् । अत एव सुधायां जन्माधिकरणे तथैव स्पष्टं विभावयिष्यतीत्युत्तानदृशां भ्रममुद्भट्टङ्क्य निरस्यति—**केचित्त्विति** । उक्तमेव पुनस्स्मारयति—**जीवस्येति** । अत्र टीकोक्तं पूर्वपक्षप्रमेयं न्यायविवरणानुसारीत्याह—**तदेतदिति** । सङ्गृह्णस्तु—

जीवान्यब्रह्मणोऽभावात्तस्य च स्वप्रभत्वतः ।
तज्ज्ञानान्मुक्तयभावाच्च जिज्ञासा नावकल्पते ॥

चन्द्रिका

इति । सिद्धान्तसङ्क्षेपस्तु—

जिज्ञास्यं ब्रह्मशब्देन गुणपूर्त्यभिधायिना ।
अपूर्णत्वेनानुभूताज्जीवाद्भिन्नं प्रतीयते ॥

जिज्ञास्यमेव ब्रह्म, "तद्विजिज्ञासस्व तद्ब्रह्म" इत्यादिश्रुतेः । श्रौत-ब्रह्मशब्दोक्तया गुणपूर्त्या अल्पगुणत्वेनानुभूयमानाज्जीवाद्भिन्नत्वेन स-

प्रकाशः

"तथाहि" इत्यादि "अल्पगुणत्वेनानुभवात्" इत्यन्त-टीकां न्यायविवरणपरां व्याख्यातुं, पूर्वपक्षोपमर्दकं सिद्धान्तप्रमेयं सङ्गृह्णाति—**जिज्ञास्यमिति** । 'जीवाद्भिन्नं प्रतीयते' इत्यन्वयः । यद्यपि ब्रह्मशब्दः पूर्णतामात्रवाची । तथापि योग्यतया गुणानामन्वयः । **अपूर्णत्वेनेति** । 'गुणैः' इति सम्बन्धः । साध्यहेत्वोरप्रतीतेः, कुत्रत्येन ब्रह्मशब्देनेत्यप्यप्रतीतेः, भिन्नत्वोक्तिरुपयोगादृष्टेश्च कारिकां व्याचष्टे—**जिज्ञास्यमेवेति** । श्रुत्युक्तापि जिज्ञासा न कार्या, असन्दिग्धत्वेनाविषयत्वादित्युक्तमित्यत आह—**श्रौतेति** । अयमर्थः—ब्रह्मशब्दो गुणपूर्तिनिमित्तकः सन्, तद्योग्यमपूर्वं वस्तु बोधयन्, जीवापूर्णत्वानुभवसाहित्येन जीवाद्भिन्नमेव बोधयति यदा, तदानीमेव अपूर्णत्वेन जीवं गृह्णन्ननुभवः ब्रह्मशब्दोक्ताद्गुणपरिपूर्णाद्वस्तुनो भिन्नमेव गृह्णाति,

शास्त्रगम्यपरेशानाद्भेदः स्वात्मन ईयते ।
अनुभूतिविरोधेन कथमेकत्वमुच्यते ॥

इति द्वितीयेऽनुव्याख्यानोक्तेः । एवं च श्रुतिसाक्षिभ्यां भेदे सिद्धे,

चन्द्रिका.

न्दिग्धत्वाच्च ॥

निर्दोषश्रुतिसाक्षिभ्यां प्रमिते ब्रह्मजीवयोः ।
गुणपूर्त्यल्पगुणते मिथ्येति च न युज्यते ॥

न केवलम् "अथ कस्मादुच्यते ब्रह्मेति बृहन्तो ह्यस्मिन् गुणाः" इति श्रुत्या गुणपूर्तिर्ब्रह्मशब्दार्थः, किन्तु ब्रह्मशब्दावयवशक्त्याऽपि । अपरिच्छेदे हि तस्याऽवयवशक्तिः परस्याऽपि सम्मता । गुणापरि-

प्रकाशः

तदुपजीविनः, जीवेशौभिन्नौ विरुद्धधर्मकत्वाज्ज्वलानलवदित्यनुमानस्यापि सम्भवात्प्रत्यक्षानुमानशब्दरूपप्रमाणत्रितयेन भेदावगतेः, जीवस्य स्वप्रकाशत्वेन सिद्धत्वेपि, तद्विन्नस्य ब्रह्मणः तदभावेनागुणत्वाष्टगुणत्वादिना वादिविप्रतिपत्त्या सन्दिग्धत्वाज्जिज्ञास्यमेव ब्रह्मेति ॥ ननु गुणपूर्त्यादिविरुद्धधर्मस्य मिथ्यात्वात्तेन मिथ्याभेदसिद्धावपि, वास्तवाभेदाप्रतिबन्धान्न विषयत्वं ब्रह्मण इत्याशङ्कानिवृत्त्यै प्राप्ता "न च ब्रह्मणि गुणाध्यासः" इत्यादिटीका । तदभिप्रायं सङ्गृह्णाति—**निर्दोषेति** । एतच्च श्रुतिसाक्षिणोर्विशेषणम् । एतच्चानादित्वेन ध्येयम् । 'श्रुतिः' ब्रह्मपदरूपा । "ब्रह्मजीवयोः" इत्युक्त्या टीका उपलक्षणमित्युक्तं भवति । टीकायां "अथ कस्मादुच्यते" इति श्रुतिमुदाहृत्य गुणपूर्णत्वं ब्रह्मशब्दार्थः इत्युक्तम् । सुधायामवयवशक्त्या । तद्विरुध्यतइत्याशङ्क्य द्वयमप्यभिप्रेतमित्याह—**नकेवलमिति** । "बृहि वृद्धौ" इति धातोः "बृंहेरम् नलोपश्च" इति मनिन्प्रत्यये अमागमे नलोपे च ब्रह्मेति रूपम् । वृद्धिश्च देशकालाभ्यामिव गुणतोऽपि ग्राह्या, सङ्को-

चन्द्रिका

च्छेदोऽपिचाऽपरिच्छेद एव । न च सङ्कोचे हेतुरस्ति । अन्यथा कालमात्राऽपरिच्छेदस्तस्याऽर्थः स्यात् । वक्ष्यते चैतत्सौत्रब्रह्मशब्दव्याख्यानावसरे । टीकायां तु, देशमात्रापरिच्छेदार्थ-

प्रकाशः

चकाभावादित्यर्थः । **अन्यथेति** । सङ्कोचकाऽभावेऽपि गुणापरिच्छेदस्य त्यागे इत्यर्थः । ननु देशकालाभ्यामिव वस्तुतोऽपरिच्छेद एवापरिच्छेदशब्दार्थः, न तु गुणापरिच्छेद इत्यत आह—**वक्ष्यत** इति । तर्हि "देशाद्यपरिच्छेदेन च जीवभेदसिद्धेः" इति टीकाविरोधइत्यत आह—**टीकायांत्विति** । अत्र यत्केन चित्प्रलपितं—सर्वेषां वेदान्तानां निर्विशेषजीवचैतन्यरूपे ब्रह्मणि तात्पर्यमाश्रित्य कृतस्य पूर्वपक्षस्य निरासाय, सर्ववेदान्तप्रतिभटत्वेन प्रयुक्तोऽयं ब्रह्मशब्दो गुणपूर्तिनिमित्तः सन्नपि, सर्वानपि वेदान्तानुपक्रमादिदृढन्यायनिर्णीतादद्वैततात्पर्यात् प्रच्यावयितुं कथं शक्नुयात् । प्रत्युत स्वयमेव तद्गुणभूतत्वात्तदनुगुणमेवाऽद्वैतवाद्यभिमतत्रिविधपरिच्छेदराहित्यरूपमर्थमवलम्बेत । अत एव "न स्थानतोपि" इति सूत्रे सुधायां—"सकलश्रुतिस्मृतीतिहासपुराणानां परमेश्वरस्याऽशेषदोषदूरत्वे महातात्पर्यात् 'कार्यकारणबद्धौतौ' इत्यादिवाक्यं भगवतो दोषित्वे मानं न" इत्युक्तमिति, तदयुक्तं, सकलवेदस्य विचारविधायकवाक्यानुगुण्येनैव अर्थस्य वाच्यतया, सर्वस्य तदधीनत्वेन राजाध्ययनविधिवत्तस्य प्राधान्येन तद्गततया विद्युच्चदेशगततया च श्रुतिरूपत्वाच्च ब्रह्मपदस्य बलवत्त्वात्, श्रुतेश्चाद्वैतबोधकवाक्येभ्यः तदनुगुणोपक्रमादिलिङ्गेभ्यश्च

प्रकाशः

प्राबल्यस्य "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये *परदौर्बल्यमर्थविप्रकर्षात्" इति पूर्वतन्त्रसूत्रे, "शब्दादेव प्रमितः" इति ब्रह्मसूत्रे च वक्ष्यमाणदिशा सिद्धत्वात्। एकस्याऽपि ब्रह्मशब्दस्य धर्मिसमर्पकतया उपजीव्यत्वाच्च। उक्तं च विष्णुतत्त्वविनिर्णये—

द्विविधं बलवत्त्वं च बहुत्वाच्च स्वभावतः।
तयोस्स्वभावो बलवान् उपजीव्यादिकश्च सः॥ इति।

वस्त्वभेदो ब्रह्मशब्दार्थइत्यस्याऽग्रे निरसिष्यमाणत्वेन निरवकाशत्वाच्च। अद्वैतवाक्यानां तदनुगुणोपक्रमादीनां च सावकाशत्वं चाऽन्यत्र न्यायामृतादौ स्पष्टम्। किञ्च विचारविधायकनानावाक्येषु ओम्ब्रह्मात्मनारायणादियौगिकशब्दानां सहस्रशस्सत्त्वेन ब्रह्मपदस्य तादृशानेकश्रुतिसम्प्रतीतत्वाच्च। एकैकस्याऽपि शब्दस्य "नारायणं महाज्ञेयं" "नारायणोऽसौ परमोविचिन्त्यः" "तद्विजिज्ञासस्व तद्ब्रह्म" "तपसा ब्रह्म विजिज्ञासस्व" इत्यादिविचारविधायकनानावाक्येषु बहुशः श्रवणेन प्रत्येकं बाहुल्या च्च। न ह्येकस्मिन् सूत्रे एकमेवोदाहरणं, विश्वतोमुखत्वभङ्गप्रसङ्गात्। वक्ष्यति च "युक्तश्चन्तरसूचकत्वात्" इति। अपि च गुणपूर्त्यर्थकेन ब्रह्मपदेन विषयसिद्धिं वदता सूत्रकृता श्रुत्यनुभवानुमानानां भेदप्रमापकत्वस्य प्रागुक्तदिशोक्तत्वाच्च। प्रत्यक्षानुभवस्य च न वचनसहस्रमपि बाधकमित्यन्यत्र विस्तरइति यत्किञ्चिदेतदित्यास्तां विस्तरः। विस्तरस्तु गुरुपादकृतकण्टकोद्धारे द्रष्टव्यः।

*'पारदौर्बल्यम्' इति मुद्रितमीमांसापुस्तकेषु पाठः.

चन्द्रिका

त्वेऽपि तावतैवाणोर्जीवाद्वेदसिद्धेस्तदुपेत्योक्तम् । न च "मन्तव्यः" इत्यादेः "विष्णुरुपांशु यष्टव्यः" इत्यादिवदविधित्वमिति वाच्यम्, तत्र जामितादोषोपक्रमतन्निर्हरणान्तैकवाक्यमध्यस्थानां विष्ण्वादिवाक्यानां विधित्वे प्रतीतैकवाक्यताभङ्गादेरिव, प्रकृते बाधकस्याऽभावात् । अन्यथा "स्वाध्यायोऽध्येतव्यः" इत्यत्राप्यर्हार्थत्वप्रसङ्गात् । प्रयाजादिवाक्यस्य स्वयमवान्तरवाक्यतया विधायकस्याऽपि पुनर्दर्शपू-

प्रकाशः

एतेन—विषयाद्यभावेनोपपत्तिविरोधात् "तद्विजिज्ञासस्व" इत्यादिकमप्रमाणमिति प्रागुक्तं निरस्तम् । विषयसिद्धेरुक्तत्वात्तदुक्तचैव फलाधिकारिसम्बन्धानां सत्त्वलाभाच्चेति । ननुप्रामाण्येऽपि तव्यादेरविधायकत्वमुक्तमित्यतस्तदुद्धरति—**न च मन्तव्य इत्यादेरिति** । "जामिर्वा एतद्यज्ञस्य क्रियते" इत्यादिवाक्ये जामितादोषोपक्रमात्, "अग्नीषोमावुपांशुयष्टव्यावजामित्वाय" इत्यन्ते जामितादोषनिर्हरणस्योपसंहाराच्च तदन्तमेकं वाक्यमिति निर्णीतत्वेन, मध्ये विष्ण्वादिवाक्यानां विधायकत्वे प्रतीतैकवाक्यता भज्येत । न ह्येवं प्रकृते बाधकमस्तीति भावः । **अन्यथेति** । बाधकाभावेऽप्यर्हार्थत्वे । नन्वत्राऽपि सर्वस्य ब्रह्मपरतया प्रतीतैकवाक्यताभङ्ग एव बाधकइत्यतः, दृष्टान्तपूर्वमेकवाक्यतामाह—**प्रयाजादीति** । तृतीये "असंयुक्तं प्रकरणादितिकर्तव्यताऽर्थित्वात्" इति तृतीयपादीयचतुर्थाधिकरणे दर्शपूर्णमासयोः श्रुतानां समिदादिपञ्चप्रयाजानां परस्पराकाङ्क्षादिरूपेण प्रकरणेन विनियोगोऽस्त्युतनेति विशये, स्वर्गकामस्य दर्शपूर्णमासौ कर्तव्यावित्यर्थपर्यवसा-

चन्द्रिका

र्णमासादिवाक्येन वाक्यैकवाक्यतावत्प्रकृतेऽपि पृथग्विधायकस्यापि ब्रह्मपरवाक्येन वाक्यैकवाक्यतोपपत्तेश्च । "यदभिधारयेत्" इत्यादौ "अभिधार्यास्त्रैयम्बकानाभिधार्या इति मीमांसन्ते" इति मीमांसासमभिव्याहारेणेव "यस्योभयं हविरार्तिमार्छेत्" इत्यादौ निमित्तत्वाभिधायक-

प्रकाशः

नान्निरपेक्षं प्रधानवाक्यं "समिधो यजति" इत्यादेः फलाकाङ्क्षायामपि "सस्वर्गस्स्यात्" इति न्यायेन तच्छाभान्नैराकाङ्क्ष्याच्च न प्रकरणेन विनियोग इति प्राप्ते, यदि दर्शपूर्णमासौ कर्तव्यौ इति वाक्यार्थः स्यात्, तदा यागक्रियाया निर्ज्ञातप्रकारत्वात् स्यान्नैराकाङ्क्ष्यम् । दर्शपूर्णमासाभ्यां स्वर्गः कार्य इति हि वाक्यार्थः । तत्र न ज्ञायते केन प्रकारेण ताभ्यां स्वर्गः कार्य इति । तेनास्तीतिकर्तव्यताकाङ्क्षा, प्रयाजादेस्तु फलाकाङ्क्षा स्पष्टैवेति, साकाङ्क्षयोः सन्निहितयोः अप्रत्यक्षैकवाक्यत्वमात्रकल्पनं फलान्तरकल्पनाच्छ्रीयं । अतः प्रकरणेन समिदादीनां विनियोग इति सिद्धान्तितम् । अत्र यथा प्रधानवाक्यैकवाक्यता अङ्गवाक्यानां विधायकत्वाविरोधिनी, तथा ब्रह्मपरवाक्यैकवाक्यताऽपि न विचारविधित्वविरोधिनीत्यर्थः । मोक्षहेतुब्रह्मोत्कर्षज्ञानाय प्रवृत्तानामखिलवेदानां विचारापेक्षणाद्विचारविधिवाक्यैश्च ब्रह्मज्ञानोद्देशेन तत्करणवेदानुग्राहकतया विचारविधानाद्ब्रह्मपरवाक्यैकवाक्यत्वं द्रष्टव्यम् । यदपि लिङ्गादेरविधायकत्वमुक्तं, तदप्युद्धरति । **यदभिधारयेदिति** । व्याख्यातप्रायमेतत् । **यस्योभयमिति** । द्वितीये "विधिमन्त्रयोरैकार्थ्यमेकशब्दत्वात्" इति आद्यपादीयसप्तमा-

चन्द्रिका

यच्छब्दादिनेव, "तद्विजिज्ञासस्व" इत्यादौ केनचिद्विधिशक्तिप्रतिबन्धाभावाच्च। "आत्मन्येवाऽऽत्मानं पश्येत्" इत्यादावपि दर्शनस्य लक्षितस्य विचारस्य वा विधिसम्भवाच्च। सति बाधके विधावपि लक्ष-

प्रकाशः

धिकरणे "यस्योभयं हविरार्तिमार्च्छेत्" "ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्" इत्यादिषु निमित्तप्रतिपादनेनाऽऽख्यातान्तरैकवाक्यतामागतेष्वाख्यातेषु विधायकत्वमस्त्युत नेति सन्देहे, प्रसिद्धविधायकाख्यातैकरूप्याद्विधायकत्वमिति प्राप्ते, निमित्तत्वावगमकेन यच्छब्देन विधिशक्तिप्रतिबन्धान्न विधायकत्वमिति सिद्धान्तितम्। अत्रोभयत्र यथा 'मीमांसन्ते' 'यस्य' इति च विधिशक्तिप्रतिबन्धनपरशब्दश्रवणं दृश्यते, न तथा "तद्विजिज्ञासस्व" इत्यादावित्यर्थः। यद्यपि "अग्नीदग्नीन्विहर" इत्यादाविवाभिमुखानभिमुखसाधारणविधिविरुद्धस्वभावेनाभिमुखमात्रविषयेण मन्त्रेण न विधिशक्तिप्रतिबन्धो ज्ञायते. तथाऽपि क्रतुप्रयोगमध्यपातिषु प्रैषेष्वेव प्रतिबन्धकत्वं, प्रकृते तु पुराकल्पस्वरूपार्थवादेन विध्युन्नयनान्न कश्चित्प्रतिबन्ध इति भावः। **दर्शनस्येति**। "पत्न्यवेक्षितमाज्यं भवति" "विदुषा कर्म कर्तव्यम्" "तस्मात्पश्येत नित्यशः" इत्यादौ ज्ञानविधिदर्शनान्न प्रागुक्तदोषः। समर्थितं चैतन्न्यायामृते तृतीयपरिच्छेदे इति भावः। **लक्षितस्येति**। ननु 'विधौ न लक्षणा' इत्युक्तमित्यत आह—**सतीति**। अत एव "सोमेन यजेत" इत्यादौ सोमेन यागं, यागेन स्वर्गं कुर्यादिति वैयधिकरण्येनान्वये उद्देश्यत्वोपादेयत्वानुवाद्यत्वविधेयंत्वप्राधान्यगुणत्वरूपविरुद्ध-

चन्द्रिका

णायास्वीकृतत्वाच्च । अध्ययनविधेरपि विचाराक्षेपकतायाः विचारविधेरपूर्वविधित्वादेश्च अन्यत्रोक्तत्वाच्चेति । तदेतदभिप्रेत्योक्तं न्यायविवरणे—"तद्विजिज्ञासस्व, तद्ब्रह्मेति ब्रह्मशब्देन गुणपूर्णत्वोक्तेर्नानुभवसिद्धाल्पगुणजीवाभेदः" इति ॥ नन्वत्रानुव्याख्याने "तत्र तारार्थमूलत्वम्" इत्योङ्कारस्य सूत्रादित्वमुक्त्वा "ओतत्ववाची ह्योङ्कारः" इति स व्याख्यातः । सुधायाञ्च—'स्तवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते' इति श्रुतिबलात् प्रतिसूत्रं ब्रह्मविद्यात्वादा-

प्रकाशः

त्रिकद्वयापत्तिरूपबाधकेन सोमवता यागेनेति सामानाधिकरण्ये नान्वयाय मत्वर्थलक्षणाया अङ्गीकृतत्वात्, अन्वयानुपपत्तेस्तात्पर्यानुपपत्तेर्वा लक्षणाबीजस्य विध्यविधिसाधारण्याच्च, शाबरवचनस्याप्यनुवादकमुख्यार्थत्वाय विधौ लक्षणा न न्याय्येत्येवंपरत्वादिति भावः ॥ यदप्यध्ययनविधेर्नित्यत्वेन विचारानाक्षेपकत्वं, विचारस्य ज्ञानहेतुत्वप्राप्तया विध्यनपेक्षत्वमुक्तम्, तद्व्यमुद्धरति—**अध्ययनविधेरिति** । न्यायामृते तृतीयपरिच्छेदे उक्तत्वादित्यर्थः। विस्तरभयान्नास्माभिरपि लिख्यत इति तत्रैवानुसन्धेयम् । उक्तं सिद्धान्तटीकाप्रमेयं न्यायविवरणमूलमित्याह—**तदेतदिति** । व्याख्यातप्रायमेतत् ॥ एवं सूत्राभिप्रेतं सिद्धान्तं समर्थ्येदानीं सूत्रावयवभूतान्योङ्कारादीनि पञ्च पदानि व्याचिकीर्षुः, ओङ्कारं तावद्व्याकर्तुं तस्यादित्वे सम्मतिं वदन्, सुधाशयं स्फुटीचिकीर्षुस्तद्ग्रन्थमाक्षेप्तुमनुवदति—**नान्वयादिना । सुधायाञ्चेति ।**

चन्द्रिका

द्यन्तयोरोङ्कारस्योहः कार्यः । न चोह्यमानं वाक्यात् पृथक्, मन्त्रेष्वप्यूह्यमानस्य तदनवयवत्वप्रसङ्गात् । ओङ्कारार्थस्य प्रथमसूत्रवाक्यार्थे समन्वयेनावयवत्वनिश्चयाच्च । असंहितया निर्देशस्तु सर्वसूत्रेष्वनुगतिसूचनार्थः' इत्युक्तम् । तत्कथं, 'सूर्याय' इत्यूहं प्रति 'अग्नये' इत्यादेरिव, प्रकृते स्थानिनोऽभावात् । यथोक्तम्—

प्रकाशः

सर्वत्रानुगतत्वेन पृथगोंक्रियतेऽखिलैः ।

इत्येतद्व्याख्यावसर इति भावः । सुधावाक्यानां विक्षिप्तानां मङ्क्षेण क्वचिच्छब्दतः क्वचिदर्थतोऽनुवादोऽयम् । अवयवत्वे युक्तचन्तरमाह—**ओङ्कारार्थस्येति** । नन्ववयवत्वे अथशब्दवत् संहितया निर्देशस्स्यादित्यत आह—**असंहितयेति** । विश्लिष्टतयेत्यर्थः । "अङ्गस्य" इति पाणिनिसूत्रवदिति भावः । **सूर्यायेति** । नवमे "प्रकृतौ यथोत्पत्तिवचनमर्थानां" इति तृतीयपादीयाद्याधिकरणे दर्शपूर्णमासयोरश्रुतः "अग्नये जुष्टं निर्वपामि" इति मन्त्रः "सौर्यं चरुं निर्वपेत्" इति विकृतौ चोदकप्राप्तः, तत्राग्निपदस्थाने सूर्यपदप्रक्षेपेणोहितव्य उत नेति सन्देहे, यथाऽवस्थितस्वरूपस्यैव मन्त्रस्य चोदकेन प्रापितत्वादग्निपदेनैन्द्रीवद्गुणवृत्त्या सूर्यप्रकाशनसम्भवान्नोह इति प्राप्ते, प्रकृतावग्निशब्दो न स्वरूपविवक्षयाऽऽम्नातोऽदृष्टार्थत्वापत्तेः । किन्तु देवतापदविवक्षया, दृष्टार्थतालाभात् । अतस्तेनैव रूपेण विकृतौ चोदकेन प्रापणात्, अग्निपदस्य वैकृतदेवतापरत्वाभावात्, तदुद्धारेण सूर्यपदप्रक्षेपेण चोहितव्यो मन्त्रः । ऐन्द्री तु स्वरू-

चन्द्रिका

प्रकृतस्थानपतितपदार्थान्तरकार्यतः ।
ऊहः प्रयोगो विकृत ऊह्यमानतयोदितः ॥

इति । न चोहशब्देन अध्याहारो लक्ष्यत इतिवाच्यम्, "संयज्ञपतिरा-

प्रकाशः

पेण गार्हपत्ये विनियुक्तेति वैषम्यमिति सिद्धान्तितम् । तत्र यथा सौर्ययागे चोदकप्राप्ते "देवस्य त्वा" इति मन्त्रे 'अग्नये' इति पदं स्थानिरूपं विद्यते, न तु तथा प्रतिसूत्रमोङ्कारोहस्य स्थान्यस्तीत्यर्थः । 'इत्यादेः' इत्यादिपदेन 'नीवाराणाम्' इत्यूहं प्रति "व्रीहीणां मेधसुमनस्यमानः" इति मन्त्रे 'व्रीहीणां' इत्यस्येवेति ग्राह्यम् । **यथोक्तमिति** । तन्त्रवार्तिके इति भावः । प्राकृतः प्रकृतियागीयो यः पदार्थः व्रीह्यग्निलक्षणद्रव्यदेवतारूपः, तस्य स्थाने पतितं यत्पदार्थान्तरं विकृतियागसम्बन्धि नीवारसूर्यलक्षणद्रव्यदेवतारूपं, तस्य यत्कार्यं प्राकृतकार्यतुल्यं होमादि, तदर्थं, विकृतो यः प्रयोगः 'सूर्याय' इत्यादिरूपः, स ऊह इत्युच्यते। कुतः, 'ऊह्यमानतया' ऊहविषयत्वादित्यर्थः । **संयज्ञपतिरिति** । द्वितीये "व्यवायान्नानुषज्येत" इत्याद्यपादीयान्तिमाधिकरणे "संते प्राणो वायुना गच्छताम्, सं यजत्रैरङ्गानि, सं यज्ञपतिराशिषा" इति मन्त्रेषु 'गच्छताम्' इत्यस्य "सं यजत्रैरङ्गानि" इत्यत्र वचनभेदादननुषङ्गे, "सं यज्ञपतिराशिषा" इत्यत्रापि किं तस्यैवानुषङ्गः उताध्याहार इति सन्देहे, बुद्धिविपरिवृत्तेः अनुषङ्गः

चन्द्रिका

शिषा, इषे त्वा" इत्यादाविव साकाङ्क्षत्वाभावात्। किञ्च मन्त्रेष्वप्यूह्यमा-

प्रकाशः

इति प्राप्ते, "सं यजत्रैरङ्गानि" इत्यत्र असम्बन्धेन बुद्धिविपरिवृत्तिभङ्गादनुषङ्गायोगे साकाङ्क्षत्वादध्याहार इति सिद्धान्तितम्। तथा तत्रैवाद्यपादे "समेषु वाक्यभेदस्स्यात्" इति षोडशेऽधिकरणे "इषे त्वोर्जे त्वा" इत्यादिषु किमेकमन्त्रत्वमुत मन्त्रभेद इति संशयेऽनुष्टेयार्थाप्रकाशनाददृष्टार्थत्वे चानेकादृष्टकल्पनापत्तेर्मन्त्रैक्यमिति प्राप्ते, 'इषे त्वा' इति 'छिनति' 'ऊर्जे त्वा' 'इति 'अनुमार्ष्टि' इत्यादिना शाखाच्छेदनादिषु करणत्वेन विनियोगादर्थप्रकाशनरूपक्रियानिर्वर्तनेनैव करणत्वस्य निर्वाह्यत्वेन छेदनादिकं प्रति साकाङ्क्षत्वात्, 'छिनद्मि' इत्यध्याहारेण वाक्यं पूरणीयमिति मन्त्रभेद इति सिद्धान्तितम्। अत्रोभयत्र क्रियापदाश्रवणात्तदाकाङ्क्षायामध्याहारः स्वीकृतः, नैवं मूत्रेष्वाकाङ्क्षेति, अध्याहारो न युक्त इत्यर्थः। **ऊहेत्यादि**। उक्तः ऊहः' 'प्रवरः' ऋचार्षेयादिः। 'नामधेयं' देवदत्तादि। **द्वितीय इति**। द्वितीये आद्यपादे "अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभागस्स्यात्" इति दशमाधिकरणे, ऊहप्रवरनामधेयानां मन्त्रत्वमस्युत नेति संशये, मन्त्रैकवाक्यत्वेन तन्मध्यनिवेशान्मन्त्रकार्यकरत्वाच्च मन्त्रत्वमिति प्राप्ते, "रथघोषेण माहेन्द्रस्तोत्रमुपाकरोति" इत्यादौ, रथघोषादेरमन्त्रत्वेऽपि मन्त्रकार्यकरत्वेनानैकान्त्यात्, मन्त्रत्वस्याध्येतृप्रसिद्ध्यधीनत्वात्तस्याश्चाध्ययनकाले समाम्नातविषयत्वेन मन्त्रैकवाक्यताया अप्रयोजकत्वादमन्त्रत्वमिति सि-

चन्द्रिका

नस्य तदनवयवत्वमिष्टमेव, ऊहप्रवरनामधेयानाममन्त्रत्वस्य द्वितीये सिद्धान्तितत्वात् । अपि च—ओतत्वस्य न वाक्यार्थेऽन्वयः । ब्रह्मणश्शब्दत उपसर्जनस्य पदान्तरोपात्तौतत्वान्वयानुपपत्तेः । अपि च—अर्थप्रतीत्यर्थत्वे

प्रकाशः

द्धान्तितत्वादित्यर्थः । यद्यप्यत्रोह्यमानस्य मन्त्रैकवाक्यतया तदवयवत्वमभ्युपेत्यैव तदपराधस्य "यदक्तो यज्ञभ्रेषमागच्छेद्यद्यजुष्टो यज्ञभ्रेषमागच्छेत्" इत्यादिमन्त्रवैकल्यप्रायश्चित्तानापादकत्वसिद्ध्यर्थममन्त्रत्वं व्यवस्थापितम्, सुधायां तु तदनवयवत्वमेवापादितम्, न त्वमन्त्रत्वमपीति नेष्टापादनं युक्तम् । तथाऽप्यमन्त्रत्वेन तदनवयवत्वं सुधावाक्याभिप्रेतमिति शङ्कितुर्हृदयमिति ध्येयम् । यदप्युक्तं "ओङ्कारार्थस्य प्रथमसूत्रवाक्यार्थे समन्वयेन" इत्यादि, तदपि नेत्याह—**अपि चेति** । अधिकारानन्तरं फलवत्त्वाद्ब्रह्मविचारः कार्य इति वाक्यार्थे ओतत्वस्यान्वयाप्रतीतेरित्यर्थः । ननु वाक्यार्थे प्रतियोगिसमर्पकत्वेनान्वयायोगेऽपि, ओतं यद्ब्रह्म तद्विचार इति ब्रह्मविशेषणत्वं स्यादित्यत आह—**ब्रह्मण इति** । 'उपसर्जनस्य' जिज्ञासाविशेषणस्य । यदि 'ओंब्रह्मजिज्ञासा' इति समस्तं स्यात्, यदि वा ब्रह्मणो जिज्ञासा इति ब्रह्मपदं व्यस्तं स्यात्तदौतत्वस्य कथञ्चिद्ब्रह्मपदार्थान्वयः स्यात्, न चैवमस्तीति भावः । यदपि "स्तवत्यनोङ्कृतं" इत्यादि, तदपि विरुध्यत इत्याह—**अपि चेति** । यच्चोक्तं "असंहितया निर्देशस्तु सर्वसूत्रेष्व-

चन्द्रिका

आदावेव प्रयोगेण चरितार्थत्वादन्ते प्रयोगवैयर्थ्यम् । किञ्च—ओङ्कारस्योत्तरत्रानुषङ्गेऽनुषक्तस्य "ङ्याप्प्रातिपदिकात्" इत्यादेः, "अच्छिद्रेण पवित्रेण" इत्यादेः, "तनूर्वाषिष्ठा" इत्यादेश्च तत्र तत्रान्वयदर्शनात् प्रकृतेऽप्योङ्कारार्थस्य जन्मादिसूत्रेष्वन्वयो वाच्यः ।

प्रकाशः

नुषङ्गसूचनार्थः" इति, तच्च नेत्याह—**किञ्चेति** । "**ङ्याप्प्रातिपदिकात्**" **इत्यादेरिति** । व्याकरणे चतुर्थाध्याये "स्वौजसमौट्छष्टाभ्यां भिस् ङे भ्यां भ्यस्" इत्याद्युत्तरसूत्रे अनुवृत्तस्य "ङ्याप्प्रातिपदिकात्" इत्यस्य ङ्यन्तादाबन्तात्प्रातिपादिकाच्च स्वादयः प्रत्ययाः भवन्तीत्यर्थो यथा दृश्यते इत्यर्थः । **अच्छिद्रेणेति** । द्वितीयाद्यपादे "**सर्वेषु**" इत्युपान्त्याधिकरणे "चित्पतिस्त्वा पुनातु, वाक्पतिस्त्वा पुनातु, देवस्त्वा सविता पुनातु" इति मन्त्रत्रयानन्तरमाम्नातः "अच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभिः" इत्ययं शेषः किं पूर्वयोरनुषज्यते किं वा परस्यैव शेष इति संशये, शेषस्याव्यवहितसम्बन्धमात्रेण नैराकांक्ष्यात्, पूर्वयोश्च स्वत एव आकाङ्क्षाविरहात् नानुषङ्ग इति प्राप्ते, पुनातुशब्दैकवाक्यतामापन्नस्य 'अच्छिद्रेण' इत्यादेः पवनक्रियाकरणपवित्रद्वारेण पवनक्रियाप्रकाशनार्थत्वात्, तस्या एव पूर्वमन्त्राभ्यामपि प्रकाश्यत्वात्, प्रधानवशेनानुकर्षस्य न्याय्यत्वादनुषङ्ग इति सिद्धान्तितम् । तथा तत्रैव "अनुषङ्गो वाक्यसमाप्तिः सर्वेषु तुल्ययोगित्वात्" इति सप्तदशेऽधिकरणे "या ते अग्नेऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो

चन्द्रिका

स चाशक्य इति । उच्यते—नात्रोहशब्दो "मन्त्रसामसंस्कारो-

प्रकाशः

अपावधीं त्वेषं वचो अपावधीत्स्वाहा । या ते अग्ने रजाशया या ते अग्ने हराशया" इति ज्योतिष्टोमे श्रुतं मन्त्रत्रयमुदाहृत्य, तत्रोत्तरयोः लौकिकः शेषोऽध्याहार्यः किं वा पूर्वमन्त्रान्तरपठितः "तनूर्वर्षिष्ठा" इत्यादिरनुषञ्जनीय इति संशये, समाम्नायेन पूर्वत्रैव निबद्धस्य शेषस्यान्यत्र नयनायोगात्, सकृदाम्नातस्य सर्वार्थत्वानुपपत्तेः, आनन्तर्यदेशविशेषाभ्यां विशेषग्रहणेन पूर्वशेषत्वावसायादनुषङ्गायोगे लौकिकस्य क्वाप्यनिबद्धत्वेन सर्वार्थत्वादध्याहार इति प्राप्ते, सर्वानन्तर्येण सकृत्पठितुमशक्यो बुद्धिविपरिवृत्तिमात्रेण साकाङ्क्षैः सर्वैस्सम्बन्धसिद्धेः पुनःपुनरनाम्नातोऽयं शेषस्सर्वार्थे नैवाम्नात इत्यवगमादनुषङ्गो न लौकिकस्याध्याहार इति सिद्धान्तितम् । अत्र यथा "अच्छिद्रेण पवित्रेण" इत्यादेः पूर्वत्रानुषक्तस्य "चित्पतिस्त्वा पुनातु" इति पवनक्रियायां पवित्ररूपकरणसमर्पकतया, "तनूर्वर्षिष्ठा" इत्यादेश्च पश्चादनुषक्तस्य रजाशयाहराशयाशब्दितयोः रजतमयत्वहिरण्मयत्वविशेषणयोः तनूलक्षणविशेष्यार्पकतयाऽन्वयो दृष्टः, तथा "जन्माद्यस्य" इत्यादिसूत्रेष्वोङ्कारस्यान्वयो वाच्य इत्यर्थः ॥ एवं पूर्ववाद्युक्तान् षडपि दोषानुद्दिधीर्षुः, यत्तावदुक्तं प्राकृतस्थानिनोऽभावान्नोहत्वमिति, तदुद्धरति—**नात्रोहेति** । "अग्नये जुष्टं" इत्यादौ "सूर्याय जुष्टं" इत्यादिः मन्त्रोहः । "यद्योन्यां तदुत्तरयोर्गायति" इति "कवतीषु रथन्तरं गायति"

चन्द्रिका

हः" इत्यादाविव कर्मव्युत्पत्त्या विकारपरः, किन्तु "अध्याहार स्तर्क ऊहः" इति प्रसिद्धेः भावव्युत्पत्त्याऽध्याहारवाचकः । अत एव टुप्टीकायां नवमे "ऊहो नाम तर्कणा । सा चैकरूपा मन्त्रसामसंस्कारेषु क्रियमाणा" इत्यादिना तर्क एव मुख्य ऊहः, तद्विषयत्वान्मन्त्रादेरन्यथात्वमप्यूह इत्युक्तम् । तत्र च "स्रवत्यनोङ्कृतं" इति श्रुतिरेव मानम् । यद्यप्यत्र स्रवणविशरणपरिहाररूपादृष्टफलार्थत्वं श्रुतम् । तथाऽपि दृष्टस्यापेक्षितस्य अर्थप्रत्य-

प्रकाशः

इत्यादिषु प्रकृतिग्रन्थे योनावाम्रातानां साम्रामुत्तरादिषु तत्तदानुगुण्येनान्यथागानं सामोहः । व्रीहिषु श्रुतानामवहननादीनां वैकृतेषु नीवारादिषु औचित्येनानुष्ठानं संस्कारोहः, इत्येतेषां निर्देशके "मन्त्रसामसंस्कारोहः" इत्यादौ मीमांसकव्यवहारे ऊह्यत इति व्युत्पत्त्या यथा प्रयोगविकारपर ऊहशब्दः, न तथा प्रकृते, "ऊह वितर्के" इत्यस्माद्धातोर्भावे घञि लघूपधत्वाभावेन गुणाभावे चोह इति सिद्धेरध्याहारपर इत्यर्थः । वार्तिककृत्सम्मतिमाह—**अत एवेति** । यदत्रोक्तं साकाङ्क्षत्वाभावादध्याहारे न मानमिति, तत्राह—**तत्र चेति** । अध्याहारे इत्यर्थः । ओङ्कारानुच्चारणे निन्दाश्रवणात्तदन्यथाऽनुपपत्त्या तदुच्चारणविधेरुन्नयनादाकाङ्क्षया अभावेऽपि विधिबलादध्याहार इति भावः । नन्वेवमदृष्टार्थतैव स्यान्नार्थप्रत्यायकत्वम्, तथा च सुधाविरोध इत्याशङ्क्यामुपक्षिप्य निरस्यति—**यद्यपीति** । **दृष्टस्येति** । ओङ्कारादोतत्वरूपार्थप्रत्यय-

चन्द्रिका.

यस्यापि फलत्वसम्भवान्न तत्त्यागः । एवं च स्विष्टकृदादिवदो-

प्रकाशः

दर्शनादिति भावः । **अपेक्षितस्येति** । "ओमित्येतदक्षरम्" इत्यादिवक्ष्यमाणदिशेति भावः । **स्विष्टकृदिति** । चतुर्थे "आश्रयिष्वविशेषेण भावोऽर्थः प्रतीयेत" इत्याद्यपादीयसप्तमाधिकरणे स्विष्टकृदुत्तमप्रयाजपशुपुरोडाशादीनां दृष्टार्थत्वमेवोतादृष्टार्थत्वमपीति विशये, प्रकृतदेवतास्मरणेन द्रव्यप्रतिपत्त्या च दृष्टार्थतालाभादेकेन प्रयोजनेन नैराकाङ्क्ष्यान्नादृष्टार्थत्वकल्पनावकाश इति प्राप्ते, मन्त्रप्रक्षेपांशयोः दृष्टार्थत्वेऽपि, त्यागांशस्य दृष्टप्रयोजनाभावाददृष्टार्थत्वमावश्यकमित्यंशभेदेनोभयार्थत्वमिति सिद्धान्तितम् । तद्वदोङ्कारोच्चारणस्यापि श्रुतिबलात्सामर्थ्याच्चोभयार्थत्वमित्यर्थः । ननु स्विष्टकृदादौ प्रक्षेपत्यागाद्यवच्छेदकभेदेनोभयार्थत्वं दृष्टम् । नैवमोङ्कारोच्चारणेऽवच्छेदकभेदः सम्भवति, येनोभयार्थत्वं स्यात् । किञ्च —यत्रादृष्टार्थत्वं कल्प्यं, तत्र दृष्टार्थत्वे सम्भवति नादृष्टार्थत्वमिष्यते, यथा "स्वाध्यायोऽध्येतव्यः" इत्यादौ । यत्र मानान्तरवशाददृष्टार्थत्वमावश्यकम्, तत्र सम्भवदपेक्षितमपि दृष्टार्थत्वं नाद्रियते, यथा "स्तौति शंसति" इत्यादौ । अत एव द्वितीयाद्यपादे "स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवताभिधानत्वात्" इति षष्ठे अधिकरणे तथैवोक्तम् । तथा च प्रकृते "स्रवत्यनोङ्कृतम्" इति श्रुत्याऽदृष्टार्थत्वे आवश्यके प्रत्यायनार्थत्वानवकाशः । अतः कथमोङ्कारोच्चारणस्योभयार्थत्वमिति चेदुच्यते ।

चन्द्रिका

ङ्कारोच्चारणमुभयार्थम् । अत एव नान्ते प्रयोगवैयर्थ्यम् । नाप्युत्तरसूत्रेष्वोङ्कारार्थस्य अनन्वयदोषः, तत्र दृष्टासम्भवेन केवलादृष्टार्थत्वोपपत्तेः । न चैकस्यैकत्रोच्चारणे दृष्टार्थे अन्यत्रापि तथात्वनियमः, मन्त्राणां प्रयोगकाले उच्चारणस्य दृष्टार्थत्वेऽपि जपकाले

प्रकाशः

"स्तौति शंसति" इत्यादौ देवताप्रकाशनरूपदृष्टप्रयोजनस्वीकारे गुणसम्बन्धाभिधानलक्षणस्तुतिरूपं विहन्येत इति श्रुतिबाधस्स्यात् । अतस्तद्बलाददृष्टार्थत्वं युक्तम् । उक्तं च—

सत्यं दृष्टार्थता युक्ता श्रुतिश्चेन्न विरुध्यते ।
देवतास्मरणार्थत्वे स्तुतिरूपं विहन्यते ॥ इति ।

प्रकृते तु दृष्टार्थत्वाभ्युपगमे न काचिच्छ्रुतिर्बाध्यते । न च सामर्थ्यस्य दौर्बल्यमिति युक्तम् । न हि सूत्रेष्वाद्यन्तयोरोङ्कारमुच्चारयेदिति प्रत्यक्षो विधिरस्ति, येन दौर्बल्यं सामर्थ्यस्य स्यात्, किन्त्वनुच्चारणे निन्दाश्रवणान्यथाऽनुपपत्त्योङ्कारोच्चारणविधिरुन्नेयः । सामर्थ्यं तु प्रत्यक्षम् । अतः श्रुतिसामर्थ्ययोस्तुल्यबलत्वादविरोधाच्चोभयार्थत्वम् । स्विष्टकृदाद्युदाहरणं तूभयार्थत्वसम्भवमात्र इति न कोपि दोषः ॥ यच्चोक्तं अर्थप्रतीत्यर्थत्वे अन्ते प्रयोगवैयर्थ्यमिति, तत्राह—**अत एवेति** । अदृष्टार्थमावश्यकत्वादेवेत्यर्थः । यदप्योङ्कारस्योत्तरत्रानुषङ्ग इत्यादि, तदुद्धरति—**नापीति** । नन्वादौ दृष्टार्थत्वेनोच्चरितस्यान्ते द्वितीयादौ चादृष्टार्थत्वे वैरूप्यं स्यादित्याशङ्क्याह—**न चेति** । **मन्त्राणामिति** । प्रथमे "तदर्थशा-

चन्द्रिका

तस्यादृष्टार्थत्वदर्शनात् । "अन्वेनं माता" इत्यादौ एकवचनस्य एकपशुके दृष्टार्थत्वेऽपि बहुपशुके अदृष्टार्थत्वदर्शनाच्च, "न माता

प्रकाशः

स्यात्" इति द्वितीयपादीयान्तिमाधिकरणे क्रत्वङ्गभूतानां मन्त्राणां किमर्थप्रकाशनं दृष्टद्वारमुतादृष्टद्वारमिति संशये, उपायान्तरेणापि प्रयोगवेलायामर्थप्रकाशनसम्भवात्तादर्थ्ये मन्त्राणां नित्यवदाम्नानानर्थक्यापत्तेः, मन्त्रप्रत्यायनाददृष्टकल्पनायामुच्चारण एव तत्कल्पनौचित्यात्, पुरुषव्यापारगोचरत्वेन तत्रैव फलाकाङ्क्षायाः सत्त्वाददृष्टार्था मन्त्रा इति प्राप्ते, मन्त्रोच्चारणादनुष्ठेयस्मरणं, तत्स्मरणात्प्रयोगः, तस्मात्फलमित्येवं दृष्टप्रयोजनलाभान्नादृष्टकल्पनावसरः । यस्तु मन्त्रेणैव स्मर्तव्यमिति नियमः, तस्य न दृष्टं किञ्चित्फलमित्यदृष्टं कल्प्यते । उच्चारणस्य तु दृष्टमेव फलम् । जपादौ विनियुक्तानां मन्त्राणामर्थप्रत्यायनानपेक्षतयाऽदृष्टार्थमुच्चारणमस्त्विति सिद्धान्तितम् । अत्र यथा कर्मणि विनियुक्तानां मन्त्राणामुच्चारणस्य तदनुष्ठानकाले दृष्टार्थत्वं, "त्रिभिरनश्नन् पारायणैः पूतो भवति" इत्यादिना पारायणादिषु विनियुक्तानां तेषामेवोच्चारणस्यादृष्टार्थत्वं, एवमोङ्कारोच्चारणस्यापि श्रुतिबलाददृष्टार्थत्वमित्यर्थः । **अन्वेनं मातेति** । मन्त्राधिकरण एव "ऊहः" इति गुणसूत्रेण अग्नीषोमीयाच्चोदकेन पशुगणं प्राप्ते "अन्वेनं माता मन्यतामनु पिताऽनु भ्राता" इत्यध्रिगुप्रैषगते वाक्ये मात्रादिपदानामूहप्रतिषेधपरमेकवचनान्तं मात्रादिपदं न बहुवचनान्त-

प्रकाशः

रूपवृद्धिमाप्नुयादित्यर्थकं "न माता वर्धते" इति वचनमन्यत्रोहास्तित्वावगमकतया मन्त्राणामर्थविवक्षायां लिङ्गमुपन्यस्तम् । अत्र यथा पशुगणे मात्रादिपदानां एकवचनान्तानामसमवेतार्थतयोच्चारणमदृष्टार्थमेकस्मिन् पशौ दृष्टार्थमित्येकस्यैव प्रयोगभेदेनोभयार्थत्वं, तथा प्रकृतेऽपीत्यर्थः । अत्र यत्कश्चिदाह—पशुगणे मात्रादिपदानामेकवचनान्तानामसमवेतार्थत्वे स्यात्तदुच्चारणमदृष्टार्थम् । न चेतदस्ति, तेषां पशुपरेण 'एनम्' इति शब्देन सहान्वयाभावात् । किन्त्वनुमन्यतामित्यनेनान्वयः । स च तत्प्रतिसम्बन्धित्वाभिप्रायेण,

ये मानवा विगतरागपरावरज्ञाः
नारायणं सुरगुरुं सततं स्मरन्ति ।
ध्यानेन तेन हतकिल्बिषचेतनास्ते
मातुः पयोधररसं न पुनः पिबन्ति ॥

इति श्लोक इवैकवचनान्तत्वेऽप्यविरुद्धः । अतोऽर्थसमवायान्न तदुच्चारणमदृष्टार्थम् । "न माता वर्धते" इति वचनं न्यायप्राप्तानूहानुवादमात्रपरम्, न प्राप्तोहप्रतिषेधार्थम् । उक्तं च राणके—"एकमात्रादिसम्बन्धे पशुभेदेऽपि मात्रादिशब्दोहस्यानाशङ्क्यत्वात् मात्रादिभेदेऽप्येकपशुसम्बन्धाभावात्सम्बन्धिभेदादेव तद्भेदसिद्धेर्न्यायादेवानूहावगतेः" इति । अतो वचनबलादप्यदृष्टार्थत्वासम्भवात्कथमयं दृष्टान्त इति, अत्र ब्रूमः—साक्षात् पशुपरेदंशब्दान्वयाभावेऽपि

चन्द्रिका

वर्धते" इतिश्रुत्या मात्रादिशब्दे ऊहनिषेधात् । अध्याह्रियमाणस्यापादितममन्त्रत्वं च मन्त्रेण सहैककार्यकारित्वाभाव इति

प्रकाशः

बहुत्वेनावगततत्कर्मिकायाननुमितिक्रियायामेकस्य मात्रादेरन्वयासम्भवात्तदन्वयघटनाय बहुवचनान्तत्वेन तेषां पदानां ऊहावश्यंभावात् । "मातुः पयोधररसं" इत्यादिकं तु गौणतयाऽप्युपपन्नम् । नेह तदाश्रयणे प्रमाणमस्ति । एवं चात्र वचनबलादेवानूहोङ्गीकार्यः । तस्मादेकवचनान्तानां तेषामुच्चारणं पशुगणे अदृष्टार्थमित्यकामेनाप्याश्रयणीयमिति नादृष्टार्थताऽनुपपत्तिरिति । राणकोक्तिस्तु अभ्युपगमवादादिना कथंचिन्नेया । ननु बहुपशुके 'अन्वेनान् मातरो मन्यन्ताम्' इति बहुवचनान्ततयोहे सति नादृष्टार्थत्वमित्यत आह—**न मातेति** । एकवचनान्तो 'माता' इतिशब्दो 'मातरः' इति बहुवचनान्ततया न वर्धतइति श्रुत्यर्थः । अत एव महाभाष्ये "बहुगणवतुडति सङ्ख्या" इत्यत्र संज्ञार्थकोऽपि सङ्ख्याशब्दः "ष्णान्ताषट्" इत्यत्रानुषक्तः संज्ञिपरः इत्युक्तम् । अत ओङ्कारस्योभयार्थत्वं युक्तमिति । यच्चोक्तमूह्यमानस्य तदनवयवत्वमिष्टमेवेति, तदुद्धरति —**अध्याह्रियमाणस्येति** । वाक्यार्थप्रतीतिरूपैककार्यकारित्वाभावो वाऽदृष्टरूपैककार्यकारित्वाभावो वेत्यर्थः । अन्यथा "सं यज्ञपतिराशिषा" इत्यादावध्याहृतस्य 'गच्छतां' इत्यस्य तेन सहैककार्यकारित्वं न स्यादिति भावः । एतेन—'मन्त्रेषूह्यमानस्य' 'सं यज्ञपतिराशिषा' इत्यादावध्याह्रियमाणस्य, 'तदनवयवत्वप्रसङ्गात्'

चन्द्रिका

नेष्टापत्तिः । जिज्ञासाऽन्विततया प्रथमं प्रतीतस्यौतत्वस्य तत्रासम्भवेन, "सप्तदशारत्निर्वाजपेयस्य यूपः" इत्यादाविव अङ्गावतारन्यायेन

प्रकाशः

तेन सहैककार्यकारित्वाभावप्रसङ्गात् इति सुधावाक्यार्थः उक्तो भवति। यद्यपि सुधायां मन्त्रानवयवत्वमात्रमापादितं. नामन्त्रत्वमितीष्टापादनं सुपरिहरम् । तथाऽप्यापादनस्यामन्त्रत्वपर्यन्तत्वेऽपि नानुपपत्तिरिति प्रौढ्या परिहारान्तरमवोचदिति ध्येयम् ॥ यदप्यवादि ओतत्वस्य न वाक्यार्थेऽन्वय इत्यादि तदयुक्तमित्याह—**जिज्ञासेति** ॥ तृतीये "आनर्थक्यात्तदङ्गेषु" इत्याद्यपादीयाष्टमाधिकरणे "सप्तदशारत्निर्वाजपेयस्य यूपः" इत्यत्रारत्निसाप्तदश्यं किमूर्ध्वपात्रद्वारा वाजपेयाङ्गं उत यूपद्वारा पशुयागाङ्गमिति संशये, अव्यवधानात् प्रधानत्वात् प्रकरणानुग्रहाच्च वाजपेयस्याङ्गम्, परिमाणस्य साक्षात्कर्मण्यनन्वयेऽपि तत्साधनीभूतोर्ध्वपात्रद्वारा तन्निर्वाहः, यूपशब्दोऽपि सादृश्यादूर्ध्वपात्रमात्रपर इति प्राप्ते, 'देवदत्तस्य नप्ता' इतिवत्परम्परासम्बन्धेऽपि षष्ठ्युपपत्त्या वाजपेयशब्देन पशुयागलक्षणानाश्रयणेऽपि "वाजपेयस्य यूपः" इति व्यपदेशसम्भवात्, श्रुतिसम्भवे यूपशब्दे ऊर्ध्वपात्रमात्रलक्षणाया अन्याय्यत्वाच्च, श्रुत्यनुग्रहायाव्यवहितसम्बन्धादित्रयमनादृत्य, यूपद्वारा पश्वङ्गत्वमेवाङ्गीकर्तुं युक्तमिति सिद्धान्तितम् । अत्र यथा अरत्निसाप्तदश्यस्य प्रधानभूतवाजपेयाङ्गत्वेन प्रतीयमानस्यापि तत्रान्वयासम्भवात्तदुपसर्जनीभूते पशुयागे अन्वयः, एवमोतत्वस्यापि जिज्ञासाविशेषण-

चन्द्रिका

तदुपसर्जनब्रह्मान्वयसम्भवाच्च । अर्थवादार्थप्राशस्त्यस्य 'यजेत' इत्यत्रोपसर्जनीभूतयागविशेषणत्वदर्शनाच्च । "दण्डीप्रैषानन्वाह" इत्यादौ दण्डस्योपसर्जनस्य विध्यन्वयदर्शनाच्च । उक्तं हि वार्तिके—

"विशेषणपरत्वं च दण्डीत्यादिषु दर्शितम्" इति ।

प्रकाशः

तया प्रतीतस्यापि तत्रान्वयायोगेन तदुपसर्जनब्रह्मान्वय इत्यर्थः । नन्वयं न्यायोऽङ्गाङ्गिभावविषयतया द्वितीये रेवत्यधिकरणेऽभिहित इति चेत्, अत्रापि विशेषणस्य विशेष्यभूतजिज्ञासाङ्गतया तदङ्गभूतब्रह्मण्यन्वयादङ्गत्वस्य तदुपकारकत्वरूपत्वादिति भावः । अत एव 'अर्थवाद' इत्याद्युदाहरणान्तरमित्येके । **अर्थवादेति** । प्रत्ययोपात्तायां भावनायां करणत्वेनोपसर्जनीभूते यागे प्रशस्तो याग इति विशेषणत्वेनान्वयदर्शनाच्चेत्यर्थः । **दण्डी प्रैषेति** । मैत्रावरुणो दण्डी भूत्वा मन्त्रविशेषाननुवदेदित्यर्थः । अत्र दण्डवरुणसम्बन्धस्य प्रैषानुवचनसम्बन्धस्य च प्रतीयमानस्य "क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति" "मैत्रावरुणः प्रेष्यति चानु चाह" इति वाक्याभ्यां प्राप्तत्वेनाविधेयत्वात्, स्थित्वोच्चैरनवलम्बनं प्रैषानुवचनं कुर्वतो मैत्रावरुणस्यावलम्बनापेक्षायां, मैत्रावरुणार्थत्वेनावगतस्य दण्डस्य तदुपकारद्वारापेक्षायाः सत्वाच्च, "लोहितोष्णीषा ऋत्विजः प्रचरन्ति" इत्यत्रेव प्रकृत्यर्थत्वेनोपसर्जनीभूते दण्डे प्रैषानुवचनसम्बन्धित्वेन विध्यन्वयदर्शनाच्चेत्यर्थः । विशेषणपरत्वं 'विधेः' इति

चन्द्रिका

न च ब्रह्मशब्देनैव विषयसूचनादोङ्कारवैयर्थ्यम्, न केवलं जिज्ञास्ये "तद्विजिज्ञासस्व, तद्ब्रह्म" इत्यादौ ब्रह्मपदश्रवणात्तस्य जीवाद्विन्नत्वेन जिज्ञास्यता, किन्तु "ओमित्येतदक्षरमुद्गीथमुपासीत" इत्यादौ जीवेष्वसम्भावितगुणपूर्तिवाचकोङ्कारादिश्रवणादपीति युक्त्यन्तरसूचकत्वात् ।

प्रकाशः

शेषः । **गुणपूर्तिवाचकोङ्कारादीति ॥**

ओतत्ववाची ह्योङ्कारो वक्तव्यसौ तद्गुणोतताम् ।

इत्यनुव्याख्यानरीत्येति भावः । आदिपदोपादानेन, ओङ्कार उपलक्षणं, नारायणादिपदादपीत्यपि सूचयति । नन्वोङ्कारस्य गुणपूर्तिवाचित्वे कथं ब्रह्मपदेनान्वयः, तस्यापि गुणपूर्तिवाचित्वेन गुणपूर्णे गुणपूर्णमित्यन्वयादिति चेन्न, "आत्मेति तूपगच्छन्ति ग्राहयन्ति च" इत्यत्रात्मशब्दस्य आवृत्तिमाश्रित्यैकस्य यौगिकत्वमपरस्य रूढिं चोपेत्य 'आत्मा' विष्णुः, 'आत्मा' स्वामीत्यर्थस्य मुधायां चतुर्थाद्यपादे उक्ततया, तद्वदिहापि ओंब्रह्मशब्दयोरेकस्य यौगिकत्वमपरस्य रूढत्वमाश्रित्य 'ओं' गुणपूर्णस्य, ब्रह्मणः' विष्णोः, जिज्ञासेत्युक्तौ दोषाभावात् । न च (अनुव्याख्याने) द्वयोः यौगिकत्वोक्तिविरोधः, द्वाभ्यां विषयलाभोक्तिविरोधश्चेति वाच्यम्, द्वयोर्विष्णौ योगरूढत्वेनैकैकस्य योगांशं रूढ्यंशमुपादाय तथोक्त्युपपत्तेः[1] । ननु च सूत्रे ब्रह्मपदवदोंपदेन जिज्ञासायां कर्मकारकार्पणे ह्येवं युक्तयन्तरसूचनं स्यान्नान्यथेति चेन्न, अन्योन्यविशेषणविशेष्यभावेन ओंब्रह्मपदयोर्जिज्ञासायां कर्मकारकार्पणेनापि विशिष्टे जिज्ञास्यतान्वयेनैतत्सूचनोपपत्तेः । 'इति युक्त्यन्तर'

[1] "अन्वयोक्तेर्युपपत्तेः" इति च पाठः.

चन्द्रिका

अदृष्टार्थमादाववश्यं प्रयोक्तव्यत्वाच्च । यत्तु—अध्ययनोपक्रमादा-

प्रकाशः

इत्युपलक्षणम्,

ओतत्ववाची ह्योङ्कारो वक्तृचसौ तद्गुणोतताम् ।
स एव ब्रह्मशब्दार्थो नारायणपदोदितः ॥
स एव भर्गशब्दार्थो व्याहृतीनां च भूमतः ।
भावनाच्चैव सुत्वाच्च सोऽयं पुरुष इत्यपि ।
स एव सर्ववेदार्थो जिज्ञास्योऽयं विधीयते ॥

इत्यनुव्याख्यानोक्तरीत्या व्याहृतिगायत्रीपुरुषसूक्तद्वारा वा, " तद्यथा सर्वाणि पर्णानि शङ्कुना संतृण्णान्येवमोङ्कारेणैव सर्वा वाक् संतृण्णा " इत्यादिश्रुत्या सुधोक्तरीत्या साक्षादेव वा, ओङ्कारव्याख्यानरूपमीमांसानुग्राह्यसर्ववेदरूपप्रमाणोक्तचर्थत्वादित्यपि ग्राह्यम् । नन्वेवं " नारायणोऽसौ परमो विचिन्त्यः " इत्यादौ श्रुतनारायणादिपदं हित्वा ओङ्कारप्रयोगे किं बीजमित्यत आह—**अदृष्टार्थमिति** । नैवं नारायणादिशब्द इति भावः ॥ यदपि सुधायाम् " अखिलैर्वेदपाठकैः " इत्यादिना " दृष्टान्तस्य साध्यविकलता " इत्यन्तेनाध्ययनोपक्रमे उच्चार्यमाणस्योङ्कारस्य तदवयवत्वमुक्तम्, तदयुक्तं भाति, अध्ययनोपक्रमविरतिवैचित्र्येण तत्तत्स्थानपरित्यागेन अन्यान्यस्थानेऽखिलैः पठ्यमानस्य तस्य वेदवाक्यानवयवतायाः सुप्रसिद्धत्वात् । अन्यथाऽध्ययनोपक्रमविरतिवैचित्र्येऽपि "ओमिति ब्रह्म" इत्यादिवत् नियतस्थानतया पाठप्रसङ्ग इत्यत आह—**यच्चिति** । ओङ्कारार्थस्यौतत्वादेरधी

चन्द्रिका

उच्चार्यमाणस्याप्योङ्कारस्य तदवयवत्वं सुधायामेवोक्तं, तदपि तदुच्चारणस्य अर्थानुसन्धानद्वारैवाङ्गत्वमित्यभिप्रेत्य । सन्नचायरत्नावल्यां तु—"ओङ्कारस्तु पृथगुच्चरितो वेदितव्यः, नाथशब्दवत्सूत्रोपनिबद्धः" इति सूत्रात्पार्थक्यमेवोक्तम् । तत्रानुव्याख्याने "ओतत्ववाची" इत्यादिना तदर्थकथनं, सर्ववेदव्याख्येयोङ्कारार्थवाचकनारायणपदवाच्यस्य सर्ववेदार्थत्वात् शास्त्रविषयत्वमित्यभिप्रेत्य, न तु सूत्रार्थतया । अन्यथा भर्गादिपदानामपि सूत्रावयवत्वं स्यात्, "स एव

प्रकाशः

यमानमन्त्रार्थेऽन्वयानुसन्धानद्वारैवेत्यर्थः । यद्वा—"ओमिति ब्राह्मणः प्रवक्ष्यन्ना" इत्यत्र तैत्तिरीये "एवं स्वाध्यायकृच्चाह" इतिभाष्योक्तदिशार्थानुसन्धानद्वारैवेत्यर्थः । एवं सुधोक्तमवयवत्वं समर्थ्य प्राचीनानुव्याख्यानटीकाशयमाह—**सन्नचायरत्नावल्यां त्विति** । तुशब्दसूचितं सुधातो विशेषमाह—**ओङ्कारस्त्विति** । "पृथगोंक्रियते" इत्यस्यार्थः—'पृथगुच्चरितो वेदितव्यः' इति । ननु सूत्रानवयवत्वे "ओतत्ववाची ह्योङ्कारः" इत्योङ्कारार्थोक्तिरसङ्गतेत्यत आह—**तत्रेति** । एतन्मत इत्यर्थः । वेदव्याख्येयो ह्योङ्कारः प्रसिद्धः, "ओङ्कारेणैव सर्वा वाक्संतृण्णा" इत्यादेः । तस्य च योऽयं गुणोतत्वरूपोऽर्थः, तस्य वाचको नारायणशब्दः, तदर्थस्य सर्ववेदार्थत्वान्नारायणस्यैव शास्त्रविषयत्वमिति भावेनेत्यर्थः । **अन्यथेति** । सूत्रावयवस्यैव अर्थकथने । ननु तर्हि वचनद्वयस्य प्रामाण्यादिकस्यैव अवयवत्वानवयवत्वे कथं स्याताम् । न च

चन्द्रिका

भर्गशब्दार्थः" इति तदर्थस्यापि कथनादिति भावः ॥ यद्वा—माऽस्तु "स्रवत्यनोङ्कृतं" इत्यनेन साधारणोङ्कारस्याद्यसूत्रावयवता, तथाऽपि—

ओङ्कारश्चाथशब्दश्च तस्मात्प्राथमिकौ क्रमात् ।
तद्धेतुत्वं वदंश्चापि तृतीयोऽत उदाहृतः ।
अतश्च पूर्वमुच्चार्यौस्सर्व एते सतां मताः ॥

इति भाष्योदाहृतस्मृत्या अथातश्शब्दतुल्यतया आद्यसूत्रावयवताया उक्तत्वात्, अनुव्याख्याने "तत्र ताराथमूलत्वं" इत्यथशब्दतुल्यतयोङ्कारस्य आद्यसूत्रावयवत्वोक्तिर्युक्ता । एवं च सन्न्यायरत्नावली "स्रवति" इत्यादिश्रुतिप्रापितसाधारणोङ्कारविषया, सुधा तु "ओङ्कारश्च" इत्यादिस्मृतिप्रापितासाधारणोङ्कारविषयेति

प्रकाशः

व्रीहियववद्विकल्पः, वस्तुनि विकल्पायोगात् । न च "विप्रतिषेधे परम्" इति परस्य प्राबल्यम्, पूर्वस्यापि नुटः नुमचिरतृज्वद्भावेभ्यः प्राबल्यदर्शनादित्याशङ्क्य, भिन्नविषयतया न विरोध इत्याह—**यद्वेति** । अयमर्थः—यथा ह्यष्टाक्षरादौवैक ओङ्कारस्तदवयवः, अन्यौ च द्वावदृष्टार्थौ, एवमाद्यसूत्रेऽप्येकस्तदवयवोऽन्यौ चाद्यन्तयोरदृष्टार्थाविति त्रय ओङ्काराः । तत्राद्यस्यादृष्टार्थस्य तदवयवत्वं, अन्यस्य तु ओतत्वरूपार्थबोधनेन तदवयवत्वमिति । अदृष्टार्थकोङ्कारसत्त्वे मानमाह—**स्रवतीति** । दृष्टार्थकतत्सत्त्वे मानमाह—**ओङ्कारश्चेति** । ननु श्रुतिप्रापितस्यैवोङ्कारस्य स्मृतिविषयत्वसम्भवा-

चन्द्रिका

द्रष्टव्यम् । यद्वा—सन्नचायरत्नावल्युक्तं पृथक्त्वमूह्यमानत्वं, न तु वाक्येऽनन्वय इत्यविरोध इति द्रष्टव्यम् ॥

प्रकाशः

ओङ्कारद्वयं कल्प्यमिति भावेन, एकविषयकत्वेऽप्यविरोधमाह—**यद्वेति**। "पृथगुच्चरितो वेदितव्यः" इत्यस्य सर्वसूत्रेषूहनीयः, न त्वेतत्सूत्रमात्रसम्बद्ध इत्यर्थः। न त्वेतत्सूत्रे अन्वयप्रतियोगिसमर्पको नेत्यर्थः। एवं चानुव्याख्याने ओङ्कारत्वरूपार्थोक्तिरपि सङ्गच्छत इति भावः ॥ ननु—

अथातश्शब्दपूर्वाणि सूत्राणि निखिलान्यपि।

इति भाष्योदाहृतस्मृतावथातश्शब्दयोरेव प्राथम्यं सिद्धवत्कृत्य "कश्चार्थश्च तयोर्विद्वन्" इत्यादिना तयोरेव प्रश्नपरिहारयोः प्रवृत्तेः,

सूत्रेषु तु महाप्राज्ञास्तावेवादौ प्रयुञ्जते।

इत्यवधारणेनोङ्कारव्यवच्छेदपूर्वं तयोरेवादित्वोपसंहाराच्च, कथमोङ्कारस्यादित्वमुपेत्यानुव्याख्याने व्याख्यानमिति चेन्न, उपक्रमादिना तयोः सूत्रावयवत्वस्यैव सिद्धत्वोङ्कारस्याव्यवच्छेदादोङ्कारस्य माङ्गलिकत्वादिनाऽऽदित्वं "ओङ्कारश्चाथशब्दश्च" "सिसृक्षोः परमाद्विष्णोः" "स्ववत्यनोङ्कृतं ब्रह्म" इत्याद्येनकमानसिद्धमिति निश्चिन्वता, अथातश्शब्दमात्रविषयकप्रश्ने कृते तत्रैव परिहार इत्युपपत्तेः। अत एव टीकायां "मङ्गलोक्तचादेश्शब्दान्तरेण सम्भवात्" इत्युक्तम्। "तावेवादौ" इत्युपसंहारस्थावधारणस्यापि ब्रह्मशब्दादिव्यवच्छेदकत्वोपपत्तेः। ब्रह्मशब्दाद्यपेक्षया 'तावेव' इति, 'तावादौ प्रयुञ्जत एव' इति वा भिन्नक्रमेणाप्युपपत्तेः। विरोधाधिकर-

चन्द्रिका

ननु प्रतिवचनाद्यभावेन प्रश्नाद्यर्थत्वासम्भवेऽपि "अथ शब्दानुशासनं" इत्यादाविव आरम्भरूपाधिकारार्थोऽथशब्दः कस्मान्न स्यात् ।

प्रकाशः

णन्यायेनोक्तश्रुतिविरोधेन "तावेव" इत्युपसंहारस्योक्तार्थानुसरणावश्यंभावाच्च । ओङ्कारव्यवच्छेदभ्रान्तिनिरासायैव "सिमृक्षोः" इति स्मृत्योङ्कारस्य मुख्यादित्वमथातश्शब्दयोरमुख्यादित्वं चाभिधाय "अतश्च पूर्वमुच्चार्याः" इति पूर्वोच्चारणविधानाच्च ॥ ननु ओङ्कारस्य सूत्रावयवत्वे सूत्रव्याख्यार्थं प्रवृत्तो भगवान्भाष्यकारः किमित्योङ्कारं हित्वा अथादिपदान्येव व्याचख्याविति चेदत्राहुः—उत्तरप्रस्थाने व्याकरिष्यमाणत्वादिह त्यक्तं अत एवेहानुक्तमपि वर्णकान्तरं सूत्राणां तत्रोच्यत इति वा, ओङ्कारार्थस्य छान्दोग्याद्युपनिषद्भाष्योदाहृतवचनैः व्याख्यातत्वाद्वा नेह व्याख्यायत इति, यद्वा—पूर्वपक्षप्रापकाधिकार्याद्यभावरूपहेतुचतुष्टयनिरासस्याथादिपदैरेव करणात्तेषामेवेह व्याख्यानं, तावत एवोपयोगात्, ओङ्कारस्य त्वदृष्टार्थतया आवश्यकस्य दृष्टार्थोऽपि सम्भवतीत्यभिप्रेत्य अनुव्याख्याने व्याख्यानमिति । अथशब्दादिवैलक्षण्यज्ञापनायेहाव्याख्यानमित्यप्याहुः । यदत्र केन चित्प्रलपितं—ओङ्कारस्यादित्वे, सूत्रावयवत्वे, गुणपूर्त्यर्थत्वे, "स्तवत्यनोङ्कृतं ब्रह्म" इत्यत्र ब्रह्मपदेन सूत्रग्रहणे च मानं नेत्यादि, तत्सर्वस्य खण्डनं गुरुपादकृतन्यायमौक्तिकमालायां द्रष्टव्यम् ॥

एवमोङ्कारव्याख्यानं समर्थ्य अधिकारानन्तर्यार्थोऽयमथशब्द इत्यथशब्दव्याख्यानं समर्थयितुमाक्षिपति—**नन्विति** ।

चन्द्रिका

अत्र परेषां भाष्यं—"ब्रह्मजिज्ञासाया अधिकार्यत्वात्" इति, तन्न, इच्छाया आरभ्यत्वासम्भवेऽपि, विवरणरीत्या जिज्ञासाशब्दस्य विचारलक्षकत्वेन तस्यारभ्यत्वसम्भवात् । नन्वानन्तर्याभिधानमुखेन शा-

प्रकाशः

मङ्गलानन्तरारम्भप्रश्नकात्स्न्यर्चेष्वथो अथ।

इत्यभिधानात् प्रतिवचनभावेन "अथ भागवतं ब्रूत" इत्यादाविव प्रश्नार्थत्वायोगेऽपि, कात्स्न्यर्चेन ब्रह्मविचारकरणस्य बाधेन तदर्थकत्वायोगेऽपि, मङ्गळस्य वक्ष्यमाणदिशा वाच्यार्थत्वाभावेऽप्यारम्भार्थत्वं किं न स्यादित्यर्थः । आदिपदात् "अथ योगानुशासनम्" इत्यादेर्ग्रहणम् । एवमाक्षिप्तस्य स्वयं समाधानं करिष्यन्, यदत्राद्वैतिनां परिहारभाष्य—"तत्राथशब्द आनन्तर्यार्थः परिगृह्यते, नाधिकारार्थः, ब्रह्मजिज्ञासाया अनधिकार्यत्वात् । मङ्गलस्य च वाक्यार्थे समन्वयाभावादर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति । पूर्वप्रकृतापेक्षायाश्च फलत आनन्तर्यव्यतिरेकात्" इत्यन्तं, तत् क्रमेण दुदूषयिषुः, 'अनधिकार्यत्वात्' इत्युक्तं तावद्दूषयितुमनुवदति—**अत्रेति । इच्छाया इति** । जिज्ञासापदमुख्यार्थभूतज्ञानेच्छाया इत्यर्थः । अत एव भाष्यत्वां लक्षितविचारारम्भार्थत्वमथशब्दस्य भविष्यतीति मत्वा, "न च स्वार्थपरत्वस्योपपन्नौ सत्यामन्यार्थकल्पना युक्ता" इति तल्लक्षकत्वमेव निरस्तम्, अवतारितं च कल्पतरौ तथैवेति ॥ परभाष्यस्याभिप्रायान्तरमाशङ्कते—**नन्विति** । सत्यमेवं, तथाऽपि मन्मत एवेदं युज्यते, न तु

चन्द्रिका

स्त्रीयस्याधिकारिणः न्यायतस्समर्पणाभावे विचारो निरधिकारिकोऽननुष्ठेयः स्यादित्यधिकारितद्विशेषणप्रयोजनलाभायानन्तर्यार्थतेति चेत्. न तावद्विचारविधौ त्वत्पक्षे मुमुक्षुरधिकारी, मोक्षश्च फलमिति युक्तम्, विचारो मोक्षसाधनतया न प्राप्त इति तद्विधेरपूर्वविधित्वापातात् । मुमुक्षोरपि ज्ञानकामनां विना विचारेऽप्रवृत्तेः । त्वन्मते च वक्ष्यमाणरीत्या ज्ञानकामनाऽनुपपत्तेश्च । नापि विचारविधौ ज्ञानकामोऽधिकारी, ज्ञानं च फलमिति युक्तम्, अध्ययनविधेः ज्ञानकामाधिकारं निषेधता त्वया, अज्ञाते ज्ञाने काम-

प्रकाशः

त्वन्मत इति भावेन तन्मतं दूषयितुं, किं मुमुक्षुरधिकारी, मोक्षः फलं, उत ब्रह्मज्ञानकामोऽधिकारी, ब्रह्मज्ञानं च फलम्, अथापरोक्षज्ञानकामोऽधिकारी, ब्रह्मापरोक्षज्ञानं च फलम्, यद्वा—अप्रतिबद्धब्रह्मापरोक्षज्ञानकामोऽधिकारी, तादृशज्ञानं च फलम्, अथ वा ब्रह्मेतरानवच्छिन्नब्रह्मापरोक्षज्ञानकामोऽधिकारी, तादृशज्ञानं च फलमिति पञ्च पक्षान् हृदि निधायाद्यं तावद्दूषयति—**न तावदिति** । ज्ञानहेतुत्वेन विचारस्य लोकतोऽवगमेऽपि मोक्षोद्देशेन विचारविधावपूर्वविधित्वमेव स्यात् । न चेष्टापत्तिः, त्वया नियमविधित्वाङ्गीकारादिति भावः । मोक्षः फलमित्यंशं निरस्य, मुमुक्षुरधिकारीत्यंशं निरस्यति—**मुमुक्षोरिति** । विचारस्य ज्ञानद्वारेणैव मोक्षहेतुत्वादिति भावः । द्वितीयं निरस्यति—**नापीति** । **अध्ययनेति** । "स्वाध्यायोऽध्येतव्यः" इत्यस्य ज्ञानकामाधिकारिकत्वे ज्योतिष्टोमवत्काम्यतैव स्या-

चन्द्रिका

नायोगात् ज्ञानज्ञाने च तदवच्छेदकविषयस्यापि ज्ञातत्वात् पुनस्तज्ज्ञाने कामनाऽयोगादिति युक्तया ज्ञानकामनानिषेधात् ॥ ननु परोक्षज्ञाने कामनाऽयोगेऽपि, परोक्षेण प्रतिबद्धापरोक्षेण वा ज्ञानेन ज्ञातब्रह्मावच्छिन्नेऽपरोक्षज्ञाने अप्रतिबद्धापरोक्षज्ञाने वा कामना श्रवणरूपविचारविध्यधिकारिविशेषणमिति चेन्न, इच्छाया अपरोक्षत्वात् तदवच्छेदकज्ञानावच्छेदकविषयस्याप्यपरोक्षत्वादिच्छासमानका-

प्रकाशः

त्, इष्यते च नित्यत्वम्, अतो ज्ञानकामाधिकारिकत्वं यया युक्त्या निरस्यते, तयैव ब्रह्मविचारविधावपि तदधिकारिकत्वस्य निरासादित्यर्थः । तामेव युक्तिमाह—**अज्ञात इति** । कामनायां धर्मिभूतज्ञानस्य अज्ञाने कारणीभूतधर्मिज्ञानाभावात् कामनाया अयोगः, धर्मिभूतज्ञानस्य च ज्ञाने विषयमगृहीत्वा तदवच्छिन्नज्ञानग्रहणायोगात् ज्ञानज्ञानेन विषयभूतधर्मादेरपि ग्रहणात् सिद्धे इच्छाविरहेण धर्मज्ञानादौ न कामना सम्भवतीत्यर्थः । उक्तदोषपरिजिहीर्षया तृतीयतुरीयौ शङ्कते—**नन्विति** । यदा परोक्षज्ञानेन ज्ञातं ब्रह्म, तदा तदवच्छिन्नापरोक्षज्ञाने कामना, यदा त्वपरोक्षज्ञानेन ज्ञातं, तदा तदवच्छिन्नाप्रतिबद्धापरोक्षज्ञाने कामना, एवं च धर्मिभूतज्ञानज्ञानस्य परोक्षत्वे अपरोक्षत्वे वा न कश्चिद्दोष इति भावः । 'श्रवणरूप' इति पररीत्या । एतच्च 'श्रवणसाध्यस्य' इत्यादिवक्ष्यमाणदूषणसौकर्याय । पक्षद्वयमप्येकेन दोषेण निराह—**इच्छाया इति** । कामनाया इच्छात्वादिति भावः ।

चन्द्रिका.

लवर्त्यपरोक्षज्ञानस्यापि विचारसाध्यत्वानुपपत्तेः । अन्यानवच्छेदेन अपरोक्षज्ञानस्य विचारसाध्यत्वे च, तादृशपरोक्षज्ञाने कामना, तस्य विचारसाध्यत्वं चास्तु । किंच—श्रवणसाध्यस्य परोक्षज्ञानस्य, प्रतिबद्धापरोक्षज्ञानस्य वा तस्मात्प्रागसत्त्वेन तदधीनायाः अपरोक्षज्ञानादौ कामनायाः श्रवणविध्यधिकारिविशेषणत्वायोगः ।

प्रकाशः

एवं च इच्छाविषयकमपरोक्षज्ञानं स्वविषयमिच्छां गृह्णत्, इच्छाविषयं ज्ञानं तदवच्छेदकं ब्रह्म चाविषयीकृत्य, नेच्छां विषयीकर्तुमलमिति, इच्छाविषयापरोक्षज्ञानस्यैव ब्रह्मापरोक्षज्ञानतया, स्वविषये अप्रतिबद्धत्वेन ब्रह्मविषयकाप्रतिबद्धापरोक्षतया च, इच्छासमसमयवर्तिनो विचारसाध्यत्वानुपपत्तेरिति भावः । न केवलं परोक्षज्ञानस्येत्यपेरर्थः । पञ्चमं कल्पमाशङ्क्य दोषमाह—**अन्येति**। तथा च नोक्तदोष इति भावः । **तादृशेति** । अत्रापि न पूर्वोक्तदोषः पततीति भावः । नन्वस्तु तर्हि ब्रह्मान्यानवच्छिन्नपरोक्षज्ञानकामोऽधिकारी, तादृशं परोक्षज्ञानं फलमिति चेन्न, अध्ययनविधावप्येतादृशार्थज्ञानकामाधिकारिकत्वसम्भवे तत्खण्डनानुपपत्तेरध्ययनविधेः नित्यत्वायोगाच्चेति भावः । अन्यानवच्छिन्नब्रह्मापरोक्षे कामना, तादृशाप्रतिबद्धापरोक्षे वा कामना श्रवणरूपविचारविध्यधिकारिविशेषणमित्यत्र दोषान्तरमाह—**किंचेति** । 'तस्मात्' श्रवणादित्यर्थः । 'तदधीनायाः' परोक्षज्ञानाद्यधीनायाः । अवच्छेदकस्य ब्रह्मणोऽज्ञाने तदवच्छिन्नापरोक्षज्ञानादौ कामनाऽयोगादिति

चन्द्रिका

न च कामनाहेतुपरोक्षज्ञानादिकं श्रवणात्प्रागापातप्रतीतिदशायामेव सिद्धमिति वाच्यम्, तस्यां दशायां निश्चयरूपस्य तस्याभावात्। न हि वेदान्तवेद्यं सर्वं परोक्षज्ञानादिना निश्चित्यापरोक्षाद्यर्थं मीमांसायां प्रवर्तन्ते। सन्देहरूपस्य च तस्य तस्यां दशायां भावेऽपि सन्देहेन ज्ञातब्रह्मावच्छिन्नपरोक्षनिश्चय एव कामनोपपत्तिः, निश्चिते निश्चयकामनाया अदर्शनेन तस्यां निश्चयविषयविषयकसन्देहस्यैव हेतुत्वात्। किंच—त्वत्पक्षे धर्मविचारस्योत्तरक्रतुविधिप्रयुक्तत्वेऽपि, तज्ज्ञानकामनाहीनस्य तद्विचारे अप्रवृत्तेः, धर्मादौ चा-

प्रकाशः

भावः। ननु श्रवणात्प्रागापातधीदशायां तादृशं ज्ञानमस्तीत्याशङ्क्य निरस्यति—**न चेति**। तादृशं ज्ञानं निश्चयरूपं उत सन्देहरूपमिति विकल्पौ हृदि निधाय आद्य आह—**तस्यामिति**। आपातधीदशायामित्यर्थः। तदेवोपपादयति—**न हीति**। द्वितीये त्वाह—**सन्देहेति**। तदुपपादयति—**निश्चित इति**। 'तस्यां' निश्चयकामनायाम्। किंच यदि परोक्षज्ञाने कामनां निषिध्यापरोक्षज्ञान एव कामनोच्येत, तर्हि धर्ममीमांसायां न कोऽपि प्रवर्तेत, धर्मापरोक्षज्ञानकामनाऽयोगात्। न च "ज्ञात्वा कर्म समाचरेत्" इति ज्ञानोत्तरकर्मविधायकेन विधिना, विचारं विना वेदार्थज्ञानासम्भवाद्विचारकर्तव्यत्वं बोधितमिति, तत एव तत्र प्रवृत्तिर्न तु धर्मज्ञानकामनाधीनेति वाच्यम्, एवमपि तज्ज्ञानकामना आवश्यकीति भावेनाह—**किंचेति**। अवच्छिन्नज्ञानकामनायामव-

चन्द्रिका

परोक्षज्ञानकामनाऽनुपपत्तेः, परोक्षज्ञाने च त्वया कामनाऽनङ्गीकारात् धर्मादिविचारे न प्रवृत्तिः स्यात्। किञ्च—सन्दिग्धस्थाण्वादिविशेषापरोक्षज्ञानकामना तद्विशेषपरोक्षधीपूर्विका स्यात्। तस्मात्सामान्यतो ज्ञाते विशेषज्ञानकामनायाः दर्शनात्तां प्रति तदेव हेतुः। अवच्छिन्नज्ञाने अवच्छेदकज्ञानस्य हेतुताऽपि हि दर्शनादेवेति, तदुल्लङ्घने साऽपि न स्यात्। तस्मात्परोक्षज्ञाने कामनां निषेधतः परस्य मते, ज्ञाने मोक्षे वा विचारप्रवृत्तिपर्यन्तं कामनाऽयोगात्, तत्का-

प्रकाशः

च्छेदकज्ञानस्यावश्यकतया परोक्षेणावच्छेदके निश्चिते, अपरोक्ष एव कामना युक्तेत्याशङ्कां दोषान्तरेण निरस्यति—**किं चेति**। न चेष्टापत्तिरनुभवविरोधादिति भावः। कथं तर्हि कामनेत्यत आह—**तस्मादिति**। कामनायाः काम्यमानज्ञानविषयविषयकनिश्चयपूर्वकत्वायोगादित्यर्थः। 'तां प्रति' विशेषज्ञानकामनां प्रति। 'तदेव' सामान्यज्ञानमेव। 'तदुल्लङ्घने' दर्शनातिक्रमणे। 'सा' अवच्छेदकज्ञानस्य हेतुता। विवरणमतदूषणमुपसंहरति—**तस्मादिति**। उक्तदूषणगणादित्यर्थः। **ज्ञान इति**। परोक्षे अपरोक्षे वेत्यर्थः। **मोक्ष इति**। ज्ञानकामनापूर्वकत्वात् मोक्षकामनाया इति भावः। **विचारेति**। यावद्विचारे न प्रवर्तते, तावत् विचारसाध्यपरोक्षादिनिश्चयाभावात्तदधीनाया अपरोक्षज्ञानकामनाया अयोगादित्यर्थः। तथा च विचारे प्रवृत्त्यनन्तरं परोक्षादिनिश्चयः, तस्मिंश्च सत्यपरोक्षादौ कामनया तत्र प्रवृत्तिरित्यन्योन्याश्रयः सूचितो भवति।

चन्द्रिका

मस्याधिकारिणः तस्य फलस्य च सूचनं नानन्तर्यार्थेनाप्यथशब्देन। भामतीरीत्या जिज्ञासाशब्दस्येच्छावाचकत्वेऽप्यार्थिकार्थेन विचारेणाध्याहृतस्य कर्तव्यपदस्येव श्रुतस्याधिकारार्थाथशब्दस्याप्यन्वयोऽस्तु । यथोक्तं कल्पतरौ—"आर्थिके चास्मिन्नर्थे कर्तव्यपदाध्याहारः" इति। न चार्थिकेनार्थेन अध्याहृतस्यैवान्वयो न तु श्रुतस्येत्यत्र नियामकमस्ति । "सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः" इत्यादौ द्र-

प्रकाशः

'तत्कामस्य' ज्ञानादिकामस्य । 'तस्य' ज्ञानादेः । तथा च नाधिकारादिसूचनायानन्तर्यार्थत्वमथशब्दस्येत्यधिकारार्थत्वमेव विवरणमते युक्तमिति। भामतीमतेऽप्यधिकारार्थत्वं युक्तमित्याह—**भामतीति**। तन्मते ह्येवमर्थः—ब्रह्मजिज्ञासा ब्रह्मज्ञानेच्छा भवितुं युक्तेति श्रौतोऽर्थः । ज्ञानेच्छा हि सन्दिग्धे विषये निश्चयाय भवति, निश्चयश्च विचारसाध्य इति, विचारकर्तव्यत्वमार्थिकोऽर्थ इति । तथा च 'विचारः कर्तव्यः' इतिवत् 'आरभ्यते' इत्यन्वयः सम्भवतीत्यर्थः। भामत्यामदृष्टेराह—**यथोक्तमिति**। कर्तव्यपदवैषम्यमाशङ्क्य हेत्वभावेन निरस्यति—**न चेति** । न केवलं नियामकाभावः, दृश्यते च तथाऽन्वय इत्याह—**सौर्यमिति** । द्वितीये "संस्कारश्चाप्रकरणेऽकर्मशब्दत्वात्" इति तृतीयपादीयपञ्चमाधिकरणे, "सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः" इत्यत्र दार्शपौर्णमासिके निर्वापे चरुगुणविधिः, किं वा निर्वापरूपकर्मान्तरविधिः, उत यागविधिरिति सन्देहे, गौरवान्न कर्मान्तरविधिः, अश्रुतत्वान्न यागविधिः,

चन्द्रिका

व्यदेवतासंबन्धाक्षिप्तेन यागेन, 'यदाग्नेयोऽष्टाकपालो भवति' इत्यादौ भवनाक्षिप्तभावनया च विधिप्रत्ययान्वयदर्शनाच्च । तस्मादधि

प्रकाशः

असति यागे देवतासम्बन्धायोगात् 'सौर्यम्' इति तेजोदैवत्यत्वादाग्नेयस्यानुवादः । चरुशब्दः स्थालीवचनः । स्थाल्यां निर्वपेदित्यर्थः । 'ब्रह्मवर्चसकामः' इति सर्वकाम्यवाक्यप्राप्तफलानुवादः । अतो दार्शपौर्णमासिके निर्वापे चरुगुणविधिरिति प्राप्ते, नित्यवच्छ्रुतस्य फलपदस्य पाक्षिकानुवादत्वानर्थक्ययोरयोगात्फलविशिष्टं कर्मान्तरं यावदुक्तं विधीयत इत्याद्याशङ्कानिरासपूर्वकं, द्वितीयशङ्कामुत्थाप्य, निर्वापे देवतान्वयायोगेन तत्पदवैयर्थ्यप्रसङ्गात् द्रव्यदेवतासम्बन्धानुमितो यागो विधीयते, निर्वपतिस्तु तत्र चोदकप्राप्तानुवाद इति सिद्धान्तितम् । अत्र यथा 'निर्वपेत्' इति श्रुतस्य विधिप्रत्ययस्य 'सौर्यम्' इति द्रव्यदेवतासम्बन्धाक्षिप्तेन यागेनान्वयस्तथा प्रकृतेऽपीत्यर्थः । **यदाग्नेय इति** । "यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति" इत्यत्र, भावयितुर्व्यापारं विना स्वयमेव भवनायोगात् 'भवति' इत्युक्तभवनेन प्रयोजककर्तृव्यापारभूतभावनाया आक्षेपात्तया च 'भवति' इति लेट्प्रत्ययरूपविधेरन्वयदर्शनादित्यर्थः । अत्राह—आक्षिप्तेन श्रुतस्यान्वये न सौर्यवाक्यमुदाहरणं, तत्राक्षिप्तस्य यागस्य भावनाविशेषणत्वेन आक्षिप्तविधिविधेयत्वावश्यंभावाच्छ्रुतविध्यन्वयानभ्युपगमाद्विशिष्टविधिस्थले प्रत्ययार्थतया श्रुतस्य विधेस्तदर्थभूतायां सकलवि-

प्रकाशः

शेषणविशिष्टायां भावनायामेवान्वये विशेषणानि तदाक्षिप्तैः विधिभिर्विधीयन्त इति वार्तिककारमतानुवर्तिनां पन्थाः । अत एवानेकेषामर्थानां विधिसंस्पर्शावश्यंभावेऽपि विशिष्टविधिस्थले न वाक्यभेदः, प्राप्तकर्मानुवादेन गुणविधानस्थले अनेकगुणश्रवणे श्रुतस्य विधेरेकत्र सङ्कान्तौ जातायां अर्थापत्तिपरिक्षयेणेतरविध्याक्षेपानुन्मेषात्, तत्रापि श्रुतस्य विधेर्व्यापारस्य वाच्यतया वाक्यभेद इति व्यवस्था सङ्गच्छते । एवं च सकलस्य भावनाविशेषणस्याक्षिप्तविधिविधेयत्वनियमान्न श्रुतस्याक्षिप्तेन महान्वये सौर्य वाक्यमुदाहरणम् । अधिकरणं त्वाक्षिप्तविधिविधेयत्वाभिप्रायमस्तु । यदपि "यदाग्नेयः" इत्यादि, तदपि न, भवत्युक्तभवनाक्षिप्तभावनाया विध्यन्वयानर्हत्वात् । प्रयोजककर्तृव्यापारे हि प्रयोज्यकर्तुर्भाव्यत्वनियमेन भवनकर्तुराग्नेयाष्टाकपालशब्दाभ्यामुक्तस्य पुरोडाशस्य, द्रव्यदेवतासम्बन्धाक्षिप्तस्य यागस्य वा अपुमर्थस्यैव तस्यां भावनायामन्वयो वाच्यः । न ह्यपुमर्थभाव्यका भावना विधावन्वयमर्हति, चेतनप्रवर्तनात्मकस्य पुमर्थभाव्यकभावनान्वयापेक्षित्वादिति । उच्यते—श्रुतस्यैव विधेर्विशेषणेष्ववश्यं व्यापारो वाच्यः । तेषामाक्षिप्तविधिविधेयत्वे आक्षेपेण विशेषणविधौ सिद्धे विशिष्टविधिसिद्धिः, तस्मिंश्च सिद्धे विशेषणविधेराक्षेपसिद्धिरित्यन्योन्याश्रयापत्तिरिति भामत्युक्तेस्तद्रीत्या आद्योदाहरणस्य युक्तत्वात् । पश्चात्कल्प्यस्यापि विशेषणविधेः प्राक्प्रवृत्तत्वेनाकल्प्यत्वान्नेतरेतराश्रयत्वापत्तिरिति पौर्णमास्यधिकरणरा-

चन्द्रिका

कारार्थ एवाथशब्दोऽस्त्विति । उच्यते—'आरभ्यते' इत्यनुक्ताऽप्यारब्धे इदमनेनारब्धमिति ज्ञातुं शक्यत्वादधिकार्याद्यसूचनापाताच्च ना-

प्रकाशः

णकोक्तरीत्या आक्षिप्तविधिविधेयत्वेऽपि न दोषः । 'यागेन विध्यन्वयदर्शनात्' इत्यस्य, विधिप्रत्ययार्थभूतप्रवर्तनारूपविध्यन्वयदर्शनादिति नार्थः, किन्तु तदर्थभूतायां भावनायां विध्यवरुद्धायामवच्छेदकत्वेनान्वयदर्शनादिति । अङ्गीकृतश्चायमन्वयः सौर्यवाक्ये । तत्र हि प्रत्ययार्थीभूताया भावनायाः धात्वर्थानवच्छेदे, विध्यन्वययोगात्तदर्थमवच्छेदकधात्वर्थाकाङ्क्षायां, समानपदोपात्तस्य निर्वापस्यान्वये, तत्र देवताऽन्वययोगेन तत्पदवैयर्थ्यापत्तेः, तत्सार्थकत्वाय द्रव्यदेवतासंबन्धाक्षिप्तो यागस्तत्रावच्छेदकत्वेनान्वीयते । ततश्च तद्विशिष्टा भावना श्रुतेन विधिना विधीयते । तदाक्षिप्तेन विधिना यागो विधीयत इति । यदपि यदाग्नेयोदाहरणे दूषणं, तन्न, कृत्स्नस्वाध्यायप्रयोजनपर्यवसानापादकाध्ययनविधिप्रसादलब्धफलभावनाक्षिप्तयागभावनया 'भवति' इति पञ्चमलकाररूपविधिप्रत्ययार्थभूतप्रवर्तनात्मकविध्यन्वयदर्शनादित्यर्थादिति दिक् । **तस्मादिति** । परोक्तपरिहारासम्भवादित्यर्थः । स्वयं समाधत्ते—**उच्यत इत्यादिना । अधिकार्यादीति।** आनन्तर्यार्थ एव तत्सूचनादिति भावः । एतेन—

त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत् ॥

चन्द्रिका

रम्भार्थः । "अथ शब्दानुशासनम्" इत्यादौ तु व्याकरणे अङ्गान्तरव्यावृत्तस्याधिकारिविशेषणस्याभावेन तदानन्तर्यार्थत्वासम्भवात्, मङ्गलप्रयोजनकोऽथशब्दोऽगत्याऽऽरम्भार्थः । मङ्गलप्रत्यायकत्वं तु अथशब्दस्य, 'अथ' इत्यनेन मङ्गलस्याप्रतीतेरधिकार्याद्यसूचनापातात्, "तस्मान्माङ्गलिकावुभौ" इति स्मृतावोङ्काराथशब्द-

प्रकाशः

इत्यादौ प्रतिज्ञापूर्ववचनदर्शनेनोच्यमानस्यावश्यकर्तव्यत्वमभिव्यनक्तीत्यालङ्कारिकरीत्याऽत्र प्रारम्भवचनमारम्भोपयुक्ताधिकार्यादिसद्भावमभिव्यनक्तीति प्रारम्भार्थत्वेऽप्यथशब्दोऽर्थवानिति केन चिदुक्तं निरस्तम्, आनन्तर्याभिधानमुखेन विशिष्याधिकार्यादिलाभे सति सामान्यतस्तच्छाभोक्त्ययोगात् । "आनन्तर्येऽधिकारस्य" इति स्मृतिविरोधाच्चेति । कथं तर्हि महाभाष्ये आरम्भार्थत्वमथशब्दस्योक्तमत आह— **अथ शब्देति । अङ्गान्तरेति** । शिक्षाकल्पादितः । **अगत्येति** । तद्वाच्यार्थान्तराभावेनेत्यर्थः । नन्वारम्भार्थत्वासम्भवेऽपि मङ्गलार्थकत्वं स्यात् इत्याशङ्क्य निरस्यति—**मङ्गलेति** । 'अयुक्तं' इत्यन्वयः । प्रयोगप्रत्ययाभ्यां हि शब्दार्थयोस्सम्बन्धः । न चाथशब्दोच्चारणे शक्त्या लक्षणया वा मङ्गलं प्रतीयते, येन तत्प्रत्यायकत्वमथशब्दस्य स्यादित्यर्थः । **तस्मादिति** ।

ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥

इति स्मृतौ प्रयोजनार्थकठञ्प्रत्ययान्तप्रयोगेण मङ्गलफलकत्वोक्तेरित्यर्थः।

चन्द्रिका

योः मङ्गलफलकत्वोक्तेश्चायुक्तम् । अन्येषां भाष्ये तु "मङ्गलस्य च वाक्यार्थे समन्वयाभावात्" इत्युक्तम् । तन्न, अपदार्थत्वहेतौ समन्वयाभावे, भामत्यां "पदार्थ एव हि वाक्यार्थे समन्वीयते । स च वाच्यो लक्ष्यो वा । न चेह मङ्गलमथशब्दस्य वाच्यं लक्ष्यं वा" इत्युक्तस्यापदार्थत्वस्य हेतुत्वे अन्योन्याश्रयात् । नापि—'न तावज्जिज्ञासायां मङ्गलं कर्त्रादिभावेन वैयधिकरण्येनान्वेति, कर्त्रादिभावे मानाभावात् । कर्त्राद्यन्तरभावाच्च । नापि सामानाधिकरण्येन, जिज्ञासामङ्गलमित्यर्थवादत्वप्रसङ्गात्' इति विवरणोक्तो हेतुः, 'सधूमो गिरिस्साग्निकः' इतिवत् "ईक्षतेर्नाशब्दम्" इत्यत्र त्वत्पक्षे 'अशब्दम्'

प्रकाशः

स्वयं समाधायान्योक्तं निरस्यति—**अन्येषामिति** । भाष्योक्तसमन्वयाभावे व्याख्यातृद्वयोक्तं हेतुद्वयमपि क्रमेण निराह—**अपदार्थत्वेति** । भाष्ये हि मङ्गलस्यापदार्थत्वं साध्यं कृत्वा, वाक्यार्थे समन्वयाभावो हेतूकृतः, भामत्यां तु समन्वयाभावं साध्यं कृत्वा अपदार्थत्वं हेतूकृतम्, तथा च हेतुसिद्धौ साध्यसिद्धिः, साध्यसिद्धौ हेतुसिद्धिरित्यन्योन्याश्रय इत्यर्थः । **नापीति** । 'विवरणोक्तो हेतुः' इत्यन्वयः । **कर्त्राद्यन्तरेति** । "शान्तो दान्तः" इत्यादिश्रुत्या शमादिमतोऽधिकारिणो ब्रह्मणश्च कर्मणः सत्त्वादित्यर्थः । **अर्थवादत्वेति** । तस्य वैयर्थ्यादिति भावः । **सधूम इति** । सधूमत्वादित्यर्थः । **ईक्षतेरिति** । प्रधानं न जगत्कारणं, अशब्दं हि तत् कारणवाक्याप्रतिपाद्यत्वादित्यर्थोक्तेरिति भावः । **अन्वयेति** ।

चन्द्रिका

इतिवच्च मङ्गलत्वात्कर्तव्येति हेतुत्वेनान्वयोपपत्तेः । एतेन—ब्रह्मजिज्ञासाया मङ्गलत्वं प्रसिद्धतरत्वान्न वक्तव्यमिति निरस्तं, प्रसिद्धस्यैव हेतूकर्तव्यत्वात् ॥ यदपि "पूर्वप्रकृतापेक्षायाश्च फलत आनन्तर्याव्यतिरेकात्" इति परेषां भाष्यम्, तस्य भामत्यनुसारेण, अथशब्दस्य पूर्वप्रकृतापेक्षार्थत्वाशङ्कानिरासायानन्तर्यार्थत्व इव, पूर्वप्रकृतापेक्षार्थत्वेऽपि जिज्ञासाहेतुभूतस्य पूर्वप्रकृतस्य लाभात् फलभेदाद्वच-

प्रकाशः

जिज्ञासाकर्तव्यत्वे हेतुसमर्पकत्वेन मङ्गलस्यान्वयसम्भवादथशब्दार्थत्वं मङ्गलस्य स्यादेवेति, "वाक्यार्थे समन्वयाभावात्" इति भाष्योक्तो हेतुरसिद्ध इति भावः । अत एव भामत्यां 'मङ्गलहेतुत्वात्प्रत्यहं ब्रह्मजिज्ञासेति सूत्रार्थस्सम्पद्यते' इत्युक्तम् ॥ प्रकृतापेक्षार्थत्वं वा, प्रकृतादर्थादर्थान्तरपरत्वं वा अथशब्दस्य किं न स्यादित्याशङ्क्य, स्वयं समाधास्यन् परोक्तं समाधिमनूद्य निरस्यति—**यदपीत्यादिना** । 'तस्य' इत्यस्य 'भामत्यनुसारेण यद्यर्थः' इत्यन्वयः । एवं हि भामत्यां व्याख्यातम्—अयमथशब्दो विनैवानन्तर्यार्थत्वं, पूर्वप्रकृतापेक्षो भविष्यति, यथा 'शब्दो नित्यः अथानित्यः' इत्यादौ पूर्वप्रकृतं धर्मिभूतं 'शब्दः' इति पदमपेक्ष्य प्रथमपक्षोपन्यासपूर्वकं, पक्षान्तरोपन्यासे, पूर्वप्रकृतापेक्षोऽथशब्द इत्याशङ्कानिरासकमिदं भाष्यमित्यवतार्य, "न वयमानन्तर्यार्थतां व्यसनितया रोचयामहे । किन्तु ब्रह्मजिज्ञासाहेतुभूतपूर्वप्रकृतसिद्धये । सा च पूर्वप्रकृतापेक्षत्वेऽप्यथशब्दस्य सिद्ध्यतीति व्यर्थं आनन्तर्यार्थत्वावधारणाग्रहोऽस्माकम्" इति।

चन्द्रिका.

र्थ आनन्तर्यार्थत्वाग्रहोऽस्माकमिति यद्यर्थः, तर्हि भाष्ये "आनन्तर्यार्थः" इत्युक्त्ययुक्तिः । सूत्रे कल्पान्तरानुपन्यासेन पूर्वप्रकृतापेक्षार्थत्वमशक्यशङ्कं च । किंच—'किं नित्यश्शब्दः अथानित्यः' इत्यादिकल्पान्तरोपन्यासेऽपि, सामानाधिकरण्यार्थमनुषक्तस्य धर्मिणः 'अनित्यः' इत्यत्रापेक्षायामपि, न साऽथशब्दार्थः । अन्यथा 'उतानित्यः' इत्यादावुतादेरपि पूर्वप्रकृतापेक्षार्थत्वं स्यात् । नापि—प्रकृतादर्थादर्थान्तरपरत्वाशङ्कानिरासाय, अर्थान्तरत्वं हि यतः कुतश्चित्प्रकृताच्चेत् व्यर्थम्,

प्रकाशः

**तर्हीति** । आनन्तर्यार्थत्वाग्रहाभाव इत्यर्थः । 'पूर्वप्रकृतापेक्षो वा आनन्तर्यार्थो वा' इत्येवोक्तिः स्यादिति भावः । नन्वत एवारुच्या भामत्यां—"परमार्थतस्त्वस्तु कल्पान्तरोपन्यासे पूर्वप्रकृतापेक्षा । न चेह कल्पान्तरोपन्यास इति, पारिशेष्यादानन्तर्यार्थ एव युक्तः" इत्युक्तमित्यत आह—**सूत्र इति । अशक्यशङ्कमिति** । अनेनैतच्छङ्कानिरासाय प्रवृत्तो भाष्यकारः, तद्भाष्यव्याख्यार्थं प्रवृत्तो भवांश्चात्यन्तानभिज्ञ इत्युक्तं भवति । किञ्चाथशब्दस्य पूर्वप्रकृतापेक्षार्थत्वस्य क्वाप्यभावात्, प्रकृते तच्छङ्काऽत्यन्तानुचितेत्यभिप्रेत्याह—**किञ्च किं नित्य इति** । 'सा' पूर्वप्रकृतापेक्षा । किन्तु पूर्वप्रकृतादर्थादर्थान्तरत्वमिति भावः । कुत एवमित्यत आह—**अन्यथेति** । आदिपदात् 'आहोस्वित् यद्वा' इत्यादिग्रहः । **नापीति** । 'पूर्वप्रकृतादर्थादर्थान्तरपरत्वाशङ्कानिरासाय विवरणोक्तोऽभिप्रायः' इत्यन्वयः । प्रकृतादर्थादर्थान्तरत्वं हि यस्मात्कस्माच्चित् प्रकृ-

चन्द्रिका

पुष्कलकारणाच्चेदानन्तर्याभिधानं विना कारणत्वासिद्धिः, आनन्तर्याभिधाने च प्रकृतादर्थादर्थान्तरत्वस्यान्तर्णीततया सिद्धिरिति विवरणोक्तोऽभिप्रायः, आनन्तर्यानभिधानेऽपि, वैयर्थ्यपरिहारार्थमेव प्रकृतस्य हेतुत्वसिद्धेः। अन्यथाऽऽनन्तर्यार्थत्वेऽपि तत्प्रतियोगिनो हेतु-

प्रकाशः

तानुपयुक्तादर्थान्तरत्वं* वा, उत विचारकर्तव्यतायामुपयुक्तात्पुष्कलकारणरूपात्प्रकृताद्वेति विकल्प्य, आद्ये व्यर्थमित्युत्तरम्, तस्यावचनेनापि सिद्धत्वादिति भावः। द्वितीये त्वाह—**आनन्तर्येति**। पूर्वप्रकृतस्य कारणत्वं हि अथशब्दस्यानन्तर्यार्थत्वे सत्येव लभ्यते, आनन्तर्यस्य कारणानन्तर्ये मुख्यत्वेनानन्तर्यप्रतियोगिनः प्रकृतस्य कारणत्वलाभादिति भावः। ननु प्रकृतादर्थादर्थान्तरत्वस्यापि वक्तव्यत्वादावृत्तिः स्यादित्यत आह—**आनन्तर्याभिधाने चेति**। 'एतदनन्तरमिदम्' इत्युक्त्यैव अर्थान्तरत्वस्य लाभात् पूर्वापरभावस्यार्थभेदप्रयुक्तत्वादित्यर्थः। आनन्तर्यार्थे अथशब्दस्योक्ते, यथा आनन्तर्यप्रतियोगिनः प्रकृतस्य कारणत्वलाभस्तथा प्रकृतादर्थादर्थान्तरपरत्वेऽपि यतः कुतश्चित्प्रकृतादर्थादर्थान्तरपरत्वे प्रकृतानुपयोगेन वैयर्थ्यादेव, विचारकर्तव्यतायामुपयुक्तात्पुष्कलकारणादेवार्थान्तरत्वस्य प्राप्त्या प्रकृतस्य हेतुत्वं लभ्यत इति, तदर्थं नानन्तर्यार्थत्वाग्रहः कार्य इत्याह—**आनन्तर्यानभिधानेऽपीति**। अयं च निर्वाहस्तवापि तुल्य इत्याह—**अन्यथेति**। एवमवचन इत्यर्थः। आनन्तर्यमपि द्वेधा, यस्मात्कस्माच्चित्, विचारकर्तव्यतोपयुक्तकारणकलापाद्वा, तत्राद्यस्य

*'अर्थान्तरपरत्वम्' इति क्वचित्पाठः.

चन्द्रिका

त्वासिद्धिः । ननु कारणादानन्तर्यं मुख्यं, अव्यवधेरव्यभिचाराच्चेति, तदेवाथशब्दवाच्यमिति चेन्न, अव्यवधेरकारणादानन्तर्येऽपि सम्भवात् । अव्यभिचारित्वं तु न मुख्यत्वे हेतुः, 'चैत्रो गतः अनन्तरमेव मैत्र आगतः' इत्यादावमुख्यत्वाभिमानाभावात् । अनन्यथासिद्धनियतान-

प्रकाशः

वैयर्थ्यमेवोत्तरम्, सर्वस्यापि लोकस्य किञ्चित्करणानन्तरमेव किञ्चित्करणस्य स्वभावसिद्धत्वात्, अतो वैयर्थ्यपरिहारार्थमेव द्वितीयमेष्टव्यमित्याशयः । ननु नास्माकमेवं निर्बाहः, साक्षादेव हेतुत्वलाभात् । कारणानन्तर्यं मुख्यानन्तर्यं, कार्ये कारणानन्तर्यस्याव्यभिचारित्वात् । विजातीयेनाव्यवहितत्वाच्च । तथा च "मुख्यामुख्ययोर्मुख्ये कार्यसम्प्रत्ययः" इति न्यायेनानन्तर्यं वदन्नथशब्दः मुख्यं कारणानन्तर्यमेव वदतीत्यानन्तर्यार्थकेनैवाथशब्देन प्रकृतस्य हेतुत्वं लभ्यत इति शङ्कते—**नन्विति** । सत्यमव्यवहितमानन्तर्यं मुख्यानन्तर्यमिति । तद्यदि कार्यकरणयोरेव स्यात्, तदा स्यादेवं त्वदुक्तम् । न चैवं, 'चैत्रो गतोऽथ मैत्र आगतः' इत्यादावकारणकार्ययोश्चैत्रगमनमैत्रागमनयोरपि अव्यवहितानन्तर्यदर्शनेन मुख्यमानन्तर्यं वदन्नप्ययमथशब्दो न कारणानन्तर्यं वक्तुं शक्नोतीति भावेन परिहरति—**अव्यवधेरिति** । 'अकारणात्' चैत्रगमनात्, 'तत्कार्ये' मैत्रागमनादौ, यदानन्तर्यं, तत्राप्यव्यवधानस्य सम्भवादित्यर्थः । अत एव "हलोऽनन्तराः संयोगः" इत्यादौ 'अनन्तराः अव्यवहिताः' इत्यव्यवहितानन्तर्यं हलामाहेति भावः । **अमुख्यत्वेति** । यद्यव्यभिचारित्वमव्यवधानवत् मुख्यत्वे

चन्द्रिका

न्तरभावित्वादिरूपे कार्यलक्षणादौ नियतपदानर्थक्यप्रसङ्गाच्च । कारणस्य प्रकृतत्वं मुख्यमित्यपि सुवचत्वाच्च । पूर्वप्रकृतादर्थादर्थान्तरत्वाभिधानेऽप्यानन्तर्यस्य अन्तर्णीततया सिद्धेश्च । तस्मादस्यैव आदिसूत्रत्वेन पूर्वप्रकृतार्थसाङ्कर्यशङ्कानुदयात् " आनन्तर्येऽधिकारस्य " इति भाष्योदाहृतस्मृतिविरोधादधिकार्याद्यसूचनप्रसङ्गाच्च, न प्रकृतादर्थाद-

प्रकाशः

हेतुस्तर्हि व्यवहितानन्तर्ये यथा अमुख्यत्वाभिमानः, तथा ' चैत्रो गतः ' इत्यादौ स्यादित्यर्थः । **नियतपदेति** । अव्यभिचरितानन्तर्यरूपमुख्यानन्तर्यस्यैव ग्रहणसम्भवेनानियतानन्तर्यवति रासभादावतिव्याप्त्यभावादिति भावः । न चेष्टापत्तिः, सर्वतान्त्रिकविरोधादिति भावः ॥ **किञ्च**—यद्येवमपि कारणानन्तर्यं मुख्यमित्युच्येत, तर्ह्यर्थान्तरत्वमपि न यतः कुतश्चित्प्रकृतान्मुख्यं, किन्त्वर्थान्तरं प्रति कारणभूतात्प्रकृतादेवेति, साक्षादेव प्रकृतस्य हेतुत्वं सुवचमित्याह—**कारणस्येति**। तथा च पूर्वप्रकृतादर्थान्तरपरत्वेऽप्यथशब्दस्यानन्तर्यार्थत्वं विनैव, पूर्वप्रकृतस्य विचारकर्तव्यतायां हेतुत्वं लभ्यत इति भावः । यदप्यानन्तर्याभिधानेऽर्थान्तरत्वस्यान्तर्णीततया सिद्धिरिति, तदपि सममित्याह—**पूर्वेति** । कथं तर्हि प्रकृतादर्थादर्थान्तरपरत्वस्य निरास इत्यतः, त्रिभिर्हेतुभिस्तमाह—**तस्मादिति** । परोक्तपरिहारस्यायोगादित्यर्थः । **अधिकार्यादीति** । आनन्तर्य एव तत्सूचनादिति भावः ॥ एवं " अधिकारानन्तर्यार्थश्च " इति भाष्ये " आनन्तर्यार्थः " इत्यंशं समर्थ्य, " अधिकार "

चन्द्रिका

र्थान्तरत्वमथशब्दार्थः । एवमानन्तर्यार्थत्वे स्थिते, न तावत् तदानन्तर्यमध्ययनमात्रात्, "शान्तो दान्तः" इत्यादिश्रुतिविरोधात् । नापि कर्मविचारात्, तदनन्तरं ब्रह्मजिज्ञासेत्यत्र क्रमे श्रुत्यर्थपठनस्थान मुख्यप्रवृत्तिक्रमाणां तत्प्रमाणानामन्यतमस्याभावात् । विस्तृतं चैतद-

प्रकाशः

इत्यंशमपि समर्थयितुं प्रसक्तं प्रतिक्षिपति—**एवमिति** । मात्रपदेन शमादिव्युदासः । **शान्त इति** । "तस्मादेवं विच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत्" इति श्रुतौ शान्तादिर्भूत्वा परमात्मानं स्वस्थितं विद्यादिति शमादीनां ब्रह्मज्ञानशेषतोक्तेरिति भावः । **कर्मविचारादिति** । 'आनन्तर्यम्' इत्यस्यानुषङ्गः । 'तदनन्तरम्' कर्मविचारानन्तरम् । **श्रुतीति** । पूर्वतन्त्रे पञ्चमे आद्ये पादे श्रुत्यादीनि क्रमेण षट्प्रमाणानि निरूपितानि । तथा हि—"श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वात्" इत्याद्यनये "हृदयस्याग्रेऽवद्यति अथ जिह्वायाः अथ वक्षसः" "वेदं कृत्वा वेदिं करोति" "अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति" इत्यादौ अथादिश्रुतिः हृदयावदानाद्यानन्तर्ये मानमित्युक्तम् । तथा—"अर्थाच्च" इति द्वितीयनये "अग्निहोत्रं जुहोति यवागूं पचति" इत्यादावग्निहोत्रस्य यवागूसाध्यत्वेन यवागूपाकानन्तरमेव अग्निहोत्रकरणे सामर्थ्यशब्दितमर्थरूपं मानमुक्तम् । तथा—"क्रमेण वा नियम्येत क्रत्वेकत्वे तद्गुणत्वात्" इति चतुर्थनये "समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति" इत्यादौ पाठक्रम

चन्द्रिका

न्यत्र । नापि परेषां भाष्योक्तात् 'नित्यानित्यवस्तुविवेकः इहामुत्रार्थ-

प्रकाशः

एवानुष्ठानक्रमे मानमुक्तम् । तथा—"स्थानाच्चोत्पत्तिसंयोगात्" इति षष्ठनये ज्योतिष्टोमविकृतिभूते साद्यस्क*नामके यागविशेषे "सह पशूनालभते" इति श्रुत्या सहानुष्ठेयस्याग्नीषोमीयसवनीयानुबन्ध्य-रूपपशुत्रयस्य मध्ये पूर्वं सवनीयस्यानुष्ठाने "आश्विनं ग्रहं गृहीत्वा सवनीयं पशुमुपाकरोति" इत्युत्पत्तिवाक्यावगताश्विनग्रहणसामीप्यरूपं स्थानं प्रमाणमुक्तम् । तथा—"मुख्यक्रमेण वाऽङ्गानां तदर्थत्वात्" इति सप्तमनये "सारस्वतौ भवतः" इति विहिते "पुमान् स्त्रिया" इत्येकशेषेण सरस्वतीदेवताकसरस्वद्देवताकरूपकर्मद्वये निर्वापाद्यनुष्ठाने प्रधानक्रमापरपर्यायो मुख्यक्रमो मानमुक्तम् । तथा—"प्रवृत्त्या तुल्यकालानां गुणानां तदुपक्रमात्" इति पञ्चमनये "सप्तदश प्राजापत्यान् पशूनालभते" इति वाक्ये विहितसप्तदशपशुद्रव्यकसप्तदशयागाङ्गपश्वङ्गतया विहितेषु प्रोक्षणोपाकरणपर्यग्निकरणादिधर्मेषु सप्तदशपशुमध्ये प्रथममत्र पशौ प्रोक्षणमनन्तरमत्रेति विशेषे मानाभावेनेच्छयैव क्वचित्पशावादौ प्रोक्षणेऽनुष्ठिते, प्रथमप्रवृत्तप्रोक्षणानुरोधेन तत्रैवोपाकरणाद्यनुष्ठाने नियामकः प्रोक्षणप्रवृत्तिक्रम इत्युक्तम् । तेषु नैकमपि कर्मविचारानन्तरं ब्रह्मविचार इत्यत्रास्तीत्यर्थः । विस्तरस्तु गुरुपादकृतन्यायमौक्तिकमालायां ध्येयः । **विस्तृतमिति** । तर्कताण्डवादाविति भावः । अतोऽधिकारानन्तर्यमेवाथशब्दार्थ इति स्थितम् । तत्राधिकारोऽपि "भक्तिमान् परमे विष्णौ" इत्यादिभाष्य-

*'साद्यस्क' इत्यपि केषुचिन्मीमांसापुस्तकेषु पाठः.

चन्द्रिका

भोगविरागः शमदमादिसम्पत्तिः मुमुक्षुत्वं च' इति साधनचतुष्टयसम्पद्रूपा दधिकारात् । तथाहि—नित्यानित्यवस्तुविवेको नाम किं ब्रह्मैव नित्य मन्यदनित्यमिति विवेकः, किं वा आत्मानात्मसमुदाये नित्यत्वानित्य-त्वे स्तः, तौ च धर्मौ, तयोश्च धर्मिभ्यां भवितव्यमिति निश्चयः, यद्वा अनित्यस्य संसारस्य किञ्चिदधिष्ठानमस्तीति निश्चयो न तु ब्रह्मेति । नाद्यः, ज्ञातव्यस्य प्रागेव ज्ञाततया विचारवैफल्यात् । न च सगुण-निर्गुणविवेकाखण्डसमन्वयाद्यर्थं शास्त्रमिति युक्तम्, भामत्यां नित्यानित्य-शब्दयोः सत्यानृतपरत्वेनोक्ततया, ब्रह्मैव सत्यमन्यदनृतमिति विवेकस्य प्रागेव सिद्धौ, तदर्थस्य सगुणनिर्गुणविवेकादेरप्यनपेक्षितत्वात् । न हि श्रुतितात्पर्यधीः स्वरूपेणापेक्षिता, किन्तु ज्ञेयनिश्चायकतया । न

प्रकाशः

कोरोक्त एव नान्य इति समर्थयितुं परोक्तमनूद्य दूषयति—**नापीति** । 'भाष्योक्तात् अधिकारात्' इत्यन्वयः । 'आनन्तर्यम्' इत्यनुषङ्गः । नित्यानित्यवस्तुविवेकं तावद्दूषयितुं भामत्यनुसारेण त्रेधा विकल्पयति—**नित्येति । विचारोऽपि** । तेनापि ब्रह्मैकमेव नित्यमिति ज्ञानस्यैव सम्पाद्यत्वादिति भावः । ननु विचारो नोक्तज्ञानार्थः, किन्त्विदं निर्गुण-मिदं सगुणमिति विवेकार्थः, अखण्डे ब्रह्मणि समन्वयार्थो वा, भेदभ्रमनिवृत्त्यार्थो वेत्याशङ्क्य निराह—**न चेति । तदर्थस्येति** । सगुणनिर्गुणविवेकादिर्हि ब्रह्मैकमेव सत्यमिति ज्ञानाय, तद्यदि विचारात् प्रागेव सिद्धं, तदा तदर्थकसगुणनिर्गुणविवेकाद्यर्थं वि-चारो व्यर्थ इत्यर्थः । तदुपपादयति—**न हीति** । विचारो हि ता-त्पर्यावधारणाय, तच्च ज्ञेयनिश्चयाय, ज्ञेयं च ब्रह्मैकमेव सत्यमन्य-

चन्द्रिका

चोक्तादन्यत् मुमुक्षुज्ञेयमस्ति । जीवब्रह्मभेदस्यापि ब्रह्मातिरिक्ततया तन्मिथ्यात्वस्य, तदभेदस्यापि ब्रह्ममात्रतया तत्सत्यत्वस्यापि तेनैव निश्चितत्वाच्च । न द्वितीयः, तन्मात्रेणानात्मप्रहाणेन आत्मविचारे प्रवृत्त्ययोगात् । ऐहिकामुष्मिकभोगे विरागायोगाच्च । नान्त्यः ब्रह्मशब्दार्थत्वादेः प्रकारस्याज्ञानेऽपि, वस्तुतो ब्रह्मण अनात्माधिष्ठानस्य शास्त्रवेद्यस्य ज्ञातत्वेन शास्त्रवैयर्थ्यात् । न च विवरणरीत्या

प्रकाशः

न्मिथ्येत्येतदेव, तच्च प्रागेव ज्ञातमिति विचारो व्यर्थ इति । ननु भेदासत्यत्वमभेदसत्यत्वं च ज्ञेयम्, तच्च प्राक् न ज्ञातमित्यत आह—**जीवेति** । 'तदभेदस्य' जीवब्रह्माभेदस्य । **तन्मात्रेणेति** । यद्यन्यदनित्यं ब्रह्मैकमेव नित्यमिति निश्चिनुयात्तदा ह्यन्यपरित्यागेन ब्रह्मविचारे प्रवृत्तिर्युज्येत, यदा तु नित्यत्वानित्यत्वरूपं धर्मद्वयमस्ति, तदाश्रयौ च द्वाविति निश्चयमात्रं, तदा कथमात्मविचारे प्रवृत्तिः, किन्तु किं नित्यत्वाधिष्ठानं किं वाऽनित्यत्वाधिष्ठानमिति सन्दिहानो न क्वापि प्रवर्तेतेति-भावः । किञ्च—धामतीमते विवेकस्य विरागहेतुतोक्तेः, उक्तविवेकवतः पुंसः पशुपुत्रादैहिकभोगे स्वर्गाद्यामुष्मिकभोगे च कथं विरागस्यादित्याह—**ऐहिकेति** । तत्र विरागस्य तदनित्यताज्ञानसाध्यत्वादिति भावः । **शास्त्रवैयर्थ्यादिति** । विचारशास्त्रमप्यसत्यसंसाराधिष्ठानस्य सत्यस्य ब्रह्मणो न ब्रह्मत्वप्रकारकज्ञानजनकं, अखण्डार्थत्वहानेः, किं त्वधिष्ठानमात्रज्ञानजनकं, तच्च ज्ञानं शास्त्रात् प्रागेवास्तीति, व्यर्थं शास्त्रमित्यर्थः । **न चेति** । एतन्मते चानात्मप्रहाणेनात्मविचारे

चन्द्रिका

नित्यानित्यशब्दौ ध्वंसप्रतियोग्यप्रतियोगिपरौ, ततश्च ब्रह्मज्ञानफलं स्थायि, कर्मादिफलं त्वस्थायीति विवेको नित्यानित्यविवेक इति युक्तम्, प्रतिपन्नोपाधावत्यन्ताभावप्रतियोगित्वरूपबाध्यत्ववतोऽनात्मनः ध्वंसप्रतियोगित्वायोगात् । पारमार्थिकत्वाकारेणात्यन्ताभावः, स्वरूपेण तु ध्वंस इति चेन्न, पारमार्थिकत्वस्याबाध्यत्वरूपत्वेनान्योन्याश्रयात् । तथाऽत्यन्ताभावप्रतियोगित्वस्य निराकारे ब्रह्मण्यपि सम्भवाच्च । अतात्त्विके रूप्यादावनित्यत्वाव्यवहाराच्च । "गौरनाद्यन्तवती" "एषोऽश्वत्थस्सनातनः" इत्यादिश्रुत्यनुसाराय, मोक्षेऽपि अतात्त्विकी अनुवृत्तिः, निवृत्तिस्तु तात्त्विकी, मुक्तेर्बन्धाद्वैषम्यं तु

प्रकाशः

प्रवृत्तिरैहिकादिभोगविरागश्च युज्यत इति भावः । **प्रतिपन्नेति** । "प्रतिपन्नोपाधावभावप्रतियोगित्वलक्षणस्य मिथ्यात्वस्य" इति विवरणोक्तेस्तादृशस्य चासत्त्वापत्त्या शशशृङ्गादेरिव ध्वंसायोगादिति भावः । **अन्योन्याश्रयादिति** । अबाध्यत्वं हि बाध्यत्वाभावः, बाध्यत्वं चाबाध्यत्वाभाव इत्यन्योन्याश्रयादित्यर्थः । **तथेति** । पारमार्थिकत्वाकारेणेत्यर्थः । **अतात्त्विक इति** । तथा च कर्मादिफलस्य त्वया अतात्त्विकत्वेनाङ्गीकृतस्य नानित्यत्वं युक्तमिति भावः । ननु "भूयश्चान्ते विश्वमायानिवृत्तिः" इति निवृत्तिवाक्यस्य "नेह नाना" इत्यत्यन्ताभाववाक्यस्य च सत्त्वादेव द्वयमप्यङ्गीक्रियत इति चेत्तर्हि वचनान्तरमप्यनुसर्तव्यमिति भावेनाह—**गौरिति** । अविद्या आद्यन्तवती नेत्यर्थ । 'अश्वत्थः' संसारः । **निवृत्तिरिति** । तद्बोधकश्रुत्यनुसारायेति भावः । **मुक्तेरिति** । बन्धदशायामतात्त्विकानुवृत्तौ

चन्द्रिका

तात्त्विकनिवृत्तिमत्तामात्रेणेत्यप्यापाताच्च । किञ्च—विवेको भेदस्य तद्वच्चाप्तस्य वा ज्ञानं, तस्य च भ्रमत्वे ब्रह्मविचारो न नित्यफलकस्स्यात् । प्रमात्वे तु भेदस्सत्यः स्यात् । तस्मात् परमते न नित्यानित्यवस्तुविवेको युक्तः । नापीहामुत्रार्थभोगविरागः, विवरणे—विषयैरपि नित्यमात्मस्वरूपसुखमेवाभिव्यज्यते, न तु जन्यं सुखमस्ति इत्युक्तत्वेन वैषयिकसुखेऽपि विरागायोगात् । मोक्षे रागवतः तत्त्वतस्ततो भेदहीने भोगे विरागायोगाच्च । तत्त्वतस्तद्भेदहीनत्वेऽपि तदभेदहीनत्वमात्रेण विराग इति चेन्न, उभयाभावस्य व्याहतत्वात् । दृश्यते चापारमार्थिकस्यापि रूप्यस्य नेदं रूप्य-

प्रकाशः

सत्यामपि न तात्त्विकी निवृत्तिरिति विशेष इत्यर्थः । **भ्रमत्व इति** । यदि ब्रह्मज्ञानफलं नित्यमन्यफलमनित्यमिति ज्ञानं भ्रमः, तर्हि ब्रह्मज्ञानफलं न नित्यं स्यादिति कथं तद्विचारे प्रवर्तेत, इदं नित्यमिदमनित्यमिति भेदज्ञानस्य प्रमात्वे तद्विषयस्य सत्यत्वनियमेन भेदस्तात्विकस्स्यादित्यर्थः । उपलक्षणमेतत्, तद्वच्चाप्तो धर्मो वा सत्यः स्यादित्यपि ग्राह्यम् ॥ एवं विवेकभाष्यं मतद्वयानुरोधेन निरस्य "इहामुत्रार्थभोगविरागः" इति भाष्यं निराह—**नापीति** । नन्वात्मरूपात् सुखाद्वैषयिकसुखस्याभेदेऽपि, कल्पितभेदाद्विरागोपपत्तिरित्यत आह—**मोक्ष इति** । स्वरूपसुखरूपे मोक्षे इत्यर्थः । अधिष्ठानाध्यस्तयोरुभयाभावोपलम्भान्न व्याहतिरित्यत आह—**दृश्यत इति** । यद्वा—अध्यस्तरूप्ये सत्यामपीच्छायां तद्भेदहीने शुक्तिशकले रा-

प्रकाशः

गादर्शनेन, तद्वन्मोक्षे रागवतोऽपि भोगे विरागो युज्यत इत्यतः, तत्रापि भेदाभावोऽसिद्ध इत्याह—**दृश्यते चेति** । एवमुक्तरीत्या 'मोक्षे' इत्यादि विवरणदूषणतयैव योज्यम् । यद्वा—स्वरूपसुखमेव वैषयिकमिति विवरणमते दोषमुक्त्वा, ये तु विषयैरन्तःकरणवृत्तिरूपं सुखं दुःखमिवात्यन्तिकमेवोत्पद्यत इत्यङ्गीकुर्वते, तत्पक्षेऽपि दोषमाह—**मोक्ष इति** । अविद्यानिवृत्त्यादिरूपे मोक्ष इत्यर्थः । विरागायोगे हेतुमाह—**तत्त्वत इति** । मोक्षाद्भोगस्याविद्यकभेदसत्त्वेऽपि तात्त्विकभेदस्य मिथ्यावादिनाऽनङ्गीकारादित्यर्थः । वह्नावयं न वह्निः किन्तु गुञ्जापुञ्ज इति मिथ्याभेदसत्त्वेऽपि, तात्त्विकभेदाभावेन दाहस्यैव दृष्टेरिति भावः । नन्वग्नौ तात्त्विकभेदाभावेऽपि तात्त्विकस्याग्न्यभेदस्य सत्त्वाद्दाहो युक्तः, मोक्षस्य तु तात्त्विकस्यातात्त्विकेन वैषयिकसुखेन तत्त्वतोऽभेदायोगान्मोक्ष एव रागो न भोगे सम्भवतीति **शङ्कते—तत्त्वत इति** । ननूभयाभावस्य व्याहत्या भेदाभेदयोरन्यतरेण भाव्यमित्येतत् तात्त्विकधर्मिविषयं, सुखं त्वतात्त्विकमतो न दोष इत्यत आह—**दृश्यत इति। लौकिकेति** । शुक्तिसत्तासमानसत्ताको व्यावहारिक इत्यर्थः । तथा च तद्वदेव मोक्षसत्तासमानसत्ताकमोक्षगतताात्त्विकभेदप्रतियोगित्वं वैषयिकसुखस्यैष्टव्यम्, तच्च त्वया सदद्वैतभङ्गभिया नेष्यत इति तदभेदस्यैवापत्त्या विरागायोगो युक्त इति भावः॥ यद्वा—'सुखे न विरागः किन्तु भोग एवेत्यत आह—**मोक्ष इति**' इत्यवतार्य, विवरणदूषणपरत्वेनैव योज्यो 'मोक्षे' इत्यादिग्रन्थः । एवं परमते विरागानुपपत्तिमुक्त्वा, अन्यदपि भाष्यो-

चन्द्रिका

मिति शुक्तिधर्मिकलौकिकपारमार्थिकभेदप्रतियोगित्वम् । 'शमदमादि-सम्पत्तिः' इत्यत्र च आदिशब्दो न युक्तः, तेन तितिक्षादेरेव ग्र-

प्रकाशः

क्तं निराह—शमेति । ननु "शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत्" इत्येकश्रुत्युपात्तत्वमेव संग्राहकधर्म इति चेन्न, 'पश्येत्' इत्यात्मज्ञानस्यापि ग्रहणापत्तेः । न चात्मज्ञानाङ्गतया उपात्तत्वं, तच्च 'भूत्वा' इत्यनेन शमादिपञ्चकस्यैवेति वाच्यम्, 'उपरतो विषयालंबुद्धिमान्' इत्यनेन विरागस्य 'समाहितो यथावस्तुतत्त्वज्ञानी' इत्यनेन नित्यानित्यविवेकस्य च प्राप्त्या तयोः पार्थक्यायोगादिति भावः । अत एव "तितिक्षाद्यनुगतस्य" इत्याद्याह । कथं तर्हि भाष्ये "शमादिसंयुक्तो मध्यमः समुदाहृतः" इति आदिशब्द इति चेन्न, श्रुत्युक्तशमादिसर्वाशयेनोपपत्तेः। न ह्यत्र नित्यानित्यविवेकादि पृथगुपादाय आदिशब्दः प्रयुक्तोऽस्ति। "आब्रह्मस्तम्बपर्यन्तं" इत्यादिना वैराग्यस्य पृथगुक्तिस्तु, वैराग्यस्य प्राचुर्येणोक्त्योत्तमाधिकार्युक्त्यर्थेत्युपपतेः । तथा शान्तादिश्रुत्या नित्यानित्यविवेकस्य स्पष्टमप्रतीतेर्वैराग्यहेतुत्वालाभाच्च, सारासारविवेकादौ "परीक्ष्य लोकान्" इति श्रुत्यन्तरोदाहरणं भाष्ये युक्तम्। कथं तर्हि "एवं भूतैः प्रमाणैः पदार्थानां नित्यत्वानित्यत्वादिकं निश्चित्य विषयेषु विरक्तस्य शमदमादिसम्पत्तिमतः" इत्यादिप्रमाणपद्धत्यादिप्रकरणे तत्र तत्र विवेकादिकं पृथगुक्त्वाऽपि 'शमदमादि' इत्यादि-शब्दोक्तिरिति चेन्न, हेतुहेतुमद्भावाभिव्यक्त्यर्थतया वा परप्रसिद्ध्या

चन्द्रिका

हणं न तु विवेकादेरिति नियमहेतोः तितिक्षाद्यनुगतस्य विवेकादिव्यावृत्तस्य च उपसङ्ग्राहकधर्मस्याभावात् । मुमुक्षा च न परपक्षे युक्ता, मोक्षस्य नित्यसिद्धात्ममात्रत्वेन तत्रेच्छाऽयोगात् । वृत्त्युपलक्षितस्याप्यात्मनो वृत्तेः पश्चादिव पूर्वमपि सत्त्वाच्च । किञ्च—किमहं मुक्तस्यामितीच्छा मुमुक्षा, चिन्मात्रं मुक्तं स्यादिति वा ।

प्रकाशः

स्पष्टार्थतया वा " शमदमाद्युपेतस्स्यात् " इत्यत्र " शान्तो भवेद्दान्तो भवेदनुकूलो भवेदाचार्यं परिचरेत् " इति भाष्योदाहृतश्रुत्यन्तरोपात्तधर्माभिप्रायेण वोपपत्तेरिति दिक् ॥ भाष्योक्तमन्यदपि निराह—**मुमुक्षा चेति** । ननु नात्ममात्रं मोक्षः, येनोक्तदोषः, किन्त्वखण्डाकारवेदान्तजन्यचरमवृत्त्युपलक्षित एव, स च पूर्वं न सिद्ध इतीच्छा युक्तेत्यत आह—**वृत्तीति** । तथा च नेच्छोपपत्तिरिति भावः । ननु नात्ममात्रं मोक्षः, किन्त्वविद्यानिवृत्तिलक्षणः पञ्चमप्रकार आत्मान्यः, अतो न सदद्वैतभङ्गः । उक्तं च—

न सन्नासन्न सदसन्नानिर्वाच्यश्च तत्क्षयः ।

इतीति चेन्न, चतुर्थप्रकारस्यैवायोगेन पञ्चमप्रकारस्याप्ययोगात् । सदप्यविद्यानिवृत्तिरूपो मोक्षः आत्मान्यः सत्य एव, न चाद्वैतभङ्गः, अभावद्वैतस्याङ्गीकारात् । अतो मोक्षेच्छा युक्तेति, तदप्यभावद्वैतस्य न्यायामृते निरासान्निरस्तम् । विस्तरस्तु चतुर्थपरिच्छेदे बोध्य इति भावः ॥ एतन्मतसाधारण्येन दोषान्तरमाह—**किञ्चेति** । अहमर्थस्य मुक्तिः स्यादितीच्छा, उताहमर्थविशेष्यभूतस्य चिन्मात्रस्य

चन्द्रिका

नाद्यः, त्वन्मतेऽहमर्थस्य मुक्त्यनन्वयात् । नान्त्यः, जातेष्ट्यधिकारिणः पितुः पुत्रस्य स्वार्थत्वात् पुत्रः पूतादिः स्यादितीच्छावत्, प्रकृते चिन्मात्रस्येच्छाश्रयाहमर्थार्थत्वाभावेन तादृशेच्छाया अदर्शनेन, विपरीतेच्छाया एव च दर्शनेन, ज्ञानस्यानिष्टफलत्वापा-

प्रकाशः

मुक्तिः स्यात् इतीच्छेत्यर्थः । **मुक्त्यनन्वयादिति** । अहमर्थस्यानात्मत्वेन तद्विलयस्यैव मोक्षत्वादिति भावः । **आनिष्टेति** । चिन्मात्रं मुक्तं स्यादितीच्छा ह्यहमर्थस्य वाच्या, चिन्मात्रस्येच्छाश्रयत्वायोगात्, तथा चान्यगतफलेच्छया अन्यस्य श्रवणादौ प्रवृत्त्ययोगेन न तथेच्छा सम्भवतीत्यहमर्थार्जितज्ञानस्याकाम्यमानचिन्मात्रमुक्तिफलकत्वेऽनिच्छाविषयफलकत्वं स्यादित्यर्थः । ननु जातेष्ट्यादौ पुत्रगतपूतत्वोद्देशेन पितुः प्रवृत्तिवद्भविष्यतीत्यतस्तद्वैषम्यमाह—**जातेष्टीति** । चतुर्थस्य तृतीयपादे "फलसंयोगस्त्वचोदिते न स्यादशेषभूतत्वात्" इति सप्तदशेऽधिकरणे, "वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते" इति विधाय श्रुते "यस्मिन् जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति" इति फलवाक्ये किं पूतत्वादिकमिष्टिकर्तुः पितुः फलम्, उत पुत्रस्य इति विशये, अन्यफलकर्मणान्यस्य प्रवर्तनायोगात्, पितुरेव प्रवर्त्यत्वेन विधिविरोधात्, "अग्नीनादधीत" इत्याधानवाक्यगतात्मनेपदेनाग्निसाध्यकर्मफलानामाधातृगामित्वनियमात् पितुरेव फलमिति प्राप्ते, "यस्मिन् जाते निर्वपति स पूतो भवति" इति स्पष्टं

चन्द्रिका

तात् । किञ्च—किं भामतीरीत्या साधनचतुष्टये पूर्वपूर्वस्य उत्तरोत्तरहेतुत्वेन मुमुक्षैवाधिकारिविशेषणमन्यत्तद्धेतुभूतं, किं वा विवरणैकदेशोक्तरीत्या मुमुक्षावद्विवेकादिरप्यधिकारिविशेषणम् । आद्ये मुमुक्षानन्तर्यमेव अथशब्दार्थस्स्यात्, न चतुष्टयानन्तर्यम् । अन्यथा

प्रकाशः

पुत्रगामित्वावगमात्, पुत्रफलमपि पितुरभिलषितमेवेति, विधेरात्मनेपदस्य चाविरोधात् पुत्रस्यैव फलमिति सिद्धान्ततम् । अत्र पुत्रस्य पितुरुपकारकत्वेन पित्रर्थत्वात् पुत्रगतपूतत्वादीच्छा पितुः यथा सम्भवति, न तथा प्रकृते चिन्मात्रस्याहमर्थोपकारकत्वाभावेनाहमर्थार्थत्वाभावाच्चिन्मात्रगतमुक्तीच्छा नाहमर्थस्य युक्तेत्यर्थः । किञ्च—चिन्मात्रं मुक्तं स्यादितीच्छाया अननुभवेन, अहं मुक्तः स्यामितीच्छाया एवानुभूयमानत्वेनाकाम्यमानफलत्वं स्यादित्याह—**तादृशेति** । एवं साधनचतुष्टयं भाष्यकारीयं पृथङ्निरस्य, प्रकारान्तरेणापि निरसितुं मतद्वयानुरोधेन विकल्पयति—**किञ्च किमिति** । **मुमुक्षानन्तर्यमेवेति** । तथा च "अथशब्देन यथोक्तसाधनसम्पत्त्यानन्तर्यमुपदिश्यते" इति तदीयभाष्यविरोध इति भावः । मुमुक्षानन्तर्योक्तौ तद्धेत्वानन्तर्यमपि लभ्यत इत्यत आह—**अन्यथेति** । तथा च भाष्ये आनन्तर्यप्रतियोगित्वेन साधनचतुष्टयोक्तिरयुक्तेति भावः । **सामर्थ्यादेरिति** । "अर्थी समर्थो विद्वानधिक्रियते" इति न्यायेन सामर्थ्यादौ सति कर्माद्यनुष्ठानमन्यथा नेत्यन्वयव्यतिरेकाभ्यां अर्थित्वादेरधिकारिविशेषणत्वं यथा, एवं साधनचतुष्टयस्याप्यधिकारिविशेषणत्वं गम्यं किमित्यर्थः।

चन्द्रिका

विवेकहेत्वानन्तर्यमपि तदर्थः स्यात् । अन्त्येऽपि तत्किं सामर्थ्यादेरिवान्वयव्यतिरेकाभ्यां गम्यं, किं वा गृहदाहादेरिव शास्त्रात् । नाद्यः, शमाद्यभावेऽपि मुमुक्षामात्रेण विचारदर्शनात् । ननु स विचारः शूद्रयागवन्न फलपर्यन्तः, तत्पर्यन्तस्तु शमाद्यभावे नास्तीति चेन्न, तथाऽपि विरागशमादिमुमुक्षासु सतीषु, विवेकाभावेन फलपर्यन्तं विचाराभावादर्शनात् । नान्त्यः, श्रुत्याद्यवगतशेषत्वस्यापि म-

प्रकाशः

**गृहदाहादेरिति** । "यस्य गृहान् दहत्यग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत्" इति क्षामवत्यामिष्टौ गृहदाहो निमित्तमधिकारिविशेषणं यथा शास्त्रादवगम्यते, तथा मुमुक्षावद्विवेकादिरप्यधिकारिविशेषणं किं शास्त्राद्गम्यमित्यर्थः । **मुमुक्षामात्रेणेति** । तथा च व्यतिरेकव्यभिचारान्न शमादेरधिकारिविशेषणत्वमिति भावः। **स विचार इति** । मुमुक्षामात्रवत्कृतः । **विवेकाभावेनेति** । तथा च नित्यानित्यविवेकस्य नाधिकारिविशेषणत्वमिति भावः । न च तदभावे वैराग्यादिकमेव नेति वाच्यम्, तद्धेतुत्वस्य त्वयाऽनङ्गीकारादिति भावः । **श्रुतीति** । तृतीये "लिङ्गक्रमसमाख्यानात् काम्ययुक्तं समाम्नानम्" इति द्वितीयपादीयसप्तमेऽधिकरणे "काम्ययाज्यानुवाक्याकाण्डम्" इति समाख्याते मन्त्रकाण्डे समाम्नातानां "इन्द्राग्नी रोचना दिवः" इत्यादीनां मन्त्राणां किं लिङ्गेन सर्वत्र विनियोगः, किं वा क्रमसमाख्याभ्यां 'काम्येष्टिकाण्डम्' इति समाख्याते इष्टिकाण्डे क्रमेणाम्नातास्विष्टिषु इति संशये, श्रु-

चन्द्रिका

न्त्रस्य वस्तुसामर्थ्यापरपर्यायलिङ्गेनानुष्ठेयप्रकाशनद्वारैव शेषत्ववत्, आरुण्यादेरेकहायन्यादिद्रव्यावच्छेदद्वारैव क्रयशेषत्ववच्च, विवेकादि-

प्रकाशः

तिवदर्थप्रकाशनसामर्थ्यरूपलिङ्गस्यापि प्रमाणान्तरानपेक्षस्यैव विनियोजकत्वात्, क्रमसमाख्याभ्यां बलवत्त्वाच्च, तद्बाधेनार्थवशेन सर्वत्र-विनियोग इति प्राप्ते, मन्त्रप्रकाश्यानामिन्द्रादीनां कर्मणोऽन्यत्रापि प्रतीतेः, तत्स्वरूपमात्रप्रकाशनेन मन्त्राणां फलाप्राप्तेः, तत्प्राप्तये कर्मसम्बन्धापादकं प्रमाणान्तरमपेक्ष्य द्वारविशेषे लिङ्गविशेषस्य विनियोजकत्वमिति क्रमसमाख्यानुसारेण काम्येष्टिष्वेव विनियोग इति सिद्धान्तितम् । तथा—तत्रैव "अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात्" इत्याद्यपाक्षीयषष्ठेऽधिकरणे ज्योतिष्टोमे श्रुतं "अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति" इति वाक्यमुदाहृत्य किमारुण्यं वाक्यभङ्गाश्रयेण प्राकरणिकसर्वद्रव्येषु निविशते, किं वा क्रयेण सम्बद्धचैकहायन्यां निविशते इति संशये, तृतीयया करणत्वावगमादमूर्तस्य गुणस्य क्रियानिर्वर्तनाशक्तेः क्रयसमन्धायोगाद्वाक्यभेदेन प्राकरणिकसर्वद्रव्ये निवेश इति प्राप्ते, गुणस्य साक्षात्क्रियानिर्वर्तकत्वायोगेऽपि, साधनीभूतद्रव्यावच्छेदद्वारा तत्सम्भवान्न वाक्यभेदो न्याय्य इत्येकहायन्यामेव निवेश इति सिद्धान्तितम् । अत्र लैङ्गिकविनियोगस्य सामान्यसम्बन्धघटकप्रमाणान्तरसापेक्षतया श्रुतिप्रकरणादिना सिद्धे तस्मिन् लिङ्गेनानुष्ठेयविशेषप्रकाशनद्वारा यथा मन्त्राणां कर्मशेषत्वं, यथा वा तृतीयाश्रुत्या

चन्द्रिका

रपि वैराग्यादिद्वारैव विचारहेतुत्वस्य न्याय्यत्वात्, "परीक्ष्य लोकान्" इति श्रुतिसिद्धत्वाच्च, मुमुक्षावदधिकारिविशेषणत्वायोगात् । न हि यागे स्वर्गकामनावत्तद्धेतुभूतमप्यधिकारिविशेषणम् । अस्माकं तु मते, यथाशास्त्रं विवेकादेरधिकारिविशेषणवैराग्यादिहेतुत्वं, शमादेस्त्वधिकारिविशेषणत्वमिति, विशेषणानां चतुष्कमिति परोक्तं न युक्तम् ॥

प्रकाशः

अवगतक्रयशेषत्वस्याप्यारुण्यादेः क्रयसाधनैकहायनीद्रव्यावच्छेदद्वारेण तच्छेषत्वं, तथा विवेकादेर्विचारहेतुत्वश्रवणेऽपि वैराग्यादिद्वारैव विचारहेतुत्वं न्याय्यं, विवेकादेर्वैराग्यजनन एव सामर्थ्यादिति भावः। विचारविधिवाक्य एव विवेकादेः साक्षाद्धेतुत्वावगमेऽपि, पारम्पर्ये न्याय्यमिति वक्तुं द्वितीयदृष्टान्तः । न केवलमिदं न्यायप्राप्तं, श्रुतं चेत्याह—**परीक्ष्येति** । "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्" इत्यत्र लोकान् विष्णुलोकेतरान् कर्मोपादितानसारानित्यतया परीक्ष्य वैराग्यं प्राप्नुयादिति श्रुत्या विवेकस्य हेतुत्वलाभात्, समानकर्तृकयोः पूर्वकाले क्त्वाप्रत्ययस्मरणादिति भावः । ननु परम्परयाऽपि विशेषणत्वलाभात् कथमयोग इत्यत आह—**मुमुक्षावदिति** । न साक्षादिति भावः । 'तद्धेतुभूतं' कामनाहेतुभूतम् । अयं च दोषस्तवापि सम इत्यत आह—**अस्माकमिति** । 'परीक्ष्य' इति श्रुतेर्विवेकस्य वैराग्यादिहेतुत्वमित्यर्थः। वक्ष्यमाणदिशा निदिध्यासनाङ्गत्वमेवेति भ्रान्तिं निरस्यति—**शमादेस्त्विति** ॥

चन्द्रिका

केचित्तु—नित्यानित्यवस्तुविवेकादीनि न ब्रह्ममीमांसाधिकारि-विशेषणानि, तेषां तत्साध्यत्वेन अन्योन्याश्रयात् । न च ब्रह्मज्ञानफलमेव नित्यमन्यदनित्यमिति विवेको वैशेषिकादिशास्त्रान्तरात्, प्रथममेव अध्ययनविधि वश्यतया* पुरुषस्य शास्त्रान्तरानवकाशात् । तत्रोक्तनित्यानित्यविवेकस्य वेदान्तविरुद्धत्वाच्च । नापि इतिहासपुराणादिना, विचारात्प्राक् तेन तदनिश्चयात् । अन्यथा ब्रह्मनिश्चयोपि तेनैव स्यात् । शमदमादीनि तु निदिध्यासनाङ्गानि, "तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वाऽऽ

प्रकाशः

**नित्यानित्येति** ॥ आदिपदाच्छमादिग्रहः । **अन्योन्याश्रयादिति** । ब्रह्मज्ञानफलं नित्यमन्यफलमनित्यमिति विवेको विचारशास्त्रसम्पाद्य इति हेतोः, विवेके सति अधिकारसम्पत्त्या शास्त्रे प्रवृत्तिः, तत्प्रवृत्त्यनन्तरं च विवेकसम्पत्तिरिति अन्योन्याश्रयादित्यर्थः । **शास्त्रान्तरादिति** । 'सिद्ध्यति' इति शेषः । येन नान्योन्याश्रय इति भावः । 'विवेकः' इत्येव वक्तव्ये 'ब्रह्मज्ञान' इत्यादिना तद्विवरणं तद्विरोधस्फोरणाय । अत एवाह—**तत्रोक्तेति** । **नापीति** । 'विवेकः' इत्यनुषङ्गः । निरस्यति—**विचारादिति** । तथा च विचारे प्रवृत्त्यनन्तरं तेनेतिहासाद्यर्थनिर्णये ततो विवेकसिद्धिः, तत्सिद्ध्यनन्तरं च विचारे प्रवृत्तिरित्यन्योन्याश्रय एवेति भावः । **अन्यथेति** । विचारं विनैवापाततो विवेकसिद्धावित्यर्थः । शमादेरपि विचाराङ्गत्वं प्रागादिपदेन निरस्तमपि स्पष्टं निराह—**शमेति** ॥ यद्वा—प्रागधिकारि-

* बद्धतया इति पाठान्तरम्.

चन्द्रिका

त्मन्येवात्मानं पश्येत्" इति श्रुतौ एवंविच्छब्देन **शास्त्रजन्य**-ज्ञानमनूद्य 'पश्येत्' इति निदिध्यासनाङ्गतया तेषां विधानात्। न तु विचाराङ्गानि, इहैव विचारशास्त्रे "शमदमाद्युपेतस्स्यात्" इत्यत्र तद्विधानादित्याहुः। तन्न,

यत्त्वादौ श्रद्धया सिद्धं पुनर्न्यायेन साधितम्।

इति न्यायेन—

अनित्यत्वात् सदुःखत्वान्न धर्माद्याः परं सुखम्।
मोक्ष एव परानन्दः

इत्यादीतिहासादिना वा, "नास्त्यकृतः कृतेन" इत्यादिश्रुतित आ-

प्रकाशः

विशेषणत्वं निरस्तम्। तदेव कुत इत्यतोऽनङ्गत्वादिति भावेन अ-ङ्गत्वं निरस्यति—**शमेति। शास्त्रजन्येति।** विचारजन्येत्यर्थः। श-**मेति।** "शमदमाद्युपेतस्स्यात्तथाऽपि तु तद्विधेस्तदङ्गतया तेषाम-वश्यानुष्ठेयत्वात्" इति सूत्रे तृतीये विधानादित्यर्थः। तथा च **शास्त्रे** प्रवृत्त्यनन्तरं शमादिविधिदृष्ट्या तत्सम्पादनं, तत्सम्पत्त्यन-न्तरं च **शास्त्रे** प्रवृत्तिरित्यन्योन्याश्रय इति भावः। 'श्रद्धया' आस्तिक्यबुद्ध्या 'न्यायेन' इत्यादितृतीयान्तानां 'विवेकसिद्धेः' इत्यन्वयः। धर्मादीनां परमसुखत्वाभावे हेतुद्वयम्—**अनित्यत्वा-दित्यादि**। तथा च सयुक्तिकत्वान्निश्चायकत्वमस्येति भावः। "सं-सारे परिवर्तनाम्" इति वाक्यशेषः। 'अकृतः' नित्यपुमर्थो मोक्षः, 'कृतेन' कर्मणा न सिद्ध्यतीत्यर्थः। ननु विना विचारं श्रुत्यर्थो

चन्द्रिका

पाततो वा, श्रुतिमूलहितैषिपित्रादिवाक्येन वा, श्रवणेन वा, मननात्मकविचारात्प्रागपि श्रद्धामात्रेण नित्यानित्यविवेकसिद्धेः। अन्यथा त्वन्मतेऽपि अपशूद्रमधिकारे ज्ञाते अशूद्रस्यैतच्छास्त्रविचारे प्रवृत्तिः, प्रवृत्तौ चैतच्छास्त्रेणापशूद्रमधिकार इत्यन्योन्याश्रयस्स्यात्। तथा—अध्ययनविधावपिं अधीते स्वाध्याये "अष्टवर्षं ब्राह्मणमुपनयीत" इत्यादिवाक्येन अष्टवर्षत्वादेरधिकारिविशेषणत्वज्ञापनम्, तज्ज्ञाने च अध्ययने प्रवृत्तिरिति अन्योन्याश्रयस्स्यात्। तथा—ब्रह्मज्ञानस्य अनन्तस्थिरफलत्वनिश्चये तदर्थिनो ब्रह्मविचारे निश्शङ्कप्रवृत्तिः, विचारेण च तन्निश्चय इत्यन्योन्याश्रयस्स्यात्। फलज्ञानं सम्भावनात्मकं चेत्, विवेकोऽपि तथाऽस्तु। यद्यपि त्वन्मते पूर्ववृत्तेन कर्मविचारेण कर्मणामल्पास्थिरफलत्वं निश्चितम्, तथाऽ-

प्रकाशः

न निर्णीत इत्यत उक्तम्—**अपातत इति**। वाक्येऽप्रामाण्यव्युदासायोक्तम्—**श्रुतीति**। 'श्रवणेन' औपदेशिकवाक्यार्थग्रहणरूपेण। **सिद्धेरिति**। तथा च नान्योन्याश्रय इति भावः। **अपशूद्रमिति**। "अपपरिबहिरञ्चवः पञ्चम्या" इत्यव्ययीभावः। "शुगस्य तदनादरश्रवणात्" इति नये शूद्रस्याधिकारनिषेधादिति भावः। **अधिकार इति**। अधिकारज्ञानमित्यर्थः। अत उक्तैव रीतिरुपेयेति भावः॥ ननु ब्रह्मज्ञानं नित्यफलमिति निश्चित्य तत्र न प्रवर्तते, येनोक्तदोषः, किन्तु प्रायेण नित्यफलं भवितुमर्हतीत्युत्कटकोटिकसंशयादेवेत्याशङ्क्य, मोक्षोऽपि नित्यो भवितुमर्हतीत्येवंरूपादेव ज्ञानादत्रापि प्रवृत्तिः स्यादित्याह—**फलेति**।

चन्द्रिका

पि न तन्निश्चय एव नित्यफलार्थिनो ब्रह्मविचारे प्रवृत्तिहेतुः, भिन्नविषयत्वात् । अतिप्रसङ्गाच्च । नापि—कर्मणामरुपास्थिरफलत्वनिश्चयसहितो ब्रह्मज्ञानस्यापाततोऽनन्तस्थिरफलत्वसन्देहस्तद्धेतुः, अन्यस्यानुपायत्वनिश्चयेन ततो निवृत्तिमात्रसिद्धावपि, तस्योपायत्वानिश्चये तदुपेयार्थिनः तत्र निश्शङ्कमप्रवृत्तेः । "एवंवित्" इति वाक्येन शमादीनां निदिध्यासनाङ्गत्वेऽपि "प्रशान्तचित्ताय शमान्विताय प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्" इत्यादिवाक्यावगतं श्रवणाङ्गत्वं च न

प्रकाशः

**भिन्नेति** । कर्मणामनित्यफलत्वनिश्चयेन नित्यपुमर्थार्थिनः ततो निवृत्तावपि, यावद्ब्रह्मज्ञानस्य न नित्यफलत्वं निश्चितं, तावद्ब्रह्मविचारे प्रवृत्तिर्न युक्तेत्यर्थः । **अतिप्रसङ्गाच्चेति** । वात्स्यायनादावपि प्रवृत्तिप्रसङ्गात्, कृषेर्धान्यफलकत्वनिश्चयेन ज्योतिष्टोमादौ स्वर्गार्थिनः प्रवृत्तिप्रसङ्गादित्यर्थः । **निश्चयसहित इति** । अतो न भिन्नविषयत्वमिति भावः । 'अन्यस्य' कर्मणः । 'तस्य' ब्रह्मज्ञानस्य । 'तत्र' ब्रह्मज्ञानजनकविचारे । एतदुक्तं भवति—ब्रह्मज्ञानस्यानन्तस्थिरफलत्वसंदेहेन ब्रह्मविचारे सशङ्कप्रवृत्तौ सम्भवन्त्यामपि, न निश्शङ्कप्रवृत्तिः, तस्याश्च तथाविधफलहेतुत्वनिश्चयसाध्यत्वात्, तस्य च विचारमन्तरेणासिद्धेरन्योन्याश्रयो दुर्वार इत्युक्तैव रीतिराश्रयणीयेति । एवं नित्यानित्यवस्तुविवेकस्य ब्रह्मविद्याधिकारिविशेषणत्वं समर्थ्य शमादेरपि तत्त्वं समर्थयते—**एवंविदितीति** । यथा ह्येकस्यैव दध्यादेर्वचनात् क्रत्वर्थत्वं पुरुषार्थत्वं च तद्वदिति भावः ।

## अथशब्दो मङ्गलार्थोऽधिकारानन्तर्यार्थश्च ।

तत्त्वप्रकाशिका

श्यकर्तव्यत्वात्तत्फल*तयाऽथशब्दं व्याचष्टे—**अथेति**। मुक्त्यर्थिमात्रस्य

चन्द्रिका

विरुद्धम् । किञ्च—"परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" इत्यादौ विवेकादीनां श्रवणाङ्गोपसत्तेः पूर्वभावश्रुतेः कथं श्रवणानन्तरभावित्वम् । न च नित्यानित्यविवेकमात्रं विचारफलं, येन तद्वैयर्थ्यं स्यात् ॥

तस्मादथशब्दस्य अधिकारानन्तर्यमेवार्थः, तदर्थत्वं च स्वमत एव युक्तं, न तु परमते इत्यभिप्रेत्याह भाष्यकारः—**अधिकारानन्त-**

प्रकाशः

**परीक्ष्येति** । कर्मोपादितान् विष्णुलोकेतरान् लोकानसारानित्यतया निश्चित्य ब्राह्मणो वैराग्यं सम्पादयेत्, यतोऽकृतो मोक्षः कर्मणा न सिद्ध्यति, किन्तु ज्ञानेन, तस्माद्विज्ञानार्थं गुरुमुपगच्छेदित्यर्थः । **श्रवणेति** । 'विचारानन्तरभावित्वम्' इति वाच्येऽप्येवमुक्तिः, तस्य श्रवणाङ्गत्वमप्यस्तीति वक्तुम् । ननु विवेकादेर्विचारात् प्राक्सिद्धत्वे विचारोऽनर्थक इत्यत आह—**न चेति** । वासुदेवमहामहिमादेरपि वर्णनादिति भावः ।

"प्रतिवचनाद्यभावेऽपि" इत्यादिना प्रतिपादितमर्थमुपसंहरन् भाष्यारूढं करोति—**तस्मादिति** । प्रारम्भाद्यर्थकत्वासम्भवादित्यर्थः ॥ एवमथशब्दार्थं समर्थ्य "यतो नारायणप्रसादमृते न मोक्षः" इत्यन्ताथशब्दार्थप्रपञ्चनपरभाष्यटीकाक्षराणि दुर्घटार्थानि यो-

*'तत्परतया' इत्यपि पाठः.

चन्द्रिका

**र्थार्थश्चेति** । टीकायां "तत्फलतया" इति पाठस्साधुः, न तु "तत्परतया" इति, विघ्नोत्सारणासाधारणकारणरूपस्य विष्णुस्मरणाथशब्दोच्चारणादेर्मङ्गलस्याशब्दार्थत्वेन तत्परत्वायोगात् । प्रशस्तरूपमङ्गलात्मकस्य ब्रह्मणः अथशब्दावयवाकारार्थत्वेऽपि, तस्येहाप्रस्तुतत्वात् । "तस्याभिधेयमर्थमाह" इत्युत्तरग्रन्थाननुगुणत्वात् । "मङ्गलप्रयोजनकः" इति सुधाग्रन्थविरोधाच्च । "मङ्गलोक्त्यादेः" इति टीकाया अपि विघ्ननिवर्तकशब्दोच्चारणादेरित्येवार्थः, अन्यथा "शङ्खवीणावेणुध्वनिवत् श्रुतितो माङ्गलिकत्वात्" इति सुधाविरोधात् । "तत्परतया" इति पाठेऽप्ययमेवार्थोऽनुसन्धेयः । एवं च "अथशब्दो

प्रकाशः

नयति—**टीकायामिति** । 'तत्परतया' इति क्वाचित्कपाठस्य लेखकदोषत्वं मन्वान आह—**तत्फलतयेति** । योगरूढिगौणीलक्षणाभेदभिन्नमुख्यामुख्यवृत्तिव्यतिरेकेण तात्पर्यवृत्त्यभावस्य कर्मनिर्णयादौ समर्थितत्वेन, शब्दवृत्तिविषयस्यैव तात्पर्यवृत्तिविषयतया मङ्गलस्य पूर्वोक्तरीत्या शब्दार्थत्वाभावेनाथशब्दस्य तत्परत्वासम्भवादित्यर्थः । ननु 'अकारः परब्रह्माभिधायकः' इति भाष्योदाहृतस्मृतेरकारस्य विष्णुवाचित्वात्तस्य च "मङ्गलानां च मङ्गलम्" इति स्मृत्या परममङ्गलरूपत्वात् 'तत्परतया' इति पाठ उपपद्यत इत्यत आह—**प्रशस्तेति**। नन्वेवं "सिसृक्षोः" इति भाष्यावतारिकायां 'मङ्गलोक्त्यादेः' इत्ययुक्तं, तत्र मङ्गलस्योक्तिरभिधानं तस्य शब्दान्तरेणापि सम्भवादित्यर्थप्रतीतेरित्यत आह—**मङ्गलोक्त्यादेरितीति** । **इति पाठेऽपीति** ।

चन्द्रिका

मङ्गलार्थः" इति भाष्यस्य, अथशब्दो विघ्नोत्सारणासाधारणकारणात्मकानुष्ठेयविष्णुस्मरणाथशब्दोच्चारणरूपमङ्गलप्रयोजनकः प्रशस्त-

प्रकाशः

तन्मङ्गलं परं मुख्यं फलं यस्य तत्त्वेनेत्यर्थ उक्तो भवति। भाष्ये उदाहरिष्यमाणप्रमाणानुसारात् "मङ्गलार्थः" इति भाष्यं द्वेधा व्याचष्टे—**एवं चेति**। मङ्गलस्य फलत्वे सतीत्यर्थः। **अनुष्ठेयेति**। अथशब्देन जायमानविष्णुस्मृत्यादेः कृतिसाध्यत्वादिति भावः। **अननुष्ठेयेति**। विष्णोरकृतिसाध्यत्वादिति भावः। विष्णुवाचकत्वोक्तिश्च मङ्गलफलकत्वोपपादनोयति ध्येयम्। उक्तं च तत्त्वप्रदीपे—"अथशब्दः श्रवणकीर्तनाभ्यां मङ्गलफलः, विष्णोः परमङ्गलस्य वाचकत्वेनातिप्रियत्वात्" इति। एतेन—क्वचित् 'तत्परतया' इति पाठस्य 'मङ्गलरूपविष्णुपरतया' इत्यर्थः, क्वचित् 'तत्फलतया' इति पाठस्य 'मङ्गलफलकतया' इत्यर्थ उक्तो भवतीति केचिदाहुः। एतेन—यत्तु केनचिदुक्तं-भाष्ये "मङ्गलार्थोऽधिकारानन्तर्यार्थश्च" इति चशब्दोऽनुपपन्नः, तुल्यार्थे हि समुच्चयः, यथा गोशब्दः सास्नावदर्थो जलार्थश्चेति। न चेह मङ्गलं वाच्यम्, येन चकारोपपत्तिः, 'मङ्गलफलक आनन्तर्यवाचकः' इत्येतावत एव सामञ्जस्यादिति, तन्निरस्तम्। मङ्गलरूपविष्ण्वर्थकत्वस्यापि वर्णनात्। सकृच्छ्रुतस्याप्यथशब्दस्य तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयणेनार्थद्वयोपपत्तेः। न केवलं मङ्गलफलकः, किन्त्वानन्तर्यवाचकश्चेति चशब्दोपपत्तेश्चेति। आद्यतृतीययोः 'आक्षिपति' इत्यनुक्त्वा

**अतश्शब्दो हेत्वर्थः । उक्तं च गारुडे—**

**अथातश्शब्दपूर्वाणि सूत्राणि निखिलान्यपि ।**
**प्रारभन्ते नियत्यैव तत्किमत्र नियामकम् ॥**
**कश्चार्थश्च तयोर्विद्वन् कथमुत्तमता तयोः ।**

तत्त्वप्रकाशिका

ब्रह्मजिज्ञासायां प्रवृत्तिनिरसनपरतयाऽपि तं व्याचक्षाणस्तस्याभिधेय मर्थमाह—**अधिकारेति** । अथशब्दस्यानन्तर्यमात्रार्थत्वेऽप्यधिकारस्य योग्यतया सम्बन्धः । ब्रह्मजिज्ञासायाः प्रयोजनशून्यताशङ्कानिवर्तकतयाऽतश्शब्दं व्याचष्टे—**अत इति** । नन्वथातश्शब्दपूर्वकत्वं सूत्राणां किंनिमित्तं, मङ्गलोक्तचादेः शब्दान्तरेणापि सम्भवादित्याशङ्कां पुराणवचनेनैव परिहरति—**उक्तं चेति** । 'अत्र' प्रथमप्रयोज्यत्वे नियामकेन भाव्यम् । तत्किं नियामकम् । न चैतत्प्राथम्यं यादृच्छिकम्, यतो निखिलान्यपि नियत्यैव तत्पूर्वकाणीत्यर्थः । नियामकं च भवत् द्विविधं भवेत् । अवश्यवक्तव्यार्थत्वमाधिक्यं चेति। आधिक्यं च स्वरूपतोऽर्थतश्चेति द्वेधा भवति । तत्रादिपक्षे पृच्छति—**कश्चेति** । कोसाववश्यवक्तव्योऽर्थो येन प्राथम्यमित्यर्थः । द्वितीयमाक्षिपति—**कथमिति** । शब्दान्तरस्य स्वरूपोत्तमत्वादर्शनात्कथ-

चन्द्रिका

रूपाननुष्ठेयविष्णुभिधायकश्चेत्यर्थद्वयं द्रष्टव्यम् । **द्वितीयमाक्षिपतीति।** अवश्यवक्तव्यार्थत्वार्थाधिक्ययोस्तदभावयोश्च लोके शब्दान्तरेषु दर्श-

प्रकाशः

द्वितीये तथोक्तौ को हेतुरत आह—**अवश्येति** । "कथमुत्तमता"

एतदाख्याहि मे ब्रह्मन् यथा ज्ञास्यामि तत्त्वतः ॥
एवमुक्तो नारदेन ब्रह्मा प्रोवाच सत्तमः ।
आनन्तर्येऽधिकारस्य मङ्गलार्थे तथैव च ॥
अथशब्दस्त्वतश्शब्दो हेत्वर्थे समुदीरितः ।
परस्य ब्रह्मणो विष्णोः प्रसादादिति वा भवेत् ॥
स हि सर्वमनोवृत्तिप्रेरकस्समुदाहृतः ।

तत्त्वप्रकाशिका

मनगोस्तदिति भावः । तृतीयेऽपि पृच्छति—**कथमिति** । अवश्य वक्तव्यार्थत्वात् प्रथमप्रयोग इति परिहारमभिप्रेत्यावश्यवक्तव्यार्थत्वं तयोर्दर्शयति—**आनन्तर्य इति** । अत्रातश्शब्दस्यावश्यवक्तव्यमर्थान्तरं चाह—**परस्येति** । अकारवाच्याद्विष्णोस्तत्प्रसादात्तज्जिज्ञासादि कार्यमिति वाऽतश्शब्दार्थो भवेदित्यर्थः ॥ "अः इति ब्रह्म" इत्यादिश्रुतिं सूचयति परब्रह्मग्रहणेन । किं जिज्ञासाद्यर्थं भगवत्प्रसादेनेत्यत आह—**स हीति** । ननु मङ्गलोक्तयादेः शब्दान्तरेणापि

चन्द्रिका

नादथशब्दे तत्सन्देहेन प्रश्नमात्रमाद्यतृतीययोः, द्वितीये तु स्वरूपाधिक्यस्य शब्दान्तरेष्वदर्शनात् अथशब्दे तदाक्षेप इति भावः । कथंशब्दमाक्षेपपरतया व्याख्याय, प्रश्नपरतयाऽपि व्याचष्टे—**तृतीये-**

प्रकाशः

इति भाष्यस्थकथंशब्दस्याक्षेपार्थत्वेन व्याख्यानात् "तृतीये पृच्छति" इति कस्यार्थ इति न ज्ञायते, अत आह—**कथंशब्दमिति** । "सि-

सिसृक्षोः परमाद्विष्णोः प्रथमं द्वौ विनिस्सृतौ ॥
ओङ्कारश्चाथशब्दश्च तस्मात्प्राथमिकौ क्रमात् ।
तद्धेतुत्वं वदंश्चापि तृतीयोऽत उदाहृतः ॥

तत्त्वप्रकाशिका

सम्भवात्किमेतत्प्रयोगनियत्येत्यतः, स्वरूपाधिक्यं चास्तीत्याह—**सिसृक्षोरिति** । प्रथमं विनिस्सृतावतः स्वरूपोत्तमौ, तस्मात्प्राथमिकावित्यर्थः । यत्स्वजातौ प्रथमं हरेर्निस्सरति, तत्तत्रोत्तममिति न्यायोऽनुसन्धेयः । अतश्च तृतीयतया प्राथमिक उदाहृतः । यतः तृतीयतयोदाहृतो विष्णुनेत्यत उत्तम इत्यर्थः । 'तद्धेतुत्वं' तस्य

चन्द्रिका

ऽपि पृच्छतीति । **इति न्याय इति** । सामान्यव्याप्तिरेवानुसन्धेया, "यथा देवेषु चतुर्मुखः" इति दृष्टान्तसम्भवात्, न तु 'यश्शब्दः' इति विशेषव्याप्तिः, दृष्टान्ताभावादिति भावः । 'अतः'

प्रकाशः

सृक्षोः" इति भाष्यव्याख्याऽवसरे "यत्स्वजातौ प्रथमं हरेर्निस्सरति, तत्तत्रोत्तमम् इति न्यायोऽनुसन्धेयः" इत्युक्तम् । तत्रैवमेव व्याप्त्यनुसन्धानेऽभिप्रायमाह—**इतिन्याय इतीति** ॥

तद्धेतुत्वं वदंश्चापि तृतीयोऽत उदाहृतः ।

इति भाष्ये 'अतश्च तृतीयोऽपि प्राथमिकः' इत्यादिटीकोक्ताशेषार्थाप्रतीतेराह—**अत इत्यस्येति** । यद्यपि 'अतः' इत्यस्यातश्शब्दपरत्वं हेतुपरत्वं चेति सकृदावृत्तिरेव भाति, तथाऽपि "यतस्तृतीयतयोदाहृतः" इत्यत्र "उत्तमः" इत्यत्र च विशेष्याकाङ्क्षायामतश्श-

**अकारस्सर्ववागात्मा परब्रह्माभिधायकः ।**
**तथौ प्राणात्मकौ प्रोक्तौ व्याप्तिस्थितिविधायकौ ॥**

तत्त्वप्रकाशिका

विष्णोर्जिज्ञासादौ हेतुत्वं, तस्य जिज्ञासादेर्मोक्षहेतुत्वं वा वदन्नित्यनुवादः । न केवलमाधिक्यं स्वरूपत एव, किं त्वर्थतश्चेत्यतोऽपि प्रथमप्रयोग इत्याह—**अकार इति** । सर्ववागर्थपूर्णताऽभिधायकतया **परब्रह्माभिधायक** इत्यर्थः । **प्राणात्मकाविति** । प्राणदैवत्यौ भगवद्वाचकौ । अभिमान्यभिमन्यमानयोरैक्यव्यपदेशो "महतश्चतुर्मुखात्"

चन्द्रिका.

इत्यस्य अतश्शब्दपरत्वं, हेतुपरत्वं, असकृदावृत्तिं, 'तृतीयः' 'उदाहृतः' इत्यनयोरावृत्तिं, 'प्राथमिकौ' इत्यस्य वचनव्यत्ययेनानुषङ्गं चाभिप्रेत्य व्याचष्टे—**अतश्च तृतीयतयेति । महतश्चतुर्मुखादिति।** महत्तत्त्वाभिमानिनश्चतुर्मुखादित्यर्थः । **अयं वै लोकः प्रथमा महा-**

प्रकाशः

ब्दपरस्य 'अतः' इत्यस्यान्वयात् "असकृदावृत्तिम्" इत्युक्तम् । **वचनेति** । एकवचनान्तत्वेनेत्यर्थः । 'महतः' महत्त्वगुणयुक्तादिति भ्रान्तिं निरस्यति—**महत्तत्त्वेति** । यद्यपि "आन्महतस्समानाधिकरणजातीययोः" इति स्मृतेर्महातत्त्वेतिवाच्यम् । तथाऽपि प्रमेयदीपिकायां 'महत आत्' इति स्थानिनः पूर्वमुद्देशे कार्ये "आन्महतः" इति निर्देशाद्वा, 'जातीयसमानाधिकरणयोः' इत्यल्पाच्तरस्यं पूर्वमुद्देशे कार्ये व्यत्यासेन निर्देशाद्वा ज्ञापकादात्वमनित्यमित्युक्ततया वा, द्वितीये "चक्षिङः ख्याञ्" इत्यत्र "संज्ञाच्छन्दसोर्बहुलम्"

अतश्च पूर्वमुच्चार्याः सर्व एते सतां मताः ।
अथातश्शब्दयोरेवं वीर्यमाज्ञाय तत्त्वतः ॥
सूत्रेषु तु महाप्राज्ञास्तावेवादौ प्रयुञ्जते । इति ।
अधिकारश्चोक्तो भागवततन्त्रे—
मन्दमध्योत्तमत्वेन त्रिविधा ह्यधिकारिणः ।
तत्र मन्दा मनुष्येषु य उत्तमगणा मताः ॥
मध्यमा ऋषिगन्धर्वा देवास्तत्रोत्तमा मताः ।

तत्त्वप्रकाशिका

इत्यादौ प्रसिद्धः । वाच्यवाचकयोरैक्यव्यपदेशो " अयं वै लोकः प्रथमा महानाम्नी " इत्यादौ दृष्टः । ' अतः ' इत्युपसंहारः । ' वीर्यं ' स्वरूपाधिक्यादिमाहात्म्यम् । ननु कोऽसावधिकारः कतिविधश्च ब्रह्मजिज्ञासायां, यदानन्तर्यमथशब्दो वक्तीत्यत आह—**अधिकारश्चेति** । अत्राधिकारिकथनेऽपि तद्विशेषणतयाऽधिकारोऽप्युक्तो भवति । अनेन

चन्द्रिका

**नाम्नीति** । " विदा मघवन् " इत्यादिका ऋक् पृथिवीलोक-

प्रकाशः

इति वचनाद्वा 'महत्तत्व' इति साधु, तथैव सुधोक्तेः । वाच्यवाचकभावस्य स्फुटमप्रतीतेराह—**विदा मघवन्निसादिकेति** । परमैश्वर्यादिसम्पन्नमहार्थप्रतिपादकत्वेन महच्छब्दितेन्द्रादिनामास्यामस्तीति महानाम्नीसंज्ञिता " विदा मघवन् " इत्यादिका ऋक् अयंलोकशब्दाभ्यामभिधीयमानविष्णुवाचिकेति भावेन, " अयं वै लोकः प्रथमा महानाम्नी "

**इति जातिकृतो भेदस्तथाऽन्यो गुणपूर्वकः ॥**
**भक्तिमान्परमे विष्णौ यस्त्वध्ययनवान्नरः ।**

तत्त्वप्रकाशिका

मोक्षयोग्यत्वं सामान्यलक्षणमभिप्रेतम् । अस्य च सच्छूद्रादौ *व्याप्तेः प्रायिकत्वादरुच्या प्रकारान्तरेणाधिकारिस्वरूपमाह—**तथेति** । अत्राध्ययनलब्धाऽपि विष्णुभक्तिरन्याय्याध्ययननिवृत्तयर्थं पृथगुक्ता । तथा च हरिभक्तिपूर्वकाध्ययनवत्त्वं सामान्यतो ब्रह्मविद्याधिकार इत्युक्तं

चन्द्रिका

स्थविष्णुवाचिकेत्यर्थः । **अरुच्येति** । सच्छूद्रस्य देहान्तरे वैदिकब्रह्मविद्याधिकारेऽपि नैतद्देहेऽधिकारः, देहान्तरेऽधिकारश्च नेदानीं प्रवृत्त्युपयोगीत्यरुच्येत्यर्थः । **अध्ययनलब्धाऽपीति** ।

अवैष्णवस्य वेदेऽपि ह्यधिकारो न विद्यते ।

इत्यादेरित्यर्थः । **अन्याय्याध्ययनेति** । अभक्तानधिकारिकृतत्वमन्याय्यत्वम् । **भक्तिपूर्वकाध्ययनमिति** । शमादिकमप्यत्र

प्रकाशः

इत्यादि ब्राह्मणं प्रवृत्तमित्यर्थः । सच्छूद्रस्य मोक्षहेतुज्ञानावश्यंभावेन ब्रह्मविद्याधिकारित्वात् कथमरुचिरित्यत आह—सच्छूद्रस्येति । 'देहान्तरे' विप्रदेहे । कथमध्ययनेन विष्णुभक्तेर्लाभ इत्यत आह—**अवैष्णवस्येति** । भक्तिपूर्वकाध्ययनमुपलक्षणमित्याह—**शमादिक**-

*लक्ष्यमात्रे यस्य व्याप्तिस्तद्धि लक्षणम् । मुक्तियोग्यत्वस्य च सच्छूद्रे असामर्थ्यानर्थित्वाभ्यामधिकाररहितेषु पशुपक्ष्यादिषु च व्याप्तिरस्तीत्यतिव्याप्तिरेव । विदुरधर्मव्याधजारितार्यादिष्वधिकारदृष्टेः तद्व्यापनंनानिष्टमित्यतउक्तं–प्रायिकत्वादिति । विदुरादिभिन्नेष्वपि अधिकारविधुरसच्छूद्रादिषु बहुषु मुक्तियोग्यत्वसत्त्वान्नेष्टापत्तिरित्यर्थः ॥

अधमश्शमादिसंयुक्तो मध्यमस्समुदाहृतः ॥
आब्रह्मस्तम्बपर्यन्तमसारं चाप्यनित्यकम् ।
विज्ञाय जातवैराग्यो विष्णुपादैकसंश्रयः ॥
स उत्तमोऽधिकारी स्यात्सन्न्यस्ताखिलकर्मवान् । इति ॥
"अध्ययनमात्रवतः" "नाविशेषात्" इति चोपरि ।

तत्त्वप्रकाशिका

भवति । 'शमादिसंयुक्तः' इत्यादौ पूर्वसङ्ग्रहः, पूर्वत्र चोत्तरोक्तानुकर्षश्च कर्तव्यः । न चैवं साङ्कर्यम्, उत्तरोक्ताप्राचुर्येणासाङ्कर्यात् । ब्रह्माद्यसारता नाम तेषामसर्वोत्तमत्वं, तत्पदादीनां मोक्षावरत्वं च ज्ञेयम् । नन्वत्र 'ब्रह्मविद्यायां' इत्यनुक्तेः कुतोऽयमधिकारस्तत्रैविध्यं च ब्रह्मविद्यायामित्यत आह—अध्ययनेति ।

चन्द्रिका

विवक्षितम् । उत्तरोक्ताप्राचुर्येणेति । 'पूर्वपूर्वस्मिन्*' इति शेषः । तत्श्चायमर्थः—समानाधिकरणानां वेदाध्ययनशमादिविष्णुपादैकसंश्रयत्वादीनां मध्ये यस्य शमादिविष्णुपादैकसंश्रयत्वादिके अप्रचुरे, अध्ययनं तु प्रचुरं, सोऽधमः । यस्य विष्णुपादैकसंश्रयत्वादिकमेव अप्रचुरं, अध्ययनशमादिके तु प्रचुरे, स मध्यमः । यस्य तु विष्णुपादैकसंश्रयत्वादिकं प्रचुरं, अध्ययनशमादिके त्व-

प्रकाशः

मिति । आकाङ्क्षितं पूरयति—पूर्वपूर्वस्मिन्निति । निष्कर्षति—तत-

* अस्याधमे मध्यमे चेत्यर्थः । शेषपूरणं विनैव 'उत्तरोक्ताप्राचुर्येण' इत्यस्यावृत्तया उत्तमलक्षणलाभः । उक्तयोरधमे मध्यमे चोक्तयोरध्ययनशमाद्योरुत्तरस्मिन् उत्तमे अप्राचुर्येणेति तदर्थः । एतेन अत्रोक्तमुत्तमलक्षणं टीकालब्धं नेति निरस्तम् ॥

"शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत्" । "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" । "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्" ।

तत्त्वप्रकाशिका

'उपरि' तृतीये वक्ष्यते । शमादिसंयुक्तता च ब्रह्मविद्यायामेवाधिकार इति श्रुत्याऽऽह—शान्त इति । 'शान्तः' भगवन्निष्ठबुद्धिः । 'दान्तः' निगृहीतेन्द्रियः । 'उपरतः' विषयालं बुद्धिमान् । 'तितिक्षुः' द्वन्द्वसहिष्णुः । 'समाहितः' यथावस्तुज्ञानादिमान् । शान्तादिर्भूत्वा परमात्मानं स्वस्थितं विद्यादिति तेषां तादर्थ्यमुक्तं भवति, "उपनीतोऽधीयीत" इत्यादिवत् । अत्र 'आत्मनि' इत्युक्त्या मध्यमाधिकारित्वं सूचितम्, "ऋषयोऽन्तःप्रकाशाः" इति श्रुतेः । सारासारविवेकाद्यपि ब्रह्मविद्यायामेवाधिकार इति श्रुत्या दर्शयति—**परीक्ष्येति** । 'लोकान्' विष्णुलोकेतरान् कर्मोपादितान् असारानित्यतया परीक्ष्य वैराग्यं प्राप्नुयात् । स च मोक्षादितरत्र निर्विण्णो विज्ञानार्थं गुरुमेवाभिगच्छेत् यस्मान्नित्यपुमर्थो मोक्षः कर्मादिना न सिद्ध्यति, तस्मादित्यर्थः । अत्रापि विज्ञानपदेनोतमाधिकारित्वं सूचितम् । "देवादीनां तु यज्ज्ञानं विज्ञानमिति कीर्तितम्" इत्युक्तेः । विष्णुभक्तिरपि ब्रह्मविद्यायामधिकार इति श्रुत्याऽऽह—**यमिति** । 'एषः' विष्णुः, यं वृणुते, 'तेन लभ्यः' तस्य प्रसन्नो भवति । ततश्च तस्याधिकारिणः स्वस्वरूपं

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

इत्यादिश्रुतिभ्यश्च । व्योमसंहितायां च—

अन्त्यजा अपि ये भक्ता नामज्ञानाधिकारिणः ।
स्त्रीशूद्रब्रह्मबन्धूनां तन्त्रज्ञानेऽधिकारिता ॥
एकदेशे परोक्ते तु न तु ग्रन्थपुरस्सरे ।
त्रैवर्णिकानां वेदोक्ते सम्यग्भक्तिमतां हरौ ॥
आहुरप्युत्तमस्त्रीणामधिकारं तु वैदिके ।
यथोर्वशी यमी चैव शच्याद्याश्च तथाऽपराः ॥ इति ।

---

तत्त्वप्रकाशिका

प्रकाशयतीत्यर्थः । अत्र 'वृणुते' इत्यनेन भक्तत्वं सूचितम् । सा च भक्तिर्विष्णौ सर्वाधिकाऽन्येष्वपि यथायोग्या ब्रह्मविद्योपयोगिनीत्येतच्छ्रुत्याऽऽह—**यस्येति** । नन्वध्ययनवतामेव ब्रह्मविद्याधिकारित्वे त्रिवर्णेतरेषामध्ययनविधुराणां ज्ञानाभावेन मोक्षाभावः स्यादित्याशङ्क्य प्रमाणेन परिहरति—**व्योमसंहितायां चेति** । 'अन्त्यजाः' वर्णबाह्याः । 'भक्ताः' इत्यधिकारकथनम् । 'तन्त्रं' पञ्चरात्रादि । अध्ययनाभावेन वैदिकज्ञानानधिकारित्वेऽपि त्रिवर्णेतरेषां नामादिज्ञानाधिकारित्वान्मोक्षोपपत्तिरिति भावः । "सपत्नीं मे पराधम" इत्यादौ स्त्रीणामपि वेदाधिकारदर्शनात्कथं तासामनधिकार इत्यत उक्तस्यापवादमाह—**आहुरिति** ॥ 'तथा पराः' मुनिस्त्रियो नरादिकुलजाश्च । एवमथशब्दं

**यतो नारायणप्रसादमृते न मोक्षः, न च ज्ञानं विनाऽत्यर्थप्रसादः, अतो ब्रह्मजिज्ञासा कर्तव्या।**

तत्त्वप्रकाशिका

संक्षेपविस्ताराभ्यां व्याख्याय, "अतःशब्दो हेत्वर्थः" इत्युक्तं व्यनक्ति—**यत इति**। सुखमेव मे स्याद्दुःखं मनागपि मा भूदिति सर्वाभिमतमोक्षस्य नारायणात्यर्थप्रसादमन्तरेणासम्भवादत्यर्थप्रसादस्य च तदपरोक्षज्ञानमन्तरेणालाभादपरोक्षज्ञानस्य च ब्रह्मजिज्ञासां विना अनुदयादत्यर्थप्रसादद्वारा मोक्षसाधनापरोक्षज्ञानोत्पादिका ब्रह्मजिज्ञासा

चन्द्रिका

प्रचुरे, स उत्तम इति। **यतो नारायणप्रसादमृते न मोक्ष इत्यादि**। ननु प्रकृतस्य हेतुत्ववाचकेनातश्शब्देन कथमिदं लभ्यम्, अधिकारिविशेषणत्वेन मोक्षस्य प्रकृतत्वेऽपि तं प्रति नारायणप्रसादस्य साधनत्वादेरप्रकृतत्वेन तस्य 'अतः' इत्यत्र प्रातिपदिकेन परामर्शासम्भवेन तस्य विचारकर्त्तव्यतायां हेतुत्वस्य

प्रकाशः

**श्रेति** ॥ एवमथशब्दव्याख्यानपरभाष्यटीकाभिप्रायं तत्तदक्षरयोजनां च स्फुटीकृत्यातश्शब्दार्थविवरणभाष्याभिप्रायं स्फोरयितुमाक्षिपति—**नन्विति** ॥ 'इदं' मोक्षसाधनप्रसादसाधनज्ञानहेतुत्वम्। तदेव व्यनक्ति—**अधिकारीति**। अधिकारिविशेषणेच्छाविषयत्वेनेत्यर्थः। ज्ञानसाध्यत्वमादिपदार्थः। **प्रातिपदिकेनेति**। एतच्छब्दात्परपञ्चम्यास्तसिलादेशे "एतदोऽश्*" इति प्रकृतिभागस्य एतच्छब्दस्य 'अश्' इत्यादेशे 'अतः' इति रूपम्। तथा च प्रकृतपरामर्श्येतच्छब्दादेशेन अकारेण प्रकृतमुद्दिश्य, तस्य तसिला हेतुत्वमुच्यते, न च

*काशिकानुसार्ययं सूत्रपाठः। "शकारः सर्वादेशार्थः" इति तत्रोक्तेः। "एतदोऽन्" इति तु कौमुदीधृतः पाठः॥

चन्द्रिका

विभक्त्योक्त्ययोगात् । मैवं, "यमेवैष वृणुते" इत्यादिश्रुत्या प्रयोजनाभावप्रयुक्तानारम्भणीयत्वशङ्कानिरासहेतोरन्यस्याभावात्, "स्रुवेणावद्यति" इत्यादौ 'द्रवद्रव्यम्' इतिवत् 'यतः' इत्यादिभा-

प्रकाशः

प्रसादस्य मोक्षसाधनत्वं ज्ञानस्य प्रसादसाधनत्वं च प्रकृतं, येन हेतुत्वमभिदध्यादित्यर्थः । **विभक्त्येति** । विभक्त्यादेशेन तसिलेत्यर्थः । उक्तशङ्कायाः सप्तधा परिहारमाह—**यमित्यादिना**। यमात्मा प्रसन्नस्सन् वृणुते, तेनैव प्राप्य इति श्रुत्या, "न तादृशी प्रीतिः" इति श्रुत्या, "द्रष्टव्यः" इति श्रुत्या च प्रसादादिगतमोक्षादिहेतुत्वस्य 'शब्दतः प्रकृतत्वसम्भवात्' इत्यन्वयः । बुद्धिस्थस्य हि परामर्शः, बुद्धिस्थत्वं च श्रुत्युक्तत्वात्सम्भवतीति भावः । यद्वा—'अध्याहारेण' 'शब्दतः प्रकृतत्वसम्भवात्' इत्येवान्वयः । अध्याहारस्य निरङ्कुशत्वाद्वैपरीत्येनाध्याहारः किं न स्यादित्यत उक्तं—**इत्यादिश्रुत्येति** । तथा च 'श्रुत्याऽध्याहारेण' इति अध्याहारे श्रुतिर्मूलमित्याशयेन व्यधिकरणे तृतीये । अध्याहारमूलभूतामर्थापत्तिं चाह—**प्रयोजनेति** । यद्वा—'शङ्कानिरासहेतोरन्यस्याभावात्' इत्येतत्कुत इत्यतः 'इत्यादिश्रुत्या' इत्यन्वेति । तथा चार्थापत्तिरेकैवाध्याहारे बीजमिति ध्येयम् । तत्र श्रौतं दृष्टान्तमाह—**स्रुवेणेति** । आद्ये "अर्थाद्वा कल्पनैकदेशत्वात्" इति चतुर्थपादीयान्तिमाधिकरणे "स्रुवेणावद्यति, स्वधितिनाऽवद्यति, हस्तेनावद्यति" इत्युदाहृत्य, द्रवद्रव्येष्वाज्यादिषु संहतेषु मांसादिषु पुरोडा-

चन्द्रिका

प्योक्ताध्याहारेण शब्दतः प्रकृतत्वसम्भवात् । अतएव "यत्रानवसरः" इति श्लोको "यतः" इत्याद्यध्याहारसमर्थनपरतयाऽपि

प्रकाशः

शादिषु च किमविशेषेण विनियोगः, किं वा यथासामर्थ्यम् इति विशये, विशेषाश्रवणादनियमे प्राप्ते, अशक्यार्थे विध्ययोगादवश्यं विधायकस्य शक्तिः सहकारिणीत्युपेयत्वाच्छक्तिसहायो विधिरेव यथासामर्थ्यं विधेयं व्यवस्थापयतीति, द्रवद्रव्यादिषु स्रुवादीनां विनियोग इति सिद्धान्तितम् । तत्र यथा सामर्थ्यानुसारेण विनियोगे सिद्धे 'स्रुवेण द्रवद्रव्यमवद्यति' इत्याद्यध्याहारेण वाक्यं पूर्यते, तथेहापि "यमेव" इत्यादिश्रुत्युक्तशङ्कानिरासहेतोरन्यस्याभावान्मोक्षेहेतुप्रसादजनकज्ञानकारणत्वस्यैवोक्तशङ्कानिरसनसमर्थतया स एव भाष्योक्ताध्याहारेण पूर्यत इत्यर्थः । उक्तं च सुधायाम्—

जिज्ञासोत्थज्ञानजात्तत्प्रसादादेव मुच्यते ।

इत्यत्र "यद्यपि न सूत्राक्षरेभ्यो भगवत्प्रसादो लभ्यते, तथाऽप्यन्यथाऽनुपपत्त्याऽङ्गीकरणीयः" इति । अन्यथाऽनुपपत्तचाऽध्याहार इत्यत्र भाष्योदाहृतवचनं संवादयति—**अतएवेति** । यस्मात् "यतः" इत्यादिवाक्याध्याहारं विना विचारकर्तव्यत्वरूपार्थानुपपत्त्या "यतः" इत्याद्यध्याहारः, अत एवेत्यर्थः । न केवलं कर्तव्यपदाध्याहारसमर्थनपरतयेत्यपरेर्थः। अतएव तत्र "वाक्यं वा" इत्युक्तिरिति भावः । श्लोकार्थस्तु टीकायां स्पष्टः । 'प्रामाणिकत्वात्' प्रमाणेन बुद्धौ सन्निहितत्वात् । 'इदंश-

यत्रानवसरोऽन्यत्र पदं तत्र प्रतिष्ठितम् ।
वाक्यं वेति सतां नीतिः सावकाशे न तद्भवेत् ॥
इति बृहत्संहितायाम् ।

तत्त्वप्रकाशिका

कर्तव्येत्यर्थः । यदुक्तमसन्दिग्धत्वान्न ब्रह्मणो विषयत्वमिति, तद्ब्रह्मपदप्रयोगेण परास्तम् । तथाहि—भवेदेतदसन्दिग्धत्वं जिज्ञास्यस्य, यदि तत्स्वप्रकाशजीवाभिन्नं स्यात् । न चैतदस्ति, जिज्ञास्ये ब्रह्मपदश्रवणात् "तद्विजिज्ञासस्व । तद्ब्रह्म" इति । ब्रह्मशब्दश्च पूर्णगुणतां वक्ति, "अथ कस्मादुच्यते ब्रह्मेति । बृहन्तो ह्यस्मिन् गुणाः" इति श्रुतेः । तथा च कथं तस्य जीवाभेदः, जीवस्याल्पगुणत्वेनानुभवात् । न च ब्रह्मणि गुणाध्यासः, परमार्थतोऽब्रह्मत्वप्रसङ्गात् । देशाद्यपरिच्छिन्नता ब्रह्मतेति चेन्न, उक्तश्रुतिविरोधात् । देशाद्यपरिच्छेदेन च जीवभेदसिद्धेः, जीवाणुत्वस्य च वक्ष्यमाणत्वात् । अतो जीवस्य स्वप्रकाशत्वेऽपि तद्भिन्नब्रह्मणः सन्दिग्धत्वाद्विषयत्वसिद्धिः । मोक्षाख्यप्रयोजनसद्भावात्, तत एवाधिकार्यादिसम्भवाद्ब्रह्मजिज्ञासा कर्तव्येति । ब्रह्मपदव्याख्यानरूपं नारायणपदम् । ननु कर्तव्येति पदमत्र न श्रूयते । यद्यध्याहारस्तर्हि न कर्तव्येत्यध्याहारः किं न स्यादध्याहारस्य निरङ्कुशत्वादित्यत आह—यत्रेति । 'यत्र' वाक्ये महावाक्ये वा, यत्पदं वाक्यं वा विना 'अन्यत्र' अर्थान्तरे, 'अनवसरः' अर्थान्तरस्याघटना, 'तत्र' वाक्ये महावाक्ये वा, तदेव पदं वाक्यं वा, 'प्रतिष्ठितं' प्राप्तं, नान्यदिति सतां न्यायः । यत्पदं वाक्यं

तत्त्वप्रकाशिका

वा विनापि पदान्तरेण वाक्यान्तरेण वा वाक्ये महावाक्ये वा 'सावकाशे' अर्थान्तरे घटनावति, तदेव पदं वाक्यं वा नियमेन प्रतिष्ठितं न भवेदिति न्यायात्कर्तव्यपदमेवाध्याहार्यम् । न कर्तव्येत्यादेरधिकारकथनादिनाऽयोगादिति भावः । नारायणप्रसादमृते

चन्द्रिका

व्याख्येयः * । यद्वा—जन्मादिसूत्रे प्रामाणिकत्वाज्जगत इदंशब्देन परामर्शवदत्रापि प्रमादादेर्मोक्षहेतुत्वादेः प्रामाणिकत्वादेतच्छब्देन प-

प्रकाशः

ब्देन' 'अस्य' इत्यनेन । ननु तत्र 'अस्य' इति प्रामाणिकत्वान्न जगत्परामर्शः, किन्तु "यतो वा इमानि भूतानि" इति विषयवाक्यगतस्य जगद्वाचिनः 'इमानि' इत्यस्य विपरिणामेन निर्देशः । न च तत्र 'जीवन्ति' इति श्रवणाद्भूतपदस्य चेतनमात्रपरत्वेन कृत्स्नजगत्तत्र न प्राप्तमिति वाच्यम्, भूतशब्दस्य सर्वचेतनपरत्वे तदभिमन्यमानमहदादिजडस्यापि प्राप्तेः, तेन विना तेषां जन्मायुक्तेः । अन्यथा कृत्स्नहेतुत्वस्य श्रुतावप्राप्तौ, तद्वचाख्यारूपे सूत्रे 'अस्य' इत्यनेन कृत्स्नलाभायोगादिति चेन्न, 'इमानि' इत्यनेनापि प्रामाणिकत्वादेव जगत्परामर्शस्य वाच्यतया सूत्रेऽपि स एव न्यायोऽनुसर्तव्य इति तात्पर्यात् । अतएव सुधायां—"अस्य प्रत्यक्षादिप्रमाणसिद्धतया प्रमितस्य समस्तप्रपञ्चस्य" इत्युक्तम् । ज्ञानप्रसादहेतुत्वे क्रमेणादिपदद्वयग्राह्ये । प्रामाणिकत्वेऽप्यप्रकृतस्य कथं परा-

* एतेन—टीकायां 'ननु' इत्याद्यवतरणवाक्ये 'कर्तव्येतिपदं' इत्यनेन "यतोनारायणेत्यादि" इति, 'नकर्तव्येति' इत्यनेन "नारायणप्रसादमृते मोक्ष इत्यादि" इति चोपलक्षणीयमिति ज्ञापितम् ॥

"तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते"।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः।
"यमेवैष वृणुते तेन लभ्यः" "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्यादिश्रुतिस्मृतिभ्यः।

तत्त्वप्रकाशिका

न मोक्ष इत्येतत्कुत इति तत्राह—तमिति। अत्र ज्ञानान्मोक्षो नामानन्यथोपपत्त्या प्रसादादेवोक्तो भवति। ज्ञानेन भगवत्प्रसाद इत्येतत्कुत इति तत्राह—प्रियोहीति। न केवलमर्थान्मोक्षस्य प्रसादैकसाध्यत्वं, किन्तु श्रुतं चेति तां श्रुतिं चाह—यमिति। यमात्मा प्रसन्नस्सन् वृणुते, तेनैव प्राप्य इत्यर्थः। जिज्ञासया ज्ञानमित्येतत्कुत इति तत्राह—आत्मेति। दर्शनार्थं श्रवणादिरूपा जिज्ञासा कार्येत्यर्थः। न च श्रवणादेरसन्वाच्यता, "जिज्ञासितं सुसंपन्नं" इति विचारेऽपि तत्प्रयोगात्, इच्छाया अविधेयत्वात्, भवतीत्यादिकथनस्य वैय्यर्थ्यात्। सूत्रं च श्रुत्यनुसारीति॥

चान्द्रका

रामर्शः। बुद्धिसन्निधानमेव हि प्रकृतत्वम्। अत एव "तमेवं विद्वान्" इत्यादिना तस्य प्रामाणिकता दर्शिता भाष्ये। यद्वा—

प्रकाशः

मर्श इत्यत आह—बुद्धीति। प्रमाणमेव बुद्धौ सन्निधापकमिति भावः। किं तत्प्रमाणमित्याशङ्कामुक्तार्थे भाष्यसंवादप्रदर्शनेन निरस्यति—अत एवेति। बुद्धिस्थपरामर्शकत्वादेवेत्यर्थः। प्रमाणार्थस्तु टीकायां स्पष्टः॥ एवं भाष्यपर्यालोचनया लब्धं समाधिद्वयमुक्तम्। तत्राऽपि 'यतः' इत्याद्यन्तरङ्गभाष्यलब्धमादाउक्तम्। उक्तार्थस्य प्रामाणिक-

चन्द्रिका

एतत्सूत्रानन्तरितेन "नारायणोऽसौ परमो विचिन्त्यो मुमुक्षुभिः कर्मपाशादमुष्मात्" इत्यादिना विधिवाक्येन उपस्थापितत्वात् विचारस्य मोक्षप्रयोजनकत्वमतश्शब्दार्थः, व्याख्येये प्रकृतस्य व्याख्याने 'अतः' इति परामर्शसम्भवात । यद्वा—अनुव्याख्यानोक्तरीत्या मीमांसाङ्गभूतब्रह्मतर्के प्रकृतत्वात् सिद्धे व्युत्पत्त्यादिकमिव, विचारस्य

प्रकाशः

त्वोक्तिपरबाहिरङ्गभाष्यलब्धं पश्चात् । इदानीं बहिरङ्गतः प्राप्तया तदाह—**एतत्सूत्रेति** । **मोक्षप्रयोजनकत्वमिति** । 'प्रसादद्वारा' इति शेषः, "यस्य प्रसादात्परमार्तिरूपादस्मात्ससारान्मुच्यते नापरेण" इति पूर्वार्धेन तत्प्राप्तेः । यद्यप्यत्र "तद्विजिज्ञासस्व" इति श्रुतिरेवोदाहृता, तथाऽपि सूत्रस्यानेकशाखानिर्णायकत्वान्नानाशाखागतविचारविधायकबहुवाक्यव्याख्यारूपत्वोदेवमुक्तम् । एकस्योदाहरणं तु उपलक्षणतयेति भावः । **प्रकृतस्येति** । बुद्धौ सन्निहितस्येत्यर्थः । ततोऽपि बहिरङ्गात्तत्प्राप्तिमाह—**अनुव्याख्यानेति** । "कार्यता च न काचित्स्यात्" इत्यादिना वेदस्य कार्यपरत्वादिकं निरस्य सिद्धे व्युत्पत्त्यादिसमर्थनेन ब्रह्मपरत्वं समर्थ्य,

एतत्सर्वं तर्कशास्त्रे ब्रह्मतर्के हि विस्तरात् ।
उक्तं विद्यापृथक्त्वात्तु सङ्क्षेपेणाऽत्र सूचितम् ॥

इत्यादिना ब्रह्मतर्के सिद्धं 'अतः' इति परामृश्यत इत्युक्तम् । तद्बुज्ज्ञानप्रसादद्वारा मोक्षप्रयोजनकत्वं विचारस्य तत्रैव सिद्धमिति 'अतः' इति परामर्शोपपत्तिरित्यर्थः । ग्रन्थान्तरोक्तस्य ग्रन्था-

चन्द्रिका

मोक्षेहतुत्वमतश्शब्दार्थः । यद्वा—जन्मादिसूत्रे ब्रह्मणो विचारसाध्यज्ञानजन्यप्रसादद्वारा मोक्षदत्वस्य वक्ष्यमाणत्वात्, "अथैष ज्योतिः" इत्यादौ वक्ष्यमाणेऽप्येतच्छब्ददर्शनात्, भगवत उक्तद्वारेण मोक्षद-

प्रकाशः

न्तरे कथं परामर्शः, अतिप्रसङ्गादित्यत उक्तम्—मीमांसाङ्गेति । तदङ्गत्वं च—

प्रमाणन्यायसच्छिक्षा क्रियते तर्कशास्त्रतः ।
मानन्यायैस्तु तत्सिद्धै मींमांसा मेयशोधनम् ॥

इत्यनुव्याख्यानोक्तरीत्या ध्येयम् । तस्य च सूत्रकृतैव कृतत्वात्तत्रोक्तस्य 'अतः' इति परामर्शो युक्त इति भावः॥ इदानीमन्तरङ्गभूतसूत्रादेव प्रकृतत्वमाह—**यद्वा—जन्मादीति । वक्ष्यमाणत्वादिति ।** मोचकत्वेन विष्णुर्जिज्ञास्यश्चेत्, बन्धकत्वेनाऽजिज्ञास्योऽपि स्यादिति प्राप्तेऽप्रसन्नस्य बन्धकत्वं प्रसादहेतोः जिज्ञासायाः कर्तव्यत्वानुकूलमेव, न तु प्रतिकूलमिति, वर्णकान्तरस्य * मोक्षदत्वात् जिज्ञास्यमित्यनुव्याख्यानरीत्या वक्ष्यमाणत्वादित्यर्थः । **अथैष इति ।** "अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिः" इत्युक्त्वा "एतेन सहस्रदक्षिणेन यजेत" इत्युच्यते । तत्र "एष ज्योतिः" इत्येतच्छब्दो वक्ष्यमाणसहस्रदक्षिणाकयागपरामर्शको यथा, तथेत्यर्थः । अत एव द्वितीयस्य द्वितीये "संज्ञा चोत्पत्तिसंयोगात्" इत्यष्टमेऽधिकरणे "अथैष ज्योतिः" इत्याद्युदाहृत्य, किं प्रकृतज्योतिष्टोम एव ज्योतिरादिशब्दैरुच्यते, अथ कर्मान्तरम् इति सन्दिह्यैतच्छब्दस्य प्रकृतगामित्वाज्ज्योतिष्टोम एवैतैश्शब्दै रुच्यते इति प्राप्ते, एतच्छब्दस्य

* 'मोक्षदत्वात् जिज्ञास्यमिति वर्णकान्तरस्य' इत्यन्वयः ॥

चन्द्रिका

त्वस्य अतश्शब्दार्थत्वोपपत्तिः । यद्वा—मुमुक्षारूपाधिकारानन्तरं विचारः कर्तव्य इत्यथब्रह्मजिज्ञासापदाभ्यां उक्ते विचारविध्यधिकारिविशेषणेच्छाविषयत्वेन लब्धं मोक्षस्य प्रयोजनत्वं 'अतः' इति हेतूक्रियते । न चात्र द्वितीयपक्षे अधिकार्यादेरप्यतश्शब्देनैव परामर्शसम्भवादथशब्दादिवैयर्थ्यम्, शमादेरधिकारिविशेषणस्य सि-

प्रकाशः

वक्ष्यमाणपरतयाऽप्युपपत्त्या संज्ञाभेदात् कर्मान्तराण्येवंनामकानीति सिद्धान्तितमिति भावः । **अतःशब्देति** । अतश्शब्दप्रातिपदिकार्थत्वोपपत्तिरित्यर्थः । भिन्नसूत्रादप्यन्तरङ्गेणाऽथशब्देन प्रकृतत्वमाह—**यद्वा—मुमुक्षेति** । एवं चेच्छाविषयत्वेन लब्धं मोक्षफलत्वं प्रातिपदिकेन परामृश्य विभक्त्या हेतुत्वोक्तौ " यमेवैषः " इत्यादिभाष्योक्तश्रुत्यादिबलात् ज्ञानजन्यप्रसादद्वारैव तत्सेत्स्यति, यथा यागस्य स्वर्गहेतुत्वं श्रुतमपूर्वद्वारा, यथावा " व्रीहिभिर्यजेत " इति श्रुतं करणत्वं प्रोक्षणावघातादिद्वारा निर्वाह्यते, तद्वत् । आद्यपक्षे सर्वस्य सामर्थ्यलभ्यत्वमुक्तम्, अत्र तु ज्ञानप्रसादयोरेवेति भेद इति बोध्यम् । उक्तं च सुधायाम्—" अधिकारिविशेषणत्वेन प्रकृतो मोक्षस्सम्बध्यते " इति । तत्त्वप्रदीपे चोक्तं—" निश्शेषदुःखनिवृत्तिः परमसुखावाप्तिश्चेच्छाविषयत्वेन सदा हृदि कृता अत इत्युच्यते " इति । **न चात्रेति** । षट्सु पक्षेषु मध्ये । यद्वा—सूत्र इत्यर्थः । **अधिकार्यादेरिति** । अधिकारिविषयप्रयोजनानां त्रयाणामपि " मन्दमध्योत्तमत्वेन " इत्यादिभाष्योक्तप्रमाणेन सिद्धत्वात् ' अतो जिज्ञासा '

चन्द्रिका

द्धस्य प्रवृत्त्यङ्गत्वं, प्रयोजनादेस्त्वसिद्धस्यापि बुद्धिस्थस्य, तत्रापि विषयस्य नासिद्धत्वनियमः, प्रयोजनस्य तु तन्नियम इत्यादिविशेषज्ञापनार्थं पृथक्सूचनात् । यद्वा—उपनिषद्वाष्यादिरूपसिद्धार्थ-

प्रकाशः

इत्येव सूत्रणीयं स्यादिति भावः। 'बुद्धिस्थस्य प्रवृत्त्यङ्गत्वं' इत्यन्वयः । 'तत्रापि' विषयप्रयोजनयोरपि । **नासिद्धत्वनियम इति** । धर्मस्यासिद्धस्य ब्रह्मणः सिद्धस्य विषयत्वदृष्टेरिति भावः । यद्यप्येषा शङ्का तदनन्तरमेव कर्तव्या, तथाऽपि यथाऽधिकारिविशेषणेच्छाविषयत्वेन मोक्षस्य प्रयोजनत्वं लब्धं, तथा ब्रह्मज्ञानफलं नित्यमन्यफलमनित्यमित्येवंभूतनित्यानित्यवस्तुविवेकरूपाधिकारिविशेषणविषयत्वेन ब्रह्माख्यविषयस्याप्युपस्थापितत्वात् 'अतः' इति परामर्शो पृथग्ब्रह्मपदं नोपादादीतेति शङ्काया अपि निरासात्, तथा सप्तमेऽपि श्रवणविषयतया ब्रह्मणोऽथशब्देनोपस्थापनेनैवंविधशङ्कायास्तत्राप्युदयेन तन्निरासार्थत्वाच्चात्र कृता । अत एवान्त्योपान्त्ययोर्मध्ये एवैतच्छङ्कासमाधानमित्याहुः । 'इत्यादिविशेष' इत्यादिपदेन स्वरूपाधिक्यमङ्गलार्थकत्वविषयवाक्यविशेषसूचनादिविशेषपरिग्रहः । यद्वा—"तदेवं स्वर्गादिसाधने" इत्यादिना अथादिपदानां भिन्नभिन्नशङ्कानिरासकत्वरूपो वक्ष्यमाणो विशेषो ग्राह्यः । 'अतः' इत्यनेनैव हेतुवाचिना त्रयाणां ग्रहणे सिद्धानामेव हेतुत्वमिति सर्वेषां सिद्धत्वमसिद्धत्वमेव वा ज्ञायेतेति भावः । प्रसादादेस्सर्वस्यापि साक्षादथशब्देन लाभप्रकारमाह—**यद्वेति** । जिज्ञासैव श्रवणमिति मते, तस्याधिकारिविशेषणत्वायोगात् तत्स्वरूपमुक्तम्—**उपनिषद्वाष्यादीत्यादिना** ।

चन्द्रिका

कथनात्मकोपदेशाधीनवाक्यार्थग्रहणात्मकस्य श्रवणस्य मननरूपजिज्ञासाधिकारिविशेषणत्वाच्छ्रवणविषयस्य मोक्षप्रसादादिसाध्यसाधनभावस्याथशब्दोपस्थापितत्वाद्धेतुत्वयोग्यत्वाच्च 'अतः' इति परामर्श इति। अनुव्याख्योनतु—

अतो यथार्थबन्धस्य विना विष्णुप्रसादतः।
अनिवृत्तेस्तदर्थं हि जिज्ञासाऽत्र विधीयते॥
प्रत्यक्षवच्च प्रामाण्यं स्वतएवागमस्य हि।
व्युत्पत्तिः प्रथमा तस्माद्वर्तमानेऽगते ततः।

प्रकाशः

'सिद्धार्थ' इति मननाद्वैदोक्तिः, न्यायनिर्णीतार्थेत्यर्थः। श्रवणविषयाणामनेकेषामथशब्देनोपस्थापितत्वात् 'अतः' इति परामर्शः स्यादित्यत उक्तम्—**हेतुत्वयोग्यत्वाच्चेति**। नेतरत्तद्योग्यमित्याशयः॥ एवं भाष्योक्तं ज्ञानजन्यप्रसादद्वारा मोक्षप्रयोजनकत्वरूपमतश्शब्दार्थं सप्तधा समर्थ्य, अधुना "सूत्रे भाष्येऽनुभाष्ये च" इति प्रतिज्ञातार्थसिद्धये अनुव्याख्यानोक्तं फलसाधकहेतुर्विषयसाधकहेतुद्वयपरामर्शपरत्वमप्यनुव्याख्यान एव विक्षिप्य समर्थितं सङ्गृह्य स्पष्टीकरोति—**अनुव्याख्याने त्वित्यादिना मतान्तरमुक्तमित्यन्तेन**। 'अतः' असत्यत्वेबाधकात्, सत्यत्वे साधकसत्त्वाद्धेत्यर्थः। 'तदर्थं' विष्णुप्रसादार्थम्। 'अत्र' आद्यसूत्रे। प्रत्यक्षादिवदागमस्य प्रामाण्यं, 'स्वत एव' संशयविपर्ययाजनकत्वे सति ज्ञानजनकत्वादेवेत्यर्थः। 'तस्मात्' वर्तमानार्थव्युत्पत्तेः कारणत्वात्, अनागताद्यर्थव्युत्पत्तेः कार्यत्वात्, 'वर्तमाने' सिद्धे व्युत्पत्तिः प्रथमा। 'ततः' पश्चात्,

चन्द्रिका

इत्यादिना बन्धस्य मिथ्यात्वात्तन्निवृतेः प्रसादनैरपेक्ष्यान्न भगवत्प्रसादार्था जिज्ञासा मुमुक्षुणा कर्तव्येत्यादिशङ्कानिरासाय प्रयोजनसाधकं जगत्सत्यत्वादिकमप्यतश्शब्देनोक्तम्, विषयसिद्धिहेतुयुक्तिष्वपि 'स्वप्रकाशप्रत्यगर्थाभिन्नत्वान्न विषयत्वम्' इति प्रमेये आरोपिताकारशङ्कानिरासकृत् या ब्रह्मपदसूचिता युक्तिः, तदतिरिक्ता 'शब्दस्य न प्रामाण्यं, प्रामाण्येऽपि सिद्धार्थे न प्रामाण्यम्' इत्यादिका प्रमाणे आरोपिताकारशङ्कानिरासकृद्युक्तिरप्य-

प्रकाशः

'अगते' अनागते व्युत्पत्तिरित्यर्थः । त्रीण्यपि वचनानि भिन्नभिन्नस्थानानि, अतो नान्योन्यमसङ्गतिर्दोषाय । यद्यपि "व्युत्पत्तिः" इति वाक्यं पूर्वं, "प्रत्यक्षवच्च" इति पश्चात्तनम् । तथाऽपि वक्ष्यमाणदिशोपपादनसौकर्याय व्यत्यासेनोपन्यास इति न दोषः । 'इत्यादिना' इत्यस्य, 'अतश्शब्देनोक्तम्' 'अतश्शब्देनैव सूचिता' 'इत्युक्ता' इत्यन्वयः । आद्यश्लोकस्याभिप्रायवर्णनं 'बन्धस्य' इत्यादि, उत्तरार्धयोर्विवरणं—'विषयसिद्धि' इत्यादि, शब्दस्य न प्रामाण्यमिति शङ्कानिरासः "प्रत्यक्षवच्च" इत्यनेनोपपादितः, "व्युत्पत्तिः" इत्यनेन सिद्धार्थे प्रामाण्यं नेति शङ्कानिरास इति विवेकः । **प्रसादनैरपेक्ष्यादिति** । शुक्तिरूप्यादिनिवृत्तौ तथोपलम्भादिति भावः । न केवलं प्रयोजनमित्यपेरर्थः । सत्यस्यापि निवर्त्यत्वमादिपदार्थः । 'विषयसिद्धिहेतुयुक्तिषु' गुणपूर्तिवेदप्रामाण्यसिद्धार्थबोधकत्वादिरूपासु मध्ये, 'या ब्रह्मपदसूचिता

चन्द्रिका

तदशब्देनैव सूचिता, अपेक्षितार्थहेतुसूचकत्वादतश्शब्दस्य, इत्युक्त्वा—

यतोऽनुभवतस्सर्वं सिद्धमेतदतोऽपिच ।

इत्यादिना बुद्धौ विपरिवर्तमानं हि साक्षात्प्रकृतं, ग्रन्थोक्तत्वं तु तल्लिङ्गं, बन्धसत्यत्वादिकं चानुभवसिद्धत्वात् प्रकृतमिति मतान्तरमुक्त्वा,

अतस्तदर्थं संक्षेपादत इत्यभ्यसूचयत् ।

प्रकाशः

तदतिरिक्ता युक्तिरतश्शब्देनैव सूचिता" इत्यन्वयः । संक्षिप्योक्तेत्यर्थः । 'तदतिरिक्ता' इत्युक्त्या न ब्रह्मपदवैयर्थ्यमिति भावः । एतेन— सिद्धार्थे व्युत्पत्त्या प्रामाण्योपपादकानुव्याख्यानावतारिकासुधायां— "एवं मीमांसाप्रयोजनसमर्थनार्थत्वेनातःशब्दं द्वेधा व्याख्याय, विषयसमर्थनपरतयाऽपि व्याख्याति" इत्युक्तत्वात्, अतश्शब्देनैव विषयसिद्धेः ब्रह्मेति व्यर्थमिति शङ्का निरस्ता । ननु पक्षद्वयेऽप्यप्रकृतस्य कथं 'अतः' इति परामर्श इत्यतोऽनुव्याख्यान एव विक्षिप्योक्तं त्रेधा समाधानं दर्शयितुमेकं तावदाह—**अपेक्षितेति** । यद्यपीदं "अतो यथार्थबन्धस्य" इतिश्लोकाभिप्रायं कथयता सुधाकृतैव "सेयमाशङ्का अतश्शब्देनापेक्षितार्थसाधकहेतुसूचकेन निराकृता" इत्यनेनोक्तम् । तथाऽपि तदुक्तमेवानुव्याख्यानोक्तं मत्वैतदुक्तम् । समाध्यन्तरे अप्याह—**यत इत्यादिना** । नन्वनुभवसिद्धस्यापि कथं परामर्शः, ग्रन्थतोऽप्रकृतत्वादित्यतोऽभिप्रायमाह—**बुद्धाविति । बन्धसत्यत्वादिकमिति**—'सर्वम्' इत्यस्यार्थः । एतेन 'वेदप्रामाण्यादिकं' इति सुधास्थादिपदस्य बन्धसत्यत्वादिकमप्यर्थ उक्तो भवति । 'अतः' ब्रह्मतर्के प्रकृतत्वात् । "इत्यादिना' इत्यस्य 'उक्तम्' इत्यन्वयः ।

चन्द्रिका

इत्यादिना मीमांसाङ्गभूतब्रह्मतर्काख्यतर्कशास्त्रे सूत्रकृत्कृते प्रकृतो जिज्ञासाकर्तृत्वोपयोगी युक्तिकलापोऽतश्शब्दार्थः, तर्कशास्त्रस्य मीमांसाङ्गत्वं च तन्निर्णीतस्वरूपसङ्गत्याबलाबलादिभिः प्रमाणैरिह प्रमेयशोधनादिति मतान्तरमुक्तम् । तदेवं स्वर्गादिसाधने ज्योतिष्टोमादौ यथा तत्कामस्त्रैवर्णिकोऽधिकारी, तथा विचारस्य सत्यपि विषये फले च मुमुक्षुस्त्रैवर्णिकोऽधिकारी, न तु शान्त्या-

प्रकाशः

अन्यत्र प्रकृतस्यान्यत्र कथं परामर्श इत्यत उक्तम्—**मीमांसाङ्गेति**। एककर्तृकत्वाच्च तत्रत्यस्यात्र परामर्शो युक्तः इति भावेनोक्तम्—**सूत्रकृत्कृत इति**। 'तन्निर्णीत' इति "प्रमाणन्यायसच्छिक्षा" इति श्लोकार्थोक्तिः। तदेवमतश्शब्दार्थं प्रस्थानद्वयोक्तं समर्थ्य, इदानीमथब्रह्मशब्दार्थं विविक्तत्वेनातश्शब्दार्थं निष्कृष्टुं, अथादेरप्यर्थं वदन् "भक्तिमान् परमे विष्णौ, कर्मणा त्वधमः प्रोक्तः" इत्यादिभाष्यस्योत्सूत्रितत्वभ्रमनिरासायाथातश्शब्दारूढत्वं टीकोक्तं स्फोरयन्नुपसंहरति—**तदेवमित्यादिना**। यद्वा—इह पूर्वपक्षे 'विषयाभावादेव नाधिकार्यादि' इत्युक्ततया विषयोपपादकब्रह्मपदेनैवाधिकार्यादिसिद्धेः 'ब्रह्मजिज्ञासा' इति पूर्त्याऽथातःपदयोर्वैयर्थ्यमित्यतो भिन्नभिन्नशङ्कानिरासकत्वात् सार्थक्यमिति भावेन, अथादिपदव्यावर्त्यशङ्कापूर्वं तत्तदर्थं निष्कृष्याह—**तदेवमित्यादिना**। 'तत्कामः' स्वर्गादिकामः। **त्रैवर्णिक इति**। उभयत्र कर्मब्रह्मतन्त्रगतापशूद्रनयन्यायेनेति भावः। ब्रह्मातश्शब्दाभ्यामथशब्दस्यागतार्थत्वायोक्तं—

चन्द्रिका

दिकमपि तद्विशेषणमिति शङ्का, राजसूयादौ राजत्वादिरिव वचनाच्छान्त्यादिरपि तद्विशेषणमिति सूचयताऽथशब्देन परिहृता । विषयप्रयोजनयोरभावान्निरधिकारिकत्वमिति शङ्का तु तत्समर्पकाभ्यामतश्शब्दब्रह्मशब्दाभ्यां निराकृता । एवं—सत्यपि विषये जिज्ञा-

प्रकाशः

**सत्यपि विषये फले चेति । राजत्वादिरिवेति** । यथा "राजा राजसूयेन यजेत" इत्यत्र 'राजा' इति वचनाद्राजत्वं तत्राधिकारिविशेषणम्, यथा वा "ब्राह्मणो वाजपेयेन यजेत" इत्यत्र ब्राह्मणत्वं, तथा "भक्तिमान् परमे विष्णौ" इत्यादिवचनात् शान्त्यादिरपि तद्विशेषणमित्यर्थः । एतेन "भक्तिमान्" इत्यादिभाष्यं नोत्सूत्रितमित्युक्तं भवति । एतेनैव—शमादिकं नाधिकारिविशेषणमिति मन्यमानाः स्मृतिसूत्रविरोधान्निरस्ताः । '**अतश्शब्दब्रह्मशब्दाभ्यां**' इति यथायोगमन्वयः । तेनाथशब्देनैव निरधिकारिकत्वशङ्कानिरासात्तयोर्वैयर्थ्यमिति निरस्तम् । अत एवेह ब्रह्मपदव्यावर्त्यपूर्वपक्षस्यैव प्रपञ्चनादेवमेव निरधिकारिकत्वशङ्का पूर्वमुक्ता ॥ नन्वतश्शब्दस्याधिकारिविशेषणत्वेन प्रकृतमोक्षार्थकत्वेऽपि सप्रयोजनत्वेन विचारकर्तव्यत्वे सम्भवति प्रसादाद्यर्थपरत्ववर्णनमयुक्तमित्यत आह—**एवमिति** । न केवलं निष्प्रयोजनत्वाशङ्कानिरासकत्वमतश्शब्दस्य, किन्तु वक्ष्यमाणशङ्काद्वयनिरासकत्वमपीति समुच्चयार्थ एवंशब्दः । यद्वा—'अतश्शब्दब्रह्मशब्दाभ्यां' इति द्वयोः प्रत्येकमेवान्वयः । तत्र द्वयोर्यथाक्रमं प्रमाणप्रमेययोरारोपितान्यथाकारशङ्कानिवर्तनेन विषयसमर्पकत्वस्योक्तदिशा स्फुटत्वेन त-

**कर्मणा त्वधमः प्रोक्तः प्रसादः श्रवणादिभिः ।**
**मध्यमो ज्ञानसम्पत्त्या प्रसादस्तूत्तमो मतः ॥**
**प्रसादात्त्वधमाद्विष्णोः स्वर्गलोकः प्रकीर्तितः ।**
**मध्यमाज्जनलोकादिरुत्तमस्त्वेव मुक्तिदः ॥**
**श्रवणं मननं चैव ध्यानं भक्तिस्तथैव च ।**
**साधनं ज्ञानसम्पत्तौ प्रधानं नान्यदिष्यते ॥**
**न चैतानि विना कश्चित् ज्ञानमाप कुतश्चन। इति नारदीये॥**

तत्त्वप्रकाशिका

अस्तु मोक्षो भगवत्प्रसादसाध्यस्तदर्थं न ज्ञानमपेक्षितम्, "तत्कर्महरितोषं यत्" 'य इमं परमं गुह्यं" इत्यादेः कर्मादिनाऽपि भगवत्प्रसादसिद्धेः । यद्यपि मोक्षस्य कर्मादिसाध्यत्वं श्रुत्यादिसिद्धं, तथाऽपि "तमेवं विद्वान्" "यमेवैष वृणुते" इत्यादावन्यनिषेधाच्छङ्काभावः । अत्र पुनः "प्रियो हि" इति वाक्येऽन्यनिषेधाभावाद्भवेदेव शङ्केत्याशङ्कां प्रमाणेन परिहरति **कर्मणेति** । सत्यं भवेदेव कर्मादिना भगवत्प्रसादस्तथाऽपि तस्यानुत्तमत्वाज्ज्ञानसाध्यस्यैवोत्तमत्वात्, अनुत्तमेन स्वर्गादिमात्रसिद्धेरुत्तमेनैव मोक्षसिद्धेस्तत्साधनं ज्ञानमपेक्षितमिति भावः । ननु ज्ञानं च "कर्मणा ज्ञानमातनोति" इत्यादेः कर्मादिनाऽपि सम्भवतीति न जिज्ञासया कृत्यम्, आत्मेति वाक्येऽन्यनिषेधाभावादित्याशङ्कां तच्छेषेण परिहरति—**श्रवणमिति** । का गतिस्तर्ह्येतद्वचनस्येत्यत आह—**प्रधानमिति** । अप्रधानसाधनं कर्मादीति भावः । विपरीतं किं न स्यादित्यत आह—**न चेति** । 'एतानि' श्रवणादीनि । 'कुतश्चन' कर्मादेः । ज्ञानस्य श्रवणाद्यन्वयव्यतिरेकित्वात्तदेव प्रधानसाधनं कर्मादेस्तदभावात्तत्पारम्प-

चन्द्रिका

सा न साक्षान्मोक्षहेतुः, नापि ज्ञानद्वारा, तस्य "कर्मणा ज्ञानमातनोति" इत्यादिश्रुत्या कर्मणाऽपि सिद्धेः, किञ्च—ज्ञानमपि न साक्षान्मोक्षहेतुः, नापि भगवत्प्रसादद्वारा, तस्य "तत्कर्म हरितोषं यत्" इत्यादिना कर्मणाऽपि सिद्धेः, ज्ञानेनाज्ञाननिवृत्तौ प्रसादस्यानपेक्षितत्वाच्चेति शङ्का अतश्शब्देन प्रसादादेर्मोक्षादिहेतुत्वं

प्रकाशः

दनुक्त्वा, निष्प्रयोजनत्वशङ्का च ज्ञानादेः कर्मजन्यत्वादिप्रयुक्तैका, आत्मज्ञाने सत्यपि तदनुपलम्भकृताऽन्या, तद्द्वयोरपि क्रमान्निवर्तनेन द्वयमपि प्रयोजनार्पकमित्येतद्व्यनक्ति—**एवमिति । न साक्षादिति** । "तमेवम्" इति ज्ञानस्यैव मोक्षहेतुत्वश्रुतेः, ज्ञानजनन एव सामर्थ्याच्चेति भावः । 'कर्मणा सिद्धेः' इत्यस्य 'इति शङ्का' इत्यनेनान्वयः । **न साक्षादिति** । "यस्य प्रसादात्" इत्यादि श्रुत्या प्रसादस्यैव तद्धेतुत्वश्रवणात्,

.....न हरिं विना ।
ज्ञानस्वभावतोऽपि स्यान्मुक्तिः कस्यापि हि क्वचित् ॥

इत्याद्यनुव्याख्यानोक्तदिशा स्वतोऽसामर्थ्याच्चेति भावः । प्रसादं विना ज्ञानादेव मोक्ष इत्यत्र युक्तिं चाह—**ज्ञानेनेति** । अज्ञाननिवृत्तेरेव मोक्षत्वात्, न हि दीपस्यान्धकारनिवृत्तावन्यापेक्षेति परैरङ्गीकारादिति भावः । **प्रसादादेरिति** । प्रसादज्ञानयोर्मोक्षप्रसादहेतुत्वमित्यर्थः । तथा "श्रवणं मननं चैव" "कर्मणा त्वधमः प्रोक्तः" इत्यादिभाष्योक्तदिशा कर्मणोऽन्तःकरणशुद्धिद्वारा परम्परयैव ज्ञानहेतुत्वं, कर्मादिजन्यप्रसादादेर्मोक्षेतरहेतुत्वं च सूचयतेत्यप्यर्थः । तेन "कर्मणा" इत्यादिकं

चन्द्रिका

सूचयता परिहृता । अहमिति ब्रह्मणि ज्ञायमानेऽपि मोक्षानुपलम्भान्निष्प्रयोजनत्वमिति शङ्का तु विषयसूचकेन ब्रह्मपदेनैव निरस्तेति द्रष्टव्यम् । यद्यपि विषयादिकं समन्वयाध्यायादौ वक्ष्यते, तथाऽपि शास्त्रेण विषयादिकं निश्चित्य शास्त्रे प्रवृत्तौ अन्योन्याश्रयादादौ तत्सूचनीयम् । अध्ययनविधिवाक्यवदेतत्सूत्रस्यापि शास्त्रान्तर्गतस्य शास्त्रारम्भप्रतिपादकेन स्वेनैवारम्भसिद्धेर्नानवस्था । यद्यपि विषयादिकमागमादेवापाततः प्रतीतम्, तथाऽपि पूर्वपक्षोक्त-

प्रकाशः

भाष्यं नोत्सूत्रितमिति ध्येयम् । **ब्रह्मपदेनैवेति** । अतो नातश्शब्दा रूढत्वप्रतिपादनक्लेश इति भावः । अत एव पूर्वं ब्रह्मपदव्यावर्त्यपूर्वपक्षप्रपञ्चने निष्प्रयोजनत्वशङ्कैवमेवोक्तेति भावः ॥ नन्विदं सूत्रमनर्थकं, विषयस्य पूर्वद्विके अधिकारफलयोरुत्तरद्विके प्रतिपादनेन तत एव तज्ज्ञानसम्भवादिति चोद्यमनूद्यावद्यति—**यद्यपीति** । ननु यथा शास्त्रप्रवर्तकमिदं सूत्रं, तथैतत्सूत्रप्रवर्तकेनाप्यन्येन भाव्यम्, अन्यथैतत्सूत्रं विनाऽपि शास्त्रे प्रवृत्तिप्रसङ्ग इत्याशङ्कां सदृष्टान्तं निराह—**अध्ययनेति** । यथा "स्वाध्यायोऽध्येतव्यः" इति वाक्यं सर्ववेदाध्ययनप्रवर्तकं सत् स्वाध्ययनेऽपि प्रवर्तयति, स्वाध्यायाध्ययनत्वादेव, तथा विषयादिसत्त्वाच्छास्त्रमारभ्यमित्युक्ते अस्यापि प्रागुक्तरीत्या शास्त्रान्तर्गतत्वादारम्भः सिद्ध्यतीत्यर्थः ॥ नन्वथापि श्रवणस्य विचाराधिकारिविशेषणत्वात् सिद्धार्थबोधकोपनिषद्वाक्यादिनैव विषयादिज्ञानसम्भवेनान्योन्याश्रयाभावादिदं सूत्रं व्यर्थमित्याशङ्कामनूद्य प्रत्याह—**यद्यपीति** । 'आपाततः' विनैव

चन्द्रिका

न्यायेन तदभावशङ्कायां न्यायेनैतत्प्रतिपादयितुं सूत्रम् । एवं च अथशब्दलब्धहेतुत्वस्यैवातश्शब्देनोक्तचा भास्करस्येव नास्माकं पौनरुक्तचम्, अधिकारिविशेषणस्य शमादेः विचारकारकत्वस्याथशब्देन लाभेऽपि सप्रयोजनत्वादेर्विचारकर्तव्यताप्रमाणस्यातश्शब्देनोक्तेः ।

भामत्यां तु—ब्रह्मशब्देन तत्प्रमाणं वेद उपस्थापितः 'अतः'

प्रकाशः

विचारमित्यर्थः ॥ एवं निष्कृष्यातश्शब्दार्थोक्तेरुपयोगमाह—**एवं चेति** ॥ एवं हि तन्मतं 'अथशब्दस्तावदानन्तर्याभिधानमुखेन हेतुतयैव पूर्ववृत्तमवगमयति, आनन्तर्यमात्रस्य विफलत्वात्' इति । तथा च अथशब्देनैव प्रकृतस्य हेतुत्वसिद्धेरतश्शब्दस्य पुनरुक्तेत्यर्थः । नन्वथशब्दलब्धस्य हेतुत्वमार्थिकमिति चेत्सत्यम्, तथाऽप्यार्थिके तात्पर्यात्तस्यैव च वाक्यार्थेऽन्वयात् । पूर्वतन्त्रेऽप्येवं व्याख्यातमिति चेत्, किमतः, न हि पराङ्गं दग्धमिति स्वाङ्गदाहदुःखं निवर्तत इति भावः । तदेव व्यनक्ति—**अधिकारीति** । एतेन "अथशब्दो हि जिज्ञासाजनकमधिकारिस्थं धर्ममनधिकारित्वशङ्कानिरासायानुवदति, अतश्शब्देन तु विषयप्रयोजनसिद्धचङ्गभूतं न्यायकलापं सूत्रकारः स्वयमाचष्टे, इति कुतः पौनरुक्त्यम्" इति सुधावाक्यं विवृतं भवति । 'सप्रयोजनत्वादेः' इत्यनेन 'विषयप्रयोजनसिद्धचङ्गभूतं' इति सुधास्थमुपलक्षणमित्युक्तं भवति । यद्वा—सुधावाक्यमनुव्याख्यानानुसारि, इदं भाष्यटीकाद्यनुसारि अत एव पूर्वमवादि "अनुव्याख्याने प्रयोजनसाधकमप्यतश्शब्देनोक्तम्" इति । परोक्तमतश्शब्दार्थं निराह—**भामत्यां त्विति । अत इतीति** । 'अतः' इत्यत्र

चन्द्रिका.

इति परामृश्यते । स च योग्यत्वात् "तद्यथेह" इत्यादिः । तथा च ब्रह्मज्ञानकर्मणोः नित्यानित्यफलत्वप्रतिपादकादागमादिहामुत्र फलभोगविरागादि, ततश्च ब्रह्मजिज्ञासा । एवं च नातश्शब्देन जिज्ञासां प्रति साधनकलापस्य हेतुतोच्यते, येन पौनरुक्त्यम् । किन्तु तत्स्वरूपालाभपरिहारोऽभिधीयते इत्युक्तम् । तन्न, हेतोः विचारकर्तव्यत्वादिरूपसाध्यान्वयत्यागेन विरागादिसाधनान्वयायोगात् ।

प्रकाशः

प्रातिपदिकेनेत्यर्थः । तर्हि सर्वे वेदान्ताः परामृश्येरन्नित्यत्राह—**योग्यत्वादिति** । अतश्शब्दोक्तहेतुत्वान्वये शक्तत्वादित्यर्थः । "तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इत्यादिः कर्मणोऽनित्यफलत्वबोधकः "ब्रह्मविदाप्नोति परम्" इत्यादिः ब्रह्मज्ञानस्य नित्यफलत्वबोधकः । **एवं चेति** । यद्यपीदं भामत्यां न स्पष्टं, तथाऽपि कल्पतरावुक्तत्वादेवमुक्तम् । **तत्स्वरूपेति** । जिज्ञासां प्रति वैराग्यादिरूपसाधनकलापस्वरूपालाभपरिहार इत्यर्थः । अन्यथा अनुकूलवेदनीये लौकिके "यन्न दुःखेन सम्भिन्नं" इत्यादिदुःखासम्भिन्ने आमुष्मिके च सुखे न विरज्येतेति वैराग्यादिस्वरूपं दुर्लभं स्यात् । अक्षय्यवाक्यान्नित्यत्वज्ञानेन विवेकोऽपि न स्यादिति भावः । **हेतोरिति** । "अतो ब्रह्मजिज्ञासा" इत्यत्रातश्शब्दार्थस्य हेतोर्जिज्ञासाकर्तव्यत्वरूपप्रधानसाध्यान्वयः, 'तस्मादनित्यः शब्दः' इत्यादाविव स्पष्टं प्रतीयत इति प्रतीतस्यास्मदुक्तरीत्या योग्यस्य साक्षात्प्रधानसाध्यान्वयस्य त्यागेन जिज्ञासासाधनीभूतवैराग्यादिरूपाप्रधानसाध्यान्वयो न युक्त इत्यर्थः।

चन्द्रिका

अथशब्दार्थानन्तर्योपसर्जनस्य विरागस्यातश्शब्दोक्तहेत्वन्वययोग्यत्वाच्च । अथशब्दोपस्थापितविरागेणैव स्वजनकस्य "तद्यथा" इत्यादेः वाक्यस्य साक्षादेवोपस्थापनसम्भवे ब्रह्मशब्देन परम्परयोपस्थापनोक्त्ययुक्तेश्च । विरागहेतुत्वेन त्वदभिप्रेतसत्यानृतविवेके "नेह नाना" इत्यादेरेव हेतुतया वक्तव्यत्वेन, "तद्यथा" इत्याद्युक्तचयु-

प्रकाशः

यद्यपि तन्मते यथाश्रुते कर्तव्यपदाध्याहाराभावात् जिज्ञासा कर्तव्येति नार्थः । तथाऽपि जिज्ञासा ज्ञानेच्छा भवितुं युक्तेति श्रौतार्थे सति, अर्थाद्विचारकर्तव्यत्वं प्राप्तमित्येवमुक्तम् । नन्वन्यस्याप्रकृतत्वादथशब्दार्थानन्तर्यप्रतियोगिनो वैराग्यादेरेव 'अतः' इति हेतुत्वोक्तौ पौनरुक्त्यापत्तेः, ब्रह्मपदोपस्थापितप्रमाणस्यैव योग्यस्याथपदोपस्थापितवैराग्यादौ हेतुत्वमुच्यत इति चेन्न, अन्यस्य प्रकृतत्वस्य प्रागेव बहुधा प्रतिपादितत्वात् । दोषान्तरं चाह—**अथशब्दार्थेति** । 'उपसर्जनस्य' आनन्तर्यविशेषणस्य । ननु वैराग्यादेः स्वरूपालाभे साधनाभावेन जिज्ञासाऽयोगादेवमुक्तमित्यत आह—**अथशब्देति** । आनन्तर्यप्रतियोगित्वेनोपस्थापितेत्यर्थः । **सम्भव इति** । अत एव भगवता भाष्ये अथपदव्याख्याऽवसर एव "आब्रह्मस्तम्बपर्यन्तम्" इति "परीक्ष्य लोकान्" इत्यादिप्रमाणमुक्तमिति भावः । **परम्परयेति** । ब्रह्मोपस्थितिद्वारा तत्प्रमाणस्यैवोपस्थापनादितिभावः । यदपि 'योग्यत्वात् तद्यथा इत्यादिः' इत्युक्तं तदपि नेत्याह—**विरागेति** । "नित्यानित्यवस्तुविवेकः" इत्यादिभाष्यव्याख्यायां 'नित्यः प्रत्यगात्मा' इत्यादिना तथैव त्वयोक्त-

चन्द्रिका

क्तेश्च ॥ विवरणे तु—अथशब्दगृहीताया एव साधनकलापस्य ब्रह्मविचारहेतुतायाः "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतम्" इत्यादिनाऽपवादशङ्कायां प्राप्तायां, तन्निराकरणं पुनरथशब्दोक्तहेतुत्वाभिधायिना अतश्शब्देन क्रियते इत्युक्तम् । तदपि न, अथशब्दोक्तानधिकाभिधायिना अतश्शब्देन अपवादशङ्कानिरासे, अथशब्देनैव तन्निरासप्रसङ्गात् । हेतुत्वसाधकहेतोः कथन एव ह्यपवादशङ्कानिरासः, न तूक्तस्यैव हेतुत्वस्य पदान्तरेण कथन इति दिक् ॥

प्रकाशः

त्वादिति भावः । **विवरणे त्विति** । अथशब्दार्थानन्तर्यप्रतियोगिनो वैराग्यादिसाधनचतुष्टयस्यैव 'अतः' इति हेतुत्वमुच्यते । 'अथ' साधनकलापानन्तरं, 'अतः' साधनकलापादिति । न च कारणादानन्तर्यस्याव्यवधेरव्यभिचाराच्च मुख्यत्वेन, तेनैव वैराग्यादेर्हेतुत्वलाभात् पुनरुक्तिरिति वाच्यम्, अक्षय्यवाक्येन कर्मजन्यसुखस्य नित्यत्वावगमेन ब्रह्मज्ञानफलं नित्यमन्यफलमनित्यमिति विवेकस्य तद्धेतुकवैराग्यादेश्चायोगेन विवेकादिसाधनकलापस्य न विचारहेतुत्वमित्यपवादशङ्कानिरासार्थत्वेनापौनरुक्त्यात् । दृश्यन्ते चापवादनिरासार्था अपि "मृडमृद" इत्यादिविधय इति, दूष्यांशस्यार्थः—**इति दिगिति**। अयं भावः । विचारकर्तव्यत्वरूपप्रधानसाध्ये अपेक्षितसप्रयोजनत्वादिस्वतन्त्रहेतुसमर्पणपरत्वसम्भवे, आनन्तर्योपसर्जनस्य हेतुतया प्राप्तस्यातश्शब्देन हेतुत्वोक्तेरयुक्तत्वात् । अथशब्दोपस्थापितवैराग्यादिनैव स्वजनकस्य कृतकत्वरूपोपपत्त्युपबृंहितत्वेन प्रबलस्य "तद्यथेह कर्मचितो लोकः क्षीयते" इत्यादिवाक्यस्योपस्थापनेन तत एवापवादशङ्कानिरासस्सम्भवाच्च । जिज्ञासाकर्तव्यतायामपेक्षितहेतोरवश्योपन्यसनीयस्य सप्रयोजनत्वादेरनुपन्यासे जिज्ञासाकर्तव्यत्वासिद्धेश्च । अयं च दोषः प्राचीनमतेऽपि बोध्यः।

चन्द्रिका

भामत्यां तु—निश्चिते जिज्ञासाऽयोगात् सन्दिग्धत्वेन ब्रह्मैव विषयः, ज्ञानमेवेच्छाविषयत्वेन प्रयोजनमिति, जिज्ञासापदेनैव विषयप्रयोजने सूचिते इत्युक्तम् । तन्न, न हि पूर्वपक्षिणा ब्रह्मज्ञाने इच्छामङ्गीकृत्य तद्विचार आक्षिप्तः । किन्तु विषयाद्यभावेनेच्छैव नोदेतुं युक्तेत्याक्षिप्तम् । न च तं प्रतीच्छया विषयादिसाधनं युक्तम् ॥ विवरणे तु—अथशब्देनाधिकारी, जिज्ञासापदेनेच्छाविषयत्वेन ब्रह्मज्ञानं प्रयोजनम्, अर्थादधिकारिविशेषणं मोक्षो ब्रह्मज्ञानफलम्, विषयश्च सूचित इत्युक्तम् । तदपि न, त्वन्मते जिज्ञासापदस्य विचारलक्षकत्वेन ज्ञानेच्छापरत्वस्याभावात् । न हि 'विषं बुभुक्षते' 'कूलं पिपतिषति' इत्यनेन विषभक्षणादेरिष्टत्वसिद्धिः, प्रतीतस्यापि मु

प्रकाशः

**भामत्यां त्विति** । निश्चिते ज्ञानेच्छारूपजिज्ञासाऽयोगाज्जिज्ञासापदोपादानेन जिज्ञास्यं ब्रह्म सन्दिग्धमिति सूचनात्तद्विषयः, काम्यमानस्य च फलत्वेन जिज्ञासेत्यत्र प्रत्ययार्थभूतेच्छाविषयभूतं प्रकृत्यर्थरूपं ज्ञानं प्रधानप्रयोजनमित्यर्थः । **न हीति** । न हि सर्वजनीनाहमनुभवसिद्ध आत्मा सन्दिग्धो वा सप्रयोजनो वा, येन जिज्ञास्यस्सन् विचारं प्रयुञ्जीतेति त्वदीयपूर्वपक्षोपसंहारे जिज्ञासाक्षेपपूर्वं विचारस्याक्षिप्तत्वादिति भावः । **न चेति** । ज्ञानेच्छायां सिद्धायां तया विषयप्रयोजनसिद्धिः, तत्सिद्धौ च तत्सिद्धिरित्यन्योन्याश्रयादिति भावः । **प्रयोजनमिति** । अवान्तरप्रयोजनं, न तु भामतीमत इव मुख्यमित्यर्थः । **सूचित इति** । 'जिज्ञासापदेन' इत्यन्वयः । मोक्षफलं त्वथशब्देन । **न हीति** । 'विषं बुभुक्षते' इत्येतच्छत्रुगृहभोजननिषेधस्य लक्षकमिति न विषभोजनेच्छापरम् । 'कूलं पिपतिषति' इत्येतत्कूलपतनमाशङ्कयत इत्येतत्परम्, न तु पतनेच्छापरम् । 'आशङ्कायां सन्वक्तव्यः' इति कात्याय-

**ब्रह्मशब्दश्च विष्णावेव ।**

तत्त्वप्रकाशिका

र्येण साधनमिति भावः ॥ ननु नारायणप्रसादमृते न मोक्षश्चे-त्तर्हि तज्जिज्ञासैव कर्तव्या न ब्रह्मजिज्ञासा । न च वाच्यम् नारायण एव ब्रह्मपदेन विवक्षितः सूत्रकृतेति, ब्रह्मशब्दस्य बह्वर्थ-त्वेन सूत्रकारविवक्षाविशेषस्य दुर्ज्ञेयत्वादित्यत आह—**ब्रह्मेति** । विष्णावेव 'मुख्यः' इति शेषः । ब्रह्मशब्दस्यानेकार्थत्वेऽपि तस्य

चन्द्रिका

रूयार्थस्य त्यक्तत्वात् । पूर्वपक्षिणेच्छानङ्गीकाराच्च । त्वन्मते ज्ञाने-च्छासम्भवस्योक्तत्वाच्च । मुमुक्षाया अधिकारिविशेषणत्वनिरासाच्च । विषयसूचनं त्वसन्दिग्धादन्यसूचनं विना न शक्यम् । अन्यथा शास्त्रारम्भसामर्थ्यादेव, कर्तव्यतोक्तिसामर्थ्यादेव वा तत्प्रयोजक-विषयादिसूचनसम्भवात्, जिज्ञासापदादिना तत्सूचनोक्त्ययुक्तिरिति॥

प्रकाशः

नस्मरणात् । तथा च तत्रोभयत्रान्यार्थपरत्वाद्विषभक्षणादेरिष्टत्वं नास्ति, तद्वत् ज्ञानमपि नेष्टमिति न प्रयोजनस्य तेन लाभ इति भावः । **पूर्वपक्षिणेति** । तथा चान्योन्याश्रय इति भावः । **उक्त-त्वाच्चेति** । तदीयाथशब्दार्थखण्डनप्रस्तावे "न तावद्विचारविधौ मुमुक्षुरधिकारी" इत्यादिनेति भावः । **निरासाच्चेति** । "मुमुक्षा च न परपक्षे युक्ता" इत्यादिनेति भावः । यदपि जिज्ञासापदेन विषयसूचनमिति, तदपि नेत्याह—**विषयेति** । यदसन्दिग्धं जी-वादि ततोऽन्यस्येश्वरादेः सूचनं विना न शक्यं, तच्च ब्रह्मपदेनै-वेति भावः । अयं दोषो भामतीमतेऽपि ध्येयः । ननु जिज्ञा-सापदोपादानसामर्थ्यादेव तत्प्रयोजकसंशयादिलाभाद्विषयादिसिद्धिर्भ-विष्यति अन्यथा तद्वैयर्थ्यमित्यत आह—**अन्यथेति** । जिज्ञासा-पदसामर्थ्यादेव तत्सूचने इत्यर्थः । शास्त्रारम्भप्रयोजकविषयादिसू-

"यमन्तस्समुद्रे कवयोऽवयन्ति यदक्षरे परमे प्रजाः ।
यतः प्रसूता जगतः प्रसूती तोयेन जीवान्वयससर्ज भूम्याम्"।
इत्युक्त्वा,
"तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम्"
इति हि श्रुतिः । "तन्नो विष्णुः" इतिवचनाद्विष्णुरेव हि तत्रोच्यते । न चेतरशब्दात्तत्प्राप्तिः ।

तत्त्वप्रकाशिका

विष्णावेव मुख्यत्वान्मुख्यस्यैव ग्राह्यत्वात्स एव सूत्रकारविवक्षितो ज्ञायत इति भावः । "स विष्णुराह हि" "तं ब्रह्मेत्याचक्षते" इति निरन्तरसूत्रद्वये ब्रह्मत्वेन नारायणस्यैव प्रस्तुतिं सूचयति विष्णुग्रहणेन । ब्रह्मशब्दस्यान्यत्राऽपि रूढत्वात् रूढेरेव मुख्यत्वात्कुतो विष्णावेवासौ मुख्य इत्यत आह—**यमिति** । यद्यप्यन्यत्र रूढो ब्रह्मशब्दः, तथाऽपि विष्णावेव मुख्यः, अन्यत्राज्ञरूढित्वात् भगवति च विद्वद्रूढ्या ब्रह्मशब्द इति । कवीनां तदेव परमं ब्रह्मेति श्रुत्युक्तत्वाद्विद्वदविद्वद्रूढ्योर्विद्वद्रूढेरेव मुख्यत्वात् । तच्छब्देन विष्णुरिति कुत इति चेत्, यमन्तस्समुद्रे स्थितं ज्ञानिनो जानन्तीति विष्णुलिङ्गादेवेति भावः । समुद्रस्थत्वलिङ्गस्यान्यत्र कथञ्चित्सम्भवात्तच्छब्देन कुतो विष्णुत्वनिश्चय इत्यतो निरवकाशश्रुतेरेवेत्याह—**तन्न इति** । यतस्तं विद्महे धीमहि च तस्मादस्माच्छुभं प्रति विष्णुश्चोदयत्वित्यर्थः । यदि विष्णुशब्दात्स एवात्रोक्तं ब्रह्म, तर्हि "तन्नो रुद्रः" इत्यादीतरवाचकसद्भावात्तेषामपि मुख्यब्रह्मत्वं प्राप्तमित्यत आह—**न चेति** । कुतो ने-

चन्द्रिका.

ब्रह्मशब्दश्च "अथ कस्मादुच्यते ब्रह्मेति, बृहन्तो ह्यस्मिन् गुणाः" इत्यादिश्रुतिबलात् गुणपूर्त्यर्थः । परपक्षे अखण्डस्य ब्रह्मपदलक्ष्यस्यैव जिज्ञास्यत्वात्

प्रकाशः

चकमाद्यसूत्रं हित्वैव, जन्मादिसूत्रमारभ्य शास्त्रे आरब्धे सति, यद्यत्र विषयादिकं न स्यात्तदा प्रेक्षावान् सूत्रकारो नारभेत, आरभते चातोऽत्रास्ति विषयादीत्यारम्भसामर्थ्यादेव वा, तथा जिज्ञासाया विषयाद्यभावे कर्तव्यतोक्त्ययोगात् तत्सामर्थ्यादेव वेत्यर्थः । उपलक्षणमेतत् । "ईक्षतेर्नाशब्दम्, आनन्दमयोऽभ्यासात्" इत्यादौ साध्यनिर्देशसामर्थ्यादेव तत्प्रयोजकलाभात् 'ईक्षतेः' अभ्यासात्, इत्यादिहेतूपन्यासो व्यर्थ इत्यपि ध्येयम् । भामतीमते आक्षिप्तविचारकर्तव्यतासामर्थ्याभिप्रायेण वाक्यं योज्यम् । इतिशब्दोऽतश्शब्दव्याख्यासमाप्तौ ॥ एवमोमथातश्शब्दान् सम्यग्व्याख्याय, द्वयोरपव्याख्यां च प्रत्याख्याय, क्रमप्राप्तस्य ब्रह्मशब्दस्य परोक्तमर्थं निरसितुं, भगवत्पादोक्तमर्थमाह—**ब्रह्मशब्दश्चेति** । "ब्रह्मशब्देन पूर्णगुणत्वोक्तेः" इति न्यायविवरणोक्तेरिति भावः । यद्यपि देशकालापरिच्छेदोऽपि ब्रह्मपदार्थः । तथाऽपि तत्राविवादाद्वा, गुणपूर्त्युक्त्यैव तस्यापि गुणस्य लाभाद्वा, "देशतः कालतश्च" इत्युपसंहारादुपलक्षणत्वाद्वा न दोषः । **अखण्डस्येति** । "अस्ति तावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावम्" इत्यादि परभाष्यादौ तथैव वर्णनादिति भावः । लक्ष्यत्वे हेतुरखण्डत्वम् । तच्च मुख्यार्थत्यागे । यद्यप्यत्र ब्रह्मशब्दस्य शिवा-

चन्द्रिका

श्रुतिसूत्रस्थब्रह्मपदस्य मुख्यार्थत्यागः । यच्च परैः—ब्रह्मणो जीवात् भेदे तद्रूपविकलत्वेनाल्पत्वं स्यादिति निरङ्कुशमहत्त्वासिद्धेः, त्रिविधपरिच्छेदाभावरूपमहत्त्वार्थेन ब्रह्मपदेनैव जीवाभेदसिद्धिरित्युक्तम् । तन्न, तेनैव घटाद्यभेदप्रसङ्गात् । जीवस्वरूपस्य तात्त्विकत्वात्, घटादेश्चातथात्वाद्वैषम्यमिति चेत्, न, देश-

प्रकाशः

दिपरत्वं प्रच्याव्य विष्णुपरत्वमित्यपि समर्थनीयम् । तथाऽपि भाष्यानुभाष्यादौ भगवत्पादैरेव बहुप्रमाणैः समर्थितत्वान्नेह तत्र पराक्रान्तम् । यद्वा—निरङ्कुशगुणपूर्त्यर्थत्वोक्त्यैव भाष्याद्युदाहृतश्रुतिस्मृतिशतैरेतादृशशिवादिप्रहाणेन तादृशविष्णुपरत्वसिद्धेरेवमुक्तम् । यद्वा—गुणपूर्त्यर्थत्वोक्तिमात्रेण जीवाद्भेदसिद्ध्या विषयसिद्धेस्तदेवोक्तम् । यद्वा—लक्षणसूत्र एव तस्य व्युत्पाद्यत्वाच्च भाष्यादौ तदुक्तिः शिष्यहितायेत्यूह्यम् । **श्रुतीति** । "तद्विजिज्ञासस्व । तद्ब्रह्म" इति श्रुतिस्थस्येत्यर्थः ॥ एवं ब्रह्मपदास्वारस्यमुक्त्वा यद्ब्रह्मपदस्य देशकालवस्तुपरिच्छेदलक्षणत्रिविधपरिच्छेदाभावरूपमहत्त्वमर्थः इत्युक्तम्, तदपि नेत्याह—यच्चेति । यद्वा—ब्रह्मशब्दमुख्यार्थत्यागः, अखण्डचैतन्यस्यैव ब्रह्मशब्दस्वरसार्थत्वादित्यतस्तदनूद्यैव निराह—**यच्चेति । तेनैवेति** । उक्तरूपमहत्त्वार्थेन ब्रह्मपदेनैवेत्यर्थः । अन्यथा तद्रूपविकलत्वेन निरङ्कुशमहत्त्वासिद्धेः । न चेष्टापत्तिः । ब्रह्मणि जगद्व्यावृत्त्यभिलापादिति भावः । **वैषम्यमिति** । तात्त्विकेनाभेदाभाव एव महत्त्वासिद्धिरिति भावः । वैषम्यमप्रयोजकमित्याह—**देशेति** । **यथा** गगनादावतात्त्विकदेशकालाभ्यामपरिच्छेदस्य सत्त्वेन महत्त्वं,

चन्द्रिका

कालयोरतात्त्विकत्वेऽपि गगनादाविव घटादौ तात्त्विकस्य वा स्वतुल्यसद्रूपस्य वा देशाद्यपरिच्छेदस्याभावेन अल्पत्ववदभेदस्य अपरिच्छेदरूपत्वे वस्तुनो घटादेरतात्त्विकत्वेऽपि, ब्रह्मणि तात्त्विकस्य स्वतुल्यतद्रूपस्य वा वस्त्वपरिच्छेदस्याभावेन अल्पत्वप्रसङ्गात् । न च परिच्छेदकस्य देशादेः घटतुल्यसद्रूपत्वात् घटादेः देशादितोऽल्पता। ब्रह्मणि तु परिच्छेदकस्य घटादेः वस्तुनः स्वतुल्यसद्रूपत्वाभावात् तदभेदाभावेऽपि न वस्तुतोऽल्पता। जीवस्य तु ब्रह्मतुल्यसद्रूपत्वा-

प्रकाशः

तथा घटादौ तदपरिच्छेदस्याभावेन अल्पत्वं दृष्टं, तद्वदतात्त्विकादपि घटादेः अभेदरूपस्यापरिच्छेदस्य ब्रह्मण्यभावे, निरङ्कुशमहत्त्वासिद्ध्याऽल्पत्वं स्यादित्यर्थः । **तात्त्विकस्येति** । सप्रकारकज्ञानाबाध्यस्येत्यर्थः । यद्येवंविधमपि घटाद्यपरिच्छेदं "सर्वं खल्विदं ब्रह्म" इतिश्रुतेर्वैयात्यात् कश्चिदङ्गीकुर्यात्, तदाह—**स्वतुल्येति** ॥ ननु देशादेः घटसमसत्ताकत्वाद्देशाद्यपरिच्छेदाभावे तस्याल्पत्वं युक्तम् । न तु ब्रह्मणि, तस्य घटादेश्च भिन्नसत्ताकत्वात्, जीवब्रह्मणोश्च समसत्ताकत्वेन महत्त्वसिद्ध्यै जीवापरिच्छेद एव वक्तव्यो न तु घटाद्यपरिच्छेद इत्याशङ्क्याह—**न चेति** ॥ 'परिच्छेदकस्य' घटादिनिष्ठपरिच्छेदनिरूपकस्य । **घटतुल्येति** । द्वयोर्व्यावहारिकत्वादिति भावः । 'घटादेः' इत्यनन्तरं 'देशाद्यपरिच्छेदाभावः' इति योज्यम् । **न वस्तुतोऽल्पतेति**। न वस्त्वभेदाभावकृतमल्पत्वमित्यर्थः । **ब्रह्मतुल्येति** । द्वयोस्तात्त्विकत्वादिति

चन्द्रिका

त्तदभेदाभावे, वस्तुतोऽल्पता स्यादिति वाच्यम्, तत्त्वतस्सद्रूपे ब्रह्मणि व्यवहारतः सद्रूपदेशादिना परिच्छेदेऽपि महत्त्वसिद्धिप्रसङ्गात्। स्वतुल्यसद्रूपघटाद्यनात्मकेऽपि गगनादौ अल्पत्वबुद्ध्यभावाच्च। अन्यथा कालापरिच्छिन्नेऽपि परमाण्वादौ देशपरिच्छेदेनाल्पत्वबुद्धिवदुभयापरिच्छिन्नेऽपि गगनादौ भेदमात्रेण परिच्छिन्नत्वबुद्धिः स्यात्। ननु घटादौ स्वतुल्यसद्रूपो देशादिपरिच्छेदोऽल्पत्वम्। ब्रह्मणि च घटादिप्रति-

प्रकाशः

भावः। वस्तुतोऽल्पतेत्युक्तार्थम्। स्वतुल्यसद्रूपनिरूपितापरिच्छेद एव महत्त्वप्रयोजको न तु भिन्नसत्ताकनिरूपितः इत्ययं कल्पो न युक्तः, अन्वयव्यतिरेकव्यभिचारादिति भावेनाह—**तत्त्वत** इति। स्वभिन्नसत्ताकनिरूपितापरिच्छेदस्य महत्त्वाप्रयोजकत्वोक्तेरिति भावः। 'घटाद्यनात्मके' घटाद्यपरिच्छेदरहिते। स्वतुल्यसद्रूपवस्त्वपरिच्छेदस्य महत्त्वप्रयोजकत्वे तत्राल्पत्वबुद्धिस्स्यात्। न चैवमस्ति। अतस्तद्वज्जीवानात्मकेऽपि ब्रह्मणि अल्पत्वबुद्ध्यभावोपपत्तिरिति भावः। ननु गगनादौ देशकालापरिच्छेदमात्रेण महत्त्वबुद्धिर्युक्तेत्यतस्तुल्यं ब्रह्मण्यपीति भावेन तदुपपादयति—**अन्यथेति**। स्वतुल्यसद्रूपवस्त्वपरिच्छेदाभावेनाल्पत्व इत्यर्थः। **भेदेति**। घटादिपरिच्छेदमात्रेणेत्यर्थः। इयता ग्रन्थेन परिच्छेदकस्य स्वतुल्यसद्रूपत्वमल्पत्वप्रयोजकमित्याशङ्क्य निरस्तम्। इदानीं परिच्छेदस्य स्वतुल्यसद्रूपत्वमल्पत्वप्रयोजकमित्याशङ्कामुद्भाव्य निरस्यति—**नन्विति**। **न स्वतुल्यसद्रूप** इति। तात्त्विकस्य कस्यापि धर्मस्य ब्रह्मण्यसम्भवादिति भावः। स्वतुल्यसद्रूपभेदस्याऽल्पत्वे तादृशभेदाभावो महत्त्व-

चन्द्रिका

योगिको भेदरूपो वस्तुपरिच्छेदो न स्वतुल्यसद्रूप इति नाल्पत्वमिति चेत् मैवम्, तथात्वे घटादिवज्जीवादपि स्वतुल्यसद्रूपभेदाभावमात्रेण महत्त्वसिद्ध्या जीवाभेदासिद्धेः। गगनादौ स्वतुल्यसद्रूपो देशाद्यपरिच्छेदो महत्त्वम्। न च ब्रह्मणि घटादिप्रतियोगिकः अभेदरूपः परिच्छेदः तथेति, महत्त्वहानिप्रसङ्गाच्च। किञ्च—स्वतुल्यसद्रूपस्यापरिच्छेदस्याभावे तादृशपरिच्छेदस्यादेव। तात्त्विकस्य अतात्त्विकादपि स्वतुल्यस-

प्रकाशः

मित्युक्तं स्यात्। तथा च जीवाभेदो न सिद्ध्यतीत्याह—**तथात्व** इति। न च जीवात्तादृशभेदाभाव एवाभेद इति वाच्यम्, घटादेरपि तादृशभेदाभावेन घटाद्यभेदापातादिति भावः। वैपरीत्यमपि सुवचमित्याह—**गगनादाविति**। 'तथा' स्वतुल्यसद्रूपः। ननु गगनादावपि तादृशदेशादिपरिच्छेदाभावेनैव महत्त्वं, न तु तादृशापरिच्छेदेन, येन ब्रह्मणि तादृशस्य घटाद्यपरिच्छेदस्याभावेन महत्त्वहानिस्स्यादित्याशङ्क्यैवमपि ब्रह्मणि तादृशस्य घटादिपरिच्छेदस्याभावाभावेन महत्त्वहानिरवर्जनीयेति भावेनाह—**किञ्चेति**। यद्वा—तादृशापरिच्छेदो महत्त्वमित्यापाद्य दूषितम्। इदानीं तादृशपरिच्छेदोऽल्पत्वमिति परोक्तरीत्यैव महत्त्वहानिरिति भावेन तादृशपरिच्छेदं ब्रह्मण्युपपादयति—**किञ्चेति**। 'अपरिच्छेदस्य' घटाद्यपरिच्छेदस्य, अभावे 'ब्रह्मणि' इति शेषः। **तादृशेति**। ब्रह्मतुल्यसद्रूपेत्यर्थः। तथा च 'अल्पत्वं स्यात्' इति शेषः। विरुद्धयोरेकस्यातात्त्विकत्वेऽन्यस्य तात्त्विकत्वनियमादिति भावः। ननु प्रतियोगिनो घटादेरतात्त्विकत्वात्तत्परिच्छेदापरिच्छेदयोः द्वयोरप्यतात्त्विकत्वमेव। "विरुद्धयोः" इति न्यायस्तु तात्त्विकप्रतियोगिस्थल एवेत्याशङ्क्य, सर्वत्र दर्शनान्न सङ्कोचो न्यायस्येति भावेनाह—**तात्त्विकस्येति**। अप्रातिभासिकस्य, सप्रकारकज्ञानाबाध्यस्येति वा।

चन्द्रिका

द्रूपभेदस्य नेदंरूप्यमिति दर्शनात् । तस्माद्ब्रह्मणो जगतो व्यावृत्तिमपरिच्छिन्नतां च अभिलषता भेदस्य परिच्छेदतैव त्याज्या, परिच्छिन्नाद्भेदे अपरिच्छेदस्यैव सिद्धेः । किञ्च—निरङ्कुशमहत्त्वार्थं ब्रह्मणस्सर्वात्मकत्वे, अल्पदेशादधिकदेशे अल्पगुणादधिकगुणे च महत्त्वबुद्धिवदेकात्मकात् गगनादितोऽनेकात्मके राश्यादौ महत्त्वबुद्धिः स्यात्, अवयवानेकत्वेऽपि परिमाणोत्कर्षादिनैव महत्त्वम् । निबिडानेकावयवायःपिण्डादपि विरलाल्पावयवे तूलराश्यादौ महत्त्वबुद्धेः ।

प्रकाशः

'शुक्तिशकलस्य' इति शेषः । वस्तुतो जीवाद्भेदेन ब्रह्मणोऽपरिच्छिन्नत्वमित्येतदुपसंहारव्याजेनाह—**तस्मादिति** । यस्माद्भेदस्य परिच्छेदत्वे घटादितो भेदेन ब्रह्मणः परिच्छिन्नत्वं प्रसज्यते, **यस्माच्च** परिच्छेदकस्य घटादेस्स्वतुल्यसद्रूपत्वाभावेन वा, परिच्छेदस्य स्वतुल्यसद्रूपत्वाभावेन वा, तत्परिहर्तुं न शक्यते, तस्मादित्यर्थः । एवं बाधकोपदर्शनेन वस्तुभेदो न महत्त्वभञ्जकः, येन तत्सिद्धये जीवाभेदोऽभ्युपेयस्स्यादित्युक्तम् । इदानीं सत्यप्येनेकात्मकत्वे महत्त्वबुद्धेरदृष्टेः, असत्यपि तस्मिन् तस्याः दर्शनात् व्यभिचारेण, न वस्त्वभेदो महत्त्वमित्याह—**किञ्चेति** । "अल्पदेशादधिकदेशे" इति बहुव्रीहिः, अल्पदेशावस्थितात्तूचणुकादितोऽधिकदेशावस्थिते घटादावित्यर्थः । 'गुणः' ज्ञानादिलक्षणः । 'पुंसि' इति शेषः । **अनेकेति** । अनेकमाषाभिन्नतत्समुदायरूपराश्यादावित्यर्थः । नन्ववयवप्राचुर्याप्राचुर्यवतोः घटकरकयोर्महत्त्वाल्पत्वे दृष्टे इत्यतस्तत्राप्यन्यदेव प्रयोजकमित्याह—**अवयवेति** । अनेकाल्पावयवत्वे हेतुः—**निबिडेति विरलेति** । अस्तु वा देशकालापरिच्छेद

चन्द्रिका

किञ्च—अपरिच्छेदस्य ब्रह्मानन्यत्वे बृहतिधात्वर्थस्य भावेऽपि प्रत्ययार्थाभावेन अपरिच्छिन्नत्वासिद्धिः । अन्यत्वेऽपि तात्त्विकत्वे सुतरां तद्रूपविकलत्वात् । अतात्त्विकत्वे तत्त्वतः परिच्छिन्नत्वापत्तेः। किञ्च—वस्तुतोऽल्पे सत्येव तन्निरूपितमहत्त्वस्य वास्तवत्वमिति ब्रह्मशब्देनैव सद्वितीयत्वम् । देशाद्यपरिच्छेदेऽपि न देशादेर्वस्तुतोऽभावो हेतुः, घटादेरपि तत्प्रसङ्गात् ।

प्रकाशः

वद्वस्त्वपरिच्छेदो महत्त्वं, तथाऽपि सोऽयमपरिच्छेदः किं ब्रह्मणो भिन्नः, उत अभिन्नः । भिन्नत्वेऽपि तात्त्विकोऽतात्त्विको वेति विकल्पान् हृदि कृत्वा, क्रमेण प्रत्याह—**किञ्चेति** । वस्त्वपरिच्छेदस्येत्यर्थः । **प्रत्ययार्थाभावेनेति** । "बृहि वृद्धौ" इत्येतस्मात् "बृंहेरन्नलोपश्च" इति मनिन्प्रत्यये नलोपेऽआगमे यणि च, 'ब्रह्म' इति वृद्धिशब्दितापरिच्छेदवदुच्यते । वृद्धिशब्दितापरिच्छेदरूपत्वेऽपि वृद्धिमत्त्वरूपमपरिच्छिन्नत्वं न स्यादित्यर्थः । 'सुतराम्' असंशयम् । 'अपरिच्छिन्नत्वासिद्धिः' इत्यन्वयः । तत्र हेतुः—**तद्रूपेति** स्वतुल्यसद्रूपापरिच्छेदाख्यवस्त्वभेदशून्यत्वादित्यर्थः । ब्रह्मशब्दादभेदसिद्धिरित्युपन्यासो विरुद्ध इत्याह—**किञ्चेति**। सद्वितीयत्वे कथमपरिच्छिन्नत्वमित्यतस्तदुपपादयति—**देशादीति** । येन द्वितीयाभावे सत्येवापरिच्छिन्नत्वं ब्रह्मणः स्यादिति भावः । तत्र हेतुः—**घटादेरिति**। वस्तुतो घटादेस्त्वन्मतेऽभावेन तदपरिच्छेदो ब्रह्मणः स्यादित्यर्थः । न चेष्टापत्तिः । घटादिव्यावृत्त्यभिलाषादिति भावः । यद्वा—घटादेरपि ब्रह्मण इव

चन्द्रिका

देशादेस्सत्त्वेऽपि तत्परिच्छेदाभावमात्रेणापि तत्सिद्धेश्च । बौद्धाभिमतक्षणिकविज्ञानादेरपि वस्तुतः कालाद्यभावेन अपरिच्छिन्नत्वप्रसङ्गाच्च । तस्मात्—

देशतः कालतश्चैव गुणतश्चापि पूर्णता ।
ब्रह्मता न तु भेदस्य राहित्यं ब्रह्मतेष्यते ॥ तदुक्तं—
देशतः कालतश्चैव गुणतश्च त्रिधा ततिः ॥ इति ॥

तदेतदभिप्रेत्योक्तं भाष्ये—'ब्रह्मशब्दश्च विष्णावेव' इति । त्रिविधपूर्तिवाचको विष्णुशब्दः ।

प्रकाशः

देशाद्यपरिच्छिन्नत्वप्रसङ्गादित्यर्थः । तदपरिच्छेदे तदभावो न हेतुः, घटादौ व्यभिचारादित्युक्तम् । अप्रयोजकश्चेत्याह—**देशादेरिति**। 'तत्सिद्धेः' अपरिच्छिन्नत्वसिद्धेः । अतिप्रसङ्गं चाह—**बौद्धेति** । विज्ञानवादिमते विज्ञानव्यतिरेकेण कालादिजगतोऽभावेन कालाद्यपरिच्छेदस्स्यात् । न चेष्टापत्तिः, क्षणिकत्वोपगमादित्यर्थः । अतो द्वितीयसत्त्वेऽपि ब्रह्मणोऽपरिच्छिन्नत्वं युक्तमित्यर्थः । यद्वा—देशाद्यपरिच्छेदं ब्रह्मपदार्थं ब्रुवता ब्रह्मपदेनैव देशकालरूपद्वितीयसत्त्वमुपेतमित्याह—**देशादीत्यादिना** । वस्तुतस्तु—देशाद्यपरिच्छेदे देशाद्यभावो न हेतुः, किन्तु तस्मिन् सत्येव तदपरिच्छेदः, तथा परिच्छिन्ने जीवादौ सत्येव तदपेक्षया अपरिच्छिन्नत्वं युज्यत इति भावेन दृष्टान्तमुपपादयति—**देशादीत्यादिना** । व्याख्यानं प्राग्वत् । 'तस्मात्' इत्यस्य श्लोकेनान्वयः । चापिशब्दाः प्रत्येकमभिसम्बध्यन्ते । त्रिभिः पूर्णतेवेत्युक्तैवकारव्यावर्त्यमाह—**न त्विति**। **तदुक्तमिति** । गीतातात्पर्ये द्वितीये । कथमस्मात्तल्लाभ इत्यत आह—**त्रिविधेति** । 'विष्लृ व्याप्तौ' इत्यस्य क्तुप्रत्यये रूपं

चन्द्रिका

अत्र परैः—ब्रह्मणो जिज्ञासेति षष्ठीसमासः,

प्रकाशः

विष्णुः' इति । व्याप्तिश्च त्रेधा भवति, "देशतः" इति वचनादिति भावः । यद्यप्ययं शिवादिव्यावृत्यर्थत्वेनोपात्तश्चक्रिरूपविशेष्यपरः, तथैव भाष्ये अग्रे प्रतिपादनात् तथाऽपि विशेष्यं वदन् उक्तत्रिविधपूर्त्यभिधानपूर्वमेव तद्वदति, सर्वशब्दानां योगपूर्वमेव भगवति वृत्तेरित्येवमुक्तम् । एतेनावश्यवक्तव्यं जीवभेदकं विषयसिद्ध्यङ्गं गुणपूर्णत्वं ब्रह्मपदार्थत्वेनानुक्त्वा, विष्ण्वर्थचमनुपयुक्तमुच्यत इति भाष्ये अनौचित्यचोद्यं निरस्तम्, विष्ण्वर्थत्वेन तल्लाभात् । न्यायविवरणे ब्रह्मशब्देन गुणपूर्णत्वोक्तेरुक्तत्वाच्च । विष्ण्वर्थकत्वं तु शिष्यहिताय वा गुणपूर्तियोग्यत्वाय वेति नानुपयुक्तम् । एतेन ब्रह्मपदस्याभेदार्थकत्वान्नाभेदपूर्वपक्षोऽनेन निरस्यत इति कस्यचित्प्रलापोऽपोढः, उक्तरीत्याऽभेदार्थकत्वाभावात् । यदपि ब्रह्मशब्दस्योक्तत्रिविधपरिच्छेदराहित्यार्थकत्वमुपेत्य, शिवपरत्वप्रलपनं, तदपि भाष्याद्युदाहृतप्रमाणजालैर्निरस्तं ध्येयम् । "पत्युरसामञ्जस्यात्" इति सूत्रकृता कण्ठतः शिवस्यापूर्णत्वदोषवत्त्वयोरुक्तत्वाच्च । तस्य चानुव्याख्याने बहुप्रमाणोदाहरणेन प्रपञ्चनाच्च । विस्तरस्तु गुरुपादकृतन्यायमौक्तिकमालातोऽनुसन्धेयः ॥ क्रमप्राप्तं "ब्रह्मजिज्ञासा" इत्यत्र समासशोधनं कर्तुं पराभिमतमनूद्य निरस्यति—अत्र परैर्मायावादिभिरिति । 'निराकृता' इत्यन्वयः । यद्यपि सिद्धान्तेऽपि कर्मणि षष्ठ्या समासः नात्र किञ्चित्परोक्तं विरोधि निरसनीयमस्ति

चन्द्रिका

*न तु चतुर्थीसमासः । षष्ठी च कर्मणि, न तु शेषे । कर्मणि षष्ठचा हि प्रतीत्यनुबन्धितया जिज्ञासापेक्षितकर्मणः साक्षाल्लाभः, शेषषष्ठचा तु सामान्यद्वारेणेति कुसृष्टिः । शेषषष्ठीपक्षे 'तद्विजिज्ञासस्व' इति साक्षाज्जिज्ञासाकर्मत्वप्रतिपादकश्रुत्यननुगमश्चेति शेषषष्ठी निराकृता । तदयुक्तम्, परपक्षे विचारजन्यज्ञानकर्मणो

प्रकाशः

तथाऽपि तादृशसमासः सिद्धान्त एव युक्तो न तु परमत इति, तद्व्याकारानौचित्यप्रदर्शनार्थं स्वभावोपन्यासः । **नचतुर्थीति** । वृत्तिकारैर्ब्रह्मणे जिज्ञासेति चतुर्थीसमास उक्तः । स न भवति, "तादर्थ्यसमासे प्रकृतिग्रहणं कर्तव्यम्" इति कात्यायनवचनेन यूपदार्वादिष्वेव प्रकृतिविकारभूतेषु चतुर्थीसमासनियमनादिति भावः । 'षष्ठी च कर्मणि' इत्युक्तं व्यनक्ति—**कर्मणि षष्ठ्या हीति** । प्रतीतौ विशेषणत्वेन सम्बन्धितयेत्यर्थः । एतदुक्तं भवति—जिज्ञासेत्यत्रेच्छाया अनुबन्धिज्ञानं, ज्ञानस्य ज्ञेयं ब्रह्म न खलु ज्ञानं ज्ञेयं विना निरूप्यते, न च जिज्ञासा ज्ञानं विनेति प्रतीत्यनुबन्धित्वात् प्रथमं जिज्ञासाकर्मैव अपेक्ष्यते, न तु सम्बन्धिमात्रमिति । **सामान्येति** सम्बन्धसामान्यस्य विशेषनिष्ठत्वात्, प्रसक्तनिषेधेन जिज्ञासाकर्मत्वलाभ इति कुसृष्टिरित्यर्थः । यद्यपि परपक्षे षष्ठ्याः कर्मत्वार्थकत्वस्यैव निरस्यत्वेन तावदेवाऽनुवदनीयं, न तु शेषषष्ठीनिरासप्रकारोऽपि, तस्यादूषणात् । तथाऽपि तस्य सिद्धान्तेऽपि प्रतिपिपादयिषितत्वेन तदनुवाद इत्यदोषः । **विचारेति** । विचारस्य स्व-

* प्रकाशरीत्या 'न चतुर्थीसमासः' इति पाठः.

चन्द्रिका

ब्रह्मणो विचारकर्मत्वायोगात् । अपरोक्षवृत्तिव्याप्यस्य फलव्याप्यत्वनियमाच्च ।

प्रकाशः

विषयविषयकज्ञानजनकत्वेन, स्वजन्यज्ञानस्य सकलकारकशक्तिविधुरब्रह्मकर्मकत्वायोगेन तस्यापि तत्कर्मकत्वायोगात् । ननु कारकशक्तिविधुरस्यापि शास्त्रजन्यापरोक्षवृत्तिव्याप्यत्वेन कर्मत्वव्यपदेश इत्यत आह–**अपरोक्षेति । फलेति ।** वृत्त्युपहितचैतन्येत्यर्थः । घटादौ दर्शनादिति भावः । तथा च ब्रह्मणः फलव्याप्यत्वरूपव्यापकस्याभावेनापरोक्षवृत्तिव्याप्यत्वमपि तस्य न सम्भवतीत्यर्थः फलव्याप्यत्वं तु कर्तृकर्मविरोधान्नाङ्गीक्रियत इति भावः । गान्धर्वशास्त्रविचारात् षड्जादिसाक्षात्कारदृष्टेः, ब्रह्मविचारात्तदपरोक्षवृत्तिर्जायत इति 'अपरोक्षवृत्तिव्याप्यस्य' इत्युक्तम् ॥ ननु सिद्धान्तेऽपि कस्समासः, ब्रह्मजिज्ञासयोरैक्यायोगेन सामानाधिकरण्येन तदयोगात् नापि द्वितीयातत्पुरुषः, श्रितादिभिरेव तस्य विधानात् । कृद्योगे द्वितीयाऽयोगाच्च । नापि तृतीयातत्पुरुषः, ब्रह्मणो विषयत्वाप्राप्तेः अत एव न पञ्चमीसमासोऽपि । नापि वृत्तिकाररीत्या चतुर्थीसमासः; प्रकृतिविकारभाव एव तादर्थ्यसमासस्य नियमितत्वात् । नापि सप्तमीसमासः, आधारसामान्ये शक्तायास्तस्याः विषयत्वरूपविशेषार्थकत्वे प्रतिपत्तिगौरवात् । सर्वत्र 'सप्तमी' इत्यादियोगविभागाश्रयणापाताच्च । षष्ठीसमासपक्षेऽपि न कर्मणिषष्ठ्या स

चन्द्रिका.

स्वपक्षे कर्मणि षष्ठ्यामपि प्रमाणसाधनप्रयोजनादिपरिकरयुक्तस्यैव ब्रह्मणो जिज्ञासाकर्मत्वान्न प्रमाणादिविचारस्याप्रतिज्ञाततापसङ्गः ।

प्रकाशः

आश्रयितुं युक्तः । तथात्वे हि ब्रह्मस्वरूपमेव जिज्ञासायां कर्मतयाऽन्वेतीति ब्रह्मजिज्ञासैव प्रतिज्ञाता, न तु प्रमाणादिजिज्ञासेति अग्रे तेषां विचारो न युक्तः स्यात् । शेषषष्ट्या तदाश्रयणे तु सम्बन्धमात्रं शेष इति, साक्षात्पारंपर्येण च ब्रह्मतत्प्रमाणादिजिज्ञासाया ब्रह्मसम्बन्धित्वात् सर्वजिज्ञासा प्रतिज्ञाता भवति । तथा च "कर्मणिषष्ठीपरिग्रहाय 'जिज्ञास्योऽयं विधीयते' इत्युक्तम् इति सुधावाक्यानुपपत्तिरित्याशङ्क्य कर्मणिषष्ठीसमासं समर्थयते **स्वपक्ष** इति । ब्रह्मजिज्ञासायां प्रतिज्ञातायां लक्षणप्रमाणादिजिज्ञासामन्तरेण तस्या अभावात्, प्रधानब्रह्मजिज्ञासयैवार्थात्प्रमाणादिजिज्ञासाऽपि लभ्यत इति भावः । अत एव 'परिकरयुक्तस्य' इति परिकरपदप्रयोगः उक्तं च सुधायां "तस्या विनाऽप्यभिधानेन लाभात्" इत्यादि । ननु यदि षष्ठी कर्मणि, न शेषे, तर्हि "कर्मणि च" इति कर्मणि षष्ठ्या समासप्रतिषेधात् कथं समास इति चेन्न "उभयप्राप्तौ कर्मणि" इत्येनेन विहितायास्तेन निषेधात् इह तु कर्मण एवोपादानं न तु कर्तुरित्युभयप्राप्त्यभावात् । यद्यथशब्दादधिकारिलाभात् कथंचित्कर्तृप्राप्तिं मन्यसे, तर्हि "स्त्रीप्रत्ययोरकाकारयोः प्रयोगे नेति वक्तव्यम्" इति अकारप्रत्ययान्तप्रयोगे "उभयप्राप्तौ" इति षष्ठ्या निषेधादिह तेन न षष्ठी-

चन्द्रिका

"कृद्योगलक्षणा च षष्ठी समस्यते" इति प्रतिप्रसवात् 'प्रतिपदविधाना च षष्ठी न समस्यते' इत्यस्य निषेधस्य नायं विषय इति । युक्त्यनुसन्धानात्मको मननापरनामको विचारो जिज्ञासा, सुधायाम्—"जिज्ञासा नाम युक्त्यनुसन्धानात्मकं विचारापरपर्यायं मननम्" इत्युक्तत्वात् । न्यायनिबन्धनात्मकशास्त्रारम्भणीयत्वस्य न्यायानुसन्धानकर्तव्यतोक्तिमात्रेण सिद्धेश्च ।

प्रकाशः

त्यवेहि । अत एव तत्र मञ्जर्यां 'धर्मजिज्ञासा देवदत्तस्य' इत्युदाहृतम् । जिज्ञासाशब्दस्य 'अप्रत्ययात्' इति विहिताकारप्रत्ययान्तस्य "कर्तृकर्मणोः कृति" इत्येव षष्ठी । नन्वेवमपि "प्रतिपदविहिता षष्ठी न समस्यते" इति निषेधात् "सर्पिषो ज्ञानम्" इत्यादाविवेहापि षष्ठीसमासो न स्यादित्यत आह—**कृद्योगेति** । "कर्तृकर्मणोः कृति" इत्यनेन विहितेत्यर्थः । 'प्रतिप्रसवः' अपवादापवादः । **नायं विषय इति** । "क्तोऽविदर्थस्य करणे" इति विहिता षष्ठी "सर्पिषो ज्ञानम्" इत्यत्रेति भावः । एवं समासार्थं निरूप्य क्रमप्राप्तजिज्ञासापदार्थं निरूपयति—**युक्त्यनुसन्धानेति** । भगवति शक्तितात्पर्यावधारणरूपसमन्वययोपक्रमादिरूपयुक्त्यनुसन्धानात्मकेत्यर्थः । टीकायामेवमनुक्तेराह—**सुधायामिति** अत्र जिज्ञासाशब्देन तस्यैव ग्रहणे युक्तिं चाह—**न्यायेति** । **मात्रेणेति** । न तु श्रवणस्यापि कर्तव्यतोक्त्यैत्यर्थः । येन श्रवण

चन्द्रिका

न ह्यौपदेशिकवाक्यार्थग्रहणलक्षणश्रवणस्य कर्तव्यता उक्तरूपशास्त्रस्याऽरम्भणीयत्वे हेतुः "श्रवणजं ज्ञानं पूर्ववृत्तम्" इति सुधायां मीमांसातस्तस्य पूर्ववृत्तत्वेनोक्ततया शास्त्रस्यारम्भणीयत्वं विनाऽपि तत्कर्तव्यतासिद्धेः । "श्रवणादिरूपा जिज्ञासा कार्या" इति टीकायां त्वतद्गुणसंवि-ज्ञानबहुव्रीहिणा विचार एवोक्तः ।

प्रकाशः

मपि जिज्ञासापदेनात्र ग्राह्यं स्यादिति भावः । तदेवाह—**न हीति** । विचारश्रवणमिति परमतव्यावृत्त्यर्थं औपदेशिकेति । उपनिषद्वाक्यादिरूपोपदेशजातवाक्यार्थग्रहणेत्यर्थः । **उक्तेति** । न्यायनिबन्धनात्मकरूपेत्यर्थः । न्यायानुसन्धानस्य तन्निबंन्धनात्मकशास्त्रं विना अयोगेन तत्कर्तव्यत्वमेव तदारम्भणीयत्वं प्रयोजयति, न तु वाक्यार्थग्रहणम्, तस्य व्याख्यानादिरूपोपदेशापेक्षत्वादितिभावः। यद्यपि वक्ष्यमाणदिशा श्रवणकर्तव्यत्वमपि शास्त्रारम्भप्रयोजकम् । तथाऽपि परम्परया तथात्वेऽपि न साक्षादिति भावः । श्रवणकर्तव्यत्वं न शास्त्रारम्भप्रयोजकमित्यत्र सुधासंमतिपूर्वकं हेतुमाह **श्रवणजमिति** । तर्हि टीकाविरोध इत्यतः तद्वाक्यस्य चतुर्धा समाधिमाह—**श्रवणादीति** तस्य गुणस्यान्यपदार्थविचारं प्रत्युपसर्जनीभूतस्य श्रवणस्यान्यपदार्थे संविज्ञानं यस्मिन् बहुव्रीहौ नास्ति सोऽयमतद्गुणसंविज्ञानबहुव्रीहिः । तथा च श्रवणस्य त्यागेनान्यपदार्थो विचार एव जिज्ञासापदार्थ उक्त इत्यर्थः । अस्मिन् पक्षे श्रवणपूर्वकत्वं मननस्य द्योतयितुं-

चन्द्रिका

अतएव 'विचारेऽपि तत्प्रयोगात्' इत्युत्तरग्रन्थः। यद्वा—यथा श्रवण-निदिध्यासने विहितत्वान्मुमुक्षुणा कार्ये, तथा मननमपीति दृष्टान्ततया तयोरुपादानम्, न तु शास्त्रारम्भहेतुतया। अथ वा—निदिध्यासनस्याकर्तव्यत्वे तदङ्गमननस्यापि तथात्वात्, परम्परया निदिध्यासनकर्तव्यता आरम्भणीयत्वे हेतुः, तथा—प्रतिवाक्यार्थमयं वाक्यार्थो युक्तोऽन्यो वेति संशयादिनिरासकविचारशास्त्र व्युत्पाद्यन्यायावताराङ्गसन्देहकारणस्य यत्नसाध्यस्य प्रतिवाक्यमयमस्य

प्रकाशः

एवं निर्देश इति भावः। उपात्तस्याविवक्षायां ज्ञापकमाह—**अत एवेति**। 'तत्प्रयोगात्' सन्नन्तप्रयोगादित्यर्थः। **यद्वेति**। अस्मिन् पक्षे टीकायां 'श्रवणादि' इति 'श्रवणादेः' इति च द्विः श्रवणशब्दप्रयोगस्वारस्यादादिपदोपात्तमननिदिध्यासनयोः स्वारस्यम्। "विचारेऽपि तत्प्रयोगात्" इति टीका च विचारार्थकत्वप्रदर्शनमुखेन छत्रिन्यायेन श्रवणनिदिध्यासनयोः लक्षकतया त्रितयार्थत्वाभिप्रायेणोपपन्नेत्याशयः। जिज्ञासाशब्दस्य त्रितयार्थत्वेन त्रिषु कर्तव्यत्वाऽन्वयेऽपि विचारकार्यत्वमेव शास्त्रारम्भे हेतुः न त्वितरकार्यत्वमपीत्यर्थः। ननु विषयाद्यभावेन मननाकर्तव्यत्वपूर्वपक्षोक्तौ तुल्यन्यायतया श्रवणादेरपि तथात्वप्राप्त्या कथं दृष्टान्तत्वमित्यत आह—**अथवेति**। 'तदङ्ग' इति अकर्तव्यत्वे हेतुः। तदङ्गत्वं च न्यायामृते तृतीयपरिच्छेदे साधितमिति भावः। 'परम्परया' मननकर्तव्यताद्वारा 'आरम्भणीयत्वे' 'शास्त्रस्य' इति शेषः। श्रवणकर्तव्यत्वस्याप्यारम्भहेतुत्वमाह—**तथेति**। **यत्रेति**। न ह्यापा

चन्द्रिका

वाक्यस्यार्थ इत्येवं रूपस्य श्रवणज्ञानस्याभावे शास्त्रारम्भासिद्धेः तत्कर्तव्यताऽप्यारम्भणीयत्वे हेतुरेवेत्यारम्भसिद्ध्यर्थमेव त्रितयकर्तव्यतोक्ता। यस्तु—सर्वशाखाधिकरणटीकायां श्रवणमनने कर्तव्ये इति प्रथमसूत्रे उक्तमित्यनुवादः, म तदुत्तराधिकरणे निदिध्यासनस्य विचारयिष्यमाणत्वात् तत्र तयोरेव विचार्यत्वात् तदुपयोगितयैकदेशानुवादः। न तु प्रथमसूत्रे तन्मात्रोक्त्या। अतएवोपासना नाम ब्रह्मजिज्ञासेति त्रिविधोपासनाया जिज्ञासात्वं तत्रैवोक्तम्॥ न चैकस्य जिज्ञासाशब्दस्य श्रवणाद्यनेकार्थत्वायोगः। इच्छार्थो जिज्ञासाशब्दो विचारलक्षक इति पक्षे दोषाभावात्। मननरूपविचाराभिधायक इति पक्षे श्रवणादौ छत्रिवल्लक्षणोपपत्तेः।

प्रकाशः

तत एव एवं रूपज्ञानं भवतीति भावः। 'हेतुः' इति 'परम्परया' इत्यन्वयः। ननु यथाकथञ्चित्त्रितयकर्तव्यत्वस्याभिमतत्वे "सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्" इति तृतीयतृतीयपादाद्याधिकरणे द्वयोरेव कर्तव्यत्वोक्त्यनुवादो विरुद्धचेतेत्यत आह—**यस्त्विति**। टीकोक्तत्रितयार्थत्वं साधयति—**न चेति**। **इच्छार्थ इति**। ज्ञानं शास्त्यानुपयोगात् प्रत्ययार्थ एवोक्तः। **दोषाभावादिति**। श्रवणादित्रितयलक्षकत्वे बाधकाभावादिति भावः। **छत्रिवदिति**। यथा च्छत्रच्चच्छत्रिसमुदाये छत्रिसाहचर्यात् "छत्रिणो गच्छन्ति" इति लक्षणया च्छत्रिशब्दः, तथा विचारे शक्तस्य तत्सहपठितयोर्लक्षणोपपत्तेरित्यर्थः। सुधायां पक्षद्वयस्याप्युक्तेः इति पक्षे इति पक्ष-

चन्द्रिका

यद्वा—इह टीकायां जिज्ञासाविचारशब्दाभ्यां साक्षात्प्रमाणद्वारा वा चित्तस्य तत्प्रावण्यरूपा श्रवणादित्रयानुगतोपासना विवक्षिता, न तु सुधायामिव मननमिति, युक्ता टीका । सुधायां तु सति मननकर्तव्यत्वे इतराकर्तव्यत्वेन शास्त्रानारम्भाभावात् तत्कर्तव्यतैवारम्भहेतुरिति मननमेव जिज्ञासात्वेनोक्तमिति, मननविधिमूलमेवेदं सूत्रम्, समानविषयत्वात्, न तु विवरणमतइव श्रवणविधिमूलम्। विस्तृतं चैतदन्यत्र । यत्तु पञ्चपादीविवरणयोरुक्तं—अवयवशक्त्या ज्ञानेच्छावाचिनो जिज्ञासाशब्दस्य विचारे लक्षणया प्रयोगप्रत्यय

प्रकाशः

पदप्रयोगः । एतेन "विचारेऽपि" (पृ.१६३) इति टीकावाक्यं, विचारशब्दस्योपलक्षणतया श्रवणादेरसन्वाच्यत्वेऽपि लक्षणया श्रवणादौ प्रयोगसम्भवादिति, विचारे प्रयोगवशात्तत्र शक्तस्यापि च्छत्रिवल्लक्षणया श्रवणादौ प्रयोगसम्भवादिति च, द्वेधा योज्यमित्युक्तं भवति। कथं तर्हि प्रस्थानद्वयस्य विरोधपरिहारः, अत्र त्रितयस्यापि विवक्षितत्वोक्तेरित्यतः, सर्वशाखाधिकरणटीकानुसारेणाभिप्रायान्तरं वर्णयन्नुक्तपक्षत्रयेऽपि, प्रस्थानद्वयविरोधं सुधाशयवर्णनेन परिहरति—**यद्वेति** । 'साक्षात्' निदिध्यासनेन, 'प्रमाणद्वारा' श्रवणमननाभ्यां, 'तत्प्रावण्यं' भगवदेकनिष्ठता । **अन्यत्रेति** । न्यायामृते तृतीयपरिच्छेदे इत्यर्थः । तथा च जिज्ञासाशब्दस्य विचारमात्रार्थकत्वं प्रागुक्तं युक्तमिति भावः । जिज्ञासाशब्दस्य विचारे शक्तिं साधयितुं परोक्तं प्रतिक्षेपायानुवदति—**यच्चेति**। प्रयोगप्रत्ययान्यथानुपपत्त्या हि शक्तिकल्पनं, तौ चान्यथोपपन्नावित्यर्थः।

चन्द्रिका

योरुपपत्तौ न शक्त्यन्तरकल्पनं, अनन्यथासिद्धकार्यान्तराभावादिति, जिज्ञासाशब्दो विचारे लाक्षणिको न तु रूढ इति, तन्न, यतः—

जिज्ञासाशब्दतो हीच्छामज्ञात्वैव विजानते ।
विचारं लौकिकास्तेन तत्रायं रूढ इष्यते ॥
अन्यथा मण्डपादीनां गृहादौ स्यान्न रूढता ।
गङ्गाशब्दात्तु तीरादि तद्धीपूर्वं प्रकाशते ॥

तथाहि—जिज्ञासाशब्दात् मीमांसाशब्दादिव इच्छाप्रतीत्यभावेऽपि विचारः प्रतीयते । अन्यथा बुभुत्सापदादपि विलम्बेन तद्धीस-

प्रकाशः

प्रयोगप्रत्ययाभ्यां अन्यदेव शक्तिकल्पकं किं न स्यादित्यत आह—**अनन्यथेति** । 'यतस्तत्र रूढ इष्यते परीक्षकै रतस्तन्न' इत्यन्वयः । लौकिकाः 'इच्छामज्ञात्वैव' व्यवधानं विनैव, विचारं विजानते 'हि' यस्मात्तेनेत्यर्थः । 'मण्डपादीनां' मण्डपादिशब्दानां । श्लोकं व्याचष्टे—**तथाहीति** । "मान विचारणे" इत्यस्मात् "मान्बधदान्शान्भ्योदीर्घश्चाभ्यासस्य" इति स्वार्थएव सनो विधानादिच्छाप्रतीतिं विना विचारः प्रतीयतइति 'मीमांसाशब्दादिव' इत्युक्तम् । अत एव वृत्तौ 'मानेर्जिज्ञासायां सन्' इत्युक्तमिति भावः । एतेनानन्यधीपूर्वकविचारप्रतीतिरूपानन्यथासिद्धकार्यं शक्तिकल्पकं वदता तादृशकार्यान्तराभावादिति हेतोरसिद्धिरुक्तेति ध्येयम् । नियमेन विचारे जिज्ञासापदप्रयोगोऽप्यनन्यथासिद्धं कार्यं शक्तिकल्पकमित्यभिप्रेत्य तद्व्यतिरेकमुखेनोपपादयति—**अन्यथेति** । लक्षणया विचारप्रतीतावभिमतायामित्यर्थः । 'धर्मबुभुत्सा' 'ब्रह्मबुभुत्सा' इत्यु-

चन्द्रिका

म्भवान्नियमेन विचारे जिज्ञासापदं न प्रयुज्येत । स्वीकृतश्च त्वयापि "विचारसाध्यज्ञानेच्छा जिज्ञासाशब्दात्प्रतीयते, नोपदेशमात्रसाध्यज्ञानविषया" इति वदता, विचारप्रतीतेरिच्छाप्रतीतिपूर्वकत्वाभावः । एवं च "तद्विजिज्ञासस्व" इत्यादावस्मिंश्च सूत्रे विधौ न लक्षणा । अन्यथा लोके, मण्डपशब्दस्य मण्डपानकर्तृरूपयौगिकार्थसम्बन्धात् गृहविशेषे, प्रवीणकुशलादिशब्दानां च प्रकृष्ट-

प्रकाशः

क्तावपि बोधेच्छान्तर्णीतविचारलक्षणासम्भवेऽपि नियमेन जिज्ञासापदं न प्रयुज्येत । प्रयुज्यते च सर्वशिष्टैः रतस्तत्र रूढ इति भावः । एतेन—झडितिप्रत्ययनियतप्रयोगयोरन्यथानुपपत्तिवर्णनेन प्रयोगप्रत्ययसामान्यस्यान्यथोपपत्तिवर्णनं न प्रकृतोपयुक्तमित्युक्तं भवति। अविलम्बेन विचारप्रतीतिः परस्यापि सम्मतेत्याह—**स्वीकृतश्चेति** । ज्ञानेच्छाधीदशायामेव ज्ञानहेतुत्वेन विचारस्यापि प्रतीतेः नेच्छाज्ञानानन्तरं तद्धीरित्यर्थः । **ज्ञानविषयेति** । 'इच्छा' इत्यनुषङ्गः। एवं सति "न विधौ परश्शब्दार्थः" इत्येतदपि अनुकूलितं भवतीत्याह—**एवं चेति** । तत्र रूढत्वे सतीत्यर्थः । द्वितीयश्लोकं व्याचष्टे—**अन्यथेति** । आदिपदार्थमाह—**प्रवीणेति** । मण्डपशब्दो मण्डं पिबतीति व्युत्पत्त्या मण्डपानकर्तरि मुख्यस्सन् तदधिष्ठितत्वरूपतत्सम्बन्धाद्गृहविशेषे लाक्षणिकः स्यान्न तु रूढः । तथा प्रवीणशब्दः प्रकृष्टवीणावति मुख्यस्सन् प्रकृष्टवीणावादनसमर्थगतप्रौढत्वरूपगुणयोगान्निपुणे गौणस्स्यान्न तु रूढः । तथा कुशलशब्दोऽपि कुशान् लुनातीति कुशच्छेत्तरि मुख्यस्सन् तद्वत्तैवेद-

चन्द्रिका.

वीणावदादिगतप्रागल्भ्यरूपगुणयोगादेव निपुणे, वाजिशब्दस्य च वाजशब्दवाच्यान्नवत्सम्बन्धादेवाश्वजातौ प्रयोगसम्भवाद्रूढिर्नस्यात् । वेदे च "अपरिमितं देयम्" इत्याधानप्रकरणे श्रुतस्यापरिमितशब्दस्य परिमितान्यरूपमुख्यार्थनिष्ठानेकत्वगुणयोगादेव बहुत्ववति प्रयोगसम्भवाद्रूढिर्न स्यात् । उक्ता च रूढिः षष्ठे । न च प्रवीणादिशब्दे इष्टापत्तिः, यौगिकार्थप्रतीत्यभावेऽपि नैपुण्यप्रतीतेः ।

प्रकाशः

ग्ध्यरूपगुणयोगान्निपुणे गोणो न तु रूढः स्यादित्यर्थः । 'वीणावत्' इति मतुप्, न तु वतिः । **अन्नवदिति** । अन्नवान् पुरुषः, तत्सम्बन्धादित्यर्थः । **वेदे चेति** । षष्ठे "*अपरिमाणे शिष्टस्य सङ्ख्याप्रतिषेधस्तच्छ्रुतित्वात्" इति सप्तमपादीयदशमाधिकरणे आधाने श्रुतं "एका देया द्वे देये षड्देयाः शतं देयं सहस्रं देयं अपरिमितं देयं" इति वाक्यमुदाहृत्य "अपरिमितं देयं" इति किं पूर्वोक्तैकादिपरिमाणनिषेधः, उतायमपि सङ्ख्यान्तरविधिः इति संशये, अपरिमितशब्दस्यावयवशक्त्या परिमाणशून्यवाचित्वात्तस्य च दानायोगात्प्रकृतपरिमाणमनूद्य तस्य प्रतिषेधः क्रियत इति प्राप्ते, अवयवशक्तेर्बलीयस्या समुदायशक्त्या तस्य स्वार्थवाचकत्वात्सुज्ञातपरिमाणेष्वपि बहुत्वमात्रेणापरिमितशब्दप्रयोगदृष्ट्या तस्यालब्ध्यात्मकत्वादयमपि सन्निहितसहस्रादधिकसङ्ख्यान्तरविधिरिति सिद्धान्तितम् । अत्रानेकत्वगुणयोगनिमित्तं गौणत्वमनादृत्य रूढ्याश्रयणं कृतं, तन्न स्यादित्यर्थः । इष्टापत्तिमाशङ्क्याह—**उक्ता चेति। यौगिकार्थेति** । तथा च प्रतीतिविरोध इति भावः । उक्त-

* "अपरिमिते" इति मुद्रितपुस्तकपाठः.

चन्द्रिका

न चैवं "वैश्वदेवेन यजेत" इत्यादौ "वैश्वदेवीमामिक्षां" इति वाक्यविहितयागे यौगिकस्य वैश्वदेवशब्दस्य वैश्वदेवावैश्वदेवसमुदाये,

प्रकाशः

रार्थं व्याख्यातुं शङ्कामुत्थापयति—न चैवमिति । ज्ञानेच्छायां यौगिकस्य विचारे रूढत्वइत्यर्थः । आद्ये चतुर्थे पादे "वैश्वदेवे विकल्प इति चेत्" इति दशमाधिकरणे चिन्तितम् । चातुर्मास्येषु वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयाख्यकर्मसमुदायेषु पर्वशब्दितेषु मध्ये वैश्वदेवपर्वणि श्रूयते—"आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं सावित्रं द्वादशकपालं सारस्वतं चरुं पौष्णं चरुं मारुतं सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालम्" इति । तत्सन्निधाविदमाम्नातं "वैश्वदेवेन यजेत" इति। तत्र किं 'यजेत' इत्यनूदितानां प्रकृताग्नेयादियागानां वैश्वदेव शब्दो विश्वदेवाख्यदेवतारूपगुणविधिपरः, किं वा तेषामेव नामधेयमिति संशये, नामत्वे तस्याविधेयत्वात् विधेयान्तराभावाच्च वाक्यमिदमनर्थकं स्यादतो देवताविधिः, "आनर्थक्यप्रतिहतानां विपरीतं बलाबलम्" इत्युत्पत्तिशिष्टाभिरप्यग्न्यादिदेवताभिर्विश्वदेवदेवता विकल्प्यन्तइति प्राप्ते, वैश्वदेवशब्दस्य च्छत्रिन्यायेन लक्षणया 'यजेत' इत्यनूदितप्रकृताग्नेयादिवैश्वदेवावैश्वदेवयागसमुदायनामत्वेऽपि "प्राचीनप्रवणे वैश्वदेवेन यजेत" इत्यादिषु वैश्वदेवशब्देनाग्नेयादियागसमुदायग्रहणोपपत्त्या प्राचीनप्रवणसम्बन्धसिद्धेर्नानर्थक्यम् । अन्यथा आमिक्षायागस्यैव प्राचीनप्रवणसम्बन्धः स्यात् । तस्मान्नामधेयमिति सिद्धान्तितम् ॥ अत्रैकत्र यौगिकस्यान्यत्र लक्षणा दृष्टा । सा न

चन्द्रिका

गङ्गापदादेश्च तीरादौ लक्षणा न स्यात्, किन्तु रूढिरेव स्यादिति वाच्यम्, तत्र मुख्यार्थप्रतीतिपूर्वकमेवेतरप्रतीतेः, प्रकृते च तदभावादित्युक्तत्वात् । किञ्च त्वन्मते ज्ञानसामान्येच्छायाः क्वाप्यभावात्, अपरोक्षेच्छायां च जिज्ञासाशब्दस्यावयवशक्त्यभावात्, समुदायशक्तेः कल्प्यत्वाविशेषे, विचारे समुदायशक्तिः, अपरोक्षेच्छायां च लक्षणेत्येव किं न स्यात् । एतेन—जिज्ञासाशब्दवाच्ययेच्छया आक्षिप्तो विचारइह विधीयते इति विवरणाभिप्रेतं मतान्तरं निरस्तम् । विचाराक्षेपस्य भामतीमतनिरासावसरे निराकरिष्यमाणत्वाच्च ।

प्रकाशः

स्यादिति शङ्कार्थः । यद्यपि वैश्वदेवशब्दस्य "यद्विश्वे देवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वम्" इति वाक्यशेषाद्विश्वदेवयष्टृकत्वगुणयोगेन यौगिकत्वमपि सिद्धान्ते दर्शितम् । तथाऽपि लाक्षणिकत्वपक्षस्याप्युक्तेरेवमुक्तम् । यद्वा—तदीयदेवताधिकरणे देवतानां कर्मानधिकारोक्तेस्तद्विरुद्धार्थवादलब्धयोगापेक्षया आमिक्षायागविधिमुखलब्धलक्षणैव ज्यायसीति सैव सिद्धान्तिनोऽभिमतेति भावेनैवमुक्तिः । वेदे दोषमाशङ्क्य लोके चाशङ्कते—**गङ्गेति** । **मुख्यार्थेति** । आमिक्षायागप्रवाहादिरूपमुख्यार्थधीपूर्वमेवेतरस्याग्नेयादियागतीरादेः प्रतीतेरित्यर्थः । एतेन "तद्धीपूर्वम्" इति चतुर्थपादो व्याख्यातः । 'प्रकृते' जिज्ञासाशब्दे । **क्वापीति** । प्रागुक्तरीत्येति भावः । **अवयवशक्तीति** । ज्ञानसामान्येच्छायामेव तस्य शक्तेरिति भावः । **एतेनेति** । ज्ञानसामान्येच्छाया अभावेनापरोक्षेच्छायामवयवशक्त्यभावेन चेत्यर्थः । 'इच्छया' ज्ञानेच्छया ।

चन्द्रिका

तस्माज्जिज्ञासाशब्दो विचारे रूढएव ॥ केचित्तु—जिज्ञासाशब्दो रूढ्या लक्षणया वा विचारं नार्पयति, नाप्यर्थादाक्षिपति, किन्त्विच्छार्थ एव। तथाऽपि इच्छाया विषयवैलक्षण्याधीनत्वेन अविधेयत्वादिच्छां प्रति कर्मभूतमिष्यमाणं विचारात्मकं तर्करूपं ज्ञानं विधेयम् । यद्यपि जिज्ञासा कर्तव्येति प्रत्ययार्थभूतेच्छायाः कर्तव्यता भाति, न तु ज्ञानस्य । तथाऽपि "स्नात्वा भुञ्जीत" "प्राङ्मुखो भुञ्जीत" इत्यत्र भुजिधातोः विधिप्रत्ययान्तत्वेन भोजनस्य कर्तव्यत्वे प्रतीतेऽपि तस्य रागतः प्राप्तत्वेन, अप्राप्तयोः स्नानप्राङ्मुखत्वयोः विधेस्तात्पर्यम् । न चैतावता भुजिधातोः स्नाने रूढिर्लक्षणा वा आक्षेपकता वाऽस्ति । एवमिहापीच्छाया अविधेयत्वाद्विचारात्मकं ज्ञानं विधेयम्, न तु जिज्ञासाशब्दस्य विचारे रूढ्यादिरित्याहुः ।

प्रकाशः.

**तस्मादिति** । व्याकरणविरोधस्तु समाधास्यतइति भावः । 'रूढ्या' इति सिद्धान्तादिशा । 'लक्षणया' इति विवरणरीत्या । **नापीति** । भामतीरीत्येति भावः । **विचारात्मकमिति** । "विचारात्मकं ज्ञानमेव तात्पर्यतो विधीयते" इति, "अत्र तर्करूपं ज्ञानं विधेयं, तर्कानुगृहीतवाक्यजन्यप्रमितिरूपज्ञानं तु फलत्वान्न विधेयम्" इति च श्रुतप्रकाशोक्तेरिति भावः ॥ श्रुतप्रकाशोक्तशङ्कासमाधी अनुवदति—**यद्यपीति** । 'तस्य' भोजनस्य । **अप्राप्तयोरिति** । नियमेनाप्राप्तयोरित्यर्थः । **स्नानेति** । स्नात्वैव भुञ्जीत प्राङ्मुख एव भुञ्जीतेति स्नानप्राङ्मुखत्वयोर्नियम इत्यर्थः । उक्तं च—"स्नानप्राङ्मुखत्वनियमयोरेव विधेस्तात्पर्यम्" इति ॥

चन्द्रिका

तन्न, स्नानादिकं हि प्राधान्येनाप्रतीतत्वात् विधातुं युक्तम् । इह तु ज्ञानमिच्छां प्रति कर्मतया प्राधान्येन प्रतीतमिति कथं तद्विरोधिनी विधेयता । न हि स्वर्गकामपदेनेच्छाविषयतया प्रतीतः

प्रकाशः

दृष्टान्तवैषम्योपपादनपूर्वकं विध्ययोग्यत्वेन दूषयति—**स्नानेति** । प्राधान्यज्ञापककामपदादेरभावादिति भावः । अङ्गीकृतं च प्राधान्यं श्रीभाष्ये—"इच्छाया इप्यमाणप्रधानत्वादिप्यमाणं ज्ञानमिह विधीयते" इति । **तद्विरोधिनीति** । प्राधान्यविरोधिनीत्यर्थः । यद्यपि प्राधान्यविरोधि गुणत्वं, न तु विधेयत्वम्, तस्यानुवाद्यत्वविरोधित्वात् । तथाऽपि प्राधान्यस्यानुवाद्यत्वेन, गुणत्वस्य विधेयत्वेन सामानाधिकरण्यनियमेन प्राधान्यविधेयत्वयोः भिन्नाधिकरणतानियमात् 'विरोधिनी' इत्युक्तम् । ननु प्रवर्तनात्मा विधिरिष्टे पुरुषं प्रवर्तयति । ज्ञानं चेष्टमिति सत्यपि प्राधान्ये तदेव विधेयमित्यतोऽतिप्रसङ्गमाह—**न हीति** ।

फलांशे भावनायास्तु प्रत्ययो न विधायकः ।

इति भट्टोक्तेरिति भावः । अत एव चतुर्थाध्यायाद्यपादे "यस्मिन् प्रीतिः पुरुषस्य तच्छिष्टसार्थलक्षणाविभक्तत्वात्" इति द्वितीयाधिकरणे द्वितीयवर्णके फलांशे विधिव्यापारोस्त्युत न इति संशये, विधेयभावनाविशेषणत्वात्करणादिवत् फलांशोऽपि विधीयत इति प्राप्ते, रागतस्तत्र प्रवृत्तिसिद्धेर्न फलांशो विधीयतइत्युक्तम् । ननु 'यजेत स्वर्गकामः' इत्यत्रेष्टसाधनं मानान्तराप्राप्तं सन्निहितं च धात्वर्थं परित्यज्य, विप्रकृष्टरागप्राप्तस्वर्गविधानं न युज्यते ।

चन्द्रिका.

स्वर्गो विधेयः । किञ्च—"प्राङ्मुखो भुञ्जीत" इत्यादौ विधेय-प्राङ्मुखत्वादेराश्रयमर्पयितुं भुजिधातुस्सार्थकः, प्रकृते तु विधेय-ज्ञानं प्रतीच्छाया आश्रयत्वाद्यभावात् "तद्विजिज्ञासस्व" इति श्रुतौ सूत्रे च सन्प्रत्ययो व्यर्थः । किञ्च—जानातेः प्रमितौ स्वार-

प्रकाशः

इह तु सन्निहितत्वादिष्टत्वाच्च युज्यतइति भावेनाह—**किञ्चेति** । यद्वा—"सक्तून् जुहोति" इत्यत्र द्वितीयया प्राधान्यप्रतीतावप्य-प्राप्तत्वेन विधेयत्वं दृष्टमित्याशयेनाह—**किञ्चेति** । यत्र हि गुणः कारकतामापद्यते, स आश्रयः, यथा "दध्नेन्द्रियकामस्य जुहुयात्" इत्यत्र दधिरूपगुणस्य धात्वर्थो होमः । दध्ना होमनिर्वृत्तिद्वारे-न्द्रियनिष्पत्तेः । तथा प्राङ्मुखत्वादिकमपि भोजनरूपक्रियानिर्वृ-त्तिद्वारा आयुष्यादिफलं जनयतीति निर्वर्त्यक्रियारूपाश्रयमनुव-दितुं भुजिधातुः सार्थकः । इह तु ज्ञानेनेच्छानिर्वृत्तिद्वारा कस्य चिदजननेनाश्रयत्वायोगेन तदनुवादानुपपत्तेः 'ब्रह्मज्ञानम्' इति सूत्रविन्यासः स्यात्, 'तद्विजानीहि' इति श्रुतिविन्यासःस्यान्न तु सन्नन्तत्वेनेत्यर्थः । एतेन—"गुप्तिङ्किद्भ्यस्सन्" इत्यत्र 'सन्' इति योगविभागमाश्रित्य जिज्ञासाशब्दे सनः स्वार्थिकत्ववर्णनं प्रत्युक्तम् । 'ब्रह्मज्ञानम्' इत्येतावता पूर्त्या सनो व्यर्थत्वात् । योगविभा-गस्य क्लिष्टत्वाच्च ॥ यदपि प्रमाजनकवाक्यानुग्राहकतर्करूपं ज्ञानं विधेयमित्युक्तं, तदपि नेत्याह—**किञ्चेति** ।

चन्द्रिका

स्यात्, सन्वाच्याया इच्छायाश्च प्रमितिरूपफलविषयत्वस्य स्वरसत्वात्, न सन्नन्तजानातेस्तर्करूपज्ञानपरता। किञ्च—त्वत्पक्षे विचारकर्तव्यताया मानान्तरप्राप्तत्वात् "श्रोतव्यः" इत्यादिवाक्यवत्सूत्रमपि अनुवादकमेव स्यादिति, कथं विधायकतोक्तिः। कथं चिदप्राप्तिसम्पादने तु "श्रोतव्यः" इत्यादिरपि विधिस्स्यात्। तस्मात् जिज्ञासाशब्दस्य इच्छार्थत्वे विध्यसम्भवात् तद्विध्यर्थं स रूढचा विचारपरः। तदेतदाह - **न च श्रवणादेरसन्वाच्यतेति** (पु. १६३)।

प्रकाशः

**प्रमितिरूपेति**। इतिकर्तव्यताभूततर्कानुगृहीतवेदान्तवाक्यजन्यप्रमारूपमीमांसाफलविषयत्वस्येत्यर्थः। उपलक्षणमेतत्, ज्ञानसामान्ये शक्तस्य जानातेस्तर्कज्ञानरूपविशेषपरत्वस्यानुचितत्वादित्यपि ध्येयम्। तर्करूपज्ञानस्य विधेयतोक्तिश्चायुक्तेत्याह—**किञ्चेति**। श्रवणविधिमूलत्वात्सूत्रस्य "श्रोतव्य इत्यादिवाक्यवत्" इत्युक्तम्। ननु जिज्ञासामात्रप्राप्तावपि कर्मविचारानन्तर्यविशिष्टं न प्राप्तमित्यत आह—**कथञ्चिदिति**। "जिज्ञासाशब्दतो हीच्छाम्" इत्यादिनोक्तं टीकारूढं करोति—**तदेतदिति**।* अतद्गुणसंविज्ञानबहुव्रीहिणा विचारस्य 'असन्वाच्यता' सन्नन्तजिज्ञासापदवाच्यत्वाभाव इत्यर्थः॥ ननु नानेन वाक्येन जिज्ञासाशब्दस्य तत्र शक्तताभिप्रायोऽवगन्तुं शक्यते, विचारस्य सन्नन्तावाच्यत्वेऽपि लक्षणया विचारेऽपि "जिज्ञासितं" इत्यादिप्रयोगवत् उपपत्तेरित्युत्तरवाक्यार्थसम्भवात्। अतएव "इच्छाया अविधेयत्वात्"

* अतद्गुणसंविज्ञानबहुव्रीहिणा 'श्रवणादेः इत्येतदर्थस्य इत्यादिः।

चन्द्रिका

नन्विच्छायामपि जिज्ञासापदप्रयोगादिच्छात्र जिज्ञासाशब्दार्थः किं न स्यादित्यत्राह—**इच्छाया अविधेयत्वादिति** (पृ. १६३)। सुधायां तु "ज्ञानेच्छान्तर्णीतो विचारो जिज्ञासापदेन लक्ष्यते" इति परमतमुक्त्वा, "यदि च जिज्ञासाशब्दो मीमांसाशब्दवद्विचारएव उपसङ्ख्यायते" इति स्वमतमुक्तम् ॥ यद्वा—सुधायां पक्षद्वयेऽपि जिज्ञासाशब्दस्य विचारपरत्वाविशेषात् अन्यतरनिर्धारणस्य अप्रयोजनत्वात् पक्षद्वयोक्तिः । तदनुसारेणात्रापि 'असन्वाच्यत्वेऽपि लक्षणया विचारेऽपि तत्प्रयोगात् मुख्यार्थस्य चेच्छाया अविधेयत्वात्' इत्यपि योज्यम् ॥ भामत्यां तु—न जिज्ञासा नाम विचारः, इच्छायां सन्विधानात् ।

प्रकाशः

इति मुख्यार्थे विध्यनुपपत्तिं लक्षणाबीजमाहेत्याशङ्क्य, नेदं लक्षणाबीजोपपादनार्थं प्रवृत्तम्, येन पूर्वतनं परिहारवाक्यं लक्षणाभिप्रायेण वर्ण्येतेति भावेन प्रकारान्तरेणावतारयति—**नन्विति** । सुधाविरोधमाशङ्क्याह—**सुधायां त्विति** । एवं च तद्वाक्यद्वयं स्वपरमतत्वेन योज्यमित्युक्तं भवति । तथा च न विरोधइत्याशयः । नन्वेवं योजनायां न ज्ञापकमस्ति । अत एव प्रमेयदीपिकायां—

मा कर्म फलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।

इति वाक्यभाष्यव्याख्यावसरे "ज्ञानेच्छापूर्वको विचारो लक्ष्यते" इति विचारे लक्षणा कण्ठोक्तेत्यतआह—**यद्वेति** । **अत्रापीति** । टीकायामपीत्यर्थः। **इत्यपीति** । लक्षणापक्षपरतयाऽपीत्यर्थः ।

चन्द्रिका

न च शास्त्रप्रवृत्त्यङ्गविषयप्रयोजनसूचनेन स्वार्थपरत्वोपपत्तौ विचारलक्षणा युक्ता। एवं च मुमुक्षानन्तरं ब्रह्मजिज्ञासा भवितुं युक्तेत्येव श्रौतोऽर्थः। विचारस्त्वार्थिकोर्थः। ज्ञातुमिच्छा हि सन्दिग्धे विषये निर्णयाय भवति, निर्णयश्च विचारसाध्य इति इच्छानिमित्तेन विचाराक्षेपात्। आर्थिके चास्मिन्नर्थे कर्तव्यपदाध्याहारादित्युक्तम्। तदपि न, विचारे रूढेरुक्तत्वात्। व्याकरणस्य च साधुत्वमात्रपरत्वात्। उक्तं हि—

यत्रार्थस्य विसंवादः प्रत्यक्षेणोपलभ्यते।
स्वरसंस्कारमात्रार्था तत्र व्याकरणस्मृतिः॥ इति॥

प्रकाशः

लक्षणया विचारोऽत्र किं न स्यादित्यतआह—**न चेति**। तत्सूचनाप्रकारः प्रागेवोक्तः॥ कल्पतरूक्तं सूत्रार्थनिष्कर्षमनुवदति—**एवञ्चेति**। विचारस्यार्थिकताप्रकारं कल्पतरूक्तमेवाह—**ज्ञातुमिति**। 'इच्छामुखेन' इति भामत्युक्तमनुवदति—**इच्छानिमित्तेनेति**। इच्छारूपनिमित्तेनेत्यर्थः। **रूढेरिति**। तथा च विचारार्थकत्वेऽपि न स्वार्थपरित्याग इति भावः। तर्हि "धातोः कर्मणः समानकर्तृकादिच्छायां वा" इति इच्छार्थकसन्विधायकव्याकरणस्मृतिविरोध इत्यतआह—**व्याकरणस्येति**। 'घटं जिज्ञासते' 'घटं बुभुत्सते' इत्यादाविच्छार्थत्वेन सनः सावकाशत्वात्, अत्र चेच्छाबोधं विनैव विचारबोधेनार्थविसंवादस्य प्रागेव दर्शितत्वात्, 'ब्रह्मजिज्ञासा' 'धर्मजिज्ञासा'

चन्द्रिका

'भवति'इत्याद्यध्याहारस्य स्वतस्सिद्धत्वेऽपि अनुवादत्वप्रसङ्गात् "तद्विजिज्ञासस्व" इति श्रुत्यनुसारिणा च सूत्रेणेच्छाया अविधेयत्वेन लक्षणयाऽपि विचारस्य विधेयत्वात्। विषयाद्यभावादिच्छाभावं वदन्तं प्रति इच्छया विषयादिसूचनोक्त्ययुक्तेश्च ॥ किञ्च—एवं सति तावन्मात्रेण नैराकाङ्क्ष्यान्नार्थिकविचारकर्तव्यतापरता युक्ता, शास्त्रारम्भवत् तस्य फलत्वेनैव सिद्धेः। कथं च विचारं विना इच्छाया अनुपपत्तिः, येन विचाराक्षेपकता। न हि कारणस्य कार्यं विनाऽनुपपत्तिः। न च इच्छा विचारसामग्री, फलेच्छायां सत्यामपि साधनानुष्ठानादर्शनात्। तस्माद्ग्रामत्युक्तमयुक्तम्। तदेतदाह—

प्रकाशः

इत्यादौ साधुत्वमात्रपरत्वं व्याकरणस्येत्यर्थः। यदपि "एवं च" इत्यादिना श्रौतार्थवर्णनं, तदपि नेत्याह—**भवतीत्यादीति**। यदपि "शास्त्रप्रवृत्त्यङ्ग" इत्यादि, तदपि नेति, प्रागुक्तं स्मारयति—**विषयादीति**। यदपि "विचारस्त्वार्थिकोऽर्थः" इत्यादि, तदपि नेत्याह—**किञ्चेति**। यदपि 'इच्छया विचाराक्षेपः' इति प्रागुक्तम्, तदपि नेत्याह—**कथं चेति**। इच्छायाः विचारसाध्यज्ञानगोचरत्वेन तं प्रति कारणत्वेन कार्यरूपविचारं विना अनुपपत्त्या तदाक्षेपः, उत सामग्रीत्वेन। आद्यआह—**नहीति**। केवलदण्डे सत्यपि घटानुदयादिति भावः। द्वितीयआह—**न चेच्छेति**। भामतीमतनिरासं टीकारूढं करोति—**तदेतदिति**। एतेन—धर्मविचारानन्तरं शिवा

चन्द्रिका

**भवतीत्यादिकथनस्य वैय्यर्थ्यादित्यादिना** (पु. १६३)। एतेन कौमुद्यां यस्मादधिकारिणां ब्रह्मज्ञानेच्छा सम्पन्ना, तस्माद्ब्रह्मविचारः कर्तव्य *इत्यवान्तरवाक्ये श्रुत्येच्छापरत्वेऽपि, महावाक्ये लक्षणया विचारपर इत्युभयपरो जिज्ञासाशब्दः। अत एव विचारे लाक्षणिकोपि विषयादिसूचक इति, यदुक्तं, तदपि निरस्तम्, युगपद्वृत्तिद्वयप्रसङ्गात्। उक्तरीत्या विषयफलयोरन्यथैव सूचनसम्भवेन जिज्ञासाशब्दस्य इच्छापरत्वे मानाभावाच्च। अध्याहारसापेक्षावान्तरवाक्यभेदादिकल्पनानु-

प्रकाशः

राधनरूपधर्मानुष्ठानाविशुद्धचित्तस्य विवेकादिसम्पत्त्या ब्रह्मज्ञानेच्छा भवतीति श्रौतोऽर्थः। तदिष्यमाणं ब्रह्मज्ञानं विचारमन्तरेण न भवतीति तत्स्वरूपप्रमाणादिविचारस्तदाक्षिप्तोऽर्थः इति शिवार्कमणिदीपिकोक्तं निरस्तं बोध्यम्। विस्तरस्तु न्यायमौक्तिकमालायां बोध्यः। **एतेनेति**। भामतीमतदूषणेनेत्यर्थः। **इच्छापरत्वेपीति**। 'जिज्ञासाशब्दस्य' इति शेषः। 'अधिकारिणां ब्रह्मज्ञानेच्छा भवति' इत्यवान्तरवाक्यम्। 'यस्मात्' इत्यादि महावाक्यप्रदर्शनम्। 'अत एव' मुख्यार्थस्यापि सत्त्वादेव। **वृत्तिद्वयेति**। नन्ववान्तरवाक्ये विषयादिसूचनार्थं मुख्यवृत्तिरपि जिज्ञासाशब्दो महावाक्ये आवर्तमानो लाक्षणिकोऽपि न दुष्यतीत्यनुशयादाह—**उक्तेति**। यद्वा—अगत्या 'गङ्गायां मीनघोषौ' इत्यादाविव वृत्तिद्वयमपि सह्यमित्यत आह—**उक्तेति**। 'अस्माभिः' इति शेषः। **अध्याहारेति**। 'यस्मात्'

*'इति' इत्यस्मादनन्तरं 'अत्र' इत्यध्याहारः। 'इत्यत्र' उक्तरूपमहावाक्यघटके 'अवान्तरवाक्ये' 'अधिकारिणां ब्रह्मज्ञानेच्छा संपन्ना' इत्येवंरूपे इति टिप्पण्यभिप्रेता योजना॥

चन्द्रिका

पपत्तेश्च । तस्मात् जिज्ञासाशब्दो विचारपरो नेच्छापर इति ॥ यत्तु परैरस्य शास्त्रस्य पूर्वतन्त्रेण गतार्थत्वमाशङ्क्य, तत्र कार्यनिष्ठो वेदभागो विचारितः, इह तु वस्तुतत्त्वनिष्ठो विचार्यतइति अगतार्थत्वमुक्तम्, तन्न, इहातत्त्वभूतोपास्यसविशेषब्रह्मविचारस्योपासनापादे तद्विधिविचारस्य चायोगात् । न चोपासना मन्मतइव त्वन्मतेऽपि मोक्षसाधनम्, येन फलसाधनादियुक्तब्रह्मविचारप्रतिज्ञानात्तद्विचारस्सङ्गच्छेत । त्वन्मते हि उपासनाया मानसत्वेन

प्रकाशः

इत्यध्याहारेत्यर्थः । एवं सूत्रावयवपदानामर्थः सविस्तरं निरूपितः। सूत्रतात्पर्यं च निरूपितम् ॥ तत्र केचिदाहुः—"अथातोधर्मजिज्ञासा" इत्यनेन सकलवेदार्थविचारस्योक्तत्वाद्धर्मपदस्य वेदार्थोपलक्षकत्वाद्ब्रह्मज्ञानस्य चोदनालक्षणत्वेन "चोदनालक्षणोऽर्थोधर्मः" इति धर्मरूपत्वाच्च, सर्ववेदस्य तत्र विचारितत्वान्नेदमारम्भणीयमिति । अस्याश्शङ्कायाः स्वमतेन परिहारं चिकीर्षुः परोक्तं निरस्यति—**यत्तु परैरिति** । 'कार्यनिष्ठः' कर्मपरः । **वस्तुतत्त्वेति** । तात्त्विकवस्तुरूपब्रह्मपर इत्यर्थः । **सविशेषेति** । आद्ये अन्तरधिकरणादौ द्वितीयपादे च सविशेषब्रह्मणोऽतात्त्विकस्य विचारादित्यर्थः। ननु फलसाधनादियुक्तब्रह्मणो विचारस्य प्रतिज्ञातत्वात्तद्विचारो युक्त इत्याशङ्क्याह—**न चेति** । ननूपासनायाः मनोवृत्तित्वेन विद्यानिमत्त्वादिह विचारो युक्त इत्यत आह—**त्वन्मते हीति** ।

चन्द्रिका

विद्यासाम्येपि अनित्यफलत्वात्, हेयत्वाच्च, तद्वाक्यानामतत्त्वावेदकत्वात्, उद्गीथाद्युपासनानां कर्माश्रितत्वाच्च, "समुद्रं मनसा ध्यायीत" इत्यादिवाक्यविहितसमुद्रध्यानादिवत् कर्मकाण्डएवोपासनाया विचारो युक्तः, निर्विशेषज्ञानार्थत्वादुपासनाया इह विचारे च, यागादिनित्यकर्मणामपि तदर्थत्वात्, मानससङ्कल्परूपतयोपासनावत् विद्यासाम्याच्च, तद्विचारोऽपि इहैव स्यात्। तस्मात्सर्वस्यापि वेदस्य ब्रह्मपरत्वात् सर्वोपीहैव विचार्यः, कर्मदेवमीमांसयोस्तु वेदैक

प्रकाशः

**अनित्येति**। तथा च नित्यफलसाधनविचारे तस्या अनिवेश्यतेति भावः। **अतत्त्वेति**। नामादौ ब्रह्मत्वादेरतात्त्विकत्वादिति भावः। ननूपासनावाक्यस्य तत्कर्तव्यतामात्रपरत्वेन स्वार्थपरत्वाभावान्नैवमिति चेन्न, तत्कर्तव्यताया अपि तथात्वात्। नहि तत्त्वनिष्ठवाक्यविचारे तेषां विचारो युक्त इति भावः। **उद्गीथेति**। "ओमित्येतदक्षरमुद्गीथमुपासीत" इत्यादीनां सामभक्तित्वादिति भावः। 'तदर्थत्वात्' ज्ञानार्थत्वात्। "कर्मणा ज्ञानमातनोति" इत्यादेरिति भावः। कथं तर्हि गतार्थतानिरास इत्यतः स्वयमाह—**तस्मादिति**।

शब्दजातस्य सर्वस्य यत्प्रमाणश्च निर्णयः।

इति स्मृतेरिति भावः। उक्तं च सुधायामेवमेव समाधानम् "स एव सर्ववेदार्थः" इत्यादिव्याख्यावसरे। ननुच यदि ब्रह्म प्रसिद्धं न जिज्ञासितव्यम्, अथाप्रसिद्धं तर्हि न जिज्ञासितुं शक्यमित्याशङ्क्य, जिज्ञासाधर्मिणि तदुपयुक्तसामान्यप्रसिद्धिविशेषविप्रतिपत्ती स्वमतेन

चन्द्रिका

देशावान्तरतात्पर्यविषयकमेदेवताविचार इति ॥ यदपि परैः—ब्रह्मणो जिज्ञास्यत्वार्थमेव प्रत्यगर्थेऽहमस्मीति प्रत्यक्त्वरूपेण सामान्येन प्रतिपत्तिः, चार्वाकादीनामहमर्थे देहेन्द्रियमनश्शून्यब्रह्मत्वादिविप्रतिपत्तेः विशेषविप्रतिपत्तिश्चेत्युक्तम्, तद्वचधिकरणम् । प्रत्यगर्थ एव ब्रह्मेति चेत्, अस्तु तावत्,

प्रकाशः

दर्शयिष्यन् परोक्ते अनूद्य निरस्यति–**यदपीति** । देहमात्रं चैतन्यविशिष्टं अहमर्थ इति चार्वाकाः । इन्द्रियाण्येवेत्यपरे । मन एवेत्यन्ये । शून्यमेवेत्येके । ब्रह्मैवेति कश्चित् । एवं बहूनां नानात्वेन विप्रतिपत्तेरित्यर्थः । **तद्वचधिकरणमिति** । अहमर्थे त्वंपदार्थे सामान्यप्रतिपत्तिविशेषविप्रतिपत्त्योः सत्त्वेऽपि, जिज्ञास्ये ब्रह्मणि तत्पदार्थे तयोरप्रदर्शनादिति भावः । नन्वतएव परभाष्ये "आत्मा च ब्रह्म" इत्युक्तमित्याशङ्क्ते—**प्रत्यगर्थ एवेति** । उक्तं च भामत्यां—"तत्पदार्थस्य शब्दतः त्वंपदार्थस्य प्रत्यक्षतः प्रसिद्धेः त्वंपदार्थस्य तत्पदार्थब्रह्मभावावगमः" इति । प्रत्यगर्थस्य ब्रह्माभेदो यद्यपि सौत्रब्रह्मपदेनैव निरस्तः । तथाऽप्यङ्गीकृत्य दूषयति—**अस्त्विति** । तत्त्वंपदार्थयोः "तत्त्वमसि" इत्यनेन अभेदावगमो हि त्रेधा । तत्पदार्थं बिम्बभूतं ब्रह्मोद्दिश्य त्वंपदार्थप्रत्यगर्थाभेदविधानेन वा, त्वंपदार्थमुद्दिश्य तत्पदार्थाभेदविधानेन वा, उभयत्र विरुद्धांशत्यागेनैक्यमात्रविधानेन वा । तत्राद्ये जिज्ञासाधर्मी तत्पदार्थो ब्रह्मैव । तस्य प्रत्यगभिन्नत्वेन जिज्ञासा ब्रह्मजिज्ञासा ।

चन्द्रिका

तथाऽपि न तावद्बिम्बं ब्रह्म जिज्ञासाधर्मि, प्रतिबिम्बे तु सामान्यप्रतिपत्त्यादीति युक्तम्, प्रतिबिम्बमात्रे विप्रतिपत्त्या बिम्बे जिज्ञासाऽदर्शनेन ब्रह्मोद्दिश्य प्रत्यगभेदादिविधानाय ब्रह्मण्येव तयोर्वक्तव्यत्वात् । नापि देहत्वादिना विप्रतिपन्नः प्रतिबिम्बः प्रत्यगर्थ एव जिज्ञासाधर्मी, प्रतीचो ब्रह्मत्वेन जिज्ञासा च ब्रह्मजिज्ञासेति युक्तम्, लोके निश्चितेन धर्मिणेवानिश्चितेन प्रकारेण विशिष्य विचारपदाप्रयोगेण, सूत्रे अश्रुतप्रत्यक्पदकल्पनापातात् । 'धर्मजिज्ञासा' इत्यादाविव श्रुतस्य ब्रह्मपदस्य कस्य कथं विचार इति प्रथमाकाङ्क्षितप्रधानधर्मिपरत्वसम्भवे, तत्त्यागेन तद्विपरीतप्रकारपरत्वायोगेन श्रुतहानापाताच्च ।

प्रकाशः

द्वितीये प्रत्यगर्थो जिज्ञासाधर्मी । तस्य ब्रह्मत्वेन जिज्ञासा ब्रह्मजिज्ञासा । तृतीये बिम्बमेव जिज्ञासाधर्मि । विशेष्यमेकमिति * ताज्जिज्ञासा ब्रह्मजिज्ञासेति पक्षत्रयं हृदि निधायाद्यं निरस्यति— **तथापीति** । अभेदाङ्गीकारेऽपि वैयधिकरण्यमेवेत्यर्थः । 'तयोः' सामान्यप्रसिद्धिविशेषविप्रतिपत्त्योः । द्वितीयमनूद्य निरस्यति— **नापीति** । 'प्रतीचः' प्रत्यक्चैतन्यस्य । जिज्ञासाधर्मित्वेन निश्चितत्वात्, 'पुरोवृत्तिजिज्ञासा' 'धर्मजिज्ञासा' इत्यादिवत् 'प्रत्यग्जिज्ञासा' इत्येव सूत्रं स्यात्, न तु 'ब्रह्मजिज्ञासा' इति, ब्रह्मत्वप्रकारस्यानिश्चितत्वादित्यर्थः । **श्रुतेति** । प्रकारार्थकस्य ब्रह्मपदस्य हानिस्स्यादित्यर्थः । किं चास्मिन् पक्षे प्रत्यगर्थं विशिष्टमुद्दिश्य विशिष्ट-

* "निर्विशेषमेकमिति" इतिक्वचित्पाठः ।

चन्द्रिका

विरुद्धांशत्यागेन मुखमात्रस्येव चिन्मात्रस्यैवाभेदस्वीकारेण विशिष्टयोर्बिम्बप्रतिबिम्बयोरभेदाभावेन ब्रह्माभेदविधानाय तस्योद्देश्यत्वासम्भवाच्च । किञ्च—धर्मिण्यतदारोपनिवृत्त्यर्थत्वात् लक्षणस्य उत्तरसूत्रे प्रत्यगर्थ एव ब्रह्मत्वेन लक्षणीयः स्यात् । न हि वस्तुतः

प्रकाशः

ब्रह्माभेदो विधेयः । न चैवं युक्तम्, चिन्मात्रैक्याङ्गीकारादित्याह—**विरुद्धेति** । 'तस्य' प्रत्यगर्थस्य । तथा च प्रत्यगर्थे विशेष्यभूतं चिन्मात्रमेवोद्देश्यमिति तत्रैव सामान्यप्रसिद्ध्यादिकं दर्शनीयम् न तु विशिष्टइति, तत्र तत्प्रदर्शनं व्यधिकरणमिति भावः । अयं च दोषः आद्यपक्षेपि समः । तत्रापि विशिष्टस्य ब्रह्मणः उद्देश्यत्वासम्भवस्य वक्तुं शक्यत्वात् । तथा च 'ब्रह्माभेद' इत्युपलक्षणम् । 'प्रत्यगभेदविधानाय' इत्यपि ग्राह्यम् । 'तस्य' इत्यस्य ब्रह्मण इत्यर्थः । तथा च तच्छब्देन तस्य प्रसिद्ध्युपदर्शनं व्यधिकरणमित्यपि ध्येयम् ॥ एवं द्वितीयपक्षे ब्रह्मपदास्वारस्यमुक्त्वा द्वितीयसूत्रास्वारस्यमाह—**किं चेति** । जिज्ञास्येऽतदाकारारोपनिवृत्यर्थं लक्षणं, प्रत्यगर्थश्च जिज्ञास्य इति तत्राब्रह्मत्वारोपनिवृत्तये 'प्रत्यग्ब्रह्म' इति लक्षणसूत्रं स्यान्न तु जन्मादिकारणत्वेन ब्रह्म लक्षणीयम्, तस्य व्यधिकरणत्वादित्यर्थः । ननु प्रत्यगर्थस्यैव वस्तुतो ब्रह्मत्वाद्ब्रह्मलक्षणोक्त्या प्रतीच्यतदाकारनिवृत्तिर्ज्ञायतइत्याशङ्क्य, वैय्यधिकरण्यमेव **दृष्टान्तेनाह—नहीति** । तथा च 'प्रतीचि' प्रत्यगर्थे, अहंत्वा-

चन्द्रिका

पुरुषे इदंत्वादिना ज्ञायमाने स्थाणुत्वाद्यारोपः 'करचरणादिमान् पुरुषः' इति पुरुषलक्षणोक्त्या निवर्तते, किन्तु 'अयं पुरुषः' इत्याद्युक्त्या । न च जिज्ञासुना प्रतीचो ब्रह्मत्वं निश्चितम्, येन ब्रह्मणि लक्षिते प्रतीचि लक्षणविरोध्याकारो मिथ्येति ज्ञायेत । नापि लक्षणं प्रतीचोऽसाधारणधर्मतया तेन निश्चितम्, येन ब्रह्मणि तत्कथनमुखेन ब्रह्माभेदो ज्ञाप्येत । त्वत्पक्षेऽपि "शारीरश्चोभयेऽपि हि भेदेनैनमधीयते" "प्राणभृच्च" "अधिकं तु भेदनिर्देशात्" इत्यादौ जन्मादिसूत्रोक्तलक्षणस्य जीवे निषेधात् । अत एव—उभयानुगतचिन्मात्रे तत्त्वंपदलक्ष्ये विप्रतिपत्तिः, जिज्ञासाधर्मि तु बिम्बं ब्रह्म

प्रकाशः

दिना ज्ञायमाने देहेन्द्रियाद्यात्मकत्वारोपो 'जगत्कारणं ब्रह्म' इत्याद्युक्त्या न निवर्तते, किन्तु 'प्रत्यग्ब्रह्म' इत्युक्त्येति भावः । ब्रह्मणो लक्षणं प्रतीचि अतदारोपनिवर्तकं नेत्येतदेव स्फुटयति—**न चेति** । 'जिज्ञासुना' इति हेतुगर्भं, अन्यथा जिज्ञासाऽयुक्तेरिति भावः । 'तेन' जिज्ञासुना । **ब्रह्मणीति** । प्रत्यगसाधारणधर्मतया ज्ञातस्य ब्रह्मणि कथने प्रत्यग्ब्रह्मणोरैक्यं ज्ञाप्येत इत्यर्थः । प्रत्यगसाधारणधर्मत्वेन अनिश्चितत्वे हेतुमाह—**त्वत्पक्षेऽपीति** । एवं द्वितीयपक्षं निरस्य, इदानीं तत्त्वंपदलक्ष्यचिन्मात्रैक्यमिति तृतीयं निराह—**अतएवेति** । चिन्मात्रएव विप्रतिपत्त्या तत्रैक्यविधानं युक्तमिति भावः । **बिम्बं ब्रह्मेति** । तथा च 'ब्रह्मजिज्ञासा' इति व्यप-

चन्द्रिका

चिन्मात्रमेवेति प्रत्युक्तम् । विशेष्यमात्रे विप्रतिपत्त्या विशिष्टधर्मिकविचारादर्शनात् । विशिष्टस्य मुमुक्षुभिरविचार्यत्वाच्च । चिन्मात्रे देहत्वादिविप्रतिपत्तेरभावाच्च । सौत्रब्रह्मशब्दास्वारस्याच्च ।

प्रकाशः

देशः लक्षणसूत्रं च युज्यतइति भावः । सामानाधिकरण्यायाह— **चिन्मात्रमेवेति** । 'अत एव' इत्युक्तं वैयधिकरण्यं व्यनक्ति—**विशेष्येति** । **विशिष्टस्येति** । तस्य मिथ्यात्वादिति भावः । निर्विशेषज्ञानार्थत्वेन विशिष्टविचारस्त्वन्तरधिकरणे निरसिष्यत इति भावः। **चिन्मात्र इति** । तदीयभाष्ये त्वंपदार्थे विशिष्टेऽहमर्थएव "देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृताजनाः" इत्यादिना विप्रतिपत्त्युक्तेः, तत्पदार्थे च विशिष्टएव "अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिः इति केचित्" इत्यादिना विप्रतिपत्त्युक्तेः चिन्मात्रेऽभावादित्यर्थः । एतेन चिन्मात्रमेव जिज्ञासाधर्मीति पक्षोऽपि प्रत्युक्तो ध्येयः । **ब्रह्मशब्देति** । चिन्मात्रमेव ब्रह्मेत्यङ्गीकारेण बिम्बे विशिष्टे जिज्ञासाधर्मिणि ब्रह्मशब्दो न स्वरस इत्यर्थः । ननु 'अस्ति तावद्ब्रह्म नित्यशुद्ध' इत्यादिपरभाष्ये भामत्यामागमादापाततो ब्रह्मणि सामान्यप्रसिद्ध्युक्तेः "अस्ति तद्व्यतिरिक्तः" इत्यादिभाष्यव्याख्यावसरे च "तत्पदार्थे विप्रतिपत्तिमाह" इत्यवतारिकापूर्वं जीवाभिन्नत्वेन विप्रतिपत्त्युक्तेर्जिज्ञासाधर्मिणि ब्रह्मण्येव सामान्यप्रसिद्धिविशेषविप्रतिपत्ती स्त इति न कोऽपि दोष इत्याशङ्क्य

चन्द्रिका

अथ जिज्ञासाधर्मिणि ब्रह्मण्येव प्रतीचोन्यत्रेति विप्रतिपत्तेः न वैय्यधिकरण्यम्, तर्हि भवदीयभाष्ये—इह सूत्रे प्रतीचि देहत्वादिवि-प्रतिपत्त्युक्तिः, उत्तरसूत्रे जीवाद्वैदकस्य लक्षणस्योक्तिश्च अयुक्ता ।

प्रकाशः

निराह—**अथेति** । 'न वैयधिकरण्यं' इत्युपलक्षणम् । 'ब्रह्मजिज्ञासा' इति व्यपदेशश्च युक्त इति ध्येयम् । **तर्हीति** । नन्विह सूत्रे प्रतीचि देहत्वादिविप्रतिपत्त्युक्तिर्न युक्ता, तस्याः जिज्ञासाधर्मिणि ब्रह्मणि विप्रतिपत्तिसूचनएव तात्पर्यात् । उक्तं च भामत्याम्—"त्वं पदार्थविप्रतिपत्तिद्वारा तत्पदार्थे विप्रतिपत्तिं सूचयित्वा" इति । तथा च न दोष इति चेत्, अयमाशयः—जीवभेदाभेदविप्रतिपत्तौ त्वन्मते ब्रह्मविचारपरे द्वितीयसूत्रे जीवाभेदस्यैव वाच्यत्वेन भेदक-लक्षणोक्तिरयुक्तेति तत्कथनं व्यधिकरणम् । अतएवोक्तम्—**उत्त-रसूत्रइत्यादि** । किं च ब्रह्मणि सामान्यप्रसिद्धिः किं विशिष्टे, उत निर्विशेषे । नाद्यः, तस्य प्रत्यगभेदाभावेनोद्देश्यत्वाभावात्तदु-द्दिश्य जीवाभेदविधानायोगात् । मुमुक्षुभिरजिज्ञास्यत्वाच्च । भाष्ये "नित्यशुद्धबुद्धमुक्तस्वभावम्" इत्यनौपाधिके ब्रह्मणि प्रसिद्धिप्र-दर्शनायुक्तेश्च । न द्वितीयः, तत्र विप्रतिपत्त्यभावात् । त्वयाऽपि विशिष्टएव तत्प्रदर्शनाच्च । "सर्वज्ञं सर्वशक्तिसमन्वितं" इति वि-शिष्टे प्रसिद्धुक्तचयुक्तेश्च । तस्यावेद्यत्वेन शब्दात्प्रतीत्ययोगाच्च । एतेन—वेदादेवापाततो ब्रह्म सविशेषं क्वचिन्निर्विशेषं च प्रतीत-

चन्द्रिका

एतेनभास्करीयं—जगत्कारणे प्रधानत्वादिविप्रतिपत्तिप्रदर्शनं निरस्तम्, आद्यसूत्रे कारणपदस्य उत्तरसूत्रे तल्लक्षणस्य च कर्तव्यत्वप्रसङ्गात् । किञ्च—

ज्ञातं सामान्यतोऽज्ञातं विशेषेण विचार्यते ।
ज्ञाताज्ञातविभागस्तु निर्विशेषे न युज्यते ॥

उक्तं चानुव्याख्याने—

इदमित्थमिति ज्ञानं जिज्ञासायाः प्रयोजनम् । इति ॥

प्रकाशः

मिति विरुद्धवाक्यद्वयाद्विप्रतिपत्तिः । अत एव भाष्ये द्विविधब्रह्मरूपप्रदर्शनमिति निरस्तम् । भाष्ये 'केचित्' इति वादिविप्रतिपत्त्युक्तचयोगादिति । एतेन एतदधिकरणान्तर्गतं "एतेनैतदपि परास्तम्" इत्यादिना "नैवं सूत्रकार आहेत्यलम्" इत्यन्तं सामान्यप्रसिद्धचादिप्रदर्शकपरभाष्यखण्डनपरं सुधावाक्यं विवृतं भवति । **आद्यसूत्रइति** । 'कारणजिज्ञासा' इत्येव स्यात्, द्वितीयसूत्रेऽपि जिज्ञास्यस्य कारणस्यैव लक्षणं स्यात्, न तु ब्रह्मण इत्यर्थः । विप्रतिपत्त्यभावाच्चिन्मात्रे न जिज्ञासेत्युक्तम्, इदानीं सामान्यज्ञानविशेषाज्ञानाभ्यां जिज्ञासा । न च ते निर्धर्मकेस्त इत्याह—**किञ्चेति**। 'विशेषणाज्ञातं' इत्यन्वयः । **इदमित्थमिति** । इदमिति सामान्यज्ञानमित्थमिति विशेषज्ञानं वदता "ज्ञातं सामान्यतः" इत्यादि सूचितमिति भावः । एवं परमते जिज्ञासोपयुक्तं सामान्यप्रसिद्धचादि

"नामानि विश्वाऽभि न सन्ति लोके यदाविरासीदनृतस्य सर्वम्। नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति" इति भाल्लवेयश्रुतिः।

तत्त्वप्रकाशिका

तरेषां मुख्यब्रह्मत्वप्राप्तिरिति चेत्, तत्प्रापकशब्दानां विष्णावेव मुख्यत्वादित्यभिप्रायेण तत्र श्रुतिमाह—**नामानीति**। सर्वाणि नामानि रुद्रादिजगति मुख्यतो न सन्ति, यतो

चन्द्रिका

तस्मद्भेदान्तादिना आपातप्रतीते ब्रह्मणि सगुणनिर्गुणाल्पगुणत्वादिना विप्रतिपत्तेः जिज्ञास्यत्वमिति। तदुक्तमनुव्याख्याने—

तस्माद्ब्रह्मैव जिज्ञास्यमस्मदीयं गुणार्णवम्।
वासुदेवाख्यमद्वन्द्वं परं ब्रह्माखिलोत्तमम्॥ इति॥

टीकाशेषाक्षरार्थस्तु—"नामानि सर्वाणि" इति श्रुतौ 'अनृतस्य'

प्रकाशः

निरस्य स्वमतेन तदाह—**तस्मादिति**। **आपातेति**। विचारात्प्रागेव सिद्धार्थबोधकोपनिषद्वाक्यादिना प्रतीतइत्यर्थः। **तदुक्तमिति**। ईक्षत्यधिकरणइति ध्येयम्। 'गुणार्णवं' इत्युक्त्या सगुणत्वादिविप्रतिपत्तिः, 'वासुदेवं' इत्युक्त्या शिवत्वादिविप्रतिपत्तिः सूचिता। एवं पदान्तरैरपि द्रष्टव्यम्। दुर्गमानि कानिचिद्वाक्यानि व्यनक्ति—**टीकाशेषाक्षरार्थस्त्विति**। व्याख्यातावशिष्टाशेषेत्यर्थः। शेषाक्षरार्थ इति वा।* **नामानीति**। 'विश्वा' इत्यस्यार्थानुवादः—**सर्वाणीति**॥

* इदं वाक्यं केषु चित् कोशेषु नोपलभ्यते।

**"यो देवानां नामधा एक एव तं संप्रश्नं भुवना यन्त्यन्या" इत्येवशब्दान्नान्येषां सर्वनामता । "अजस्य नाभावध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुः" इति हि विष्णोर्लिङ्गम् । न च प्रसिद्धार्थं विनाऽन्योऽर्थो युज्यते ।**

तत्त्वप्रकाशिका

विष्णुतरस्य जगतः सर्वं नामप्रवृत्तिनिमित्तमुत्पत्तिमत् । तर्हि कस्मिंस्तानि मुख्यतः, सर्वाणि नामानि यं मुख्यतो वाचकत्वेन विशन्ति, तमपरिच्छिन्नप्रवृत्तिनिमित्तं विष्णुं वदन्ति विद्वांस इत्यर्थः । यथा सर्वनामवत्त्वेन विष्णुरेवात्रोक्तं ब्रह्म, तथा रुद्रादीनामपि विष्णुादिशब्दवाच्यत्वेन तएवात्रोक्तं ब्रह्म किं न स्युरित्यत आह—**य इति** । 'नामधाः' नामधारकः । यच्छब्देन विष्णुरिति कुतः, अस्य सूक्तस्यान्यपरत्वादित्यत आह—**अजस्येति** । पद्मनाभत्वलिङ्गादयं विष्णुरेव, उत्सर्गतो लिङ्गाच्छ्रुतेः प्राबल्येऽपि निरवकाशलिङ्गेन सावकाशविश्वकर्मश्रुतेः बाधसम्भवादिति भावः । नाभ्यर्पितं पद्मादन्यत् किं न स्यादित्यत आह—**न चेति** । नाभ्यर्पितो विश्वाधारः पदार्थः प्रसिद्धपद्माख्यार्थं विनाऽन्यो न युज्यते, प्रसिद्धिबाधादित्यर्थः । विश्वकर्मश्रुतिवत् पद्मनाभत्वलिङ्गं चान्यस्यापि किं न स्यादित्यतो वाऽऽह—**न चेति** । पद्मनाभत्वेन प्रसिद्धपदार्थं भगवन्तं विनाऽन्यः पद्मनाभो न युज्यते, प्रसिद्धिबाधादित्यर्थः । न केवलमेतच्छ्रु-

चन्द्रिका

इत्यनेन ऋतशब्दवाच्यात् विष्णोः अन्यद्विवक्षितमित्याह—**विष्णुतरस्येति** ।

**अजस्य नाभाविति यस्य नाभेरभूच्छ्रुतेः पुष्करं लोकसारम्।**
**तस्मै नमो व्यस्तससस्तविश्वविभूतये विष्णवे लोककर्त्रे॥**

**इति स्कान्दे। "परो दिवा पर एना पृथिव्या" इति समाख्याश्रुतौ —"यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्"**

तत्त्वप्रकाशिका

त्युक्तं पद्मं पद्मनाभश्च हरिः प्रसिद्धत्वैव, किन्तु तद्वाचित्वेन स्मृतिगृहीतत्वाच्चेत्याह—**अजस्येति**। 'अजस्य नाभाविति श्रुतेः' इत्यन्वयः। क्वचिद्व्यस्ताः क्वचित्समस्ताः विश्वविभूतयो येनासौ तथोक्तः। पूर्वार्धे विष्णुवाचकपदाभावादुत्तरार्धोदाहरणम्। यदा निरवकाशत्वेन लिङ्गमात्रं श्रुतिबाधकं, तदा किं वाच्यं समाख्यायुक्तं तदिति भावेनाह—**पर इति**। "परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति" इत्यनेन विश्वकर्मसूक्तोक्तेन सूक्तान्तरे "परो दिवा पर एना पृथिव्यैतावती महिना सम्बभूव" इति समाख्यानाच्च विष्णुरेव विश्वकर्मसूक्तोक्तः। न च तत्रापि विष्णुः कुत इति शङ्क्यम्, यतः समाख्याश्रुतौ द्यावापृथिवीपरं "मम योनिरप्स्वा१न्तः समुद्रे" इति लक्ष्मीः स्वकारणत्वेन समुद्रस्थितत्वेन चाह। न चास्तु लक्ष्मीकारणं ब्रह्माद्यन्यतममिति वाच्यम्, "यं कामये" इति लक्ष्म्या ब्रह्मादीनां स्वाधीनत्वोक्तेरित्यर्थः। 'दिवा'

चन्द्रिका

**लक्ष्म्या ब्रह्मादीनां स्वाधीनत्वोक्तेरिति**। अस्य सूक्तस्याम्भ्रणीदेवताकत्वात् अम्भ्रण्याश्च लक्ष्मीमूर्तित्वादिति भावः।

इत्युक्त्वा, "मम योनिरप्स्वा१न्तस्समुद्रे" इत्याह। 'उग्रः' रुद्रः, समुद्रेऽन्तर्नारायणः, प्रसिद्धत्वात्सूचितत्वाच्चास्यार्थस्य। न चाविरोधे प्रसिद्धः परित्यज्यते।

तत्त्वप्रकाशिका

इत्यादितृतीया पञ्चम्यर्थे। स विष्णुर्द्यावाप्राथवीपरोऽहं तु महिम्ना 'एतावती' परिमिता बभूवेत्यर्थः। यमुग्रं ब्रह्माणं ऋषिं सुमेधसं वा कर्तुं कामये, तंतमुग्रं ब्रह्माणं ऋषिं सुमेधसं वा करोमीत्यर्थः। नन्वत्र समुद्रस्थो रुद्रः किं न स्यात्, "तप्यमानाय सलिले" इति भारतोक्तेः। न च रमाधीनत्वोक्तिविरोधः, उग्रशब्देन कस्य चित्क्रूरस्यैव ग्रहणसम्भवादित्यत आह—उग्र इति। अत्र 'उग्रः' इति रुद्र एव भवेत्, "उग्रः कपर्दी श्रीकण्ठः" इति तस्यैवोग्रत्वेन प्रसिद्धत्वात्। उग्रशब्देन रुद्रशब्दार्थस्य सूचितत्वाच्च, 'उग्रो रुद्रो रौद्रः' इत्येकार्थत्वात्। तथा समुद्रस्थो नारायण एव भवेत्, समुद्रशयनत्वेन तस्यैव "महोदधिशयोऽन्तकः" इत्यादौ प्रसिद्धत्वात्। तथा समुद्रान्तस्थत्वकथनेन नारायणशब्दार्थस्य सूचितत्वाच्च, "आपो नाराः" इति स्मृतेरित्यर्थः। नन्वत्र प्रसिद्ध्यादिसद्भावेऽपि तत्परित्यागेनान्यस्वीकारे किं बाधकमित्यत आह—**न चेति**। प्रसिद्धार्थस्य विरोधैकापोद्यत्वात्तदभावे तत्परित्यागो न युक्तः, प्रसिद्धिबाधादित्यर्थः। अत्रोग्रपदेन

उक्तन्यायेन च श्रुतय एतमेव वदन्ति।

वेदे रामायणे चैव पुराणे भारते तथा।
आदावन्ते च मध्ये च विष्णुस्सर्वत्र गीयते॥

इति हरिवंशेषु। न चेतरग्रन्थविरोधः।

एष मोहं सृजाम्याशु यो जनान् मोहयिष्यति।
त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय॥
अतथ्यानि वितथ्यानि दर्शयस्व महाभुज।

तत्त्वप्रकाशिका

रुद्रग्रहणे "विश्वाधिको रुद्रः" इत्यादिश्रुतिविरोधात्तत्परित्याग-इत्यत आह—**उक्तेति**। "नामानि विश्वा" इत्याद्युक्तन्यायेन व-क्ष्यमाणन्यायैश्च विश्वाधिकादिश्रुतीनां विष्णुपरतया न बाधकत्वमि-ति भावः। श्रुतीनां विष्णुवाचकत्वे स्मृतिं चाह—**वेदइति**। एतद्वचनस्य हरिवंशत्रयगतत्वसूचनाय बहुवचनम्। तथाप्यस्ति पा-शुपतादिशास्त्रविरोधः, तत्र रुद्रादीनां सर्वोत्तमत्वाद्युक्तेरित्यत आह—**न चेति**। कुतो न विरोध इति चेत्, तेषां मोहार्थं कृतत्वादि-ति भावेनाह—**एष इति**। मुह्यतेऽनेन जन इति 'मोहः' नटनं वञ्चनं वा। त्वं च सृज, दधीच्यादिभिः कारय च। अविद्यमानं

चन्द्रिका

**हरिवंशत्रयेति**। हरिवंशभागत्रयं विवक्षितम्। **नटनं वञ्चनं वेति**। विद्यमानाकाराच्छादनेनाविद्यमानाकारान्तरप्रदर्शनं 'नट-नम्'। 'वञ्चनं' त्वविद्यमानकथनम्। क्वाप्यविद्यमानं लिङ्गमूलान्वेषणादि-

प्रकाशं कुरु चात्मानं अप्रकाशं च मां कुरु ॥

इति वाराहवचनात् । शैवे च स्कांदे—

श्वपचादपि कष्टत्वं ब्रह्मेशानादयः सुराः ।
तदैवाच्युत यान्त्येव यदैव त्वं पराङ्मुखः ॥ इति ।

ब्राह्मे च ब्रह्मवैवर्ते—

नाहं न च शिवोऽन्ये च तच्छक्त्येकांशभागिनः ।
बालः क्रीडनकैर्यद्वत् क्रीडतेऽस्माभिरच्युतः ॥ इति ।

न च वैष्णवेषु तथा ।

---

तत्त्वप्रकाशिका

'अतथ्यं' । व्यधिकरणत्वेन विद्यमानं 'वितथ्यं' । आत्मानं मां च प्रति । 'प्रकाशं' प्रसिद्धि । स्कान्दादिपुराणानां शिवादिविषयत्वात्तद्विरोधः स्यादित्यत आह—शैवे चेति । 'ब्राह्मे' ब्रह्मविषये । 'क्रीडनकैः' क्रीडासाधनैरस्माभिः करणैः । तेषां शैवादित्वेऽपि न विरोधित्वं, तत्राऽपि विष्णूत्तमत्वादेरेवोक्ततया स्वविरोधेन तत्राप्रामाण्यात् । न च विपरीतं किं न स्यादिति वाच्यम्, शिवाद्युत्कर्षादेः शैवादिपुराणेष्वसाधारण्येन प्राप्तत्वादिति भावः । तथाऽपि विष्णूत्तमत्वरुद्राधमत्वयोर्वैष्णवग्रन्थविरोधोऽस्तीत्यत आह—न चेति । 'तथा' सर्वोत्तमत्वादिविरोधः ।

चन्द्रिका

कमतथ्यम् । विष्ण्वादौ विद्यमानं रुद्रादिनिष्ठतयोच्यमानं स्वातन्त्र्यादिकं वितथ्यम् । शिष्टं सुगमम् ॥

तच्च "एष मोहं" इत्युक्तम् ॥

तत्त्वप्रकाशिका

ननु तत्रापि विष्णुना* रुद्रस्तुत्यादि कथमुच्यते इत्यत आह—तच्चेति। यदुच्यते, तच्च "एष मोहं" इति वचनान्मोहार्थत्वेन प्रत्युक्तमित्यर्थः। तस्माद्रुद्रादीनामधमत्वे बाधकाभावात् "यं कामये" इत्यादौ तद्वचनात् लक्ष्मीकारणत्वेन "मम योनिः" इत्युक्तो विष्णुरेव। ततश्च तत्समाख्यानाद्विश्वकर्मसूक्तवाच्योऽपि स एव। तथा च तस्यैव "यो देवानां" इति सर्वनामत्वोक्तेर्नान्येषां सर्वनामता। अतस्तेषां "तन्नो विष्णुः" इत्यादावप्राप्तेः विष्णुरेव परं ब्रह्म। ततो विष्णावेव ब्रह्मशब्दस्य मुख्यत्वेन स एव सूत्रकृता जिज्ञास्यतया विवक्षित इति। तदेवं जिज्ञास्ये "तद्ब्रह्म" इति ब्रह्मपदश्रवणात्तेन च तस्य पूर्णगुणत्वोक्तेः नानुभवसिद्धाल्पगुणजीवाभेदस्तस्येति सन्दिग्धत्वेन विषयत्वसिद्धेः प्रयोजनादिसद्भावाच्च ब्रह्मजिज्ञासा कर्तव्यैवाऽतः शास्त्रमारम्भणीयमेवेति सिद्धम् ॥

इति जिज्ञासाधिकरणम्.

---

*'विष्णुना' इत्यतः परं 'कृतं' इतिशेषः। तेन स्तुतिं प्रतिकर्तुर्विष्णोः कर्मणो रुद्रस्य च प्राप्तेः 'आश्चर्यो गवां दोहोऽगोपेन' इत्यादाविव 'विष्णुना रुद्रस्य स्तुत्यादि' इति "उभयप्राप्तौ कर्मणि" इति समासनिषेधशास्त्रानुसारेण वक्तव्ये 'रुद्रस्तुत्यादि' इति समासो न युक्त इति चोद्यस्य नावकाशः ॥

चन्द्रिका.

# ॥ ॐम् जन्माद्यस्य यतः ॐम् ॥

जिज्ञासाकारणीभूतगुणपूर्तिप्रसिद्धये* ।
जीवादिभेदकं विष्णोर्विश्वकर्तृत्वमुच्यते ॥

पूर्वोक्तजिज्ञासाक्षेपेणेह पूर्वपक्षोत्थानात्, पूर्वाधिकरणेनाक्षेपिकी स-

प्रकाशः

ॐम् जन्माद्यस्य यतः ॐम् ॥ पूर्वाधिकरणेन सङ्गतिप्रयोजने सूचयन्नधिकरणप्रमेयं संगृह्णाति—**जिज्ञासेति** । श्लोकस्य द्विरूपतां व्यनक्ति—**पूर्वोक्तेति** । यावज्जीवभेदकं नोच्यते, तावदत्र श्रुतौ रूढित्यागे बाधकाभावेन ब्रह्मपदाद्योगासिद्ध्या, गुणपूर्त्यसिद्धेर्न जिज्ञासा युक्तेति पूर्वपक्षे तदाक्षेपात्सङ्गतिः । गुणपूर्तिप्रसिद्धिद्वारा जिज्ञासासिद्धिः फलमित्यर्थः । यद्यपि ब्रह्मपदलभ्यगुणपूर्णत्वमेव भेदकं । तथाऽपि विश्वकर्तृत्वरूपधर्मेण समस्तवस्तुव्यावृत्ततयाऽवगतएव ब्रह्मणि गुणपूर्णत्वं सिद्ध्यतीति तदुपपादकतयैतदुक्तिः । अत एव "गुणपूर्तिप्रसिद्धये" इत्युक्तम् । उक्तं च

---

* जिज्ञासां 'विष्णु र्विषयतासंबन्धेन जिज्ञासावान् गुणपूर्त्तेः' इति पूर्वाधिकरणसिद्धाप्तानुमानसाध्यभूतां प्रति कारणीभूतायाः गुणपूर्तेः प्रसिद्धये संभावितत्वज्ञानायेत्यर्थः । उक्तानुमानहेतुभूतगुणपूर्तिज्ञानस्य साध्यभूतजिज्ञासाज्ञानं प्रति कारणत्वेन गुणपूर्तेः कारणत्वं अवच्छेदकसाधारणप्रयोजकत्वपर्यवसायीति ज्ञापनाय क्त्विप्रत्ययः । ऐतेन विचाररूपजिज्ञासां प्रति सामान्यधर्मप्रकारकज्ञानस्यैव कारणत्वाद्गुणपूर्तेः कथं कारणत्वमिति शङ्कानवकाशः ॥

चन्द्रिका

ङ्गतिः, चिन्तायास्सफलत्वं च। सुधायां तु—आद्यसूत्रे साधनादि-सहितं ब्रह्म विचार्यमित्युक्तम्। तत्र साधनफलयोर्ब्रह्मज्ञानसाधनं ब्रह्मज्ञानफलमिति ब्रह्मोपहितत्वेन तज्ज्ञानधिानज्ञानत्वात् ब्रह्मणश्च साधनादिज्ञानाधीनज्ञानत्वाभावादभ्यर्हितत्वाच्चादौ तज्जिज्ञासैव प्राप्ता। सा च लक्षणप्रामाणाभ्यां। तत्रापि लक्षणविशिष्टे प्रमाणाकाङ्क्षेति लक्षणस्य प्राथम्यमिति प्रकारान्तरेणाधिकरणसङ्गतिरुक्ता। अत्र "तद्विजिज्ञासस्व तद्ब्रह्म" इति वाक्यस्थं ब्रह्म किं जीव उत विष्णुरिति चिन्ता। तदर्थं ब्रह्मशब्दस्य रूढ्यर्थजीवत्यागेन योगिकार्थविष्णु-

प्रकाशः

सुधायाम् "अनेन लक्षणेन लक्षिते ब्रह्मणि समस्तगुणपूर्णत्वं प्रधानलक्षणं सिद्ध्यति" इति। एतेन "श्रुत्यादिसङ्गतिस्तु" इति सङ्गतिटीका विवृता। सङ्गत्यन्तरमप्यत्रानुसन्धेयमिति भावेनाह—**सुधायां त्विति**। **प्रकारान्तरेणेति**। तेन सुधाविरोधः प्रत्युक्तः। **इति वाक्यस्थमिति**। सुधायां क्वचिदपि विष्णुपरत्वानङ्गीकारेण पूर्वपक्षप्रवृत्तावपीह टीकायां "तदेव" इत्यादिवाक्यान्तरस्थब्रह्मशब्दस्य विष्णुपरत्वमुपेत्यैतद्वाक्यस्थस्य विष्णुपरत्वाक्षेप इति द्योतयितुं "इति वाक्यस्थं ब्रह्म विषयः" इत्युक्तम्। **किं जीव इति**। जात्यादेरिहायोग्यतापराहतत्वादिति भावः। यदि जीवे नेतुं शक्यं, तदा यौगिकार्थविष्णुग्रहणे हेतोरभावाद्रूढ्यर्थो जीव एवेति पूर्व-

चन्द्रिका

ग्रहणे हेतुर्नास्त्युतास्तीति । तदर्थं विध्युद्देशस्थब्रह्मशब्दस्वारस्याय "यतोवा" इत्यादिपूर्ववाक्यं किं जीवे कथं चिन्नेतुं शक्यमुताशक्यमिति। पूर्वपक्षस्तु—जीव एवेदं ब्रह्म, "बृह जातिजीव" इत्यभिधानात् * ब्रह्मशब्दस्य तत्र रूढेः, विष्णौ तु यौगिकत्वात्, रूढेश्चावयवार्थनिरपेक्षायास्तत्सापेक्षयोगाद्बलीयस्त्वस्य रथकारादिशब्देषु स्थित-

प्रकाशः

पक्षे फलफलिभावः । यदि तु जीवे नेतुमशक्यं, तदा रूढ्यर्थत्यागेन यौगिकार्थग्रहणे हेतुरस्तीति विष्णुरेवेति सिद्धान्ते फलफलिभावः स्पष्ट इति भावः । एतेन विषयसंशयटीकाऽपि विवृता । पूर्वपक्षटीकां व्यनक्ति—**जीव एवेति** । "बृह जातिजीवकमलासनशब्दराशिषु" इत्यभिधानादित्यर्थः। धातोः क्रियार्थत्वेऽपि "गडि वदनैकदेशे" इत्यादाविव तत्क्रियोपलक्षणत्वेन बृहतेः जात्याद्यर्थकत्वं युक्तमिति ध्येयम् । "तत्र योगेनैव प्रवृत्तेः" इत्येतद्व्याचष्टे—**विष्णौ त्विति** । "रूढियोगयोश्च" इति वाक्यं हेतुदृष्टान्तोक्त्या व्यनक्ति—**रूढेश्चेति** । वाक्यात्पदश्रुतेरिवेति भावः । षष्ठे "वचनाद्रथकारस्याधानम्" इत्याद्यपादीयोपान्त्याधिकरणे "वर्षासु रथकारोऽग्नीनादधीत" इत्यत्र ब्राह्मणादीनामेव रथकरणे निमित्ते वर्षाकालविधिरुत रथकारसंज्ञकस्यावान्तरवर्णस्याधानान्तरविधिरिति संशये, त्रैवर्णिकानां वैदुष्यस्य स्वतो लाभात्, कालमात्रविधौ च लाघवात्तेषामेव कालविधिर्नाविदुषोऽवान्तरवर्णस्य विशिष्टाधानविधिरिति प्राप्ते, अवयवार्थपर्यालोचनसापेक्षयौगिकप्रसिद्ध्यपेक्षया तन्निरपे-

* 'अभिधानात्' अभियुक्तानां धातुव्याख्यानात् । तेन पाणिनीयधातुपाठेऽस्यानुपलम्भो न दोषाय । धातोर्जीवे रूढत्वात्तत्प्रकृतिको ब्रह्मशब्दः सुतरां रूढ इति ज्ञेयम् ॥

चन्द्रिका

न च जीवेऽपि योगाङ्गीकाराद्रूढिरक्लृप्तेति वाच्यम्, यौगिकार्थस्य गुणपूर्तेर्जीवेऽसम्भवात् । सम्भवे वा जिज्ञास्यत्वेनाभिमतस्य जीवाद्वैदासिद्धेः । गुणपूर्तितोऽन्यस्य यौगिकार्थत्वे तु जिज्ञास्यस्यापि गुणपूर्त्यसिद्धिः । न च जिज्ञास्येऽपि रूढिः, तथात्वे गुणपूर्त्यसिद्धेः । न च योगरूढिः, "बृहन्तोह्यस्मिन् गुणाः" इति

प्रकाशः

"जीवे रूढत्वात्" इतिटीकोक्तं हेतुं साधयति—**न चेति**। "बृहजाति" इत्यभिधानं तु योगेनाप्युपपन्नम्। एवं च विष्णौ क्लृप्तयोगेनाक्लृप्तरूढिर्बाधिष्यतइति भावः । जीवेऽङ्गीक्रियमाणो योगार्थः किं गुणपूर्तिरुतान्य इति विकल्पौ हृदि कृत्वाऽऽद्य आह—**यौगिकार्थस्येति** । तस्याल्पगुणत्वेनैव सिद्धेरिति भावः । अन्त्य आह—**गुणपूर्तित इति**। देशाद्यपरिच्छेदरूपस्येत्यर्थः । अतो जीवे रूढिः क्लृप्तेति प्रोक्षणीशब्दवैषम्यमिति भावः । एतेन "जीवे-रूढत्वात्" इति टीकोक्तहेतुः साधितो भवति। "यद्यपि ब्रह्मशब्दो विष्णौ प्रवर्तते, तथापि तत्र तस्य योगेनैव प्रवृत्तेः" इति टीकागतैवकारस्य व्यावर्त्याशङ्कापूर्वं तात्पर्यमाह—**न च जिज्ञास्य इति**। विष्णाविति्यर्थः। **असिद्धेरिति**। तथा च जीवाद्वैदो न सिद्ध्येत्, "बृहन्तो हि" इति श्रुतिविरोधाच्चेति भावः । **न चे ति** । योगयुक्ता रूढिरित्यर्थः। तथा च गुणपूर्तिलाभः केवलरूढ्यपेक्षया प्राबल्यं चेति भावः । रूढिवद्योगस्याप्रामाणिकत्वे कल्प्यत्वाविशेषाद्रूढिरेव

चन्द्रिका

श्रुत्यनुसारिक्लृप्तावयवशक्त्यैवोपपत्तौ समुदायशक्तौ मानाभावात्। "तदेव ब्रह्म परमं कवीनाम्" इत्यादेः केवलयोगेनाप्युपपत्तेः। न च पङ्कजादाविव योगोऽतिप्रसक्तः, येन योगरूढिः, अन्यत्र गुणपूर्तेरनङ्गीकारात्। अत एव टीकायां "योगेनैव" इत्येवकारः। तथा च "तदेव ब्रह्म परमम्" इत्यादौ रूढिबाधकसमुद्रशायित्वादिलिङ्गाद्विष्णुपरत्वेऽपि "तद्विजिज्ञासस्व" इत्यत्र न तत्परता। अत एव टीकायां 'ब्रह्मशब्दो यद्यपि विष्णौ प्रवर्तते' इत्युक्तम्।

प्रकाशः

कल्प्येतेत्यत उक्तं—**श्रुत्यनुसारिक्लृप्तेति**। उक्तं च मीमांसकैः—

भवेतां यदि वृक्षस्य वाजिकर्णौ कथं चन।
अक्लृप्तां समुदायस्य कश्शक्तिं जातु कल्पयेत्॥ इति।

ननु "तदेव" इति श्रुतौ कवीनां मते तदेव परमं ब्रह्मेत्याहुरिति रूढिरुक्तेत्यत आह—**तदेवेति**। तर्हि पङ्कजादौ योगरूढिर्नेत्यादित्यत आह—**न चेति**। तत्र पङ्कजनिकर्तृत्वस्य भेकादावपि सत्त्वेनैकान्ततस्तेन पद्मप्रतीत्ययोगाद्रूढिरङ्गीकृता। न चैवं प्रकृते योगोऽतिप्रसक्तः, येनरूढिरपि स्यादित्यर्थः। एवं टीकोक्तो विष्णौ यौगिकत्वहेतुः समर्थितो भवति। "यद्यपि" इत्यादिवाक्यं व्यनक्ति—**तथाचेति**। न **तत्परतेति**। वक्ष्यमाणदिशा बाधकाभावादिति भावः। ननु सुधायां क्वापि ब्रह्मशब्दो विष्णुपरो नेत्युक्तेः कथमेवमित्यत आह—**अत एवेति**। तत्र तथा प्रवृत्तावप्यत्र

चन्द्रिका

नन्वत्रापि जिज्ञास्यत्वमेव बाधकं । न चास्यासंदिग्धजीवपरतया

प्रकाशः

टीकायां क्वचिद्विष्णुपरत्वमुपेत्यैव प्रवृत्तेर्न दोष इति भावः । एतेन—क्वचिद् ब्रह्मशब्दस्य योगेनापि विष्णुपरत्वे शाखान्तराधिकरणन्यायेन प्रत्यभिज्ञानात् "तद्ब्रह्म" इत्यत्रापि विष्णुपरत्वं स्यादिति निरस्तम् । "यमन्तस्समुद्रे" इति पूर्ववाक्योक्तसमुद्रशायित्वरूपलिङ्गस्येवेह बाधकस्याभावादिति भावः । अत्र यद्यपि "न च जीवेऽपि" इत्यादेर्ग्रन्थस्य "ब्रह्मशब्दस्य तत्र रूढेः" इत्युक्तहेत्वसिद्धिपरिहारार्थत्वात्तदानन्तर्यं, तथा "न च जिज्ञास्येऽपि" इत्यादेश्च "विष्णौ यौगिकत्वात्" इत्युक्तहेत्वसिद्धिनिरासार्थत्वात् तदानन्तर्यं, तथा "रूढेश्च" इत्यस्यैतदानन्तर्यं चोचितं, हेत्वोः सिद्ध्यनन्तरमेव प्राबल्यादिजिज्ञासोदयात् । तथापि प्रोक्षण्यादिशब्दवैषम्यकथनाय "न च जीवेऽपि" इत्यस्य यथान्यासे युक्ते तत्सम्बद्धत्वात् "न च जिज्ञास्येऽपि" इत्यस्यापि पश्चाद्भाव इति न दोषः । बाधकाभावान्नात्र ब्रह्मपरतेत्ययुक्तमिति शङ्कते—**नन्वत्रापीत्यादिना पूर्वपक्षानुदयादित्यन्तेन** । "तद्विजिज्ञासस्व" इत्यादिश्रुतावपीत्यर्थः । "तस्य च स्वप्रकाशत्वेनासंदिग्धत्वादजिज्ञास्यता" इति टीकां हृदि कृत्वा शङ्कते—**न चास्येति** । "तद्विजिज्ञासस्व" इति वाक्यस्येत्यर्थः ।

चन्द्रिका

जिज्ञास्यत्वमेवासिद्धमिति वाच्यम्, अन्योन्याश्रयात् । न च जीवस्यापि देहादन्यतया सन्दिग्धत्वेन जिज्ञास्यत्वम् । टीकायां पूर्वपक्षे जीवस्याजिज्ञास्यत्वोक्तिस्तु ब्रह्मवदतिगहनत्वं नेत्यभिप्रेत्य । अत एव सुधायां पूर्वपक्षे—'देहादितो विविक्तया न प्रसिद्धः' इति जिज्ञासाप्रयोजकमप्रसिद्धत्वमुक्तम् । ततश्च जिज्ञास्यत्वस्य जीवेऽपि सम्भवान्न तज्जीवपरत्वे बाधकमिति वाच्यम्, कथं चिज्जि-

प्रकाशः

**जिज्ञास्यत्वमिति** । 'ब्रह्मशब्दार्थस्य' इति शेषः । तथा च नेदं बाधकमिति शङ्काभिप्रायः । **अन्योन्याश्रयादिति** । सिद्धे च जीवपरत्वे जिज्ञास्यत्वासिद्धिः, जिज्ञास्यत्वासिद्धौ बाधकाभावेन रूढचा जीवपरत्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः । एतेन—टीकायामस्यासन्दिग्धजीवपरत्वमुपेत्याजिज्ञास्यतोक्तिरयुक्ता, प्रत्युत "तद्विजिज्ञासस्व" इत्युक्तजिज्ञास्यत्वेन जीवपरत्वत्याग एव युक्तः, जीवस्य सन्दिग्धत्ववर्णनं वा कार्यमिति शङ्कितुर्हृदयमिति ध्येयम् । सुधानुरोधेन टीकाशयं वर्णयन् सन्दिग्धत्वोपवर्णनेन जिज्ञास्यत्वसम्भवमाशङ्कते—**न चेति** । 'इति वाच्यं' इत्यन्वयः । **टीकायामिति** । अतएव "देहात्मविवेकस्यावश्यकत्वात्" इति क्वाचित्कपाठे जीवस्य जिज्ञास्यत्वोक्तिरिति भावः । **कथञ्चिदिति** । देहादिविविक्तत्वेनेत्यर्थः । तथा च रूढचा जीवपरत्वं वदता पूर्ववादिना, तादृशपूर्वपक्षोदयार्थं तस्य जिज्ञासानर्हत्वाय टीकोक्तदिशाऽसन्दि-

चन्द्रिका

ज्ञासासम्भवेन तदाक्षेपेण पूर्वपक्षानुदयादितिचेन्न, विशिष्टाधिकारि-कमोक्षफलकजीवान्यधर्मिकपूर्णगुणत्वप्रकारकपूर्वसूत्रोक्तजिज्ञासाक्षेपेणैव टीकाद्वयेऽपि पूर्वपक्षप्रवृत्तेः। यद्वेह टीकायां पूर्वपक्षे पूर्वाधिकरण-पूर्वपक्षापत्त्या "तद्विजिज्ञासस्व" इत्यस्यापि पूर्वाधिकरणपूर्वपक्ष-

प्रकाशः

ग्धत्वमवश्यं वाच्यमिति श्रुतजिज्ञास्यत्वं रूढित्यागे बाधकं स्यादेव, सुधारीत्या टीकास्थजिज्ञास्यत्वोक्तेरर्थान्तरवर्णनमसमञ्जसमिति भावः। एवं बाधकशङ्काव्याजेन टीकयोर्विरोधोऽप्युद्भावितः, सुधायामिव टीका-यामपि जीवस्योक्तविधया सन्दिग्धत्वेन जिज्ञास्यत्वसम्भवेऽपि सि-द्धान्त्यभिमतविशिष्टजिज्ञासाया एवाक्षेप्यत्वेन जिज्ञासाक्षेपेण पूर्वपक्षो-दयो न विरुद्धः, टीकाद्वयाविरोधश्चेति भावेन जिज्ञास्यत्वस्य बाधकं परिहरति—**विशिष्टेति**। "भक्तिमान् परमे विष्णौ" इत्याद्युक्तविशेषणविशिष्टेत्यर्थः। अथादिशब्दोक्तान्येतानि जिज्ञा-साविशेषणानि। प्रागुक्तानाक्षेपादफलेयं चिन्तेत्यत उक्तम्—**पूर्व सूत्रोक्तेति**। तथा च टीकाद्वयेऽपि जीवस्य जिज्ञास्यत्वाङ्गीकारेण "तद्विजिज्ञासस्व" इत्युक्तस्य जीवपरत्वे जिज्ञास्यत्वं न बाधकं, टीका-यामजिज्ञास्यत्वोक्तिस्तु प्रागुक्ताभिप्राया, टीकयोरविरोधश्चेति ध्येयम्। "तस्य च स्वप्रकाशत्वेन" इत्यादिटीकास्वारस्यानुसारात् कल्पा-न्तरमाह—**यद्वेति**। **पूर्वपक्षापत्त्येति**। यथा हि पूर्वाधिकरणे जीवस्यासन्दिग्धत्वेन जिज्ञासामात्राक्षेपस्तथा ब्रह्मशब्दस्य रूढ्या

प्रकाशः

जीवपरत्वात्तस्य चासन्दिग्धत्वाज्जिज्ञासा न युक्तेति पूर्वपक्षापत्त्येत्यर्थः । ननु पूर्वत्र हि जीवान्यब्रह्माक्षिप्य जीवान्यसत्यत्वं चोपेत्य, जीवस्य चासन्दिग्धत्वमुक्त्वाऽजिज्ञास्यत्वं पूर्वपक्षितम् । न चेह तथा, "तदेव" इत्यादौ योगेन विष्णुपरत्व मुपेत्य "तद्विजिज्ञासस्व" इत्यत्रैव रूढत्या जीवपरत्वशङ्कनात् । न चेह जीवादन्यद्देहादिभिन्नत्वमसत्यं, जीवपराभेदानङ्गीकारात् । येनान्यस्य जिज्ञासानर्हतया जीवस्य च स्वप्रकाशतया सिद्धतयाऽजिज्ञास्यत्वेन पूर्वपक्षः क्रियेतेति चेत्, अयमाशयः—देहभिन्नत्वस्य जीवान्यस्य सत्यतया जिज्ञासार्हत्वेपि

जातमात्रा मृगा गावो हस्तिनः पक्षिणो झषाः ।
भयाभयस्वभोगादौ कारणानि विजानते ॥

इत्यनुव्याख्यानाद्युक्तदिशा तस्यापि चैतन्यवत् सिद्धतया सन्देहाभावेनाजिज्ञास्यत्वमिति । नन्वेवं कथं तर्हि सुधायां तेन रूपेण सन्दिग्धत्वोक्तिरिति चेत् । उच्यते—स्फुटतरविवेकाभावेन "नैषां ममाहमितिधीः श्वमृगालभक्ष्ये" इत्यादिव्यपदेशवदतिप्रसिद्धत्वाभावेन देहादिभिन्नत्वेन सन्दिग्धत्वमुपेत्य पूर्वपक्षः कृतः । अत एव तत्र 'देहादितोऽतिविविक्ततया न प्रसिद्धः' इत्यतिशब्दप्रयोगः । वक्ष्यति च "देहाद्यन्यतया जीवस्य जिज्ञास्यत्वमङ्गीकृत्यापि" इत्यपिपदेनाभ्युपगमवादोऽयमिति । "देहात्मविवेकस्यावश्यकत्वात्" इति क्वाचित्कटीका अभ्युपगमवादेनैव योज्येति । ननु तर्हि

चन्द्रिका

न्यायेनाजिज्ञास्यत्वेऽप्युपपत्तेरजिज्ञास्यत्वेनैव पूर्वपक्षः । सुधायां तु देहाद्यन्यतया जीवस्य जिज्ञासामङ्गीकृत्य सिद्धान्त्यभिप्रेतजिज्ञासाऽऽक्षिप्तेति द्रष्टव्यम् । न च जीवपरत्वे "यतो वै" इत्यादिपूर्ववाक्योक्तकारणत्वमेव बाधकं, विध्युद्देशगतब्रह्मपदस्वारस्याय जीवस्याप्यदृष्टद्वारा वा, जगतो जीवकल्पितत्वेन वा, तत्र हेतुत्वो-

प्रकाशः

विचारविधेः का गतिरित्यतो वा, अस्मिन् पक्षे जिज्ञास्यत्वबाधकाज्जीवपरत्वमेव त्यज्यतामित्यतो वाऽऽह—**तद्धिजिज्ञासस्वेति** । अप्रामाण्येन वा, प्रामाण्येपि ब्रह्मपरवाक्यमध्यस्थतया लोडादेर्विधिशक्तिप्रतिबन्धेन विचाराविधायकत्वेन वा, ब्रह्मशब्दार्थस्याजिज्ञास्यत्वेऽपि जीवपरत्वे श्रुतेरुपपत्तेरित्यर्थः । अतो न जिज्ञास्यत्वं जीवपरत्वे बाधकं, तस्यैवासिद्धेः अन्योन्याश्रयोपि प्रागुक्तो नास्ति, अन्यथैव जिज्ञासासिद्धेरुक्तत्वादिति भावः । सुधापक्षे तु—जिज्ञास्यत्वस्य बाधकताशङ्कैव नास्ति, जीवे तस्याङ्गीकारादिति भावेनाह—**सुधायांत्विति** । अपिपदेनाभ्युपगमवादसूचनाट्टीकाविरोधः परिहृतो भवति । **सिद्धान्तीति** । "विशिष्टाधिकारिक" इत्याद्युक्तविशेषणयुक्तेत्यर्थः। जिज्ञास्यत्वं न बाधकमित्युक्त्वा, सिद्धान्त्यभिमतं जगत्कारणत्वमपि न बाधकमित्याह—**न चेति** । **अदृष्टद्वारेति** । न्यायमतरीत्या सर्वस्य जीवोपभोग्यत्वेन जीवादृष्टनिमित्तत्वाददृष्टद्वारा जगति जीवस्य हेतुत्वं, एकजीवमतरीत्या सर्वस्य जीवकल्पितत्वेन तत्कल्पकत्वेन

चन्द्रिका

पपत्तेः । "इमानि" इत्यनेन जीवकर्तृककार्यजातस्यैव निर्देशोपपत्तेश्च । अत एव "आत्मा वा अरे द्रष्टव्यः" इत्यादौ जिज्ञा

प्रकाशः

वा तत्र हेतुत्वमित्यर्थः । अन्यथा विध्युद्देशस्य प्रधानत्वात्तद्गत ब्रह्मशब्दस्य रूढार्थत्यागलक्षणास्वारस्यं स्यादित्यर्थः । ननु टीकापक्षे "तद्विजिज्ञासस्व" इत्यस्य विचारविधित्वं नेति पूर्ववाक्यएवोक्तम्, अन्यथा जिज्ञास्यत्वस्यैव जीवपरत्वे बाधकतापत्तेः । तथा च कथं "विध्युद्देशगत" इति । सत्यं, सिद्धान्तिना विचारविधित्वमङ्गीकृतमिति, तं प्रति पूर्वपक्षिणेत्थमापादनाददोषः । विध्युद्देशपदेनोपसंहारो विवक्षित इत्येके । नन्वदृष्टद्वारा हेतुत्वेऽप्यत्र श्रुतं साक्षाद्धेतुत्वं न जीवस्येत्यत आह—इमानीति । प्रत्यक्षार्थनिर्देशकत्वादिदम इति भावः । एतेन—"जिज्ञास्यत्वमेव बाधकं" इत्यादिना ग्रन्थेन "न च रूढित्यागेन योगाङ्गीकारो युक्तः, बाधकं विना मुख्यार्थत्यागायोगात् । न चात्र तादृशं बाधकमस्ति" इति टीकावाक्यं विवृतं भवति । अत्र ब्रह्मशब्दो जीवपर इत्यत्र श्रुत्यन्तरमाह—अत एवेति । आदिपदेन "य आत्मा सोऽन्वेष्टव्यः" इत्यादिसुधोक्तवाक्यग्रहः । इदमुपलक्षणमिति मत्वा "आत्मा वा अरे" इत्युदाहृतम् । तेन, "तद्विजिज्ञासस्व" "य आत्मा" इत्यनयोरेव तत्रोपादानात्,

**बन्धमोक्षावपि ह्यासु श्रुतिषूक्ता हरे स्सदा ॥**

चन्द्रिका

साविधायकवाक्ये जीवे प्रसिद्धात्मपदप्रयोगः । अत एव च न जात्यादिकमिह ब्रह्मशब्दार्थः । ब्रह्मणो निष्क्रियत्वेन कर्तृत्वस्य, निर्विकारत्वेनोपादानत्वस्यचासम्भवेन, कारणत्वस्य ब्रह्मपक्षएव बाधकत्वाच्चेति ॥

प्रकाशः

इति बहुवचनं कथमिति न चिन्त्यमिति भावः, सुधायां तद्वाक्यस्याप्युदाहरणस्य फलं चोक्तं भवति । अन्यथाऽत्र विष्णुविचारविधिस्तत्र जीवविचारविधिरिति विचारविधेर्नानार्थत्वं प्रसज्येत, अद्याप्यात्मशब्दस्य विष्णुनिष्ठताया* अनिर्णयादिति भावः । ननु जीवइव जातिकमलासनादावपि रूढेर्जीव एवेति कथं निर्णयोऽत† आह—**अत एव चेति** । आत्मपदप्रयोगादेवेत्यर्थः । एवं पूर्ववादी स्वपक्षे साधकमुक्त्वा, बाधकञ्चोद्धृत्य, सिद्धान्ते साधकाभावमुक्तप्रायं मत्वा, बाधकमाह—**ब्रह्मण इति** । "निष्कलं निष्क्रियम्" इति श्रुतेर्निष्क्रियस्य कथं कृतिमत्त्वरूपकर्तृत्वमित्यर्थः । "निर्विकारोऽक्षरश्शुद्धः" इत्यादेर्निर्विकारस्य कथं परिणामलक्षणविकारवत्त्वरूपोपादानत्वमित्यर्थः । ननु "आनन्दमयोऽभ्यासात्" इत्यत्रानन्दमयादेर्विष्णुत्वे ब्रह्मशब्दस्य हेतूकरणाद्विष्णुपरत्वं सिद्धमन्यथा तत्र हेतोरसिद्ध्यापत्तेः । अत एव पादान्त्यप्राणाधिकरणपूर्वपक्षचन्द्रिकायां—"उक्तं चानन्दमयाधिकरणे ब्रह्मशब्दस्य विष्णौ मुख्यत्वम्" इत्युक्तम् । तथा च कथं ब्रह्मशब्दो जीव इति पूर्वः पक्षः । तथा "सर्वत्र प्रसिद्धोपदे-

* "निष्ठतया" इति च पाठः । † "निर्णय इत्यतः" इत्यपि पाठः.

प्रकाशः

शात्" इत्यत्रापि विष्णौ प्रसिद्धस्य ब्रह्मशब्दस्योपदेशादिति हेतूकरणात्, प्रसिद्धपदप्रयोगाच्च, सिद्धं तस्य विष्णुपरत्वम्। अत एव सिद्धान्ते द्युभ्वाद्यधिकरणे हेतूकृतात्मशब्दस्य विष्णुपरत्वं सिद्धमिति "आत्मा वा अरे द्रष्टव्यः" इत्यत्रात्मशब्दो द्युभ्वाद्यधिकरणन्यायेन विष्णुपर इति ग्रन्थकारो वक्ष्यति। न च तस्य वक्ष्यमाणत्वेन, ततः पूर्वं विष्णुपरत्वासिद्धेरेवं पूर्वपक्षोदय इति वाच्यं, ज्योतिरधिकरणपूर्वपक्षचन्द्रिकायां—"यद्यपि "वैश्वानरो जायमानः" इत्यग्निसूक्ते वैश्वानरश्रुतिर्जायमानत्वं लिङ्गं चास्ति। तथाऽपि विष्णौ श्रुतेः सावकाशतायाः वैश्वानराधिकरणे, लिङ्गस्य सावकाशताया द्युभ्वाद्यधिकरणे कण्ठोक्तत्वान्न ताभ्यां पूर्वपक्षितं" इति वक्ष्यमाणत्वेनोत्तरत्र सिद्धत्वेपीह पूर्वपक्षानुदयादिति चेदत्र केचित्—योगरूढिभ्यां तस्य विष्णुपरत्वमिहैव सिद्धं तत्र हेतूक्रियते न तु तत्रैव सिद्धम्। चन्द्रिकावाक्यन्तु भाष्ये बहुवाक्योदाहरणात्तदभिप्रायेण नेयमित्याहुः। अन्यत्र योगेन विष्णुपरत्वेपीह वाक्ये रूढौ बाधकाभावेन रूढो जीव एवेति पूर्वपक्षोदय इति गुरुपादाः। एतेन—यत्केन चित्प्रलपितं, जीवे देहबृंहकत्वादिना योगेन ब्रह्मशब्दस्योपपत्तौ रूढौ मानाभावः। "बृहजाति" इत्यादि त्वप्रसिद्धम्। किञ्च "ब्रह्मशब्दः परे विष्णौ" इत्यादिस्मृतौ, "स्याच्चैकस्य ब्रह्मशब्दवत्" "परं जैमिनिर्मुख्यत्वात्" इत्यादिसूत्रे च ब्रह्मशब्दस्य विष्णौ मुख्यत्वं सिद्धमिति कथञ्जीव इति पूर्व-

प्रकाशः

पक्ष इति, तन्निरस्तम्, विष्णौ पुष्कलयोगेन मुख्यत्वमन्यत्र तदभावेना-मुख्यत्वमिति सिद्धावपीह लोकरूढ्या जीवपरत्वे बाधकाभावादिति शङ्कनात् । एतच्छङ्कायाः क्वचिदवश्यं निराकार्यत्वाच्च । रूढावन्तरभेदस्य तत्प्राबल्यस्य चाद्याप्यसिद्धेश्च । यदपि योगेनोपपत्तौ रूढौ मानं नेति, तन्न, यौगिकार्थस्य गुणपूर्तेर्जीवेऽसम्भवा दित्युक्तत्वात् । देहबृंहकत्वादिर्योगार्थ इत्यत्र मानाभावाच्च । सर्वज्ञतमेनोदाहृतस्य चिरन्तनव्याकरणसिद्धाभिधानस्या र्चीनेनापलपितुमनुचितत्वाच्च* यत्किञ्चिदेतत् । एतेन—निरवकाशलिङ्गेन सावकाशश्रुतिबाधस्यान्तरधिकरणे वक्ष्यमाणत्वान्निरवकाशकारणत्वलिङ्गेन सावकाशब्रह्मश्रुतेर्बाधसम्भवा त्तेन गतार्थमिदम् । सावकाशश्रुत्या निरवकाशलिङ्गबाधायोगेन पूर्वपक्षानुदयश्चेति निरस्तम्, तादृशन्यायस्य तदधिकरणव्युत्पाद्यत्वेपीह तमेव न्यायं सिद्धवत्कृत्य कारणत्वरूपलिङ्गस्य निरवकाशतामात्रप्रतिपादनेनागतार्थत्वात् । पूर्वपक्षे लिङ्गस्य निरवकाशतानभ्युपगमेन श्रुतेर्विध्युद्देशगतत्वेनोपसंहारगतत्वेन वा प्राबल्येन पूर्वपक्षोदयात् । ननुचैवमाकाशाधिकरणादाविवेहाप्यन्य इति प्राप्ते, निरवकाशकारणत्वलिङ्गेन ब्रह्मशब्दस्य ब्रह्मपरत्वस्थापनेन ब्रह्मशब्दसमन्वयस्य सत्त्वात्, पञ्चाधिकरण्याः समन्वयाध्यायासङ्गतिरित्युक्तं विरुध्यत इति चेन्न,

* अवगम्यते च यादवाभ्युदयषष्ठसर्गगतस्य एकस्थानाक्षरश्लोकस्य व्याख्यावसरे—"तत्र 'अग कल्याणविहारयोः' इति धातुः प्रसिद्धधातुपाठतद्वृत्त्यादिषु न दृष्टः । तथापि शिष्टव्यवहारादादरणीयः" इत्यप्पय्यदीक्षितवाक्यादेव शिष्टव्यवहृतस्यापाटऽप्यादरणीयत्वम् ॥

चन्द्रिका

सिद्धान्तस्तु—विष्णुरेव जिज्ञास्यं ब्रह्म, "य उ" इत्यादिभाष्योक्तश्रुतिभिर्विष्णवेकनिष्ठस्य कारणत्वस्य जिज्ञास्ये "यतो वा" इत्यादिश्रवणात्तस्य च जीवेऽनुपपत्त्या रूढेरपि बाधात् ।

प्रकाशः

जिज्ञासासमर्थनद्वारा शास्त्रारम्भएव तात्पर्येण तत्समन्वयएवातात्पर्यात् । तत्समन्वयफलस्य गुणपूर्तिलाभस्य 'तदेव परमं' इत्यादिश्रुत्यन्तरएव सिद्धेरित्याद्यूह्यम् । सङ्ग्रहस्तु—

निर्बाधरूढेर्जीवोऽत्र ब्रह्म विष्णुर्न यौगिकः ।
योगाद्रूढेर्बलीयस्त्वं रथकारनये स्थितम् ॥

जगत्कारणत्वादिरूपात् बाधकादेव रूढार्थत्यागेन विष्णुपरत्वं ब्रह्मशब्दस्येति भावेन सिद्धान्तमाह—**सिद्धान्तस्त्विति** ।

भाष्योक्तश्रुतिभिर्विष्णुमात्रगात्कारणत्वतः ।
बाधकाद्रूढिबाधेन विष्णुर्ब्रह्माभिधः श्रुतः ॥

इति सङ्ग्रहः । **यउ इतीति** । यद्यपि "य उ त्रिधातु पृथिवीं" इत्यत्र रक्षकत्वं, "चतुर्भिस्साकं" इत्यत्र नियामकत्वं श्रुतं, नतु कारणत्वम् । तथापि जनकस्यैव रक्षकत्वादिकमित्युत्सर्ग इति, रक्षकत्वाद्युक्तचैव कारणत्वं लब्धमिति वा, "योनः पिता जनिता" इत्यादिश्रुतौ, "उत्पत्तिस्थितिसंहाराः" इत्यादिस्मृतौ च साक्षात्कारणत्वस्योक्तेर्वा एवमुक्तम् । श्रुत्यर्थस्तु टीकायां स्पष्टः । एतेन—किञ्जन्मादिकं लक्षणमुत तत्कारणत्वम् । नाद्यस्तस्य प्रपञ्चधर्मत्वात् । नान्त्यः, अप्रसिद्ध-

चन्द्रिका

अदृष्टद्वारा वा, कल्पकत्वेन वा, जीवकारणत्वे जातादिपदानां मुख्यार्थत्यागापत्तेः । 'अभिसंविशन्ति' इति पदोक्तमुक्तप्राप्यत्वस्य च सर्वथाऽनुपपत्तेः । 'यतः' इति 'येन' इति 'यत्' इति "तद्ब्रह्म" इति च प्रतीतकारणैक्यस्य बाधकाभावात् । 'इमानि' इति सर्वनाम्नश्च संकोचकाभावात् । जीवकर्तृतायाश्च "इतरव्यपदेशात्"

प्रकाशः

त्वादिति निरस्तम् । श्रुत्यादिषु प्रसिद्धस्य कारणत्वस्य लक्षणत्वादिति । ननु जीवेऽपि कारणत्वं युक्तमित्युक्तमत आह—**अदृष्टेति**। साक्षाज्जन्यएव जातादिपदप्रयोगादिति भावः । यत् 'अभि' स्वेच्छया सम्यग्विशन्तीत्यनेनोक्तमुक्तप्राप्यत्वस्यानुपपत्तेरित्यर्थः । कारणत्वादिलिङ्गजातस्य पक्षनिष्ठत्वमाह—**यत इतीति** । यद्वा केषांचिन्मते वक्ष्यमाणदिशा विशेषणभेदे विशेष्यभेदमाशङ्क्याह—**यत इतीति** ॥ यत्तु-'इमानि' इत्यनेन जीवकर्तृककार्यजातस्यैव निर्देश इत्युक्तं, तेन्नत्याह—**इमानीति** । कतिपयकर्तृत्वमपि जीवस्य नेत्याह—**जीवेति** । स्वतन्त्रकर्तृताया इत्यर्थः । तेन "कर्ता शास्त्रार्थवत्त्वात्" इत्यनेन न विरोधः, युक्तिपादे "इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः" इत्यधिकरणगतसूत्रेषु, "एतेन शिष्टापरिग्रहा अपि व्याख्याताः" इति तत्पूर्वाधिकरणान्तिमसूत्रे च, समयपादे च "अन्यथाऽनुमितौ च ज्ञशक्तियोगात्" इत्यत्र च निराकरिष्यमाणत्वादित्यर्थः । सूत्राणाम-

चन्द्रिका

इत्यादिसूत्रेषु निराकरिष्यमाणत्वात् । जिज्ञास्ये श्रुतस्य चात्मशब्दस्य "आत्मा नारायणः परः" इत्यादिश्रुत्या द्युभ्वाद्यधिकरणन्यायेन ब्रह्मशब्दवत् विष्णुपरतायाएव न्याय्यत्वात् ।

प्रकाशः

र्थस्तु भाष्यादौ स्पष्टः, वक्ष्यते चात्रापीति नात्र लिख्यते । उक्तञ्चानुव्याख्याने—

नहि जन्मादिहेतुत्वञ्जीवस्य जगतो भवेत् ।
हिताक्रियादिदोषञ्च वक्ष्यत्येव स्वयं प्रभुः ॥ इति ।

एतेन "अतो ब्रह्मशब्दस्य" इत्यादिटीका व्याख्याता । ब्रह्मशब्दस्य विष्णुपरत्वं समर्थ्य, प्रागुक्तात्मशब्दस्यापि तदाह—**जिज्ञास्यइति** । "आत्मा वा अरे द्रष्टव्यः" "य आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामस्सत्यसङ्कल्पस्सोऽन्वेष्टव्यः" इत्याद्यनेकवाक्यस्थस्येत्यर्थः । अत एव 'जिज्ञास्ये श्रुतस्य" इति सामान्येनोक्तिः । "नारायणपरो ज्योतिरात्मा नारायणः परः" इति तैत्तिरीयश्रुतिः । **द्युभ्वादीति** । "द्युभ्वाध्यायतनं स्वशब्दात्" इत्यत्र 'आत्मशब्दात्' इतिवक्तव्ये "स्वशब्दात्" इत्युक्तिस्तु स्वस्य विष्णो श्शब्द इत्यपि विग्रहाश्रयणेन "तमेवैकं जानथ आत्मानं" इत्यात्मशब्दस्य विष्णवेकनिष्ठत्वज्ञापनायेति वक्ष्यते । तथाचात्मशब्दात् द्युभ्वाद्यायतनं विष्णुरित्युक्तन्यायेनेत्यर्थः । "जानथ आत्मानं" इति जिज्ञास्यत्वेन श्रुतात्मनो विष्णुत्वं "अमृतस्यैष

चन्द्रिका

अन्वेषणविधिवाक्योक्तापहतपाप्मत्वादीनां च जीवे शुद्धरूपाभिप्रायेण सम्भवशङ्कायामपि सत्यकामत्वादीनां सर्वथाऽनुपपत्तेः ।

प्रकाशः

सेतुः" इत्युत्तरवाक्यस्थलिङ्गाधीनमिति, 'न्यायेन' इत्युक्तम् । **न्याय्यत्वादिति** । 'एकत्र निर्णीतः शास्त्रार्थोऽन्यत्रापि' इति न्याय-प्राप्तत्वादित्यर्थः । अन्यथा जिज्ञासावाक्यानां नानाधर्मिकजिज्ञासाविधा-यकत्वप्रसङ्ग इति भावः । "य आत्मा" इति वाक्यगतात्मशब्दस्य जीवपरत्वे बाधकमप्याह—**अन्वेषणेति** । "शङ्कायामपि" इत्य-भ्युपगमवादः, तेषामपि जीवे स्वतोऽभावात् । यद्वक्ष्यति दहरनये—

अशनायादिकानन्ये तत्प्रसादात्तरन्ति हि ॥ इति ।

**सत्यकामत्वादीनामिति** । "सत्यकामः परो नास्ति" इत्याद्युक्ते-रिति भावः । उक्तं च तत्र टीकायां—"अपहतपाप्मत्वादीनां कथं चिदन्यत्र वृत्तावपि न कथं चिदन्यत्र सत्यकामत्वादीत्याशयेनाह—**सत्यकाम इति**" इति । एतेन—जन्मादिकारणत्वमुपलक्षणं, जिज्ञासा-विधिवाक्येषु यत्र यत्र जीवपरत्वे यद्बाधकमस्ति, सत्यकामत्वादिकं, "ओमित्येतदक्षरमुद्गीथमुपासीत" इत्यादावुद्गीथत्वादिकं, तत्सर्वं ग्राह्य-मिति सूचयता,

सृष्टिः स्थितिश्च संहारो नियतिर्ज्ञानमावृतिः ।
बन्धमोक्षावपि

इत्यनुव्याख्यानदिशा सुधायां सृष्ट्यादीनामेव बाधकत्वेनोपपादन-

चन्द्रिका

निष्क्रिय-वश्रुतेश्च "स हि कर्ता" इति "सत्यकर्मा" इति

प्रकाशः

मुपलक्षणं, आत्मशब्देऽपि विष्णुपरत्वमुक्तदिशोपपाद्यमित्युक्तं भवति । उक्तं च सुधायां—"न चैकमेव सर्वत्र जिज्ञासाविधायकश्रुतिषु लक्षणं श्रूयते" इत्यादि । एवं रूढित्यागे हेतुभूतं परपक्षे बाधकं स्वपक्षे साधकं च समर्थ्य, प्रागुक्तबाधकमुद्धरति—**निष्क्रियत्वश्रुतेश्चेति** । "अक्लिष्टकारित्वादिनोपपत्तेश्च" इत्यन्वयः । उक्तं च सुधायां—"भेदेनैव तु मुख्यार्थसम्भवे" इत्यस्य व्याख्यावसरे*—'आगमस्याक्लिष्टकारित्वाद्यर्थतया सावकाशत्वात्' इति । लोकेऽनायासेन कर्मकर्तरि 'अकर्ता' इति प्रयोगः । वेदेपि "अपशवो वा अन्ये गोअश्वेभ्यः" इत्यत्र गवाश्वान्यशुषु प्राशस्त्याभावेन 'अपशवः' इति प्रयोगः । उक्तं चाद्ये "तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवायात्" इति तत्सिद्धिपेटिकायाम् । तथा च 'निष्क्रियं' इति प्रयाससाध्यक्रियानिषेधो न सामान्यक्रियानिषेध इत्यर्थः । वक्ष्यते च द्वितीये "असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात्" इति सूत्रे "नासदासीत्" इति वाक्ये, कारणासत्त्वमुच्यतइत्याशङ्क्य, स्वातन्त्र्यादिधर्मान्तरेण निषेधो न स्वरूपेणेति । ननु तत्र मानान्तरबाधात् प्राशस्त्यस्वातन्त्र्यादिधर्मान्तरनिषेधो न स्वरूपेण । न चात्र बाधकमस्तीत्यत आह—**सहीति** । "अथ वेशान्तान्पुष्करिण्यः स्रवन्त्यः सृजते स हि कर्ता" इति बृहदारण्यक-

* अवतरणोपोद्घातस्यापि व्याख्यानतात्पर्यप्रायेणेयमुक्तिः ।

चन्द्रिका

"स इदं सर्वमसृजत" इति "स इमान् लोकानसृजत" इति "नामरूपे व्याकरोत्" इत्यादिकर्तृत्वश्रुतिबलात् "अकर्माऽक्लिष्टकारित्वात्" इत्यादिस्मृत्यनुसारेणाक्लिष्टकारित्वादिनोपपत्तेश्च ।

प्रकाशः

श्रुतिः । "सत्यकर्मा महात्मा" इति तदनन्यत्वनयभाप्योक्ता श्रुतिः । "स तपोऽतप्यत । स तपस्तप्त्वा स इदं सर्वमसृजत" इति तैत्तिरीयश्रुतिः । "स ऐक्षत लोकान्नु सृजाइति । स इमांल्लोकानसृजत" इत्यैतरेयश्रुतिः । "नामरूपे व्याकरोत्" इति शब्दार्थात्मकप्रपञ्चकर्तृत्वार्थकच्छन्दोगश्रुतिः । आदिशब्दात् "स विश्वकृत्स हि सर्वस्य कर्ता" "कर्तारमीशं पुरुषं ब्रह्मयोनिं" इत्यादेर्ग्रहः । ननु श्रुतित्वाविशेषे कर्तृत्वश्रुतेरेवान्यार्थता किं न स्यादिति चेन्न, कर्तृत्वश्रुतीनां बहुत्वेन बहुबाधस्यान्याय्यत्वात् । निषेधरूपतया निष्क्रियत्वश्रुतिः प्रबलेति चेत्, 'न हिंस्यात्' इति निषेधवाक्यादपि यागीयहिंसावाक्यस्य बलवत्त्वदर्शनादिति । विस्तृतञ्चैतन्न्यायामृते । अत एवाह—**बलादिति** । किञ्च—"व्याख्यानतो विशेषप्रतिपत्तिः" इति न्यायेन व्याख्यानरूपविशेषवचनाच्चैवमेवेत्याह—**अकर्मेति** ।

अकर्माऽक्लिष्टकारित्वान्नित्यत्वादज एव च ।

इति दशमतात्पर्योदाहृतब्रह्मतर्कस्मृत्यनुसारेणेत्यर्थः । सर्वेषां पञ्चम्यन्तानां "विष्णुरेव जिज्ञास्यं ब्रह्म" इति पूर्वसाध्येनान्वयः ।

चन्द्रिका

न च "यतः" इत्यादेः कारणानुवादेन जिज्ञासाविधायकत्वादनुवादे च यथाप्राप्ति तात्पर्यात् मानान्तरेणास्मदादेर्यादृशं कारणत्वं प्राप्तम्, तत्परमेवेदं वाक्यमिति युक्तम्, अस्यानुवादकत्वेपि "शास्त्रस्था वा तन्निमित्तत्वात्" इति न्यायेन भाष्योक्तश्रुतिप्राप्तकारणपरत्वात्।

प्रकाशः

कारणत्वपरं पूर्ववाक्यं प्रकारान्तरेण जीवे सावकाशमिति शङ्कते— **न चेति**। **यादृशमिति**। पराधीनमल्पं चेत्यर्थः। **शास्त्रस्था वेति**। आद्ये तृतीयपादे "तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिस्स्यात्" इति पञ्चमेऽधिकरणे, "यवमयश्चरुर्भवति" इत्यत्र यवशब्दः किं दीर्घशूकपरः उत प्रियङ्गुपर इति संशये, उभयत्र प्रयोगदर्शनादुभयपरस्तुल्यबलत्वाच्च विकल्प इति प्राप्ते, एकत्र मुख्यत्वे अन्यत्र गौणत्वेनाप्युपपत्तौ, नोभयत्र शक्तिकल्पना युक्ता। न च नियामकाभावः, "यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोतिष्ठन्ति" इति वाक्यशेषानुगुणशिष्टप्रयोगस्य दीर्घशूकविषयस्य तदननुगुणप्रियङ्गुविषयम्लेच्छप्रयोगापेक्षया बलवत्त्वेन तत्रैव शक्तिकल्पनात् दीर्घशूक एव यवशब्दार्थ इति सिद्धान्तितम्। 'शास्त्रस्थाः' शास्त्रीयव्यवहारा एव ग्राह्याः शास्त्रे, तन्मूलत्वात् श्रौतव्यवहाराणामिति, "शास्त्रस्थाः" इति सिद्धान्तसूत्रस्यार्थः। अत्र यथा यवादिशब्दानां वाक्यशेषानुगुणार्थपरत्वं, तथा 'यः' इत्यादिभाष्योक्तश्रुतिप्राप्तकारणपरत्वमेव न्याय्यं, न प्रत्यक्षादिप्रा-

प्रकाशः

स्मदादिकारणपरत्वमित्यर्थः । इदं च शांबरभाष्यादौ वाक्यशेषमुदाहृत्यार्थस्य निर्णीतत्वादेवमुक्तम् । यदा तु "संदिग्धे तु वाक्यशेषात्" इत्यनेन गतार्थत्वभिया तन्मूलकार्थप्रसिद्ध्याऽनार्थप्रसिद्धिबाधेनार्थनिर्णयः, तदा 'श्रुतिप्राप्त' इत्यस्य श्रुतिमूलविद्वत्प्रसिद्धिप्राप्तकारणपरत्वादित्यर्थः । तेन "विद्वद्वूढेश्च" इत्याद्यग्रेतनवाक्याविरोधः ॥ एतेन—यदत्र केन चित्प्रलपितं—स्वाप्नमानोरथिकपदार्थानां सत्यतया हिरण्यगर्भादिजीवस्य स्वप्नादिभूलोकमहार्णवादिसर्वस्रष्टृत्वसम्भवेन "यतो वै" इत्यादिवाक्यं तदनुवादकत्वेनाप्युपपन्नमिति, तन्निरस्तम् । "यतो वै" इत्यनेन वक्तृश्रोतृसाधारणस्थूलजगत्स्रष्टृत्वस्यैवानुवाद्यत्वात् । सर्वनाम्नस्सङ्कोचकाभावादित्युक्तत्वात्, न स्वप्नमनोरथादावसङ्कुचितसर्वस्रष्टृत्वं जीवस्य शङ्कार्हं, परकीयस्वाप्नपदार्थेऽन्यस्याकर्तृत्वात् । "सन्ध्ये सृष्टिराह हि" इत्यादिना स्वाप्नादिपदार्थेष्वपीश्वरस्यैव कर्तृत्वोक्तेश्च । "इतरव्यपदेशात्" इत्यादिसूत्रेषु जीवस्य स्वतन्त्रकर्तृतायाः निषिद्धत्वादित्युक्तत्वाच्च । असङ्कुचितस्वतन्त्रश्रुतिप्रसिद्धमुख्यस्रष्टृत्वस्य "यतो वै" इत्यनुवादसम्भवे तत्त्यागायोगाच्च । यदप्येकेनापि ब्रह्मशब्देन कारणत्वाद्यनेकालिङ्गस्य गौणत्ववर्णनं युक्तं, पूर्वाधिकरणे एकेनापि ब्रह्मशब्देन अनेकवेदान्तवाक्यानां बाधस्य सिद्धान्ते भाषितत्वादिति, तत्तुच्छं, एकेन सावकाशेनानेकनिरवकाशलिङ्गबाधायोगात् । पूर्वाधिकरणे त्वने-

प्रकाशः

कस्यापि बाधेन सिद्धान्तोत्थितिप्रकारस्तत्रैव प्रपञ्चितोऽस्माभिः । यच्चोक्तं—"यतो वै" इत्यादिवाक्योक्तकारणत्वस्य जीवेऽसम्भवेन ब्रह्मशब्दार्थत्यागेऽन्नमयादिकोशस्थानिरुद्धादिरूपेष्वपि ब्रह्मशब्दार्थत्यागस्स्यात् ।

एतन्नानावताराणां निधानं बीजमव्ययम् ।

इत्यादिस्मृत्या मूलरूपस्यैव जगत्कारणत्वेनावताररूपेषु तदभावात् । रूपाणां सविशेषाभिन्नत्वेऽपि तत्तद्व्यापाराणां व्यवस्थितत्वेन "अन्नाद्वै प्रजाः प्रजायन्ते" इत्यादिनानूद्यमानजगत्कर्तृत्वस्य कोशस्थानिरुद्धादिरूपेष्वसम्भवादिति, तत्तु स्वरूपभूतानादिमिथ्याज्ञानाविर्भावविजृम्भितमित्युपेक्षणीयम्, सर्वरूपाणां सर्वगुणयुक्तत्वेऽप्यनभिव्यक्तिमात्रेण तत्तद्व्यापाराणां व्यवस्थाङ्गीकारात् ।

अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते ।

इत्यादिस्मृतेः । "न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि" इत्यादौ सर्वरूपाणां निर्दोषाशेषसद्गुणत्वस्य सूत्रकृतैव प्रतिपादितत्वादिति । यद्यपि मूलरूपाभेदेन कोशस्थरूपेषु कारणत्वसम्भवाज्जीवस्यापि तदभेदेन कारणत्वादिकं कथं चिद्योज्यतामिति, तदप्रमाणकमनेकमानविरुद्धं "भोक्रापत्तेः" इति सूत्रकृतैव पूर्वपक्षितमित्यास्तामस्तकणबुसोत्पवनायास इति । एवं जीवे रूढित्यागे बाधकं यौगिकार्थविष्णुग्रहणे साधकं कारणत्वादिविष्णुलक्षणं सूत्रयता, ब्रह्मशब्दस्य विष्णौ विद्व-

चन्द्रिका

किं च—'कवीनां मते तदेव परमं ब्रह्मेत्याहुः' इति श्रुतौ विष्णौ विद्वद्रूढिरुक्ता।

प्रकाशः

द्रूढिस्मूचिता,

विद्वद्रूढिर्वैदिकास्यात् सा योगादेव लभ्यते।

इत्युक्तेः। तां पूर्वनये भाष्यादौ प्रसङ्गादुक्तामिह पूर्वपक्षिणाऽऽक्षिप्तां समर्थयते—**किञ्चेति**। एतेन—सूत्रे कारणत्वस्यैव लोकप्रसिद्धिबाधकत्वस्योक्तत्वेन, विद्वत्प्रसिद्धेस्तद्बाधकत्वस्यानुक्तत्वात्, विद्वद्रूढ्यादिसमर्थनेन, तया लोकप्रसिद्धिबाधोक्तेस्सूत्रानानुगुण्यमिति कस्यचित्प्रलपनं प्रत्युक्तं, योगार्थोपादानोक्तयैव सूत्रे तत्सूचनात्। अत एवेह टीकायां—" यद्यपि विष्णौ ब्रह्मशब्दो विद्वद्रूढियुक्तः, तथाऽप्यभ्युपगम्योक्तिरियम् " इति ग्रन्थेन विद्वद्रूढ्युक्तयैवाज्ञरूढिबाधे वक्तव्ये सूत्रे कारणत्वाद्युक्तया तद्बाधोक्तिर्विष्णौ रूढ्यभावाभ्युपगमवादेनेत्युक्तम्। विद्वद्रूढ्युक्तयैव सूत्रे लोकरूढिबाधोक्तौ जिज्ञासाहेतुभूतगुणपूर्तिसिद्धिर्नस्यादित्यभ्युपगमवादप्रयोजनं ध्येयम्। यद्वा " स विष्णुराह हि " " तं ब्रह्मेत्याचक्षते " इति प्रयोगबाहुल्यरूपरूढेर्देवमीमांसान्तिममूत्रेऽभिहितत्वादिह तद्व्युत्पादनम्। तथा च सूत्रकृदभिप्रेतत्वात्, तद्वर्णनमिह नानुचितमिति ध्येयम्। " तदेव " इति तच्छब्देन विष्णुरेव परामृश्यतइत्यस्य " यमन्तस्समुद्रे " इत्यादिभाष्ये,

अम्भस्यपार इत्युक्तो नारायणपदोदितः।

इत्यादिपूर्वनयान्तिमानुव्याख्यानादौ च सिद्धत्वात्, रूढिव्युत्पाद-

चन्द्रिका

नहि 'चैत्रः परमधार्मिकः' इत्युक्ते धार्मिकत्वादन्येनाकारेण परमत्वं भाति। न च स्वस्यामुख्यत्वे, मुख्यान्तरे वा सति, स्वस्य परमत्वम्। न चैवं गुणपूर्त्यलाभः, "बृहन्तो हि" इति श्रुत्या योगस्यापि

प्रकाशः

नांशस्यास्पष्टत्वात्परमपदोक्तमुख्यत्वान्यथानुपपत्त्या ब्रह्मशब्दस्य रूढिं सिसाधयिषुः पारम्यं ब्रह्मत्वे* एवान्वेति, नान्यत्रेति तावत्साधयति—**नहीति**। तथा च ब्रह्मशब्दार्थत्वेनैव परमत्वमिति भावः। ततः किमित्यत्र आह—**नचेति**। ततोऽपि किमिति चेत्, 'रूढिं विना परमपदोक्तमुख्यत्वानुपपत्तेः रूढिः सिद्धा' इतिवक्ष्यमाणेन सम्बन्धः। तत्र बाधकमाशङ्क्य निरस्यति—**न चैवमिति**।

---

* 'ब्रह्मत्वे' ब्रह्मशब्दार्थत्वे। "तदेव ब्रह्म" इति श्रुतौ हि 'ब्रह्म' इत्यस्य ब्रह्मशब्दार्थ इत्येवार्थः 'कवीनां' इत्यस्य नन्वयपरिहारायाश्रयणीयः। ब्रह्मशब्दशक्तिजन्योपस्थितिविषयत्वरूपब्रह्मशब्दार्थत्वघटकोपस्थित्यन्वयस्य कविपदार्थे एवं सति लाभात्। एतत्पर्यवसितार्थ एव "कवीनांमते" इत्यादिचन्द्रिकायां कथितो न तु "मते" इत्यस्याध्याहारस्तदभिमतः। सति चैवं 'परमं ब्रह्म' इत्युक्तेः ब्रह्मशब्दार्थत्वेनैव परमत्वमिति भाववर्णनमनुपदमेव कृत संगच्छते। इतरथा ब्रह्मत्वेन परमत्वमिति भावो वर्णनीयः स्यात्। 'परमधार्मिकः' इत्युक्त्या धार्मिकतोत्कर्षसिद्धावपि धार्मिकशब्दरूढ्यसिद्धिवत्, अत्रापि ब्रह्मत्वोत्कर्षसिद्धावपि ब्रह्मशब्दरूढ्यसिद्धिरिति दूषणमनुद्धार्यं च स्यात्। 'ब्रह्म' इत्यस्य 'ब्रह्मशब्दार्थः' इत्यर्थकले तु 'परमं ब्रह्म' इत्युक्ते 'परमो ब्रह्मशब्दार्थः' इत्येवोक्तत्वेन उक्तभाववर्णनं, ब्रह्मशब्दार्थत्वेन परमत्वस्य ब्रह्मशब्दरूढिव्याप्यत्वेन तादृशपरमत्वान्यथानुपपत्त्या ब्रह्मशब्दरूढिसिद्धिश्च वक्ष्यमाणा निष्प्रत्यूहेति ध्येयम्।

चन्द्रिका

सत्त्वात् । पङ्कजादौ रूढेरनतिप्रसङ्गेऽपि प्रमितत्वाद्योगवत्प्रकृते योगस्यानतिप्रसङ्गेऽपि "तदेव" इति श्रुत्या रूढेरपि सत्वाच्च । रूढिं विना परमपदोक्तमुख्यत्वानुपपत्तेः*। उपपत्तौ वा तावतैव प्रकृतसिद्धेश्च।

प्रकाशः

रूढत्वइत्यर्थः । योगस्यानतिप्रसङ्गाद्रूढिर्व्यर्थेत्युक्तमित्यत आह— **पङ्कजादाविति** । एवं बाधकं निरस्य प्रकृतमाह—**रूढिमिति** । "रूढिरुक्ता" इति पूर्वेण पञ्चम्या अन्वयः । **तावतैवेति** । मुख्यत्वेनैव विष्णुपरत्वसिद्धेरित्यर्थः । उक्तं च सुधायां—

सिद्धत्वाद् ब्रह्मशब्दस्य विष्णौ स्पष्टतया श्रुतौ ।

इत्येतद्व्याख्यावसरे "मुख्यामुख्ययोर्हि मुख्यार्थस्तावद्गाह्यशक्तिवशात्तस्यैवादौ बुद्धौ सन्निधानात्" इत्यादि । एवमर्थापत्त्या रूढि-

---

* परमपदोक्तं मुख्यत्वं च स्वसजातीयद्वितीयरहित्यरूपमिति "न च स्वस्यामुख्यत्वे" इत्यादि पूर्ववाक्यात्फलति । तत्र 'अमुख्यत्वे' इत्यस्य मुख्यत्वप्रयोजकब्रह्मशब्दार्थत्वराहित्ये इति, 'मुख्यान्तरे' इत्यस्य तादृशधर्मवद्वस्त्वन्तरे इति चार्थात् । इत्थं च स्ववृत्तिब्रह्मशब्दार्थत्वाश्रयस्वातिरिक्तवस्तुशून्यत्वरूपं ब्रह्मशब्दार्थत्वेन परमत्वं रूढयादिना ब्रह्मशब्दार्थभूतानां जीवादीनां सत्त्वेनान्यथानुपपन्नं भगवदसाधारणविद्वद्रूढिमादायैव पर्यवस्यतीति भावः । विष्णुर्विलक्षणब्रह्मशब्दरूढिमान् स्ववृत्तिब्रह्मशब्दार्थत्वाश्रयवस्त्वन्तरशून्यत्वादिति रूढिसाधकानुमानं ध्येयम् । सा च रूढिः श्रौतकविशब्दबलाद्विद्वद्रूढिरित्युच्यत इत्यलम् ॥

चन्द्रिका

प्रयोगबाहुल्यरूपरूढेः 'आहुः' इत्यनेनोक्तत्वाच्च । ननु न प्रयोगबाहुल्यं रूढिः, किन्तु समुदायशक्तिः । पङ्कजादेरपि पद्मत्वजात्यंशे समुदायशक्तिरेव, प्रयोगप्राचुर्येण झडिति तेन जातिप्रतीतेरिति चेत्तर्हीहापि भाष्ये वक्ष्यमाणश्रौतस्मार्तप्रयोगप्राचुर्येण विदुषां ब्रह्मशब्देन विष्णुव्यक्तिप्रतीतेस्तत्र तस्य समुदायशक्तिरस्तु ।

प्रकाशः

सिद्धिमुक्त्वा कण्ठतस्तामाह—**प्रयोगेति** । समुदायशक्तौ मानमाह—**प्रयोगप्राचुर्येणेति** । 'तेन' पङ्कजपदेन । सा प्रतीतिरिहापि तुल्येत्याह—**तर्हीति** ।

प्रयोगमात्रबाहुल्यं रूढिरित्यभिधीयते ।

इत्यनुव्याख्यानानुसारेण प्राचीनपक्षः । अयं च,

बहुलातिप्रयोगतः । रूढमित्येव साध्यं स्यात्

इत्यनुव्याख्यानानुसारेण, अत्र प्रयोगप्राचुर्येण समुदायशक्तिरूपरूढिसाधनात् । अस्मिन् पक्षे श्रुतौ "आहुः" इत्येतत्प्रयोगप्राचुर्यप्रदर्शनपरं । तेन शक्तिः कल्प्येति भावः । यद्यपि न समुदायशक्तीरूढिरेकाक्षरप्रत्ययादौ समुदायाभावात्, किन्त्वखण्डशक्तिः । उक्तं च तर्कताण्डवे—"अखण्डशक्त्या प्रतिपादकत्वं रूढिः" इति । तथाऽपि प्रयोगबाहुल्यातिरिक्तशक्तावेव तात्पर्यम् । यद्वा पररीत्या "तुष्यतु दुर्जनः" इत्यभिधानमेतत् । एतेन "भगवति च विद्वद्बूब्या" इत्यादिपूर्वाधिकरणटीकावाक्यं विवृतम् । "विद्वदविद्वद्बू-

चन्द्रिका

विद्वद्रूढेश्च, यवादिशब्दानां प्रियङ्ग्वादिषु म्लेच्छप्रसिद्धितोऽपि दीर्घशूकेष्वार्यप्रसिद्धेरिव, बालानां चित्रलिखितसिंहे सिंहप्रसिद्धेरिव दुर्बलातोऽविद्वद्रूढितो बलीयस्त्वात् । पिकादिशब्दानां चार्यप्रसिद्धचविरोधएव म्लेच्छप्रसिद्धितः कोकिलाद्यर्थत्वमुक्तं पिकनेमाधिक-

प्रकाशः

ब्योर्विद्वद्रूढेरेव मुख्यत्वात्" इति तत्रत्यटीकावाक्यं विवृण्वानः, अस्तु विद्वद्रूढिस्ततश्च किमित्यत आह—**विद्वद्रूढेश्चेति** । 'बलीयस्त्वात्' इत्यन्वयः । तस्यापि "विष्णुरेव ब्रह्म" इति पूर्वसाध्येनान्वयः । तत्र वैदिकलाकिकौ दृष्टान्तावाह—**यवादीति** । उक्तमधिकरणशरीरं प्राक् (२९२पु.) । यवादिशब्दानां प्रियङ्ग्वादिष्वनार्यप्रसिद्धौ सत्यामपि तां बाधित्वा, आर्यप्रसिद्धिबलेन दीर्घशूकाद्यर्थत्वमुक्तमित्यार्यप्रसिद्धेर्बलीयस्त्वं यथेत्यर्थः । तत्सिद्धान्ते वाक्यशेषार्यप्रसिद्धचोर्द्वयोरप्युक्तत्वात् "भाष्योक्तश्रुतिप्राप्त" इत्यत्र (२९२पु.-४प.) च तदुदाहरणं न विरुद्धमिति ध्येयम् । 'बालानां' अज्ञानाम् । अयं चाज्ञरूढेर्दौर्बल्ये दृष्टान्तः । ननु क्व चिदनार्यप्रसिद्धोऽप्यर्थो वेदेऽपि ग्राह्य इत्युक्तमित्यत आह—**पिकादीति** । आद्ये तृतीयपादे "चोदितन्तु प्रतीयेताविरोधात्प्रमाणेन" इति षष्ठेऽधिकरणे आर्यप्रसिद्धिहीनानां पिक–नेम–सत–तामरसादिशब्दानां किं निरुक्तादिवशेनार्थकल्पनमुत म्लेच्छप्रसिद्धचनुरोधेन कोकिलाद्यर्थत्वमिति संशये, म्लेच्छेषु पदानामर्थानां च प्रायशो विप्रुतिदर्शनान्न तत्प्रसिद्धिर्मा-

चन्द्रिका

रणे । राजशब्दस्य पालनादिकर्तर्यार्याणां प्रयोगेऽपि

प्रकाशः

नमतो निरुक्तादिद्वाराऽर्थकल्पनमिति प्राप्ते, श्रुतौ प्रयोगात् पदानि तावदविप्लुतानि । न च तेषामार्यप्रसिद्धः कश्चिदर्थोऽस्ति, यत्र मुख्यानि भूत्वा म्लेच्छेषु गौणानि विप्लुतिं गच्छेयुः । तस्मान्म्लेच्छप्रसिद्ध एवार्थेऽमीषामिति सिद्धान्तितम् । प्रकृते चार्यप्रसिद्धिशब्दितविद्वद्रूढिविरोधोऽस्तीति भावः । ननु सत्यप्यार्यप्रसिद्धि विरोधे म्लेच्छप्रसिद्धेः क्वचिद्बलवत्त्वमुक्तमित्यत आह—**राजशब्दस्येति** । द्वितीये तृतीयपादे "अवेष्टौ यज्ञसंयोगात् क्रतुप्रधानमुच्यते" इति द्वितीयेऽधिकरणे राजसूयप्रकरणे "आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणम्" इति विहितामवेष्टिनामिकामिष्टिं प्रकृत्य श्रुतं "यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधाय आहुतिमाहुतिं हुत्वा तमभिव्याहरेत् । यदि राजन्य ऐन्द्रं, यदि वैश्यो वैश्वदेवं" इति वाक्यमुदाहृत्य, ब्राह्मणादीनामवेष्टिनामकेष्टौ प्राप्तानाम्मध्ये निधानविशेषं प्रति निमित्तार्थानि वचनानि अप्राप्तानां प्रापकाणि वेति संशये, "राजा राजसूयेन" इति श्रुतस्य राजशब्दस्यानार्यप्रसिद्ध्या क्षत्रियत्वनिमित्तत्वेन रूढत्वावगमेऽपि, तत्प्रसिद्धेरप्रामाण्यादार्यावर्तप्रसिद्ध्या ततो बलीयस्या जनपदरक्षणरूपराज्यकर्तृत्वनिमित्तत्वावगमेन वर्णत्रयसाधारणत्वादवेष्टौ प्राप्तानां निमित्तार्थानि वचनानीति प्राप्ते, "राजानमभिषेचयेत्" इत्यभिषेकविधौ

चन्द्रिका

"राजाऽसे" इति आर्यवरपाणिनिस्मृत्यनुगृहीतत्वात् क्षत्रियजातिविषया म्लेच्छप्रसिद्धिरेव ग्राह्येत्युक्तमवेष्टिनये। नचात्राविद्वद्बूढिः स्मृत्यनुगृहीता,

प्रकाशः

राज्ययोगात् प्रागेव क्षत्रियएव प्रयोगाद्बूढ एव राजशब्दः। किञ्च पाणिनिरपि "तस्य कर्मणि" इत्यधिकृत्य "पुरोहितादिभ्यो यक्" इति राजशब्दाद्यक्प्रत्ययेन राज्यशब्दनिष्पत्तिं ब्रुवन् रूढमेव मन्यते। अन्यथा अन्योन्याश्रयापत्तेः। न च पाणिनिस्मृतिरप्रमाणं, अनार्यप्रसिद्धेर्मूलत्वसम्भवात्। अतोऽभियुक्तस्मृत्या सम्भवद्गौणभ्रान्त्यादिमूलस्यार्यावर्तप्रयोगस्य बाधादभियुक्तस्मृत्यनुगृहीतानार्यद्राविडप्रसिद्ध्या राजशब्दो रूढ्या क्षत्रियवचन इति ब्राह्मणादावेष्टौ प्राप्त्यभावादप्राप्तप्रापकाणि वचनानीति सिद्धान्तितम्। तथा चार्यप्रसिद्धेर्बलवत्त्वमिति न विरोध इति भावः। **राजाऽसइति**। पञ्चमस्य प्रथमे "पत्यन्तपुरोहितादिभ्यो यक्" इति सूत्रम्। तस्यार्थः—पत्यन्तात्प्रातिपादिकात् पुरोहितादिभ्यश्च प्रातिपदिकेभ्यो भावकर्मणोरर्थे यक्प्रत्ययो भवति, सैनापत्यं पौरोहित्यमिति। तत्र पुरोहितादिगणपाटे "राजाऽसे" इति पठितम्। तस्यायमर्थः—'सः' इति समासस्य संज्ञा। 'राजा' राजन्शब्दः, 'असे' असमासे, यकमुत्पादयति भावकर्मणोरिति। राज्ञो भावः कर्म वा राज्यम्। समासे तु आधिराज्यं, ब्राह्मणादित्वात् प्यञेवेति। 'अवेष्टिनये' अवेष्ट्यधिकरणे। **न चात्रेति**।

चन्द्रिका

प्रत्युत "तदेव" इतिश्रौतावधारणविरुद्धा । अमुख्यत्वाविशेषेऽपि गौणी-

प्रकाशः

ब्रह्मशब्दे इत्यर्थः । "ब्रह्माणि जीवाः सर्वेऽपि" इति वचनं त्वमुख्यवृत्त्याऽप्युपपन्नमिति भावः । **प्रत्युतेति** । उक्तं च—

तदेव ब्रह्मपरमिति सावधृतिर्जगौ ।
यतोऽनो ब्रह्मशब्दस्य तत्रैव नियतत्वतः ॥

इत्यानन्दमयनयानुव्याख्याने । न चैवमपि नामधेयपादे "बर्हिराज्ययोरसंस्कारे शब्दलाभादनच्छब्दः" इति सप्तमाधिकरणे बर्हिराज्यशब्दयोस्संस्कृततृणविशेषाज्ययोर्याज्ञिकार्यप्रसिद्धौ सत्यामपि, तां बाधित्वा अनार्यप्रसिद्ध्या तृणाज्यसामान्यपरत्वमङ्गीकृतमिति वाच्यम्, संस्कृतमात्रे आर्यप्रयोगेऽपि तृणाज्यगतजातिं विना तत्राप्रयोगेण जातिनिमित्तत्वस्यार्याणामपि सम्मतत्वात्, असंस्कृते याज्ञिकाप्रयोगस्य प्रयोजनाभावेनोपपत्त्याऽनार्यप्रसिद्धेरार्यप्रसिद्ध्यविरोधात् । उक्तं च शास्त्रदीपिकायाम्—"न च शास्त्रस्थसर्वलोकविरोधः, तत्रापि जातेरनपगमादित्युक्तम्" इत्यादि । अत एव ग्रन्थकारैरपि पिकनेमाधिकरणतात्पर्योक्त्यैव तत्तात्पर्यमुक्तप्रायमिति त्यक्तमिति ध्येयम् । ननु रूढित्वाविशेषेऽपि कथमेकस्याः प्राबल्यमित्याशङ्क्य दृष्टान्तोक्तिपूर्वं हेतुं वदन्निरस्यति—**अमुख्यत्वेति** । यद्यपीदं "समाकर्षात्" इत्यधिकरणव्युत्पाद्यम् । तथाऽपि शिष्यहिताय वक्ष्यमाणमेवेहोच्यते, न त्वेतदधिकरणप्रमेयतया । तथा च

चन्द्रिका

लक्षणावृत्त्योः प्राभाकरमते* गौण्याः, मतान्तरे लक्षणाया जायस्त्ववत्, लक्षणात्वाविशेषेऽपि "प्रोद्गातृणाम्" इत्यत्र बहिरङ्गषोडशर्त्विग्लक्षणातोऽन्तरङ्गप्रस्तोत्रादिचतुष्टयलक्षणाया ज्यायस्त्ववत्, लक्षणामा-

प्रकाशः

वक्ष्यति तत्रैव ग्रन्थकार इति ध्येयम् । 'मतान्तरे' तार्किकादिमते । **प्रोद्गातृणामिति** । तृतीयस्य पञ्चमे पादे "उद्गातृचमसमेकस्य† श्रुतिसंयोगात्" इत्यष्टमाधिकरणे "प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातृणां प्र यजमानस्य प्रैतु सदस्यानां" इति मन्त्रमुदाहृत्य चिन्तितम् । 'प्रोद्गातृणाम्' इति श्रुतं चमसमुद्गातैको भक्षयेत्, उत सर्वे, अथ वा सुब्रह्मण्यादन्ये सामगायिनः, यद्वा तत्सहिताश्चत्वार इति संशये, उद्गातैको भक्षयेत्, प्रातिपदिकार्थविरोधिनो बहुवचनार्थस्य बहुत्वस्याविवक्षितत्वादित्याद्यं पक्षमुक्त्वा, लक्षणायार्थवत्त्वसम्भवेऽविवक्षायोगात्, प्राकरणिकसर्वपुरुषेष्वविशेषाल्लक्षणेति षोडशर्त्विजां भक्षणमिति द्वितीयमुत्थाप्य, श्रुत्यर्थसम्भवेन

---

*गौण्यां धर्मभेदेन सादृश्यस्य भेदे सत्यपि सादृश्यत्वेनानुगते तात्पर्यादेकार्थत्वं, लक्षणायां तु क्व चित्संबन्धे, क्व चित्तद्वारा पूतत्वे, क्व चिच्छीतलत्वादाविति विलम्बेनार्थधीरिति गौण्या ज्यायस्त्वम् । गौण्यां सादृश्यं सर्वत्र विशेषणम्, लक्षणायां संबन्धस्तु क्व चिदेवेति च विशेषे ज्ञेयः । एकस्यामेव वृत्तौ तारतम्ये दृष्टान्तोक्तिः **मतान्तर इति** । भ.तार्किकादिमते गौण्या लक्षितलक्षणापर्यवसायित्वात्तदपेक्षया लक्षणामात्रस्य ज्यायस्त्वमिति भावः ।

†'एकः' इति मुद्रितमीमांसापुस्तकेषु पाठः ॥

चन्द्रिका

त्रान्निरूढलक्षणाया ज्यायस्त्ववत्,* मुख्यत्वाविशेषेऽपि योगाद्रूढेर्ज्या

प्रकाशः

लक्षणाऽयोगात् उद्गायन्तीत्यवयवप्रसिद्ध्या गानकारिणामपसुब्रह्मण्यानां त्रयाणां छन्दोगानां भक्षणमिति तृतीयमुपन्यस्य, उत्पूर्वस्य गायतेरसमुदायप्रसिद्धिरूपरूढ्या द्वितीयसामभक्तिविषयत्वेन उद्गातुरेव तद्गातृत्वेन योगेन त्रयाणामप्राप्त्या बहुवचनानुपपत्तेः, लक्षणाया आवश्यकत्वेनोद्गातृप्रवचनसम्बन्धावान्तरसामान्यात्सुब्रह्मण्यानां छन्दोगानां चतुर्णां भक्षणमिति चतुर्थः पक्षः स्थापितो भाष्ये। अत्र यथा बहिरङ्गसर्वषोडशर्त्विग्लक्षणातोऽन्तरङ्गप्रस्तोतृप्रोद्गातृप्रतिहर्तृसुब्रह्मण्यरूपचतुष्टयलक्षणाया ज्यायस्त्वं, तद्वदित्यर्थः। अत्र यद्यपि वार्तिककारश्चतुर्थमपि पक्षं निरस्यैकस्तोत्रसम्बन्धस्य सदसि सन्निधानस्य भक्षणव्यापारस्य च ततोऽप्यन्तरङ्गावान्तरसामान्यस्यानुरोधेन प्रस्तोत्रादिषु† त्रिष्वेव लक्षणेत्यपसुब्रह्मण्यानां त्रयाणामेव भक्षणमिति पञ्चमपक्षं सिद्धान्तितवान्। तथापि भाष्ये चतुर्थस्य स्थापितत्वात् प्राभाकरैरङ्गीकाराच्च 'चतुष्टय' इत्यवोचदिति ध्येयम्। यद्वा—न चतुष्टये तात्पर्यं, किन्त्वन्तरङ्गलक्षणायामेवेति न दोषः। **निरूढेति**। शीघ्रमर्थोपस्थापकत्वादिति भावः। 'रूढेः' इत्य-

* अमुख्यवृत्तौ तारतम्यदर्शनेऽपि विद्वदविद्वद्रव्योर्मुख्यवृत्तित्वात्कथमत्र तारतम्यमित्यतस्तत्रैव दृष्टान्तान्तरमाह—**मुख्यत्वेति**॥

†'स्तोत्रकारिषु' इति क चित्पाठः.।

चन्द्रिका

यस्त्ववत्, गवादिशब्दानामनेकार्थेषु रूढत्वेऽपि प्रकरणोपपदाद्यभावे सास्नादिमद्वचक्तेरेव प्रतीतिवच्च, रूढित्वाविशेषेऽपि विद्वद्रूढेरेवासम्भाविताज्ञानमूलाया बलीयस्त्वोपपत्तेश्च । "नारायणोऽसौ परमो विचिन्त्यः" "नारायणं महाज्ञेयं" इत्यादिश्रुतौ जिज्ञास्ये नारायणशब्दश्रवणाच्चेति ॥

प्रकाशः

त्राप्ययमेव हेतुरिति भावः । **अनेकार्थेष्विति** । स्वर्गेषुपशुवाग्वज्रादिङ्नेत्रादिष्वित्यर्थः । **असम्भावितेति** । बलीयस्त्वे हेतूक्तिः । समाख्याबलाच्च ब्रह्मशब्दार्थो विष्णुरित्याह—**नारायण इति** ।

यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते नापरेण ।

नारायणोऽसौ परमो विचिन्त्यो मुमुक्षुभिः कर्मपाशादमुष्मात् ।

इति पैंगिश्रुतिः ।

नारायणं महाज्ञेयं विश्वात्मानं परायणम् ।

इति तैत्तिरीयश्रुतिः । अत्रापि पञ्चम्यन्तानां "विष्णुरेव ब्रह्म" इत्यन्वयः । जिज्ञासासूत्रे विचारविधायकनानावाक्यानामुदाहरणत्वेऽप्यविप्रतिपन्नवाक्यत्यागेन विप्रतिपन्नवाक्येषु कारणत्वादितत्तद्वाक्यस्थविष्णुलक्षणप्रदर्शनमुखेन तत्तद्विध्युद्देशगतब्रह्मात्मादिशब्दस्य विष्णुपरत्वसमर्थनार्थमस्य लक्षणसूत्रस्य प्रवृत्तत्वात्, "नारायणोऽसौ" इत्यादिश्रुतेश्च विष्णौ निरूढश्रुतिलिङ्गाद्युपेततया विष्ण्वर्थकत्वेन निर्णीतत्वात् भवत्यत्र समाख्येति भावः । एतेन—विध्युद्देशगतब्रह्मपदस्वार-

प्रकाशः

स्थानुरोधात् "यतो वै" इति पूर्ववाक्यस्थासङ्कुचितकारणत्वाद्युपेततया ब्रह्मपरत्वेऽपि, पूर्वोत्तरभागयोरविरोधाय जीवपरयोरभेद एव स्वीक्रियताम्, त्वन्मते जीवब्रह्मणोर्विरुद्धधर्मवतोरप्यभेदबोधने लौकिकविरोधदृष्टेरकिञ्चित्करत्वादीश्वरस्याचिन्त्याद्भुतमहिम्नैव निरवयवत्वैकदेशकर्तृत्वयोरिव शुष्कतर्कागोचरत्वेन सर्वविरोधसमाधानसम्भवादिति कस्य चित्प्रलपनं प्रत्युक्तम्, विष्णुग्रहणे महायोगविदूढिन्यां परममुख्यार्थस्यैव लाभेन विश्युद्देशास्वारस्याभावात् । जीवत्यागे भ्रान्तेरेव त्यागेन श्रुत्यर्थाबाधाच्च । वक्ष्यति चाभिमानिनये युक्तिविरोधेन मृदादिशब्दैरभिमानिग्रहणे मुख्यार्थस्यैव ग्रहणेन श्रुत्यर्थाबाधादित्यादौ जीवपराभेदस्याप्रामाणिकत्वानेकमानविरुद्धत्वयोरन्यत्र विस्तृतत्वाच्च । प्रामाणिकस्यैवाचिन्त्यशक्तया घटनाङ्गीकारात्, अल्पशक्तिजीवाभेदेचाचिन्त्यशक्तेरेव हानिप्रसङ्गेन, तयाऽभेदकृतविरोधसमाधानस्य कपोणिगुडायितत्वात् । "नारायणोऽसौ" इत्यादिसमाख्याश्रुतौ स्पष्टं भेदादेः प्रतिपादनाच्च यत्किञ्चिदेतत् ॥ यदपीश्वरे अचिन्त्यशक्तयैव शुष्कतर्कागोचरत्वेन सर्वविरोधमपह्नुवानस्तस्य जीवाभेदे तर्कागोचरत्वादि कथं विस्मरसीत्यादिवल्गनं, तदपि प्रत्युक्तं, तस्याप्रामाणिकत्वात् । अल्पशक्तिजीवाभेदे महैश्वर्यस्यैव हानेरित्यादेस्तत्र तत्र बहुधा प्रतिपादितत्वात् । तत्सर्वमनाकलयतो विरुद्धं चाकलयत आत्मीयदोषं सर्वज्ञतमग्रन्थकर्तर्यारोपयतस्तव महापातकिनः प्रतिवचनानर्हत्वादुपेक्षैव कार्येत्यास्तां तावत् ॥

चन्द्रिका

सुधायां तु—ब्रह्मशब्दः किं प्रसिद्धजीवपरः उतार्थान्तरपर इति सन्दिह्यान्त्ये तस्यार्थस्य तद्वाचितायास्तत्र तात्पर्यस्य च कल्प्यत्वात् गौरवम् । आद्ये तु लाघवं, जीवस्याकल्प्यत्वात्, "बृह जाति-जीव" इत्यभिधानाच्छक्तेरपि क्लृप्तत्वादबाधेन तात्पर्यस्यापि सिद्धत्वादिति पूर्वपक्षितम् । तत्रात्रैव "तद्ब्रह्म" इति वाक्यएव ब्रह्मशब्दस्य न विष्णुपरत्वमिति न विवक्षितं, किंतु सर्वत्र । अन्यथा सिद्धान्तिनं प्रत्यर्थादेः कल्प्यत्वोक्तिरयुक्ता स्यात् । तत्रत्यं "नहि ब्रह्मशब्दो गुणपूर्तिवाचीत्येतावता सर्वत्र तत्परो भवति" इति वाक्यं तु तत्पूर्व-

प्रकाशः

एवं टीकातात्पर्यमुक्त्वा, "टीकासु च यदस्पष्टं" इति प्रतिज्ञामनुसरन्, सुधातात्पर्यं प्रतीतानुपपत्तिनिरासेनानूद्याह—**सुधायांत्विति** । 'जीवपरः' इत्यनेन 'प्रसिद्धार्थपरः' इत्यत्रार्थशब्दो जीवमात्रार्थक इत्युक्तं भवति । शक्तौ 'अभिधानात्' इति हेतुः । एवमनूदितस्य पूर्वपक्षस्याशयमाह—**तत्रेति** । सुधायामित्यर्थः । 'अत्रेव' टीकायामिवेत्यर्थः । **सर्वत्रेति** । 'विष्णुपरत्वं नेति विवक्षितं' इत्यन्वयः । किमर्थमेवमित्यतोऽनुपपत्तिं स्वयमेवाह—**अन्यथेति** । यद्येवं तर्हि "न हि ब्रह्मशब्दः" इत्यादिवाक्यमयुक्तं, तत्र गुणपूर्तिवाचितया क्वचिद्विष्णुपरत्वमङ्गीकृत्य जिज्ञासावाक्यएव तदाक्षिप्यत इति प्रतीतेरत आह—**तत्रत्यमिति** । सुधागतमित्यर्थः । 'वाक्यं तु' इत्यन्वयः । तत्रैवं वाक्यक्रमः—"तत्र संदेहः, 'तद्ब्रह्म' इत्ययं ब्रह्मशब्दः

चन्द्रिका

पक्षे क्वचिद्गुणपूर्तिवाचिताङ्गीकारेण न प्रवृत्तम् । किंतु—ब्रह्मशब्दो गुणपूर्तिवाची न वेत्येव सन्दिह्यतां, किं तात्पर्यसंदेहेनेति शङ्कायां, वाचकत्वे सिद्धेऽपि तात्पर्यासिद्ध्या विवक्षितार्थासिद्धेर्नेत्थं सन्देहः, किं तु तात्पर्यसन्देह एव दर्शनीय इति परिहर्तुम् । अत एवैतद्वाक्यं संदेहावसरएव कृतम् । "—'तद्ब्रह्म' इत्ययं ब्रह्मशब्दः" इति विशिष्य संशयधर्मिनिर्देशस्तु पूर्वोक्तजिज्ञासाक्षेपेण सङ्गतिं दर्शयितुं, नत्वत्रैव क्वचिद्ब्रह्मशब्दस्य विष्णुवाचित्वाङ्गीकारेण पूर्वपक्ष इति दर्शयितुम् ।

प्रकाशः

किं प्रासिद्धार्थपर उतार्थान्तरपर इति । न हि ब्रह्मशब्दो गुणपूर्तिवाचीत्येतावता सर्वत्र तत्परो भवति । शक्तितात्पर्ययोरन्यत्रापि सत्त्वात् " इति । **न वेति** । अर्थान्तरवाची वेत्यर्थः । **विवक्षितेति** । पूर्वपक्षे विवक्षितस्य जीवरूपार्थस्य, सिद्धान्ते विवक्षितस्य ब्रह्मरूपार्थस्यासिद्धेरित्यर्थः । 'परिहर्तुं प्रवृत्तं' इत्यन्वयः । 'अत एव' उक्ततात्पर्यकत्वादेवेत्यर्थः । नन्वेवं " गुणपूर्तिवाचीत्येतावता तत्परो भवति " इत्येतावतैव पूर्तौ 'सर्वत्र' इति व्यर्थमिति चेत्, वाचकत्वेन क्वचिद्वाच्ये तात्पर्यसिद्धावपि सर्वत्र वाच्ये वाचकस्य तात्पर्यावश्यकत्वाभावेन, प्रकृते ब्रह्मशब्दस्य पूर्वपक्षाद्यभिप्रेतार्थवाचकत्वसिद्धावपि तात्पर्यासिद्ध्या तात्पर्यसन्देहस्यैव दर्शनीयत्वादित्याशयात् । **अत्रेवेति** । टीकायामित्येत्यर्थः । अत्र सर्वत्र ब्रह्मशब्दस्य विष्णुपरत्वाक्षेपेणैव पूर्वपक्ष इति स्थितम् । तत्रानूदिते पूर्वपक्षे अनुपपत्तिमाशङ्क्या-

चन्द्रिका

न च शक्त्यभावेऽपि लक्षणादिना तात्पर्यसम्भवात् सिद्धान्तिनं प्रति शक्तेः कल्प्यत्वोक्तिरयुक्तेतिवाच्यम्, लक्ष्येऽर्थे योगासम्भवेन तदधीनगुणपूर्त्यसिद्धेः सिद्धान्तिना लक्षणादेर्वक्तुमशक्यत्वात् । न चावयवशक्तेः क्लृप्तत्वेन कल्प्यत्वोक्त्ययुक्तिः, गुणपूर्तेरेवाभावेन तत्र बृहतेश्शक्त्यक्लृप्तेरिति ॥ सिद्धान्तस्तु—

यन्न दुखेन सम्भिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च सुखं स्वर्गपदास्पदम् *॥

इति श्रुतेस्स्वर्गशब्दस्य चन्दनादिरूपप्रसिद्धार्थत्यागेनाप्रसिद्धार्थपरत्ववद्ब्रह्मशब्दस्यापि "यतो वै" इत्यादिवाक्यशेषात् प्रसिद्धार्थत्यागेनालौकिकार्थपरत्वोपपत्तिरिति । यद्वाऽलौकिकविशेष्यपरत्वे गौर-

प्रकाशः

ह—**नचेति** । सत्यं लक्षणयाऽपि तात्पर्यं सम्भवतीति, तथाऽपि सिद्धान्तिना तथाङ्गीकर्तुमशक्यत्वादेवमुक्तमित्यर्थः । **गुणपूर्तेरिति** । अर्थे सति तत्र शक्तिः, शब्दस्य गुणपूर्तिरूपार्थे असम्भावनयाऽसति, कथं तत्र शक्तिरित्यर्थः । एवं पूर्वपक्षाशयोक्त्याऽनुपपत्तिं निरस्य, दृष्टान्तोक्तिपूर्वं सिद्धान्ताशयमाह—**सिद्धान्तस्त्विति** । **वाक्यशेषादिति** । जीवेऽसम्भावितकारणत्वबोधकादिति भावः । अलौकिकार्थो विष्णुरिति हृदयम् । पूर्वं ब्रह्मशब्दस्य गुणपूर्तिवाचित्वमेव नेत्याशयेन सुधा प्रवृत्तेत्युक्तम् । अधुना गुणपूर्तिवाचित्वमुपेत्य प्रवृत्तेत्याह—**यद्वेति** ।

*'तत्सुखं स्वःपदास्पदम्' इति पाठान्तरम्.

चन्द्रिका

वात्, प्रसिद्धविशेष्यपरत्वे तु लाघवात्तदनुसारेण जीवेषु सम्भवद्गुणपूर्तिरेव प्रवृत्तिनिमित्तम्, न तु सिद्धान्त्यभिप्रेतगुणपूर्तौ तात्पर्यमिति प्राप्ते, कारणत्वेनैव बाधकेनालौकिकविशेष्यपरत्वं, ततश्च सङ्कोचकाभावात्सर्वगुणपूर्तिरेव निमित्तमिति सिद्धान्त इति सुधाभिप्रायः। अत एव न्यायविवरणे, अत्रोक्तं सुधोक्तं चाधिकरणशरीरमभिप्रेत्य "न जीव एवायं ब्रह्मशब्दः "यतो वाइमानि भूतानि जायन्ते" इत्यादिना जन्मादिकारणत्वस्यैव ब्रह्मलक्षणत्वोक्तेः" इत्युक्तम्। अनुव्याख्याने तु—मोक्षदत्वाद् ब्रह्म जिज्ञास्यमित्युक्तं प्रथमसूत्रे, त-

प्रकाशः

**अत एवेति**। सामान्यतः प्रवृतस्य न्यायविवरणस्याभिप्रायद्वयसम्भवात्तद्वर्णनमुभयत्र कृतमिति भावः। तृतीयाध्याये तृतीयपादस्यादौ—

कर्तव्या ब्रह्मजिज्ञासेत्युक्ते किमिति संशये।
अत इत्युदितेऽप्यस्य विशेषानुक्तितः पुनः॥
सृष्टिबन्धनमोक्षादिकर्तृत्वस्य श्रुतत्वतः।
यतो मोक्षादिदाताऽसावतो जिज्ञास्य एव वः।
इत्याह तत्परं ब्रह्म व्यासाख्यं ज्ञानरश्मिमत्।
येनैव बन्धमोक्षस्यात्स च जिज्ञासया गतः।
सुप्रसन्नो भवेदीशो जिज्ञासाऽतोस्य मुक्तिदा॥

इत्यनुव्याख्यानाभिप्रेतं वर्णकान्तरमस्य सूत्रस्य तत्रास्फुटत्वाद्व्यनक्ति—**अनुव्याख्याने त्विति**। "तदुपपाद्यतइत्युक्तम्" इत्य-

चन्द्रिका

त्कथमिति शङ्कायामनेन सूत्रेण तदुपपाद्यतइत्युक्तम् । तत्रायं भावः—मोचकत्वेन विष्णुर्जिज्ञास्यश्चेत्, बन्धकत्वेनाजिज्ञास्योऽपि *स्यात्। न चायं न बन्धकः, जीवस्याबद्धत्वस्वबद्धत्वयोरयोगेनान्यबद्धत्वे वाच्येऽन्यस्य चेतनस्याचेतनस्य चेश्वराधीनत्वे पुनरीश्वरस्य बन्धकत्वेनाजिज्ञास्यता । अनधीनत्वे स्वानधीनकृताद्बन्धान्मोचकत्वं नेश्वरस्येति न जिज्ञास्यत्वमिति प्राप्ते, अप्रसन्नस्य बन्धकत्वं प्रसा-

प्रकाशः

न्वयः । "मोक्षदत्वात्" इत्यादिकं "कर्तव्या" इत्यादिश्लोकतात्पर्यानुवादः । "तत्कथं" इत्यादिकं तु "सृष्टिबन्धन" इत्यादेस्तात्पर्यानुवादः । उक्तं च सुधायां—"यतो मोक्षादिदाताऽसावतो वो युष्माकं मुमुक्षूणां जिज्ञास्य एवेत्येतमर्थं जन्मादिसूत्रेणाहेत्यर्थः" इति । विष्णोरबन्धकत्वं हि त्रेधा, जीवस्याबद्धत्वेन वा, स्वबद्धत्वेन वा, जीवेशाभ्यामन्यबद्धत्वेन वा । तत्राद्यौ निराह—**जीवस्येति** । दुःखित्वादिदृष्टेरबद्धत्वायोगात्, दुःखाद्यापत्त्या वा आत्माश्रयापत्त्या वा स्वबद्धत्वायोगादित्यर्थः । तृतीयेऽप्यन्यश्चेतनोऽचेतनो वा, द्वयमपीशाधीनमुतानधीनमिति हृदि कृत्वा, क्रमेण निराह—**अन्यस्येति** । "येनैव बन्धमोक्षस्स्यात्" इति श्लोकतात्पर्यमाह—**अप्रसन्नस्येति** । तर्हि 'मोक्षोऽस्य यतः' इति

* 'विष्णुर्जिज्ञास्यः इष्टमोक्षदातृत्वात्' इति पूर्वाधिकरणसिद्धान्तानुमानं 'विष्णुर्न जिज्ञास्यः अनिष्टबन्धदातृत्वात्' इत्यनेन सत्प्रतिपक्षमिति भावः ।

चन्द्रिका

देहेतोर्जिज्ञासायाः कर्तव्यत्वानुकूलमेव, न तु प्रतिकूलं* । सूत्रे सृष्ट्यादिहेतुत्वोक्तिस्तु मोक्षकत्वसम्भावनार्थेति सिद्धान्त इति ॥

अत्र परैर्न तावदुपलभ्यमानं जगदेव ब्रह्मलक्षणं, तस्यानित्याशुद्धपरिच्छिन्नादिरूपस्य तद्विरुद्धब्रह्मलक्षणत्वानुपपत्तेः। नापि नित्यत्वकारणत्वादिर्ब्रह्मधर्मः, तस्यानुपलब्धेरिति प्राप्ते, मा भूदनुभूयमानं जगत्तद्धर्मतया तदात्मतया वा लक्षणम् । तदुत्पत्त्या तु भविष्यति, देशान्तरप्राप्तिरिव सवितुर्व्रज्याया इति सिद्धान्तितम् । तन्न,

प्रकाशः

सूत्रविन्यासस्स्यादित्यत आह—सूत्र इति ।

भाष्ये अस्पष्टत्वात् भामत्युक्तमधिकरणशरीरमनुवदति—**अत्र परैरिति** । अत्र "यतो वै" इत्यादिवाक्यं ब्रह्म लक्षयत्युत नेति कल्पतरूक्तस्संशयो ध्येयः । दृश्यमानं जगदेव लक्षणं ब्रह्मण उत नित्यत्वादिस्तद्धर्मः । आद्यआह—**न तावदिति** । 'तस्य' जगतः । द्वितीयमाशङ्क्याह—**नापीति** । प्रसिद्धं हि लक्षणं भवति, नात्यन्ताप्रसिद्धमिति भावः । न जगद्ब्रह्मलक्षणं, किंतु तत्प्रति कारणत्वमिति लक्षणमुपपादयति—**मा भूदिति** । भेदमुपेत्याह—**तद्धर्मतयेति** । 'तदात्मतया' ज्ञानानन्दादिवत्तदैक्येन । **तदुत्पत्त्या त्विति** । जगत्तदुत्पन्नत्वेन स्वकारणं ब्रह्म लक्षयति ज्ञापयतीति, कार-

* 'प्रतिकूलं' इत्यन्तएव 'सिद्धान्तः' । 'सूत्रे' इत्यादिकं तु यथास्थितसूत्रन्याससमर्थनपरं न सिद्धान्तघटकम् । बन्धनिवृत्तिहेतुप्रासादात्यन्ताभावेन सोपाधिकं पूर्वं क्ष्यनुमानमिति हृदयम् ॥

चन्द्रिका

जिज्ञास्यस्येतरव्यावृत्त्यर्थं लक्षणसूत्रे अस्मद्रीत्या अव्यावृत्तिपूर्वपक्षस्यैवोचितत्वात् । अनित्यादिरूपस्य शब्दादेर्नित्यादिरूपाकाशादिलक्षणत्वदर्शनाच्च। जगत इव कारणत्वस्याप्यनात्मतयाऽऽत्मविरुद्धणत्वं तु भवति लक्षणमिति भावः । 'व्रज्यायाः' गतेरित्यर्थः । "व्रजयजोर्भावे क्यप्" । सूत्रानानुगुण्येन पूर्वपक्षं तावन्निराह—

प्रकाशः

**जिज्ञास्यस्येति** । लक्षणं नाम सजातीयविजातीयव्यावर्तकम् । सूत्रे तदुक्तिरितरव्यावृत्त्यर्था । तथा च यथाऽश्वादिविवेकेन गोरज्ञाने तज्ज्ञानाय सास्नादिमत्त्वं लक्षणमुच्यते, तथा ब्रह्मणो जीवप्रधानाद्यविवेकेन जीवादावपि ब्रह्मत्वबुद्धौ प्रसक्तायां, तद्व्यावृत्त्यर्थं लक्षणमिति, निरस्यस्य सूत्रावतारिकारूपस्य पूर्वपक्षस्याव्यावृत्तिरूपस्यैव वाच्यत्वात् सूत्रानानुगुणः पूर्वपक्षइत्यर्थः । तादृशपूर्वपक्षोऽशक्य इत्येतन्निराह—**अस्मद्रीत्येति** । अयुक्तश्च पूर्वपक्ष इत्याह—**अनित्येति** । गुणैन्द्रियिकादिरूपस्येत्यादिपदार्थः । घटपृथिवीत्वादेर्नित्यादिरूपस्यानित्यादिरूपपृथिवीलक्षणत्वदर्शनादित्यादिपदार्थः । तद्विरुद्धधर्मकमपि जगद्ब्रह्मलक्षणं स्यादिति भावः । सिद्धान्तोऽप्ययुक्त इत्याह—**जगत इति** । **आत्मविरुद्धेति** । अनित्यत्वपरिच्छिन्नत्वरूपत्वादिति भावः । अत्र यद्यपि जगदुत्पत्त्यादिकं लक्षणं चेत्सूत्रे 'यतः' इति पदमयुक्तम् । "न हि 'यतश्चैत्रजन्म स मैत्रः' इत्युक्ते, चैत्रनिष्ठजन्म मैत्रलक्षणं भवति" इति केषांचित्पक्षे वक्ष्यमाणो दोष इहापि तुल्यः । तथाऽपि कल्पतरौ 'उत्पत्त्या'

चन्द्रिका

स्वभावत्वाच्च । जिज्ञास्यत्वेनाद्यसूत्रे प्रकृतस्य निर्विशेषब्रह्मणो भ्रमाधिष्ठानत्वेनाकारणत्वाच्च । अधिष्ठानत्वस्यैव विवक्षायां तु श्रुतिसूत्रयोर्जन्मोक्त्ययोगात् । देशान्तरप्राप्तेस्सूर्यगत्यनुमापकत्वेऽपि तल्लक्षणत्वा—* भावाच्च । न चात्र सूत्रे, "यतो वै" इत्यादिश्रुतौ वा उत्पत्यादिकमद्वितीये ब्रह्मणि लिङ्गत्वेनोच्यतइति त्वयाऽपि स्वीकृतम् ॥

प्रकाशः

इत्यस्य कारणपरत्वेन व्याख्यानात् प्रकारान्तरेण दूषणमुक्तम् । एवं सिद्धान्ते पूर्वसूत्रासङ्गत्यं चाह—**जिज्ञास्यत्वेनेति । जन्मोक्तीति** । न ह्यधिष्ठानादध्यस्तं जायतइत्युच्यतइति भावः । यदत्र कश्चिदाह—लक्षणस्योद्देशपूर्वकत्वादिह चोद्देशाभावान्न लक्षणसूत्रमिदमिति, तन्न, "ब्रह्मजिज्ञासा" इति पूर्वसूत्रएव तस्योद्देशात् । न च तत् षष्ठचन्तत्वाज्जिज्ञासायां कर्मार्पकतया न लक्षणोद्देश्यसमर्पकमिति वाच्यम्, "प्रमाणप्रमेय" इत्यादिगौतमसूत्रे षष्ठचन्तनिर्दिष्टानामप्युद्देश्यत्वदर्शनात् । 'नाममात्रेण' इति मात्रपदेन लक्षणस्यैव व्यवच्छेद्यत्वात् । अत एव "प्रथमोद्दिष्टस्य प्रमाणस्य

---

* 'सूर्यगत्यनुमापकत्वेऽपि' सूर्यगतिप्रतीतिजनकप्रतीतिविषयत्वेऽपि, 'तल्लक्षणत्वाभावात्' सूर्यगतित्वरूपलक्ष्यतावच्छेदकसमनियतत्वात्मकसूर्यगतिलक्षणत्वाभावादित्यर्थः । तत्प्रतीतिजनकप्रतीतिविषयरूपसांकेतिकलक्षणपरत्वं तु नास्य सूत्रस्योचितम्, तथाविधलक्षणस्य विचारप्रतिज्ञाऽनन्तरसूत्रे जिज्ञासितत्वाभावेन तदुक्तेरसंगतत्वापत्तेरिति ध्येयम् ॥

चन्द्रिका

केचित्तु—न तावज्जन्मादयो विशेषणत्वेन लक्षयन्ति, विशेषणस्य स्वाश्रये सर्वविशेषधर्मव्यावर्तकत्वेन एकस्मिन्ननेकविशेषणायोगेनानेकविशेषणाश्रयस्य ब्रह्मणोऽनेकत्वप्रसङ्गात् । 'चैत्रश्श्यामो युवा लोहिताक्षः' इत्यादौ तु मानान्तरवशादैक्यम् । न

प्रकाशः

लक्षणमाह" इत्यादितदीयोक्तिः, प्रमाणलक्षणटीकायामपि "–'प्रमाणानां' इत्युद्देशे सिद्धे प्रमाणसामान्यलक्षणमाह" इत्युक्तिः । सूत्रे 'यतः' इत्युक्तेः 'तद्ब्रह्म' इत्यवश्यमनुषञ्जनीयत्वाच्च न कोऽपि दोषः॥

यथाश्रुतं रामानुजभाष्यमेवानुवदति–**केचित्त्वित्यादिना** । "यतो वै" इत्यादिवाक्यात् ब्रह्म लक्षणतः प्रतिपत्तुं शक्यते न वेति संशयोऽत्र द्रष्टव्यः । जन्मस्थितिप्रलया विशेषणत्वेन लक्षयन्ति उतोपलक्षणत्वेन । नाद्य इत्याह—**न तावदिति** । विशेषणं हि स्वेतरधर्मव्यावर्तकम् । उक्तं च द्वितीयस्य तृतीयपादाद्यनये—

विशेषणं व्यवच्छेत्तृ विशेष्यव्यापि चोच्यते ।

इति । तथा च जन्मादीनामैकाधिकरण्यायोगेन ब्रह्मविशेषणान्येतानि ब्रह्मणो नानात्वमापादयेयुरित्यर्थः । ननु 'चैत्रश्श्यामो युवा लोहिताक्षस्समपरिमाणः' इत्यत्र विशेषणबहुत्वेऽप्येक एव चैत्रः प्रतीयते । एवमत्राप्येकमेव ब्रह्म भवतीत्यत आह—**चैत्र इति । मानान्तरेति** । प्रत्यक्षेणैक्यप्रतीतेरेकस्मिन्नपि तत्रानेकविशेषणानामुपसंहारः । अन्यथा तत्राप्यनेकत्वमपरिहार्यम् । अत्रत्वेभिरेव लक्षणै र्लिलक्षयिषितत्वेन ब्रह्मणः

चन्द्रिका

चात्रापि ब्रह्मशब्दैक्यात् ब्रह्मैक्यम्*, 'खण्डो मुण्डः पूर्णशृङ्गो गौः' इत्युक्तेऽज्ञातगोव्यक्तेः पुंसो गोव्यक्तिबहुत्वस्येवात्रापि ब्रह्मव्यक्तिबहुत्वस्य प्रतीतिप्रसङ्गात् । नाप्युपलक्षणतया, उपलक्ष्याकारान्तराप्रतीतेः । तस्माज्जन्मादिवाक्यं न ब्रह्म लक्षयितुं शक्तमिति प्राप्तेऽस्तु तावद्विशेषणत्वम् । न च ब्रह्मणोऽनेकत्वप्रसङ्गः, विशेषणानां स्वविरोधिधर्मव्यावर्तकत्वात् । जन्मादीनां तु कालभेदेनाविरोधात् । उपलक्षणत्वं वाऽस्तु, बृहत्यर्थस्य पूर्णत्वस्योपल-

प्रकाशः

क्षणान्तरेणैक्यं नावगतमिति व्यावर्तकभेदेन ब्रह्मबहुत्वमवर्जनीयमिति भावः । **खण्ड इति** । गोपदैक्येऽपि खण्डत्वादिव्यावर्तकभेदेन गोव्यक्तिबहुत्वप्रतीतिरिवात्रापि 'जायन्ते जीवन्ति प्रयन्ति' इत्यादिव्यावर्तकभेदेन ब्रह्मव्यक्तिबहुत्वप्रतीतिस्स्यादित्यर्थः। द्वितीयं निराह-**नापीति** । उपलक्षणानामेकेनाकारेण प्रतिपन्नस्य केन चिदाकारान्तरेण प्रतिपत्तिहेतुत्वं दृष्टं, 'यत्रायं कासार स्सदेवदत्तकेदारः' इत्यादिषु । तथा च तद्वत्प्रकृते आकारान्तरं न प्रतीतमिति नोपलक्षणत्वमिति भावः । **स्वविरोधीति** । स्वविरोध्यनेकविशेषणत्वं हि भेदमापादयति । खण्डतादयो हि विरोधादेव गोव्यक्तिभेदमापादयन्ति । जन्मादीनां कालभेदेनाविरोधादेकविशेषणत्वं युक्तमिति भावः । **पूर्णत्वस्येति** । तथा च यत्पूर्णं तज्जन्मादिकारणमित्युपलक्षणत्वं जन्मादेर्युक्तमिति भावः ।

* 'ब्रह्मैकम्' इत्यपि पाठः.

चन्द्रिका

क्ष्यत्वादिति सिद्धान्तयन्ति। तन्न, पूर्वपक्षानौचित्यस्योक्तत्वात्। किञ्च—"जन्मादयः" इत्यत्र * जन्मादिशब्देन कार्यावस्थागतोत्पत्त्यादिविवक्षायां तद्भेदेन तदनाश्रयब्रह्मभेदाशङ्का, सूत्रे 'यतः' इति पदं चायुक्तम्। न हि 'यतश्चैत्रजन्म समैत्रः' इत्युक्ते चैत्रनिष्ठं जन्म मैत्रलक्षणं भवति, किन्तु—मैत्रगतं कारणत्वम्। कारणगतानां 'यतः येन' इति श्रौतपञ्चम्याद्युक्तानां जन्मादिकारणत्वानां विव

प्रकाशः

**उक्तत्वादिति**। "जिज्ञास्यस्येतरव्यावृत्यर्थं लक्षणसूत्रे" † इत्यादिनोक्तत्वादित्यर्थः। प्रकारान्तरेण पूर्वपक्षं निराह—**किञ्चेति**। कार्यगतोत्पत्त्यादिकं ब्रह्मलक्षणमुत, तत्कारणत्वं ब्रह्मगतमेव तल्लक्षणमिति विकल्प्याद्यमाह—**कार्येति**। **आशङ्केति**। 'अयुक्ता' इति योज्यम्। 'यतः' इति पदायोगमुपपादयति—**न हीति**। द्वितीयमनूद्य निराह—**कारणेति**। ब्रह्मगतानामित्यर्थः।

---

* 'इत्यत्र' श्रीभाष्यस्थे "न तावज्जन्मादयो विशेषणत्वेन ब्रह्म लक्षयन्ति" इति वाक्यइत्यर्थः॥

† 'जिज्ञास्यस्य' श्रौतब्रह्मपदवाच्यस्य, 'इतरव्यावृत्त्यर्थं' ब्रह्मपदवाच्यभूताजिज्ञास्यजीवादिव्यावृत्तिसिद्ध्यर्थं, न तु अतिव्याप्तिपरिहारार्थमित्यर्थः। तेन—'अव्यावृत्तेरतिव्याप्तिरूपाया लक्ष्ये लक्षणसंभवोपजीवितयाऽन्तरङ्गत्वेनासंभवशङ्काया एव प्रथमं वारणीयत्वात्' इति पूर्वपक्षानौचित्योद्धारो भावानवबोधनिबन्धनः, लक्षणातिव्याप्तिपूर्वपक्षस्यात्राकरणात्। प्रत्युत जिज्ञास्यमात्रवृत्तिलक्ष्यतावच्छेदकज्ञाने तदवच्छेदेन लक्षणसंभवस्यैव दुर्बोधतया लक्षणसंभवोपजीव्यलक्ष्यतावच्छेदकपरिचयार्थमजिज्ञास्यव्यावृत्तिपूर्वपक्षनिरासप्राथम्यस्यैव न्याय्यत्वादिति ध्येयम्॥

चन्द्रिका

क्षायामपि, त्वन्मते सृष्ट्यादिकारणत्वानामेकस्मिन्नेवोपादाने दर्शनान्न भेदशङ्का युक्ता । सिद्धान्ते कालभेदेनाविरोधोक्तिश्चायुक्ता, लयादिकाले "सर्गाद्या भावशक्तयः" इत्यादिस्मृतिसिद्धायास्सामर्थ्यरूपायास्सृष्ट्यादिकारणतायास्सत्त्वात् ॥

प्रकाशः

यदपि सिद्धान्ते जन्मादीनां कालभेदेनाविरोधोपपादनं, तदपि तदीयभाष्योदाहृतस्मृतिविरोधादयुक्तमित्याह—**सिद्धान्तइति** ।

शक्तयस्सर्वभावानामचिन्त्यज्ञानगोचराः ।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ॥

इति स्मृतिसिद्धाया इत्यर्थः । 'अचिन्त्यज्ञानगोचराः' अतर्क्यप्रमितिसिद्धाः । 'सर्गाद्याः' सर्गादिगोचराः* । 'भावशक्तयः' वस्तुशक्तयः । 'ब्रह्मणो वस्तुशक्तयः' इति निर्देशः 'ब्रह्मणस्तादात्म्यं' इति वत् । यद्वा—ब्रह्मणः 'भावशक्तयः' वस्तुशक्तयः, ब्रह्मणोवस्तुत्वप्रयुक्ताः निरुपाधिकाः शक्तय इत्यर्थः । यद्वा-भावशब्दः स्वभावपरः । स्वाभाविक्यः शक्तय इत्यर्थः" इति श्रुत-

* एतेन—सर्गादीनां शक्तितादात्म्यभ्रमेण दूषणाभिधानमिति केषां चिद्वल्गनं भ्रममूलकत्वान्निरस्तम्, सर्गादीनां शक्तिरूपत्वाभावेऽपि तत्कारणत्वस्य लक्षणत्वे तस्य शक्तिरूपत्वेन कालभेदेनाविरोधोक्त्यसाङ्गत्यस्यापरिहारात् । शक्तीनामतीन्द्रियत्वेन कार्यैकोन्नेयत्वेऽपि सार्वदिकत्वानपायात् । न हि कादाचित्कोन्नेयं कादाचित्कमिति नियमः । क्षित्यादिकार्योन्नेयत्वेन ब्रह्मणोऽपि कादाचित्कत्वापत्तेरिति ॥

प्रकाशः

प्रकाशे व्याख्यातत्वेन स्वाभाविक्याः सर्वदा सत्त्वादिति भावः। एतेन—यत्कश्चिदाह "यतो वै" इत्यादिवाक्योक्तं जन्मादिकं ब्रह्मणो लक्षणं भवितुमर्हति न वेति संशये, तस्य जगन्निष्ठत्वेन ब्रह्मासम्बद्धत्वात्, "सदेव सोम्य" "आनन्दाद्ध्येव, विज्ञानाद्ध्येव" इत्यादिवाक्यान्तरेषु सदानन्दादेरपि जन्मादिहेतुत्वोक्त्या इदमित्थमिति शृङ्गग्राहिकया लक्ष्यनिर्धारणाशक्तत्वाच्च न लक्षणं भवितुमर्हतीति प्राप्ते, तदसम्बद्धस्यापि चन्द्रस्य शाखाग्रवत्ताटस्थ्येन जन्मादिकं लक्षणं भवितुमर्हति, सदादिशब्दानां च कथञ्चिद्ब्रह्मशब्दिते शिवएव पर्यवसानादित्यादिसिद्धान्त इति, तन्निरस्तं, पूर्वसूत्रे "परीक्ष्य लोकान्" इत्यादिवाक्यमुदाहरतस्तवेहान्योदाहरणस्यानुचितत्वेन यज्ज्ञानार्थं गुरूपपत्तिस्तद्ब्रह्मेत्येव लक्षणसूत्रत्वौचित्यात्। अत्रैव पूर्वत्रापि ब्रह्मजिज्ञासापदघटितसूत्रानुगुण्येन तद्घटितस्यास्यैव उदाहरणत्वे तत्रैव श्रुतं जन्मादिकं लक्षणं न वेति चिन्तायास्सङ्गतत्वाच्च। सूत्रे 'यतः' इति कारणत्वस्याप्युक्त्या जन्मादिमात्रे चिन्ताया अयुक्तत्वाच्च। किञ्च—सूत्रे लक्षणत्वोपपादकन्यायस्यानुक्त्या लक्षणीभूतजन्मादिकारणत्वमात्रस्यैवोक्त्या एवंविधपूर्वपक्षस्य सूत्रानानुगुण्याच्च। अस्मद्रीत्या ब्रह्मणि तदसिद्धिपूर्वपक्षस्यैव सूत्रानुगुण्याच्च। लक्ष्यासम्बद्धस्य मुख्यलक्षणत्वाभावेन सूत्रस्य गौणार्थत्वापाताच्च। ताटस्थ्यस्याग्रे निरसिष्यमाणत्वाच्चेत्या-

चन्द्रिका

यादवप्रकाशीये तु—"तद्विजिज्ञासस्व" इति वाक्ये साङ्ख्याभिमतप्रधानस्यापि ब्रह्मशब्दार्थत्वाज्जिज्ञास्यत्वमिति शङ्कानिरासाय जन्मादिसूत्रमित्युक्तम्। तत्र न तावत्प्रधानस्यैव जिज्ञास्यत्वशङ्कानिरासकं सूत्रम्, जीवस्यापि ब्रह्मशब्दार्थत्वेन जिज्ञास्यत्वमिति शङ्कायाः, कारणत्वाभावेन तन्निरासस्य च संभवात्। जीवप्रधानादीनां जिज्ञास्यत्वशङ्का निरासार्थत्वं तु सूत्रस्यास्माकमिष्टम् ॥

प्रकाशः

द्यूह्यम् ॥ यदपि—सकलकारणवाक्यस्थयसदानन्दादिशब्दानां शिव एव पर्यवसानमिति वल्गनं, तद्वाष्याद्युदाहृतानेकमानविरुद्धत्वात्, "पत्युरसामञ्जस्यात्" इति सूत्रकृता निरसिष्यमाणत्वेनाज्ञत्वपारतन्त्र्याद्यनेकन्यायविरुद्धत्वाच्च अपेशलम्। विस्तरस्तु गुरुपादकृतपरतत्त्वप्रकाशिकादौ ध्येय इति ॥

प्रधानस्यैव जिज्ञास्यत्वशङ्कानिरासकमुत जीवस्यापीति विकल्प्याद्यं निराह—तत्रेति। कुत इत्यतः पूर्वोत्तरपक्षन्यायस्य जीवेऽपि साम्यादित्याह—**जीवस्यापीति**। द्वितीयमभ्युपगच्छति—**जीवेति। सूत्रस्येति**। "य आत्मा" इति जिज्ञास्ये जीवसाधारणात्मपदात्, जात्यादेरिव न प्रधानस्यापि संदेहनिविष्टत्वमिति हृदयम्। यद्वा न्यायविवरणटीकायां—"यद्वा 'जीव एव' इति जात्यादेरप्युपलक्षणम्। एवशब्दस्तु भगवन्तं व्यावर्तयति" इत्यादिना जीवजात्यादेरपि व्यावर्त्यतया पूर्वपक्षस्याप्युक्त्या तदनुरोधेन पक्षान्तरमभिप्रेत्यैवमुक्तिरिति ध्येयम् ॥

चन्द्रिका

यच्चोक्तं परैः —'जन्मादि' इत्यत्रोत्पत्तिस्थितिभङ्गमेवोच्यते, न त्वन्यत्, "यतो वै" इत्यादिश्रुत्यनुसारादिति, तन्न, "यतो वै" इत्यत्र चतुर्णां, "तमेवैकं जानथ" इत्यादौ "यस्मिन् द्यौः" इति स्थित्यादीनामेकैकस्येव श्रवणात्। न च 'अभिसंविशन्ति' इत्येतदपि* प्रलयपरम्, 'प्रयन्ति' इत्यनेन पौनरुक्त्यापत्त्या† तस्य मोक्षपरत्वात्।

प्रकाशः

परामिमतं सूत्रार्थमपि निरस्यति—**यच्चोक्तमिति**। 'श्रुत्यनुसारात्' इति तात्पर्यानुवादः। उक्तं च तद्भाष्ये—"जन्मस्थितिभङ्गं समासार्थः" इति। "—'यतो वै' इत्यादिवाक्ये जन्मस्थितिप्रलयानां क्रमदर्शनात्" इति च। **चतुर्णामिति**। "अभिसंविशन्ति" इत्यनेन मोक्षोक्तेरिति भावः। **तमेवेति**। तस्याप्यत्र विषयत्वादुदाहृतम्।

---

*'अभिसंविशन्तीत्येतदपि'—न केवलं 'यत्प्रयन्ति' इत्यन्तमेव, किंतु 'अभिसंविशन्ति' इत्येतदपि प्रलयपरमित्यपेरर्थः। "यत्प्रयन्त्यभिसंविशन्ति" इत्यन्तमेकमेव वाक्यं प्रलयपरम्, न तु "यतो वाइमानि भूतानि जायन्ते, येन जातानि जीवन्ति" इत्यन्तमिव वाक्यद्वयम्, तत्र 'यतः, येन' इति यच्छब्दस्य द्विरिव, अत्र 'यत्' इत्यस्य द्विरश्रवणात्। अन्यथा प्रायपाठविरोध इति भावः।

†'पौनरुक्त्यापत्त्या'—उदाहृतवाक्ये 'प्रयन्ति, अभिसंविशन्ति' इत्यनयोस्तिङन्तताश्रयणेन प्रलयपरत्वे एकेनोक्तार्थस्यैवान्येनोक्तेः शब्दतः पुनरुक्तेः, 'प्रयन्ति' इत्यस्य शत्रन्ततामाश्रित्य लयोन्मुखानीत्यर्थस्याभ्युपगमे 'अभिसंविशन्ति' इत्यनेन लयेऽभिहिते लयात्प्राक् तदुन्मुखत्वस्य विनाऽप्यभिधानं लाभादर्थत पुनरुक्तेश्चापत्तेरित्यर्थः। इतरथा उत्पत्तिस्थितिवाक्ययोरपि उत्पत्त्यभिमुखानि स्थित्यभिमुखानीति वक्तव्यं स्यादिति हृदयम्।

चन्द्रिका

न च 'प्रयन्ति' इत्यनेन सुषुप्तौ ब्रह्मप्राप्तिरुच्यते, तथाऽपि चतुष्ट्वापरिहारात् । जगतो जन्माङ्गीकारेऽनित्यत्वापत्त्या मिथ्यात्वासिद्धेरुक्तत्वाच्च । तस्मात्सृष्ट्याद्यष्टकमेव * जन्मादिपदार्थः ।

प्रकाशः

'तथाऽपि' इत्यभ्युपगमवादः । यद्यपि तद्गुणसंविज्ञानबहुव्रीहिमाश्रित्य जगतो जन्माङ्गीकरणं, तदपि व्याहतमित्याह—**जगत** इति । तथा च स्थितिभङ्गावेवोपेयाविति भावः । **उक्तत्वाच्चेति** । जिज्ञासाधिकरणे विवरणाभिमतनित्यानित्यवस्तुविवेकखण्डनग्रन्थे (पु.१३२) इति भावः । 'तस्मात्' श्रुत्यनुसारादित्यर्थः । एतेन केषां चित्पक्षोऽपि निरस्तः । यथोक्तं श्रीभाष्ये—"जन्मादीति सृष्टिस्थितिप्रलयम्" इति । एतेनैव आद्यस्य चतुर्मुखस्य जन्म यतः' इति मतं, 'आदिपदेन स्थितिमात्रं गृह्यते' इति मतं च निरस्तम्, सर्वस्य श्रुत्याननुसारात् । एतेन—"अन्ये तु—'जन्मादि' इति तद्गुणसंविज्ञानबहुव्रीहिमुपादाय सृष्टिस्थितिभङ्गं समासार्थ इति व्याकुर्वते" इत्यादिसुधावाक्यं विवृतं भवति ।

---

* न चैवं 'प्रयन्ति, अभिसंविशन्ति' इत्यनयोः क्रमेण प्रलयमोक्षपरत्वेन वाक्यभेदे द्विः 'यत्' इत्यस्य श्रवणापत्तिः, उत्पत्तिस्थितिवाक्ययोः यच्छब्दार्थस्य भिन्नभिन्नकारकतया तद्बोधकविभक्त्यन्ततया द्विः श्रवणावश्यम्भावेऽपि, अत्र क्रियाद्वयं प्रत्यपि यच्छब्दार्थस्य कर्मत्वेन द्विः श्रवणप्रयोजककारकभेदाभावेन सकृच्छ्रुतस्यैव तस्यावृत्त्या तन्त्रेण वा क्रियाद्वयान्वयप्रतियोगिसमर्पकतोपत्तेरिति ध्येयम् ।

चन्द्रिका

"यतो वै" इत्यत्र सृष्टिस्थितिप्रलयमोक्षाणाम्, "य आत्मानमन्तरो यमयति"

प्रकाशः

तत्रानुदाहृतत्वात्ता एव श्रुतीराह—**यतो वा इत्यादिना । य आत्मानमिति** । 'आत्मानं' जीवं तदभिमानिचतुर्मुखं वेत्यर्थः । नन्वत्र विचारविधेरश्रवणान्नेदं विषयवाक्यम्, तद्विधिवाक्यस्थ-लक्षणानामेवेह सूत्रे सङ्ग्रहात् । उक्तं च सुधायां—"न चैकमेव सर्वत्र जिज्ञासाविधायकश्रुतिषु लक्षणं श्रूयते, किन्त्वासु ब्रह्मजिज्ञासाविधात्रीषु श्रुतिषु क्वचित्सृष्टिः, क्वचित्स्थितिरित्यष्टकं जिज्ञास्याद्धरेर्विश्वस्योक्तमित्यनेकलक्षणोक्त्युपयोगः" इति। अत्रापि चाग्रे "विचारविधायकनानावाक्य" इत्यादि वक्ष्यति । तथा च कथमेतदुदाहरणम् । उच्यते । लक्षणसूत्रे श्रुतिवाक्यप्रसिद्धलक्षणस्य सङ्ग्रहो न विधिवाक्यस्थस्येति निर्बन्धः । अत एव तत्त्वप्रदीपे "—'विवेश भूतानि चराचराणि' इत्यर्थान्नियमनं" इत्यादिना तादृशवाक्यान्येवोदाहृतानि । उदाहृतसुधावाक्यादिकं तु सम्भावितामिप्रायम् । यद्वा—अन्तर्यामिब्राह्मणोपक्रमे "यो वै तत्काप्य सूत्रं विद्यात्तं चान्तर्यामिणमिति ब्रह्मवित्स लोकवित्" इत्याद्यर्थवादानज्ज्ञिज्ञासाविधेरुन्नयनाद्विचारविधिवाक्येमेवैतदिति न दोषः *।

* अविधिवाक्योक्तानामपि लक्षणत्वे विधिवाक्यविचारपरपूर्वाधिकरणतद्विषयवाक्याभ्यां सङ्गत्यभावरूपो दोषो नेत्यर्थः ।

चन्द्रिका

"त्वं मुक्तिदो बन्धदोऽतो मतो नस्त्वं ज्ञानदोऽज्ञानदश्चासि विष्णो" इत्यादौ नियमनादीनामप्युक्तेः । सूत्रकृतैव स्कांदेऽष्टकर्तृत्वस्य लक्षणत्वेनोक्तेश्च । न च नियत्यादीनां जन्मादावन्तर्भावः, स्वस्वव्यापारेषु प्रवृत्त्यादिरूपाणां नियत्यादीनां विनाशादेरिव जन्मादिमत्त्वेपि जन्मादिभ्यो भेदानुभवात् ।

प्रकाशः

**त्वमिति** । यतो बन्धादिदाता, अतो नोऽस्माकं 'मतः' विचारित इत्ययमप्यत्र विषय इति भावः । इयं च श्रुतिगीतातात्पर्योदाहृतश्रुतिरिति ध्येयम् । **स्कान्देति** । "उत्पत्तिस्थितिसंहाराः" इतिस्मृत्येति भावः । ननु "अन्येषामपि भावविकाराणां त्रिष्वेवान्तर्भावः" इति परभाष्ये अन्तर्भावोक्तेर्नियत्यादीनां जन्मस्थितिभङ्गोपेतत्वेन तेनैव गृहीतेर्न पृथग्वाच्यतेत्याशङ्क्याह—**न चेति**। नियतिस्वरूपोक्तिः "स्वस्वव्यापारेषु प्रवृत्ति" इति । ज्ञानाज्ञाने तु व्यक्ते । सुखदुःखानुभवो बन्धः*, नित्यानन्दानुभवो मोक्ष इति ध्येयम् । यथा विनाशस्य जन्मस्थितिमत्त्वेपि ताभ्यां भङ्गस्य पार्थक्यं, यथा वा स्थितेर्जन्मभङ्गवत्त्वेऽपि ताभ्यां पार्थक्यं, तथा नियत्यादीनां तत्त्रितयवत्त्वेऽपि तेभ्योऽपि भेदानुभवादित्यर्थः ।

---

* सुखदुःखानुभवरूपबन्धदत्वोक्त्यैव सुखदुःखदत्वं लब्धम्, तयोर्ज्ञातैकसत्त्वेन पृथगुक्त्यनपेक्षत्वात् ।

चन्द्रिका

मोक्षस्य बन्धध्वंसत्वे चोत्पत्तिरपि प्रागभावनिवृत्तिः स्यात्*। ननूत्पत्तिः प्रागभावस्य ध्वंसो न तूत्पद्यमानस्येति चेत्तर्हि मोक्षोऽपि बन्धस्य ध्वंसो न तु बद्धस्य। मोक्षस्य परमपुरुषार्थतया पृथग्वाच्यत्वाच्च। अज्ञानं तु न बन्धः, किन्तु बन्धकम्।

प्रकाशः

मोक्षस्य भङ्गभेदमाशङ्क्याह—**मोक्षस्येति**। तथा च भङ्गेनैवोत्पत्तेरपि ग्रहणं स्यादिति भावः। **उत्पद्यमानस्येति**। तथा च तद्ध्वंसो भङ्गपदार्थोऽन्यो वाच्य इति भावः। **बद्धस्येति**। बद्धस्य विशिष्टस्य पदार्थान्तरत्वेन तद्ध्वंसोऽप्यतिरिक्तो नाशपदार्थ इति वा, बद्धपदं धर्मिसामान्यपरं, तद्ध्वंसो नाशपदार्थोऽन्यो वाच्य इति वाऽभिप्रायः। भावरूपोऽप्यावश्यक इत्याह—**मोक्षस्येति**। अनिष्टनिवृत्तेः पुमर्थत्वेऽपीष्टप्राप्तेरेव मुख्यपुरुषार्थत्वमिति भावः। अज्ञानबन्धयोर्भेदमाह—**अज्ञानं त्विति**।

---

* अद्वैतसिद्धान्ते सत्कार्यवादाङ्गीकारात्प्रागभाव एव नास्तीति न तन्निवृत्तित्वमुत्पत्तेर्युक्तमिति नासौ दोष इति चेत्तत एव कार्यस्य निश्शेषनाशस्य दुरुपगमत्वाल्लयोऽपि न वक्तव्यः स्यात्। सत्कार्यवादे कार्यस्य कारणात्मना स्थित्यवश्यम्भावेऽपि कार्यात्मना लयोऽस्त्येवेति चेद्धन्त तर्हि कार्यात्मना प्रागभावोऽप्यस्तु, कारणात्मना प्रागभावाभावस्यैव सत्कार्यवादापेक्षितत्वेन कार्यात्मना प्रागभावाङ्गीकारस्य तदविरोधित्वात्। श्रुत्युक्तत्वाल्लयस्य स्वीकार्यत्वे तु, "आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंच न मिषत्" इत्यादिश्रुत्युक्तत्वात्प्रागभावोऽपि स्वीकार्य एवेतिदिक्।

चन्द्रिका

ननु तथाऽपि नियमनज्ञानादीन् 'अस्य' इत्येनेन विवक्षित्वा तेषामुत्पत्त्यादिके जन्मादिपदेनोक्ते नियमनादीन् प्रति जगत्प्रतीव ब्रह्म कारणं सिद्ध्यति, किं जन्मादीत्यत्र तद्ग्रहणेनेतिचेन्न, 'अस्य' इत्येनेन निर्दिष्टधर्मिभूतजगत्सम्बन्धार्थं धर्माणां नियमनादीनां धर्मिनिर्देशकेन जन्मादिपदेनैव ग्राह्यत्वात्। न चेत्परमते 'अस्य' इत्यनेन भङ्गं विवक्षित्वाऽस्योत्पत्त्यादिके जन्मादिपदेनोक्ते भङ्गस्य ब्रह्म कारणं सिध्यति, किं 'जन्मादि' इत्यत्र भङ्गग्रहणेनेति स्यात्।

प्रकाशः

**तथाऽपीति**। जन्मादीनामष्टानां भेदे सिद्धेऽपीत्यर्थः। यथा 'अस्य' इत्येनेन जगतः परामर्शः, तथा पञ्चधर्मानपि परामृश्यास्य जन्मादित्रयं भवतीत्युक्ते जगत्कारणं ब्रह्म यथा सिध्यति, तथा नियत्यादिकारणं सिध्यतीत्यर्थः **अस्येत्यनेनेति**। अत्र 'अस्य' इति धर्मिनिर्देशकं, 'जन्मादि' इति धर्मनिर्देशकम्। तत्र नियमनादीनां धर्माणां धर्मिनिर्देशकेनैव ग्रहणे जन्मादित्रितयसम्बन्धो जगतो नियमनादीनां च सिद्ध्यति, तथाऽपि जगतो नियमनादिधर्माणां च सम्बन्धो नोक्तस्स्यात्। अतो धर्मनिर्देशकेन तेषां ग्रहणे तु जगत्सम्बन्धो जन्मादित्रयस्येव नियत्यादीनामपि सिद्ध्यतीत्येवं ग्राह्यमित्यर्थः। **अस्येति**। 'अस्य' इत्युक्तस्येत्यर्थः। स्थितावप्ययं प्रसङ्गो बोध्यः। भङ्गमात्रे तदुक्तिस्तु सौत्रादिपदेन स्थितेरवश्यं ग्राह्यत्वाद्यथान्यासमुपेत्य।

प्रकाशः

नन्वेवमपि चेतनादिसम्बन्धिज्ञानादेर्ब्रह्मकार्यत्वे सिद्धेऽपि ज्ञानादिसम्बन्धिनियमनादेर्ब्रह्म कारणं न सिद्ध्यतीति चेन्न, 'यो यस्य धर्मस्स तदाश्रितः' इत्युक्ते धर्मित्वे सति धर्मस्य रूपादेर्यथा धर्मित्वेन 'यः' इत्येनन, धर्मितया 'यस्य' इत्येनन च ग्रहणं, तथा ज्ञानादीनामष्टकान्तर्गतत्वात् 'जन्मादि' इत्येनन गृहीतानामपि नियम्यत्वादिना रूपेण 'अस्य' इत्येनापि ग्रहणात् ।

प्रकाशः

वस्तुतस्तु—'जन्माऽस्य यतः' इति सूत्रन्यासे लाघवमिष्टसिद्धिश्चेतीदमेवादिपदोच्चारणं ज्ञापकं, धर्मिनिर्देशकेन 'अस्य' इत्येनन नियत्यादिधर्माणामग्रहण इति, यथोक्त एवार्थः सूत्रकृदभिमत इति ध्येयम्। ननु जन्मादित्रयस्य कृत्स्नजगत्सम्बन्धाद्धर्मनिर्देशकेनैतस्यैव ग्रहणं युक्तं, न तु ज्ञानादीनां, तेषां चेतनमात्रसम्बन्धित्वादिति चेत्तत्सम्बन्धार्थमपि 'जन्मादि' इत्येनैव ग्राह्यत्वात् । त्वन्मतेऽप्यनादिजीवब्रह्मविभागादौ जन्मादेरयोगात्, 'अस्य' इत्येनन जन्यमात्रविवक्षायां कृत्स्नस्थितिकारणत्वासिद्धेः, सर्वनाम्नस्सङ्कोचापत्तेश्चेति भावः । 'जन्मादि' इत्येनन सर्वधर्माणां ग्रहणमित्यत्रापि बाधकमाशङ्कते—**नन्वेवमिति** । नियत्यादीनां जगत्सम्बन्धलाभेऽपीत्यर्थः । ज्ञानादिचतुर्णां च नियमेन जन्मादिसंबन्धाबोधनादिति भावः । **रूपादेरिति** । रूपत्वादिकं प्रति धर्मी रूपरसादिः घटादिकं प्रति धर्मश्चेत्यर्थः ।

चन्द्रिका

अन्यथा तवापि भङ्गसम्बन्धिजन्मादिकारणं ब्रह्म न सिद्धचेत् । नित्य कर्मणि यस्य पुंसो यावदङ्गोपसंहारे शक्तिस्तत्प्रयोगे तावदङ्गोपेततेव, ब्रह्मण्यपि यस्य वस्तुनः स्मृष्टचाद्यष्टके यावत्सम्भवति, तावद्धेतुताऽ-

प्रकाशः

उक्तरीतिस्त्वयाऽपि वाच्येत्याह—**अन्यथेति**। ननु जन्मादित्रयमात्रविवक्षायां विश्वसंबन्धिजन्मादिहेतुत्वं एकमनुगतं लभ्यते । अन्यथा क्वचिज्जन्मादिहेतुत्वं, क्वचिज्ज्ञानादिहेतुत्वं, इत्यननुगतं स्यादित्यत आह—**नित्येति** । षष्ठे तृतीयपादे "सर्वशक्तौ प्रवृत्तिस्स्यात्तथाभूतोपदेशात्" इत्याद्याधिकरणे "यावज्जीवमग्निहोत्रं जुहोति" "यावज्जीवं दर्शपूर्णमासाभ्यां यजेत" इत्यादौ किं सर्वाङ्गोपसंहारशक्तानामेवाधिकारः, उत यस्तु यावन्ति शक्नोत्युपसंहर्तुं तावद्भिरुपेतं प्रधानं कुर्वन्नधिक्रियेतेति संदेहे, अग्निहोत्रेण भावयेदित्युक्ते, कथं भावयेदिति कथंभावाकांक्षायां, सर्वाङ्गानां समुच्चयेन ग्रहणात्, सर्वाङ्गोपेतस्यैव प्रधानस्य फलवत्त्वेन नाङ्गहीनस्य तत्राधिकार इति प्राप्ते, यावच्छब्दोपबद्धं हि जीवनं धातुसम्बन्धविहितेन णमुल्-प्रत्ययेन सम्बन्धान्तराभावान्निमित्तत्वेन यागानुरक्तां भावनां प्रत्यवगम्यते । निमित्तस्य चैतद्रूपं, यत्तस्मिन् सति नैमित्तिकमवश्यं कार्यमिति । अतः प्रधानानुरक्ता भावना स्ववाक्यश्रुतनिमित्तवशप्राप्ताऽवश्यकत्वानुरोधेन यथासम्भवमङ्गानि गृह्णाति, तावतैव शास्त्रवशात् फलसिद्धिरिति, यथाशक्ति प्रयोगेणैवाधिकार इति सिद्धान्तितम्। तथाच

चन्द्रिका

नुगतैव । यद्यपि चेतनस्थानि सुखदुःखादीनि अचेतनस्थानि वृद्ध्यादीन्यपि सन्ति । तथाऽपि विचारविधायकनानावाक्यपरामर्शेन स्कान्दे सूत्रकृतैवाष्टकर्तृत्वस्यैव लक्षणत्वेनोक्तत्वादत्रापि तस्यैव विवक्षणीयत्वान्न दोष । यद्वा * सर्वैर्मुमुक्षुभिर्विशिष्याष्टकर्तृत्वस्येवान्यकर्तृत्वस्य ज्ञेयत्वनियमाभावान्नान्यदिहादिशब्दार्थः । उक्तं च—

प्रकाशः

तत्र यथा, यत्र यावच्छक्यं, तत्र तावन्मात्राङ्गोपेतता, तथाऽत्रापीत्यर्थः । यद्येवमनुगमस्तर्हि 'जन्मादि' इत्यत्राष्टकग्रहणमिवान्येषां चेतनधर्माणां सुखदुःखेच्छाद्वेषादीनामचेतनधर्माणां वृद्धिपरिणामापक्षयादीनां विवक्षायामप्युक्तदिशाऽनुगमसम्भवात् कुतो न ग्रहणमित्याशङ्क्य, त्रेधा समाधिमाह—**यद्यपीत्यादिना अष्टकोक्तिरित्यन्तेन** । सुखादीनामन्तःकरणधर्मत्वेऽपि 'धनी' इतिवत्स्वामित्वात् 'चेतनस्थान्' इत्युक्तम् । सूत्रकृतोऽपि निमित्तोक्तिः—**विचारविधायकेति** । यद्यप्यन्वेषणादिवाक्येष्वपहतपाप्मत्वसत्यकामत्वादिधर्माः श्रुताः । तथाऽपि तेषां ब्रह्मपदोक्तगुणग्रहणेन गृहीतेस्तदुपपादकत्वमष्टानामेवेत्येवमुक्तिरिति ध्येयम् । * अवश्यज्ञेयत्वान्मोक्षशास्त्रेएतदेव विवक्षितं, नान्यदित्याह—**यद्वेति । उक्तं चेति** । तात्पर्यनिर्णयाद्याध्यायइत्यर्थः ।

---

* "ननु सूत्रकारस्यापि अन्वेषणादिवाक्योक्तसत्यकामत्वादिवद्ब्रह्मपदेन सुग्रहस्याष्टकर्तृत्वस्यैव पृथगुक्तौ किं निमित्तमित्यतः" इत्येतत् "यद्वा" इत्येतदवतरणप्रकाशे "अवश्यज्ञेयत्वात्" इत्यतः पूर्वमुपस्कर्तव्यम् ॥

चन्द्रिका

सृष्टिरक्षाहृतिज्ञाननियत्यज्ञानबन्धनान् ।

मोक्षं च विष्णुतस्त्वेव ज्ञात्वा मुक्तिर्न चान्यथा ॥ इति ॥

अथवा * विषयोपपादकगुणपूर्तिसिद्धये जीवाद्वैदके प्रसिद्धे जन्मादित्रितयहेतुत्वेऽभिहितेऽपि प्रयोजनसिद्धये मोक्षदत्वस्यापि वक्तव्यत्वात् † तस्य च बन्धकत्वं विनाऽयोगात्, तयोश्च तद्धेतुज्ञानाज्ञानदत्वं ‡

प्रकाशः

ल्युटष्टित्करणेन त्रिलिङ्गत्वस्य ज्ञापितत्वात् 'बन्धनान्' इति साधु । *अष्टानामेव प्रकृतोपयोगादन्येषां तदभावादग्रहणमिति भावेनाह— **अथ वेति । अयोगादिति ।** अन्यबद्धत्वादेर्निरासादिति भावः । 'तयोः' मोक्षबन्धदत्वयोः ।

---

* "ननु मुमुक्षुभिरवश्यज्ञेयानामवतारानवतारपञ्चभेदादीनां त्यागेनाष्टकस्यैवादिशब्दार्थत्वाङ्गीकृतौ किं नियामकमित्यतः" इतीदं "अथवा" इत्येतदवतरणप्रकाशे "अष्टानामेव" इत्यतः पूर्वमुपस्कार्यम् ॥

† ब्रह्मणो मोक्षदत्वानभिधाने पूर्वाधिकरणोक्तं मोक्षस्य ब्रह्मजिज्ञासाफलत्वं न सिद्ध्यति, निगडादिबन्धनिवर्तनसमर्थराजप्रसादस्यैव निगडान्मोचकत्वदर्शनेन ब्रह्मणो मोक्षदानसामर्थ्यासिद्धौ तज्जिज्ञासाजन्यतदपरोक्षजतत्प्रसादस्य मोक्षं प्रत्यकिंचित्कत्वात् । अतः "त्वं मुक्तिदो बन्धदः" इत्यादिश्रुतिप्रमितं ब्रह्मणो मोक्षदत्वं मोक्षस्य तज्जिज्ञासाफलतासिद्ध्यर्थमवश्यं वक्तव्यमिति भावः ॥

‡ 'तद्धेतुज्ञानाज्ञानदत्वं मोक्षहेतुज्ञानदत्वं बन्धहेत्वज्ञानदत्वं चेत्यर्थः । अत्र साक्षान्नीचोच्चतालक्षणविकारापादकादाचित्कसुखदुःखानुभवस्यैव बन्धशब्दार्थत्वात्तं प्रत्यज्ञानस्य हेतुत्वमुपपन्नम् । तेन "अविद्यादेरेव संसारत्वात्" इत्यादिस्वप्राधिकरणसुधाविरोधो न, परम्परयोक्तविकारहेतुत्वरूपसंसारत्वस्यैवाविद्यायां तत्तात्पर्यविषयत्वादिति ध्येयम् ॥

चन्द्रिका

विनाऽनुपपत्तेस्त्रितयहेतुत्वस्यापि वक्तव्यत्वात्पुनश्च दीपस्तम इव, ज्ञानं बन्धकाज्ञानं स्वभावादेव हन्ति, किमीश्वरेणेति शङ्कायां, दीपज्ञानादिस्वभावोऽपि भगवन्नियत इति वाच्यत्वात् प्रकृतोपयोगितयाऽष्टकोक्तिः । यथा च स्रष्टृत्वादावेकैकस्यैव लक्षणत्वोपपत्तावपि त्रितयोक्तिः स्थितिहेतुरन्य इति शङ्कानिरासार्थं वा, अनेकलक्षणसूचनार्थं वा, तथाऽष्टकोक्तिरपि तदर्थमस्तु । न चोपादानत्वाय त्रितयोक्तिः, सृष्ठिलयाभ्यामेव तत्सिद्धेः । सम्भवति च गुणपूर्वावेनेकोपपादकोपन्यासः । तस्मादष्टकमेव जन्मादिशब्दार्थः ॥

प्रकाशः

**त्रितयेति** । बन्धज्ञानाज्ञानत्रितयेत्यर्थः । यद्वोक्तदिशा जन्मस्थितिभङ्गानां बन्धमोक्षयोर्ज्ञानाज्ञानयोश्चैकैकसमुदायत्वं विवक्षित्वा 'त्रितयहेतुत्वस्यापि' इत्युपसंहारः । नियतेरुपयोगमाह—**पुनश्चेति** । अत्राद्यः परिहारो भाष्योक्तस्कान्दस्मृत्या सूचितः । द्वितीयस्तु 'सृष्टिरक्षा' इति स्मृत्या । तृतीयस्तु—

यतो मोक्षादिदाताऽसावतो जिज्ञास्य एव वः । इत्येनेन,
नर्ते त्वत्क्रियते किञ्चिदित्यादेर्न हरिं विना ।
ज्ञानस्वभावतोऽपि स्यान्मुक्तिः कस्यापि हि क्वचित् ॥

इत्यादिना चानुव्याख्यानेन सूचित इत्याहुः । नन्वेकलक्षणोक्तावपीष्टसिद्धेर्नानेकोक्तिरर्थवतीत्यत आह—**यथा चेति** । परमतइति भावः । **सम्भवति चेति** । जन्ममात्रोक्तौ जगज्जन्मोपयुक्तानां केषां चिद्गुणानां

प्रकाशः

लाभेऽपि स्थित्युपयुक्तगुणालाभात् साऽपि ग्राह्या । तथा संहर्तृत्वमोचकत्वादिप्रयोजकधर्माणां लाभाय स्रष्टृत्वादीनां स्वस्वप्रयोजकानेकगुणाक्षेपकत्वं तेषां ग्रहणएव सिध्यति, नान्यथा । न हि 'चैत्रो रूपद्रष्टा' इत्युक्ते चक्षुष्मत्तेव श्रोत्रादिमत्ता सिध्यति । तथा च तत्र सर्वेन्द्रियवत्त्वप्रतिपादनाय तत्तदाक्षेपकं रूपज्ञानशब्दज्ञानादिकं सर्वमुपपादकमुपादेयं, तद्वत् सर्वगुणपूर्त्यर्थमनेकोपपादकोक्तिर्युक्तेति भावः । एतेन—यदाह कश्चित्, जन्मादिकारणत्ववद्गुणपूर्तेरपि विष्णौ श्रुतत्वान्न तत्रोपपादकापेक्षा । अन्यथा तत्राप्येवमित्यनवस्थाऽऽपत्तेर्नेदं सूत्रमारभ्यम् । जन्मादिहेतुत्वस्यापि सत्यकामत्वादिवद्गुणतया ब्रह्मपदोक्तगुणपदेन ग्रहणेन तस्य द्वैरूप्यापाताच्च । किंचोपपाद्योपपादकयोर्द्वयोरपि श्रुत्येकसमधिगम्ययोस्तज्ज्ञान्यनिर्णयदशायां नोपपादकापेक्षा, आपातदशायां द्वयोरप्यनिर्णायकत्वं, वैपरीत्यस्य वाऽऽपत्तिरिति, तन्निरस्तम् । ब्रह्मपदश्रुत्या पूर्वं प्रतीतस्य गुणपूर्णत्वस्यासम्भावनयाऽसत्त्वशङ्कायां वाक्यप्रमाणेनानन्तरं धीस्थेन जन्मादिहेतुत्वेनोपपादने दोषाभावात् । अन्यथा मीमांसाऽनारम्भापत्तेः । श्रौते श्रौतस्योपपादकत्वात् । हेतुत्वेन गुणपूर्त्युपपादनस्येव तया तदुपपादानस्य अशक्यशङ्कत्वाच्च । "पराऽस्य शक्तिः" इतिश्रुतौ परत्वस्य स्वाभाविकत्वादिना, "न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वात्" इत्यादिश्रुतौ दृष्टेरभ्रान्तित्वस्याविनाशित्वेनोपपादनदर्शनाच्च । सामान्याकारेणोपपाद्य-

चन्द्रिका

केचित्तु "यतो वै" इत्यादिश्रुतौ प्रतिवाक्यं "तद्ब्रह्म" इत्यनुक्तेरेनेकलक्षणवैयर्थ्याच्च जन्मादिहेतुत्वसमुदाय एकं लक्षणम् । अत एव सूत्रे 'जन्मादि' इत्येकवचनमित्याहुः । तन्न, व्यावर्त्याभावात् * । न हि सर्वजगज्जन्मकारणं तत्स्थित्याद्यकारणं च किंञ्चिदस्ति । ननु

प्रकाशः

कोटिनिविष्टस्यापि स्वाध्यायाध्ययनविध्यादिवद्विशेषाकारेणोपपादकत्वाविरोधाच्च । अस्यां दशायां तदन्यस्यैव गुणपदेन ग्रहणोपपत्तेश्च । "कर्तृत्वात्सगुणं ब्रह्म" इति भागवते सूत्रकृतैव स्पष्टमुपपादकत्वोक्तेश्चेति ॥

सृष्टिः स्थितिश्च संहारो नियतिर्ज्ञानमावृतिः ।

इत्यनुव्याख्यानेऽसमासनिर्देशेन सूचितं जन्मादीनां प्रत्येकलक्षणत्वं साधयितुं परोक्तं निराह—**केचित्त्विति** । **व्यावर्त्याभावादिति** । अत एव तद्भाष्ये "जगद्वाचित्वात्" इत्यत्र "यस्य चैतत्कर्म सवेदितव्यः" इति वेद्यस्य ब्रह्मत्वे साध्ये जगज्जनकत्वस्य, "अक्षरमम्बरान्तधृतेः" इत्यत्राक्षरस्य ब्रह्मत्वे अम्बरान्तधारकत्वरूपस्थितिहेतुत्वस्य, "अत्ता चराचर" इत्यत्रादनकर्तुर्ब्रह्मत्वे संहर्तृत्वस्य हेतुत्वेनोपन्यास इति भावः ।

---

* न च सर्वजगज्जन्ममात्रकारणस्य व्यावर्त्यवस्तुनोऽभावेऽपि तथात्वेन शङ्कितस्यैव व्यावर्त्यत्वमस्त्विति युक्तम, त्रितयकारणस्याप्यन्यस्य शङ्कितुं शक्यत्वेन तद्व्यावर्तनाय पुनरधिककारणत्वस्य निवेशनीयत्वापत्त्या लक्षणापर्यवसानप्रसङ्गात् ॥

चन्द्रिका

जन्मादिहेतुत्वं निरतिशयबृहत्त्वस्योपलक्षकम् । न च तदुपलक्षणमेकेनैव युक्तं, जन्ममात्रोक्तौ स्थित्याद्युपयोगिज्ञानाद्यभावेन निरतिशयबृहत्त्वासिद्धेः । अतस्समुदायोक्तिरिति चेन्न, त्रितयोक्तावपि मोचकत्वोपयोगिशक्त्याद्यलाभात्* । उपलक्षणस्योपलक्ष्योपपादकत्वानियमाच्च† । उक्तशङ्कानिरासार्थमेवानेकलक्षणोक्तिसम्भवाच्च । प्रतिवाक्यं "तद्ब्रह्म" इत्यनुक्तिस्तु ब्रह्मव्यक्तिभेदशङ्कानिरासार्थमिति त्वयाऽपि स्वीकृतम् ।

प्रकाशः

एवमपि पूर्णत्वासिद्धिरित्याह—त्रितयेति । स्वीकृतमिति । ब्रह्मशब्दैक्यात् ब्रह्मैक्यमिति वदता स्वीकृतमित्यर्थः ।

---

* 'द्यभावात्' इत्यपिपाठः ॥

† उपलक्षणविशेषे काकादौ देवदत्तगृहत्वं विनाऽप्युपपद्यमाने देवदत्तगृहत्वोपपादकत्वादर्शनेन व्यभिचारादित्यर्थः । न च तन्नियमाभावेऽपि प्रकृते किं तद्ब्रह्मेति प्रश्नोत्तरभूतेन "यतो वै" इत्यादिना जगज्जन्मादिकारणत्वमुद्देश्यतावच्छेदकीकृत्य ब्रह्मत्वविधानादुद्देश्यतावच्छेदकविधेययोर्व्याप्यव्यापकभावावगमस्य व्युत्पत्तिसिद्धतया व्याप्यत्वेनावगते जन्मादिकारणत्वे विधेयब्रह्मत्वोपपादकत्वं संवतीति वाच्यम्, सर्वजगज्जन्माद्येकैककारणत्वस्यापि ब्रह्मत्वव्याप्यत्वेन ब्रह्मत्वोपपादकत्वसंभवे, जन्मादिहेतुत्वसमुदाये तदुपगमस्यायुक्तत्वात् । निरतिशयबृहत्त्वं विनाऽनुपपद्यमानत्वरूपमुपपादकत्वं तूक्तकारणत्वसमुदायस्यापि नास्तीति त्वनुपदमेवोक्तमिति ध्येयम् ॥

चन्द्रिका

अन्यथा सत्यज्ञानादिवाक्येऽपि प्रतिपदं ब्रह्मपदाश्रवणात् * निरुपाधिकसत्तायोगित्वनित्यासङ्कुचितज्ञानत्वापरिच्छिन्नगुणत्वरूपाणां सत्यत्वज्ञानत्वानन्तत्वात्मकानां स्वरूपलक्षणानामपि प्रत्येकं लक्षणत्वं न स्यात् ।

प्रकाशः

सत्यज्ञानादिशब्दार्थानामतिव्याप्तिशून्यत्वात्पृथग्लक्षणत्वमिति ज्ञापनाय तद्व्याप्योक्तमेव तेषां स्वरूपमनुवदति–**निरुपाधिकेति** । एवंविधसत्यत्वं नामान्तरभजनार्हावस्थान्तरयोगित्वेन निरुपाधिकसत्त्वरहितयोर्जीवजडयोर्नास्तीति भावः । **नित्येति** । अनेन ज्ञानशून्यस्य जडस्य, सङ्कुचितज्ञानस्य संसारिणः, कदाचिदसंकुचितज्ञानस्य मुक्तस्य च व्यवच्छेदान्नातिव्याप्तिरस्येति भावः । **अपरिच्छिन्नेति** । अनेनाल्पगुणास्सर्वे व्यावृत्ता इति भावः । तत्र प्रत्येकं ब्रह्मपदावृत्ताविहापि 'तद्ब्रह्म' इत्यस्यावृत्तिरस्तु, आवृत्तौ ब्रह्मानेकत्वशङ्का तत्रापि तुल्येति ।

---

* न च "योवेद" इत्युत्तरवाक्यस्थविदिक्रियापेक्षितकर्मसमर्पकाद्वितीयान्तपदसमुदायरूपे "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यत्र ब्रह्मपदस्य प्रत्येकं श्रवणशङ्का बुद्ध्यारोहमपि नार्हतीति युक्तम्, "ब्रह्मविदाप्नोति परं" इत्यत्र प्रसक्तं ब्रह्म किंलक्षणकमित्याकाङ्क्षानिवृत्तये उदाहृतमन्त्रवर्णघटकस्यास्य लक्षणवाक्यत्वौचित्येन द्वितीयान्तसमुदायत्वासंप्रतिपत्तेः । तथात्वेऽपि 'ब्रह्म सत्यं वेद' 'ब्रह्म ज्ञानं वेद' 'ब्रह्म अनन्तं वेद' इति ब्रह्मपदानेकत्वेऽपि कर्मार्पकत्वाविरोधाच्च ॥

चन्द्रिका

सौत्रैकवचनादपि न समुदायस्य लक्षणता । "यत्र सास्नादयस्सा गौः" "हलोऽनन्तरास्संयोगः" इत्यादौ बहुवचनेऽपि समुदाये लक्षणत्वसंयोगसंज्ञादेः, 'यस्य च्छत्रादिकं सराजा' "अजाद्यतष्टाप्" इत्यादावेकवचनेऽपि प्रत्येकं लक्षणत्वादेर्दर्शनात् ।

प्रकाशः

यदपि 'जन्मादि' इत्येकवचनादेकलक्षणत्वधीरिति, तदप्यन्वयव्यतिरेकव्यभिचारान्नेत्याह—**सौत्रेति** । विशेषणत्वे व्यतिरेकव्यभिचारोक्तिः—**यत्रेति** । उपलक्षणत्वे तदुक्तिः—**हलोऽनन्तरा इति** । यद्वा—लौकिकवैदिके व्यभिचारस्थले एते । एवमग्रेऽपि ज्ञेयम् । "हलः" इत्यत्र "उभे अभ्यस्ते" इत्यादौ चैकवचनान्तत्वाभावेपि 'ग्लानं ददते' इत्यादौ संयोगाभ्यस्तसंज्ञे प्रति समुदायस्यैव संज्ञित्वं दृष्टम् । अन्यथा प्रत्येकं संज्ञित्वे 'निर्यातं' इत्यादावपि धातुयकारस्य संयोगसंज्ञाप्रसङ्गेन "संयोगादेरातो धातोर्यण्वतः" इति निष्ठानत्वं स्यात् । विस्तृतं चैतन्महाभाष्यएवेति भावः। सत्यप्येकवचने एकलक्षणत्वाभावात् अन्वयव्यभिचार इति भावेनाह—**यस्येति** । छत्रचामरादेः प्रत्येकं लक्षणत्वं, तथा "अजाद्यतः" इत्यत्र टाप्प्रत्ययविधि प्रत्यजादिगणस्य अकारान्तस्य च 'अजा एडका' इत्यादौ 'सर्वा' इत्यादौ च प्रत्येकं निमित्तत्वं दृष्टं, अन्यथा 'यस्य छत्रादयस्सराजा' इति 'अजाद्यदन्तचष्टाप्' इति निर्देशस्स्यादित्यर्थः । आदि-

प्रकाशः

पदेन "अदेङ्गुणः" इत्यादौ प्रत्येकं संज्ञादर्शनादिति ग्राह्यम्। ननु सान्नादौ प्रत्येकमतिव्याप्तिर्बाधकात्समुदाये लक्षणत्वं, तथा संयोगसंज्ञाऽपि 'निर्यातम्' इत्यादावतिप्रसङ्गादन्वर्थसंज्ञाविज्ञानाच्च समुदाये वर्तते। उक्तं च वृद्धिसूत्रे कैयटे—"संयोगसंज्ञा त्वन्वर्थत्वात्समुदाये प्रवर्तते" इति। तथा प्रत्येकमभ्यस्तसंज्ञायां 'नेनिजानि' इत्यत्र "अभ्यस्तानामादिः" इति प्रत्येकमाद्युदात्तत्वप्रसङ्गबाधकादुभेग्रहणबलाच्च समुदाये प्रवर्तते। छत्रादिकमतिव्याप्त्यादिशून्यत्वात् प्रत्येकमेव लक्षणम्। "अजाद्यतः" इत्यत्र 'सर्वा' इत्यादौ लक्ष्ये अकारान्तादपि टाप्प्रत्ययदर्शनादजादेरकारान्तत्वाव्यभिचारेण तद्विशेषणत्वायोगाच्च प्रत्येकं निमित्तत्वम्। न च बाधकापत्तेः व्यभिचारो दोषावहः। उक्तं चाचार्यैः—

व्यभिचार्यपवादेन मानमेव भविष्यति।

इतीतिचेत्, तर्हीहापि व्यावर्त्याभावात् बाधकात्प्रत्येकमेव लक्षणमस्तु। अत एव त्वया "जगद्वाचित्वात्" इत्यादौ प्रत्येकमेव हेतूक्तमिति भावः। ननु 'गर्गाः शतं दण्ड्यन्ताम्' इत्यत्रापराधकर्तृषु गर्गेषु शतनिष्कदण्डनं न प्रत्येकं, किन्तु समुदाये दृष्टम्। अत एव—

प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः॥

इति वचनात् गर्गाणामप्राधान्येन 'दण्ड्यन्तां' इति लकाराभि-

चन्द्रिका

'गर्गाः शतं दण्डयन्ताम्' इत्यादौ समुदायइव 'विप्रा भोज्यन्ताम्' इत्यादौ प्रत्येकमपि वाक्यसमाप्तेर्दर्शनाच्च। तस्माज्जन्मादिहेतुत्वं प्रत्येकं लक्षणमिति ॥

यच्चोक्तं परैर्जन्मादिकारणत्वं तटस्थलक्षणमानन्दादिरेव स्वरूपलक्ष-

प्रकाशः

हितत्वात् प्रथमा। शतस्य च प्राधान्यादनभिहितत्वेन द्वितीया। विवृतं चैतद्बृद्धिसूत्रादौ तत्रतत्र महाभाष्ये। "समुदाये वाक्य-परिसमाप्तिस्तद्यथा 'गर्गाःशतं दण्ड्यन्ताम्' इति। अर्थिनश्च राजानो हिरण्येन भवन्ति। न च प्रत्येकं दण्डयन्ति" इति। तथा च तद्वदिहापि समुदाये लक्षणत्वमित्यत आह—**गर्गा इति**। अत्र वाक्यशब्दः प्रयोजकव्यापाररूपवाक्यार्थोक्तिद्वारा तत्फलभूतप्रयोज्यव्यापाररूपभोजनलक्षकः। तथा च वाक्यार्थफलस्य भोजनस्यान्नादनादिरूपत्वेन तृप्तिफलत्वेन च प्रतिविप्रं परिसमाप्तिदर्शनादित्यर्थः। उक्तं च कैयटे—"वाक्यशब्देन वाक्यार्थफलमुच्यते" इत्यादि। समुदायलक्षणत्वस्यैकवचनेनाज्ञापितत्वादयुक्तत्वाच्च प्रत्येकलक्षणत्वं न्याय्यमित्युपसंहरति—**तस्मादिति** ॥

जन्माद्यस्येति तेनैतद्विष्णोरेव स्वलक्षणम्।

इत्यनुव्याख्यानोक्तं स्वरूपलक्षणत्वं समर्थयितुमद्वैत्युक्तटस्थत्वमनूद्य निराह—**यच्चेति**। यथा चन्द्रस्य शाखाग्रं तटस्थलक्षणं, प्रकृष्टप्रकाशत्वं स्वरूपलक्षणं, तद्वदिति भावः। अत्र यद्यपि तट-

चन्द्रिका

णमिति, तत्र, न तावल्लक्ष्यगतागते स्वरूपतटस्थलक्षणे इति युक्तम्, काकादेर्गृहे, कारणत्वस्य च ब्रह्मणि, अध्यासतटस्थलक्षणस्य कारणत्रितयजन्यत्वस्य चाध्यासे सत्त्वेन स्वरूपलक्षणत्वापातात्। आनन्दादेस्स्वरूपलक्षणत्वाभावप्रसङ्गाच्च। एतेन—सत्यासत्ये स्वरूपतटस्थलक्षणे इति निरस्तम्। काकादेरध्यासतटस्थलक्षणस्य च गृहादावक-

प्रकाशः

स्थलक्षणमेवानुवदनीयं, न स्वरूपलक्षणं, तस्यानुमतत्वादविरोधित्वेनादूष्यत्वाच्च। तथाऽपि तटस्थस्य लक्षणं तत्रातिव्याप्तमिति कक्तुं वा, तल्लक्षणमत्रास्तीति तद्वदिदमपि स्वरूपलक्षणमिति वक्तुं वा, विभागएवायमयुक्त इति वक्तुं वेति ध्येयम्। के ते स्वरूपतटस्थलक्षणे, लक्ष्यगतागते वा, सत्यासत्ये वा, यावत्स्वबोध्यव्यावृत्तिभाव्यभाविनी वा, यावल्लक्ष्यभाव्यभाविनी वा, लक्ष्यान्तर्गतानन्तर्गते वा, निरुपाधिकसोपाधिकरूपे वा, स्वतोव्यावर्तकव्यावर्तकान्तरोपस्थापकरूपे वा, विशेषणोपलक्षणरूपे वेत्यष्टधा विकल्प्याद्यं निराह—**तत्रेति**। षष्ठ्यन्तानां 'सत्त्वेन' इत्यनेनान्वयः। **कारणेति**। दोषसंस्कारेन्द्रियसम्प्रयोगरूपकारणत्रितयेत्यर्थः। **आनन्दादेरिति**। तस्य ब्रह्मैक्येन तदनिष्ठत्वादिति भावः। एतेन—तटस्थलक्षणलक्षणस्य लक्ष्यागतत्वस्य स्वरूपलक्षणे आनन्दादावतिव्याप्तिः, कारणत्वादावसम्भवश्चोक्त इति ध्येयम्। द्वितीयं निराह—**एतेनेति**। लक्ष्ये अनध्यस्ताध्यस्तरूपे इत्यर्थः। **काकादेरिति**। तत्र तटस्थलक्षण-

चन्द्रिका

लिपतत्वात् । ननु कारणत्वमपि विशिष्टे, न तु शुद्धइति चेन्न, शुद्धेऽसतोऽसम्भवादिप्रसङ्गेन तल्लक्षणत्वायोगात् । न च लक्षणत्वस्यैवाभावे तद्विशेषतटस्थलक्षणत्वं युक्तम् । शाखास्थूलतारादिकं तु न चन्द्रारुन्धत्यादिलक्षणत्वेनोच्यते, किन्तु चन्द्रादिव्यक्तिं प्रदर्श्य स चन्द्र इत्यादिकं वक्तुम् । प्रकृते तु न तथा,

प्रकाशः

मव्याप्तामित्युक्तं भवति । यदुक्तं—ब्रह्मणि कारणत्वस्य सत्त्वेनेत्यादि, तन्न, मायावच्छिन्नं ब्रह्म कारणमिति पक्षे कारणत्वस्य मायाविशिष्टगतत्वेन शुद्धगतत्वाभावादित्याशङ्क्य निरस्यति—नन्विति । आदिपदेनातिव्याप्तिः, शुद्धस्यैव जिज्ञास्यब्रह्मतया लक्ष्यत्वेनालक्ष्ये विशिष्टे गतत्वात् । उपलक्षणमेतत् । मायाब्रह्मणी सूत्रद्वयमिव रज्जौ कारणमिति पक्षे कारणत्वस्य ब्रह्मणि सत्त्वेन स्वरूपलक्षणत्वापत्तिः, मायायामतिव्याप्तिः । मायैव तु कारणं ब्रह्म त्वधिष्ठानमिति पक्षेऽसम्भवोऽतिव्याप्तिश्चेत्यपि बोध्यम् । स्वरूपलक्षणस्यैव लक्ष्यस्थत्वनियमो न तटस्थस्येत्यत आह—न चेति । असम्भवादिना लक्षणत्वस्यैवाभावे इत्यर्थः । कथं तर्हि लक्ष्यनिष्ठमपि शाखादिकं चन्द्रादितटस्थलक्षणमित्यत आह—शाखेति । नन्विहापि "तद्ब्रह्म" इति वक्तुं "यतो वै" इत्यनेन कारणत्वमुच्यते, न तु लक्षणत्वेनेत्यत आह—प्रकृते त्विति । "किंलक्षणकं पुनस्तद्ब्रह्मेत्यत आह" इति त्वदीयभाष्ये लक्षणत्वो-

चन्द्रिका

शब्दैकगम्यशुद्धरूपस्य मानान्तरायोग्यत्वात् । न च "यतो वै" इत्यादिवाक्यमेवाभिधया कारणत्वमुपस्थाप्य पुनस्तन्मुखेन लक्षणया कारणत्वरहितमानन्दैकरसं शुद्धं बोधयतीति युक्तम्, सकृत्प्रयुक्ते वृत्तिद्वयायोगात् ।

प्रकाशः

क्तिविरोधात्, त्वदभिमते ब्रह्मणि ब्रह्मपदशक्तेरभावेन तदर्थं तद्बोधाय तदुक्तचयोगाच्चेति भावः । किञ्च तस्य शुद्धस्य बोधनमपि चन्द्रादेरिव प्रत्यक्षेणाथशब्देन । आद्ये दोषमाह—**शब्दैकेति** । उपलक्षणमेतत् । प्रत्यक्षेण तद्बोधने शाखादेरिव प्रत्यक्षस्यैव कस्य चिज्ज्ञापकस्य वाच्यत्वेनातादृशकारणत्वोक्तचयोगादित्यपि बोध्यम् । द्वितीयेऽपि "यतो वै" इत्यादिना शब्देन शुद्धब्रह्मबोधं कृत्वा "तद्ब्रह्म" इति वक्तुं कारणत्वमत्रोच्यते, अथ वाक्यान्तरेण । आद्येऽपि "यतो वै" इत्यादिना सर्वेण शब्दसमुदायेन तद्बोधः, उत 'यतः' इत्यनेनैवेति विकल्पान् हृदि कृत्वाऽऽद्यमनूद्य निराह—**न चेति । अभिधयेति** । 'यतः' इत्यादिपदगताभिधयेत्यर्थः । तस्यापि लक्ष्यत्वे मुख्यस्यान्यस्याभावेन मुख्यार्थसम्बन्धाभावाद्वचनवृत्त्या कारणत्वप्रतीतेरिति भावः । **तन्मुखेनेति** । शाखामुखेन चन्द्रबोधनवदिति भावः । **लक्षणयेति** । मुख्यवृत्तश्चैवंविधस्याप्रतीतेरिति भावः । 'वृत्तिद्वय' इत्युपलक्षणम् । लक्षणायाः पदवृत्तित्वेन वाक्यस्य लक्षकत्वायोगात्, "अर्थमन्त-

चन्द्रिका

केवललक्षणयैव शुद्धबोधनसम्भवेनाभिधया कारणत्वोपस्थापनवैयर्थ्याच्च। एतेन—'यतः' इत्यनेनैव पदेन शुद्धप्रतीतिरिति निरस्तम्। शुद्धरूपस्य तेनैव सिद्धत्वेन शेषवैयर्थ्यात्। सत्यज्ञानादिवाक्यान्तरेण शुद्धसिद्धौ तु कारणवाक्यवैयर्थ्यम्। नहि 'प्रकृष्टप्रकाशश्चन्द्रः' इत्युक्त्वा शाखाग्रमपि दर्शयन्ति। न वा प्रकृष्टप्रकाशत्वादि-

प्रकाशः

र्वेदि" इत्यादौ वाक्ये लक्षकत्वस्याखण्डार्थत्वभङ्गे निरासात्, विरम्यव्यापारायोगाच्चेत्यपि ध्येयम्। ननु यथा 'गङ्गायां घोषः' इत्यत्र गङ्गापदं शक्त्या प्रवाहमुपस्थाप्य तीरमुपस्थापयति, यथा वा वायुक्षेपिष्ठाद्यर्थवादस्स्वार्थं शक्त्योपस्थाप्य प्राशस्त्यं लक्षयति, तद्वदत्रापीति चेत्, भ्रान्तोसि। न हि तत्र शब्दएव वृत्तिद्वयेन द्वयमप्युपस्थापयति, किन्तु लक्षणया तीरादिकमेव। प्रत्येता तु शब्दतात्पर्यमजानन् पूर्वं प्रवाहादि प्रतीत्य तत्रानुपपत्तिं मन्वानस्तीरादि प्रत्येतीत्येव। न चैवं प्रकृते, जन्मादिसूत्रे कारणत्वस्य श्रुत्यर्थत्वेनैव कीर्तनादिति भावः। **केवलेति**। न च मुख्यार्थसम्बन्धार्थं तदुक्तिः, शुद्धस्यासङ्गत्वेन तीरे पूरसंबंधस्येव शुद्धे कारणत्वसम्बन्धाभावेन तदनपेक्षणादिति भावः। द्वितीयं निराह—**एतेनेति**। तृतीयं प्रत्याह—**सत्येति**। उभाभ्यामपि ब्रह्मसिद्धिरस्त्विति चेत्, किं साक्षात् उत परम्परया। आद्ये आह—**कारणेति**।

चन्द्रिका

ज्ञानानुपायमन्यदेवोक्त्वा 'प्रकृष्टप्रकाशश्चन्द्रः' इति वदन्ति । न च 'जगत्कारणं ब्रह्म' इत्यनुक्त्वा "आनंदो ब्रह्म" इति वक्तुमशक्यम् । नापि यावत्स्वप्रत्याय्यव्यावृत्तिभाव्यभाविनी स्वरूपतटस्थलक्षणे, त्वन्मते यावद्व्यावृत्तिभाविव्यावर्तकान्तराभावेनास्यैव यावद्व्यावृत्तिभावित्वावश्यम्भावात् * ।

प्रकाशः

अन्त्यआह—**न चेति** । कारणत्वस्य स्वरूपलक्षणस्य ज्ञाने अभिधाने वा अनुपयोगात् तदुक्तिर्व्यर्थेत्यर्थः । तृतीयमाशङ्क्य प्रत्याह—**नापीति** । स्वबोध्यव्यावृत्तिर्यावल्लक्ष्येऽस्ति, तावत्तत्र वर्तमानं स्वरूपं, तावदवर्तमानं तटस्थम् । अस्ति चेदं प्रकृष्टप्रकाशत्वे काकादौ चेति भावः । **व्यावर्तकान्तरेति** । सत्य-

* न च स्वज्ञाप्यव्यावृत्त्यधिकरणयावत्कालवृत्तित्वं ज्ञापकस्य कारणत्वस्य नावश्यकमिति शङ्क्यम्, स्वयमेवानृतादिव्यावृत्तिरूपत्वेन ब्रह्मस्वरूपमात्रत्वेन च व्यावृत्तिं प्रति कारकत्व-ज्ञापकत्वरहिते सत्यादिवाक्यतात्पर्यविषये स्वरूपलक्षणे यावत्स्वप्रत्याय्यव्यावृत्तिभावित्वस्यानभ्युपगमेन कारणत्वएव तस्य वाच्यत्वादित्याशयात् । न च स्वप्रत्याय्यव्यावृत्त्यधिकरणकालत्वव्यापकत्वमुक्तलक्षणार्थः । इदं च स्वप्रत्याय्यव्यावृत्त्यधिकरणकालत्ववति तत्त्वज्ञानाव्यवहितोत्तरक्षणे मिथ्यात्वेनावर्तमानस्य कारणत्वस्य न संभवतीति वाच्यम्, व्यावृत्तेर्मिथ्यात्वे तस्याः कारणत्वस्येव तत्त्वज्ञानाव्यवहितोत्तरक्षणे सत्त्वस्यैवासंभवात्, सत्यत्वेपि तत्त्वज्ञानेन सर्वदृश्यविलयोपगमेन तत्त्वज्ञानोत्तरं क्षणस्यैवाप्रसिद्धया तमादाय दूषणाप्राप्त्या कारणत्वे उक्तस्वरूपलक्षणत्वस्य निर्बाधत्वात् ॥

चन्द्रिका

अध्यासतटस्थलक्षणेऽतिव्याप्तेश्च *। अत एव न यावल्लक्ष्यभाव्यभाविनी स्वरूपतटस्थललक्षणे, अलक्ष्यव्यावर्तकस्याभावे लक्ष्यस्यानवस्थानाच्च †।

प्रकाशः

त्वादेर्लक्ष्याभेदेन तटस्थत्वाभावादस्यैव स्वरूपलक्षणत्वमिति भावः। **अध्यासेति**। कारणत्रितयजन्यत्वस्य यावद्व्यावृत्ति सत्त्वादिति भावः। चतुर्थं निराचष्टे—**अत एवेति**। उक्तातिव्याप्तेरित्यर्थः। **अनवस्थानाच्चेति**। लक्षणं हि लक्ष्यस्यालक्ष्याद्व्यावर्त्तकं सत्स्वयं

* न चास्मिन्नुत्तरस्मिंश्च कल्पे कारणत्रितयजन्यत्वमध्यासस्य स्वरूपलक्षणमेवेत्युपगमान्न तत्रातिव्याप्त्युक्तिर्युक्ता। युज्यते चैकस्यैव लक्षणभेदेन लक्ष्यत्वमलक्ष्यत्वं च, साध्यसंदेहजनककोटिद्वयोपस्थापकपक्षधर्मताज्ञानविषयत्वे सति हेत्वभिमतत्वमिति सव्यभिचारलक्षणं प्रत्यलक्ष्यस्य विरुद्धस्य अनुमितिविरोधिसंबन्धाव्यावृत्तिरूपतल्लक्षणं प्रति लक्ष्यत्वदर्शनादिति वाच्यम्, लक्षणविभाजकयोस्स्वरूपतटस्थत्वयोरेकत्र समावेशस्यैवायुक्तत्वात्। विभागस्य परस्परासंकीर्णधर्मकथनरूपत्वात्। उदाहृतं सव्यभिचारलक्षणद्वयं तु मतभेदेन प्रवृत्तमिति न तद्दृष्टान्तेन एकमतानुसारिभिन्नभिन्नलक्षणानि प्रति एकस्यैव प्रकृते लक्ष्यालक्ष्यभावसंभव इत्यलम्॥

† लक्ष्यलक्षणभावस्य परस्परनिरूप्यत्वेन तयोरेकतराभावेऽपरस्य दुस्स्थतया लक्षणाभावदशायां लक्ष्यत्वस्य दुर्निरूपत्वेन तदाश्रयरूपलक्ष्यावस्थितेरयोगादिति गुरुराजीयाभिमतोर्थः। अस्मिन् लक्षणवाक्ये लक्ष्यलक्षणपदाभ्यां ज्ञाप्यज्ञापकभावएव विवक्षितोऽतो नायं दोषइति न शङ्कनीयम्, 'यावत्स्वप्रत्याख्य' इत्यादिपूर्वोक्तलक्षणानतिरेकप्रसङ्गेन तथाविवक्षणस्य दुष्करत्वात्। उद्देशेनैव ज्ञातस्य लक्षणधर्मिणो लक्षणज्ञाप्यत्वाभावेनासंभवाच्च। लक्षणज्ञानजन्यव्यावृत्तिविधेयकानुमितौ भानमात्रेण लक्षणधर्मिणोऽपि लक्षणज्ञाप्यत्वाभिमाने तु, उदासीनघटादिपदार्थस्यापि तादृशसमूहालम्बनानुमितौ भानसंभवेन लक्षणज्ञाप्यभूतोदासीनपदार्थाधिकरणयावत्कालभावित्वस्य क्वाप्यभावेनासंभवानतिव्याप्तेरिति ध्येयम्॥

चन्द्रिका

न ह्यक्षीराद्वचावर्तकहानिं क्षीरम् । न वाऽक्षीरदशायामसन्माधुर्यविशेषो न क्षीरस्वरूपलक्षणम् ।

ईशानः प्रभुरव्ययः ।
अद्वैतस्सर्वभावानां देवस्तुर्यो विभुस्स्मृतः ।
..... तुरीयं तत्सर्वदृक् सदा

इत्यादिश्रुत्या कारणत्वादेरपि यावल्लक्ष्यभावित्वाच्च * ।

प्रकाशः

यावल्लक्ष्येऽस्ति, तावल्लक्ष्यमलक्ष्याद्व्यावर्तयति । स्वस्मिंश्चाभावे कथमितरव्यावृत्तस्वरूपं सल्लक्ष्यमवतिष्ठेत । अतो लक्षणं चेद्यावल्लक्ष्यभाव्येव वाच्यमिति कारणत्वस्यातथात्वे लक्षणत्वमेव नेति तटस्थत्वं दूरापेतम्, अतो यावल्लक्ष्यभावित्वं तस्योपेयमिति भावः । ननु सृष्ट्याद्यभावकालेऽसत्कारणत्वं कथं स्वरूपलक्षणं स्यादित्यत आह—**न वेति** । तदशायां ब्रह्मत्वस्यैवाभावादिति भावः । अङ्गीकृत्य चेदमुक्तम्, वस्तुतस्त्वकारणतादशैव नेत्याह—**ईशान इति** । माण्डूके "प्रपञ्चोपशमं शिवमद्वैतं चतुर्थमन्यन्ते" इति पूर्ववाक्ये प्रपञ्चोपशमशब्देन सर्वानिष्टनिवृत्तिकारणत्वमुक्त्वा, तत्रैवार्थे

* ईशानत्वप्रभुत्वादीनामुपलक्षणत्वेनापि श्रुत्यर्थाबाधान्न कारणत्वस्य यावल्लक्ष्यभावित्वमिति शङ्का नैव युक्ता, स्वकल्पितस्वरूपतटस्थलक्षणभेदरक्षणाय श्रुत्यन्यथानयनात्स्वकल्पितप्रक्रियात्यागस्यैव ज्यायस्त्वात् । सर्वदृक्सदा' इति कारणत्वव्याप्यसार्वज्यस्य सार्वदिकत्वोक्तया कारणत्वेपि तदवश्यम्भावेन उपलक्षणत्वस्य दुरुपगमत्वाच्च । सर्वविषयकत्वोपलक्षितदृग्रूपत्वमेव सर्वदृक्त्वमिति तस्य सार्वदिकत्वेपि न सार्वज्यस्य तादिति तु रिक्तं वचः, तस्य केवलदृग्रूपत्वानतिरेकेण दृक्पदमात्रलभ्यतया सर्वपदवैयर्थ्यप्रसङ्गेन श्रुतितात्पर्यविषयत्वात् ॥

चन्द्रिका

नापि लक्ष्यान्तर्गतानन्तर्गते स्वरूपतटस्थे, अन्तर्गतपदेन लक्ष्यैकदेशोक्तौ लक्ष्यस्याखण्डत्वहानेः। अभेदोक्तौ तु प्रकृष्टप्रकाशत्वादे-

प्रकाशः

निवृत्तेस्सर्वदुःखानामीशानः प्रभुरव्ययः।

इत्यादिमन्त्रस्योक्तयाऽव्ययपदेन कारणत्वानपगमस्योक्तेः, "निवृत्तेस्सर्वदुःखानां" इत्यस्यान्वयाय 'कारणं' इति पदस्यावश्यमध्याहार्यत्वात्, प्रभुपदस्य वा कारणार्थत्वादिति भावः। उक्तं च भगवत्पादैः—"सर्वदुःखानां निवृत्तेः कारणभूतस्तुरीयो देवः" इति। तथा च सर्वदुःखानां निवृत्तेः कारणं, 'ईशानं' मुक्तानां 'अनः' चेष्टकः, अनितेः पचाद्यच्। 'अद्वैतः' द्वैतशब्दितमिथ्याज्ञाननिवर्तकः। 'सर्वभावानां' सर्वजीवानां 'देवः' प्राप्यः, गत्यर्थत्वाद्दिव इति मन्त्रपदानामर्थो ध्येयः। ब्रह्मत्वेन पराङ्गीकृततुरीयपरत्वप्रदर्शनाय "अद्वैतः" इत्यादिशेषोक्तिः। "तुरीयं तत्सर्वदृक् सदा" इति कारणत्वाविनाभूतसार्वज्ञ्यस्य ताटस्थ्येनाङ्गीकृतस्य सदातनत्वोक्तेरिति भावः। न चाव्ययत्वं सदातनत्वं च स्वरूपापेक्षयेति वाच्यं, स्वरूपतथात्वस्य धर्मिग्राहकादिमानसिद्धत्वेन तदुक्तेर्वैयर्थ्यात्। श्रुतधर्मविशिष्टत्वेन तथात्वस्य सम्भवे तत्त्यागे हेत्वभावाच्च। पञ्चमं निराह—**नापीति**। आनन्दकारणत्वयोः स्वरूपान्तर्गतानन्तर्गतत्वात्स्वरूपतटस्थत्वे युक्ते इति भावः। अन्तर्गतपदार्थं द्वेधा विकल्प्य क्रमेण निराह—**अन्तर्गतेति**।

चन्द्रिका

श्चन्द्रस्वरूपलक्षणत्वेन स्वीकृतस्यापि तन्न स्यात् * । त्वया लक्षणवाक्य स्याखण्डार्थत्वाय † प्रकृष्टत्वादेश्चन्द्रप्रातिपदिकार्थात् बहिर्भावस्योक्त-त्वात् । प्रसिद्धस्यासाधारणधर्मस्य लक्षणत्वेनाप्रसिद्धस्य ‡ धर्मिणश्च

प्रकाशः

'तन्न स्यात्' स्वरूपलक्षणत्वं न स्यादित्यर्थः । स्वरूपत्वे लक्ष-णत्वमेवायुक्तमित्याह—**प्रसिद्धस्येति ।**

---

* ननु प्रकृष्टप्रकाशत्वपदेन प्रकाशत्वसमानाधिकरणैतज्जयोतिर्मण्डलान्तर्ग-ततेजोवधिकापकर्षशून्यत्वस्य विवक्षितत्वादभावस्य चाधिकरणस्वरूपत्वेन चन्द्रा-भिन्नस्य तस्य चन्द्रस्वरूपलक्षणत्वे नानुपपत्तिरिति चेन्न, तथा सति जगत्का-रणपदेनापि जगन्नियतपूर्ववृत्तित्वसमानाधिकरणान्यथासिद्धिविरहस्यैव विवक्षितुं श-क्यत्वेन अभावरूपत्वेन लक्ष्याभिन्नस्य कारणत्वस्य स्वरूपलक्षणत्वानङ्गीकारस्या-युक्तत्वापत्तेः ॥

† 'अखण्डार्थत्वाय' एकप्रातिपदिकार्थमात्रनिष्ठत्वरूपाखण्डार्थत्वनिरुक्त्यु-पपादनायेत्यर्थः । तेन प्रकृष्टत्वादिसंसर्गस्य लक्षणवाक्यजन्यबोधे भानाभावमात्रेण पदान्तरार्थसंसर्गागोचरप्रमितिजनकत्वरूपाखण्डार्थत्वस्य 'प्रकृष्टप्रकाशश्चन्द्रः' इति वाक्ये निर्बाधतया न तदर्थं प्रकृष्टत्वादेश्चन्द्रप्रातिपदिकार्थबहिर्भाव आवश्यक इति शङ्काया अनवकाशः । "यद्वा तत्प्रातिपदिकार्थता" इति प्राचीनोक्त-निरुक्त्यन्तरानुरोधायावश्यकत्वात् ॥

‡ अत्र प्रसिद्धाप्रसिद्धपदाभ्यामनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयविष-याविषयौ विवक्षितौ । अतो लक्षणधर्मिणो ब्रह्मणः श्रुतिप्रसिद्धत्वेन कथमप्रसिद्ध-त्वमिति शङ्कानवकाशः, सगुणत्वनिर्गुणत्वादिविप्रतिपत्तिकालीनब्रह्मज्ञानस्यातादृश-त्वात् ॥

चन्द्रिका

लक्ष्यतया, लक्षणस्य लक्ष्यमात्रत्वानुपपत्तेश्च *। कारणत्वे लक्ष्यमात्रत्व-रूपस्वरूपलक्षणत्वस्य † ममाप्यनभिलषितत्वाच्च । आनन्दत्वादेरपि धर्मत्वाच्च । आनन्दो लक्षणमिति चेत्,

प्रकाशः

सिद्धान्ते तु सविशेषत्वेन न लक्ष्यमात्रत्वमिति भावेनाह—**कारणत्व इति। आनन्दत्वादेरिति।** तथा च तस्यापि ताटस्थ्यं स्यादिति भावः।

---

* 'लक्षणस्य' सत्यज्ञानादिपदार्थस्य, 'लक्ष्यमात्रत्वानुपपत्तेः' लक्ष्यात्यन्ताभिन्नत्वायोगात् । उक्तप्रसिद्धयप्रसिद्धयोर्विरुद्धतया तदाश्रययोर्लक्षणलक्ष्ययोरत्यन्ताभेदायोगेनासंभवादिति भावः । एतेन लक्ष्यान्तर्गतपदेन उपहितकेवलात्मना लक्ष्यात्यन्ताभिन्नत्वविवक्षणान्न दोष इति निरस्तम्, प्रागुपदर्शितरीत्या अभावरूपे कारणत्वे तिव्याप्तितादवस्थ्याच्च । 'उपहितात्मना' इत्यस्य प्रयोजनाभावाच्च । किंचाभेदविशेषणमात्यन्तिकत्वं यदि तात्त्विकभेदासामानाधिकरण्यं, तार्हि त्वया क्वापि तात्त्विकभेदस्यानुपगमाद्व्यावर्तकम् । यदि चाविद्यिकभेदासामानाधिकरण्यरूपं, तार्हि स्वेनैवाविद्यिकभेदेनानन्दादीनां धर्मधार्मिभावोपपादनपूर्वकं लक्षणत्वव्यवस्थापनविरोध इत्यलम् ॥

† 'लक्ष्यमात्रत्वरूपस्वरूपलक्षणत्वस्य' लक्ष्यात्यन्ताभिन्नत्वरूपस्वरूपलक्षणत्वस्य । लक्ष्यात्यन्ताभिन्नत्वं च स्वातिरिक्तलक्ष्यप्रतियोगिकासमानाधिकरणलक्ष्याभेदाश्रयत्वरूपमद्वैतिसम्मतम् । एतादृशलक्ष्यमात्रत्वस्य चाद्वैतिमत इवास्मन्मतेऽपि कारणत्वे नाङ्गीकारः, अस्मदुपगतस्य ब्रह्मभेदप्रतिनिधेर्विशेषस्यापि स्वातिरिक्तलक्ष्यप्रतियोगिकत्वेन तदसामानाधिकरण्यस्य कारणत्वनिष्ठब्रह्माभेदे सविशेषाभेदवादिभिर्दुरुपगमत्वादिति बोध्यम् ॥

चन्द्रिका

तर्हि जगत्कारणं लक्षणमस्तु * । कारणस्य सोपाधिकत्वेन निरुपाधिकस्वरूपत्वाभावे आनन्दस्यापि तन्न स्यात्, तन्मते शुद्धे आनन्दत्वजातेरभावेनानुकूलवेदनरूपस्य वा परमप्रेमास्पदस्य वा दुःखविरोधोपलक्षितस्वरूपस्य वा तस्य सोपाधिकत्वात् ।

प्रकाशः

तर्हीति । नन्वानन्दस्य धर्मतया लक्षणत्वं युक्तं, न तु कारणस्य, धर्मित्वादिति चेन्न. आनन्दस्य लक्ष्याभेदे धर्मत्वाभावात्, कारणस्य शक्तिरूपतया धर्मत्वाच्चेति भावः । **सोपाधिकत्वेनेति** । अनन्यथासिद्धत्वादिघटितरूपत्वाच्छक्तेरपि विषयनिरूप्यत्वाच्चेत्यर्थः । 'शुद्धे' इति जात्यभावे हेतुगर्भम् । 'तस्य' आनन्दस्येत्यर्थः ।

---

* न च जगत्कारणं ब्रह्मलक्षणमित्येतदिष्टमेव, जगत्कारणभूतानां विशिष्टब्रह्मात्मकब्रह्मविष्णुरुद्ररूपशक्तीनां उपहितब्रह्माभिन्नानां शुद्धस्वरूपलक्षणत्वे बाधकाभावात् । जगत्कारणत्वं तु तटस्थमेव, तस्योक्तशक्तिधर्मत्वेन स्वरूपैक्याभावादिति वाच्यम्, "शक्तयः परमात्मनः" इत्यादिभिश्शक्तीनां शिवसंबन्धित्वाभिधायिभिर्विरोधेन, विशिष्टशुद्धयोरभेदासंभवेन च शक्तीनां शुद्धात्यन्ताभिन्नत्वरूपशुद्धस्वरूपलक्षणत्वस्यानुपपत्तेः । शुद्धसंबन्ध्युपहितरूपाभिन्नत्वात्तदुपपत्तिरिति चेत्तदीयशक्तिरूपविशिष्टस्वरूपाभिन्नस्य कारणत्वस्य कुतो न स्वरूपलक्षणत्वम्, शुद्धस्वरूपैक्याभावस्योभयत्र तौल्यादिति दिक् ॥

चन्द्रिका

एवं ज्ञानमपि अर्थप्रकाशात्मकत्वेन सोपाधिकमेव, भोजनस्य भोक्तृभोज्यसापेक्षत्ववत् ज्ञानस्य ज्ञातृज्ञेयसापेक्षत्वात्। एतेन, यदुक्तं विवरणे—विषयानवच्छिन्नमादित्यादिप्रकाशवदर्थप्रकाशनसमर्थं ज्ञानं स्वरूपलक्षणमिति, तन्निरस्तम्। सामर्थ्यस्य शक्तिरूपत्वात्। विषयनिरूप्यत्वाच्च। जगज्जननादिसामर्थ्यस्यैव स्वरूपलक्षणत्वोपपत्तेश्च। स्वरूपप्रकाशत्वं नान्योपाधिकमिति चेन्न, स्वरूपस्य स्ववेद्यत्वात्। व्यवहारयोग्यतायाश्च व्यवहारोपाधिकत्वात्। एतेन—निरुपाधिक-

प्रकाशः

विवरणोक्तं ज्ञानस्य स्वरूपलक्षणत्वमपोहितुं सोपाधिकत्वमाह—**एवमिति**। तदेव व्यनक्ति—**भोजनस्येति**। तथा सत्यत्वादिकमप्यात्यन्तिकनिषेधाप्रतियोगित्वादिरूपतया सोपाधिकमेवेत्यपि ध्येयम्। ननु नित्यज्ञानस्य न ज्ञात्रादिसापेक्षत्वमिति चेत्, तर्हि वेदवाचोऽपि वक्तृसापेक्षता न स्यात्। विस्तृतं चैतज्जडत्वहेतुभङ्गइति भावः। **विषयेति**। तथा च न सोपाधिकं ज्ञानमिति भावः। **शक्तीति**। तर्हि सैव लक्षणं न ज्ञानमिति भावः। अस्त्वित्यत आह—**विषयेति**। अर्थप्रकाशनशक्तिरिति विषयनिरूप्यत्वेन शक्तेरपि सोपाधिकत्वादिति भावः। किं स्वरूपावेदकप्रकाशत्वं स्वरूप व्यवहारयोग्यत्वं वा। न द्वयमपीत्याह—**स्वरूपस्येति**। षष्ठं निराह—**एतेनेति**। ज्ञानानन्दयोः सोपाधिकत्वकथनेनेत्यर्थः।

चन्द्रिका

सोपाधिके स्वरूपतटस्थे इति निरस्तम् । प्रकृष्टप्रकाशत्वादेर्निकृष्टादिनिरूप्यतया मिथ्यार्थावभासत्वस्यापि मिथ्यार्थनिरूप्यतया तयोश्चन्द्राध्यासस्वरूपलक्षणत्वाभावापाताच्च । एतेन—स्वयं व्यावर्तकं स्वरूपलक्षणं, व्यावर्तकोपस्थापकं तु तटस्थं, काकादिर्हि व्यावर्तकं संस्थानाद्युपस्थापयतीति निरस्तम् । त्वन्मते कारणत्वेनोपस्थाप्यव्यावर्तकान्तराभावात् । स्वरूपमात्रस्य च जिज्ञासाधर्मित्वेन प्रागेवोपस्थितेः * । एतेनैव—कार्यान्वयिरूपं विशेषणं स्वरूपलक्षणं, तदनन्वयिरूपोपलक्षणं तटस्थं । आनन्दत्वादिकं "तद्विजिज्ञासस्व" इति वाक्यविहितजिज्ञासारूपकार्यान्वयि, तस्य मुमुक्षुज्ञेयत्वात्, न तु कारणतेति निरस्तम् । इतरव्यावृत्त्यर्थमानन्दत्वादेरिव

प्रकाशः

दोषान्तरमाह—**प्रकृष्टेति** । सप्तममनूद्य निरस्यति—**एतेनेति** । **त्वन्मत** इति । तथा च कारणत्वं स्वरूपलक्षणं स्यादिति भावः । **प्रागेवेति** । कारणत्वज्ञानात्प्रागित्यर्थः । विशेषणादिस्वरूपं विवेचयन् अष्टमं निराह—**एतेनेति** ।

---

* एतेन त्रिविधपरिच्छेदशून्यत्वरूपानन्तत्वस्य कारणत्वोपस्थाप्यव्यावर्तकान्तरत्वं निरस्तं बोध्यम्, तस्य ब्रह्मस्वरूपलक्षणत्वेन तन्मात्रभूतस्य ब्रह्मस्वरूपव्यावर्तकत्वस्य, जिज्ञासाधर्मितया पूर्वमेव जातब्रह्मस्वरूपज्ञानेन विषयीकृततया कारणत्वोपस्थाप्यत्वस्य चासंभवात् ॥

चन्द्रिका

कारणत्वस्यापि जिज्ञास्यत्वात् । अन्यथा समन्वयाविरोधाध्याययो-स्तद्द्युत्पादनं न स्यात् । न च ब्रह्मण्यानन्दत्वादेः कारणत्वादेश्चा-रोपितत्वेऽविशिष्टेऽपि दुःखव्यावृत्तिरेव ज्ञेया, न त्वकारणव्यावृत्ति-रित्यत्र हेतुरस्ति । सुखस्वभावत्वादसुखव्यावृत्तौ कारणस्वभावत्वा-दकारणव्यावृत्तिरस्तु, "देवस्यैष स्वभावोयम्" इत्यादिश्रुतेः । किञ्च—जन्महेतुत्वेनैवोपलक्षणेनोपलक्ष्यज्ञानसिद्धेः स्थितिहेतुत्वाद्युप-लक्षणान्तरवैयर्थ्यम् । अस्मन्मते तु जन्महेतुत्ववत् स्थितिहेतुत्वमपि मुमुक्षुणा ज्ञेयम्, न त्वन्यज्ञानोपक्षीणम् । तस्माद्ब्रह्मशब्दार्थगुण

प्रकाशः

ज्ञेयत्वाज्ञेयत्वयोर्हेतुमाशङ्क्याह—**सुखेति** । व्यावृत्तिपदं ज्ञानपरं । यद्वा—"विज्ञानमानन्दं ब्रह्म" इति सामानाधिकरण्येन ब्रह्मणि सुखस्वरूपत्वादसुखव्यावृत्तिस्सिद्ध्यति, न तु कारणत्वेनाकारणत्व-व्यावृत्तिः येन तज्ज्ञानार्थं कारणत्वं ज्ञातव्यं स्यादित्यत आह—**सुखेति** । 'ब्रह्मणि' इति शेषः । **देवस्येति** । माण्डूके "भोगार्थं सृष्टिरित्यन्ये" इति पूर्ववाक्यप्रकृतसृष्टिं 'अयं' इति परामृश्य, 'एषः' इच्छारूपः सर्गः देवस्य स्वभाव इत्युक्तेरिति भावः । "इषु इच्छायां" इति धातोर्भावे घञि 'एषः' इति रूपम् । उपलक्षणत्वमङ्गीकृत्याप्याह—**किं चेति** । **ज्ञेयमिति** । ब्रह्मणि प्रकारतयेति भावः । "सृष्टिरक्षा" इत्यादिप्रागुक्तस्मृतेरिति भावः । **तस्मादिति** ।

चन्द्रिका

पूर्तिरूपस्वरूपलक्षणोपपादकं,

शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः ।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ॥

इत्यादिवचनसिद्धं 'यतः, येन' इत्यादिकारकशक्तिवाचिपञ्चम्याद्युक्तं जगज्जन्मादिसामर्थ्यमपि परमानन्दादिवत् यावल्लक्ष्यभाविरूपस्वरूपलक्षणमेव वह्नेर्दाहशक्तिवत्,

प्रकाशः

'स्वरूपलक्षणमेव' इत्यन्वयः । गुणपूर्तेरेव स्वरूपलक्षणत्वे किं कारणत्वेनेत्यत उक्तं—**उपपादकमिति** । तत्प्रकारः प्रागुक्तः । तर्हि तेनैवालं, किं गुणपूर्त्येति चेन्न, ब्रह्मशब्दार्थतया तस्या एवादौ वाच्यत्वादिति भावः । सामर्थ्यरूपत्वे हेतुः—**इत्यादिवचनेति** । तदर्थः प्रागुक्तः । किं तत्र तद्बोधकमित्यत उक्तं—**यत इति** । "जनिकर्तुः प्रकृतिः" इति विहितया 'यतः' इति पञ्चम्या "कर्तृकरणयोस्तृतीया" इति कर्तरि विहितया 'येन' इति तृतीयया कर्तृशक्तिरुच्यतइति ध्येयम् । जन्मादिकारणत्वं नाम जगज्जननपालनसंहरणनियमनादिशक्तिरित्युक्त्या फलोपधानस्याविवक्षितत्वात्पालनसंहरणादेरेकदा विरोध इति प्रत्युक्तम् । इदं कृत्स्नजननादिकमभिप्रेत्य । अन्यथा फलोपधानमपि सार्वकालिकमस्तीति ध्येयम् ।

चन्द्रिका

"एष नित्यो महिमा" "स्वाभाविकी ज्ञानबलक्रिया च" इत्यादिश्रुतेः। किञ्च—

असाधारणधर्मो हि लक्षणं परिकीर्त्यते।
तच्च निर्धर्मकब्रह्मवादिनां युज्यते कथम्॥

प्रकाशः

दाहशक्तेर्यावल्लक्ष्यभावित्वं प्रत्यक्षासिद्धमित्यतोऽत्रापि श्रुतिसिद्धमित्याह—**एष नित्यइति**। काण्वश्रुतौ षष्ठे चतुर्थब्राह्मणे, पूर्वं भगवतो महिमानमुक्त्वा "तदेतदृचाभ्युक्तं" इत्युदाहृते "एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा नो कनीयान्" इति मन्त्रे महिम्नो नित्यत्वोक्तेः, तथा "पराऽस्य शक्तिर्विविधैव श्रूयते" इति साक्षाच्छक्तेस्स्वाभाविकत्वश्रुतेरित्यर्थः। "**ज्ञानबलक्रिया**" इति समाहारद्वन्द्वः। "स नपुंसकम्" इति क्लीबत्वं नाश्रितम्। यद्वा—ज्ञानबलाभ्यां सहिता क्रिया 'ज्ञानबलक्रिया' इति। आदिपदात् "परेति यां प्राहुरजस्रशक्तिं" इत्यादेर्ग्रहः।

निर्गुणत्वं च तेनैव निषिद्धं प्रभुणा स्वयम्।

इत्यनुव्याख्यानं हृदि कृत्वा, ब्रह्मणो निर्धर्मकत्वमङ्गीकुर्वतां लक्षणसूत्रारम्भोऽयुक्त इत्याह—**किञ्चेति**।

अतो जीवैक्यमपि स निराचक्रे जगद्गुरुः।

चन्द्रिका

किञ्च—

स्वरूपं वा तटस्थं वा लक्षणं भेदकं मतम् ।
सजातीयाद्विजातीयात्तच्चाद्वैतिमते कथम् ॥
न च मिथ्याभेदसिद्धयै मिथ्यालक्षणकीर्तनम् ।
मुमुक्षुं तत्त्वजिज्ञासुं प्रति शास्त्रेषु शोभते ॥

न च कारणत्वे श्रुतेरतात्पर्यान्न प्रामाण्यम्, तात्पर्यनिर्णायकैःसूत्रैः प्रत्यधिकरणं "सदेव" इत्यादिवाक्यं न प्रधानादिकारणत्वपरम्, किन्तु ब्रह्मकारणत्वपरमित्युक्तेरिति ॥

प्रकाशः

इत्यनुव्याख्यानं हृदि कृत्वा, इतोऽपि न लक्षणसूत्रं युक्तमित्याह—**किञ्च—स्वरूपं वेति** । यत्तु सुधायां 'एतत्सूत्रारम्भो जीवैक्यवादिनां स्यात् कथं चित्, यदीदं तटस्थं स्यात् । स्वरूपलक्षणमिति चोपपादितम्' इति, तटस्थस्याव्यावर्तकत्वमुक्तं, तत्त्वभ्युपेत्य वादेन । अत एवोत्तरत्र "ननु तटस्थेनापि जगत्कारणत्वेन ब्रह्मणो जीवैक्यं निर्गुणत्वं च विरुध्यते" इत्यादिना तस्य व्यावर्तकत्वमुपपाद्यत इति भावः ।

न च मिथ्यागुणत्वं स्यादनिर्वाच्यस्य दूषणात् ।

इत्यनुव्याख्यानं हृदि निधायाह—**न चेति** । येन लक्षणसूत्रारम्भस्स्यात्, मिथ्यार्थकस्याप्रामाण्यादिति भावः । "अनिर्वाच्यस्य दूषणात्" इत्युपलक्षणमित्युक्तं भवति ॥

चन्द्रिका

केचित्तु—"यतो वै" इत्यादिवाक्येन प्रतिपन्नजन्मादिकारणत्वस्य ब्रह्मणस्सकलेतरव्यावृत्तं स्वरूपं सत्यज्ञानादिवाक्येनाभिधीयते । न च कारणत्वेनैव लक्षणेन स्वेतरसर्वव्यावृत्तिसिद्धेः किं सत्यादिवाक्येनेति शङ्क्यम्, यथा हि घटस्य* संस्थानविशेषादिना स्वेतरसर्वव्यावृत्तत्वेऽपि गन्धवत्त्वात्पृथिवीजातीयत्वम्*, एवं ब्रह्मणो जगत्कारणत्वेन स्वेतरव्यावृत्तत्वेऽपि जीवजडजातीयत्वमिति शङ्कायां, यथाऽब्वादेर्गन्धाभावादपृथिवीत्वम्, तथा ब्रह्मणोऽपि सोपाधिकसत्त्वादेरभावान्न जीवजडजातीयत्वमिति दर्शयितुं निरुपाधिकसत्यत्वादिलक्षणोक्तिरित्याहुः । तन्न,

प्रकाशः

यदुक्तं लक्षणमात्रं सजातीयविजातीयभेदकमिति, तत्र सत्यत्वादिकमेव तथा, न कारणत्वमिति यच्छ्रीभाष्यमत्तं, तदनूद्य निरस्यति—**के चित्त्विति** । तन्मते सत्यत्वादिस्वरूपं प्रागेवोक्तम् । यथाभाष्यमनूद्य तत्र चोद्यपरिहारौ श्रुतप्रकाशोक्तावनुवदति—**न चेति** । कारणत्वेनेतरव्यावृत्तावपि नेतरवैजात्यं सिद्ध्यति, तत्तु सत्यत्वादिनैवेति फलितार्थः ।

---

* 'संस्थानविशेषादिना' घटीयसंस्थानविशेषात्मकघटत्वादिना, 'स्वेतरसर्वव्यावृत्तत्वेऽपि' घटेतरावृत्तिघटत्वधर्मान्वयरूपवैलक्षण्याख्यस्वेतरव्यावृत्तिमत्त्वेऽपि, 'गन्धवत्त्वात्पृथिवीजातीयत्वम्' गन्धवत्त्वरूपपृथिवीत्वव्यञ्जकसद्भावात् घटेतरपटादिवृत्तिपृथिवीत्वरूपधर्मानन्वयरूपवैजात्याख्यस्वेतरव्यावृत्त्यभाव इत्यर्थः । व्यावृत्तेर्वैलक्षण्यवैजात्यभेदेन द्वैविध्यात्कारणत्वेन वैलक्षण्यसिद्धावपि वैजात्यासिद्धेस्तदर्थं सत्यत्वाद्युक्तिरिति 'सत्यत्वादिलक्षणोक्तेः' इत्यन्तग्रन्थस्याशयः ॥

चन्द्रिका

संस्थानविशेषो हि घटं * पटादिभ्य एव व्यावर्तयति, न तु पृथिवीमात्रात्, घटस्यापि पृथिवीत्वात् † । एवञ्च ‡ संस्थानादिकं येभ्यः पटादिभ्यो व्यावर्तयति, तद्विजातीयत्वमपि तेनैव सिद्धम् ।

प्रकाशः

तत्र कारणत्वेनैवेतरव्यावृत्तिवद्वैजात्यमपि सिद्ध्यतीति वक्तुं दृष्टान्तद्वयस्याप्युपपादनं विषममित्याह—**संस्थानेति** ।

---

* 'पटादिभ्यो व्यावर्तयति' पटादिप्रतियोगिकभेदविधेयकानुमितिविषयं करोति, 'न तु पृथिवीमात्रात्' पृथिवीत्वावच्छिन्नप्रतियोगिताकभेदविधेयकानुमितिविषयं न करोतीत्यर्थः । एतेन व्यावृत्तेर्वैलक्षण्यवैजात्यभेदोऽप्ययुक्तः, 'घटं पटादिभ्यो व्यावर्तयति, जलं पृथिव्या व्यावर्तयति' इत्यादिव्यवहारानुपपत्तेः । तत्र 'घटादिभ्यः' इत्यादिपञ्चम्यर्थप्रतियोगित्वान्वयस्य तदवृत्तिधर्मान्वयरूपवैलक्षण्ये तद्वृत्तिधर्मानन्वयरूपवैजात्ये तदेकदेशे वा कथमप्यसंभवादिति सूचयति ॥

† घटत्वस्य पृथिवीमात्रादव्यावर्तकत्वे हेतुः—'घटस्यापि पृथिवीत्वात्' इति । घटत्वाश्रयस्यापि पृथिवीत्वाश्रयत्वादित्यर्थः । घटत्वस्य पृथिवीत्वव्याप्यत्वादिति यावत् । भेदाभावस्य भेदप्रतियोगितावच्छेदकरूपतया पृथिवीत्वव्याप्यस्य घटत्वस्य पृथिवीत्वावच्छिन्नप्रतियोगिताकभेदाभावव्याप्यत्वावश्यम्भावेन तादृशघटत्वज्ञानं तदभावव्याप्यवत्ताज्ञानमुद्रया घटे पृथिवीत्वावच्छिन्नप्रतियोगिताकभेदानुमितिरूपां पृथिवीमात्राद्व्यावृत्तिधियं प्रतिबध्नातीति भावः ॥

‡ असंकीर्णोदाहरणाभावाद्विलक्षण्यापादकवैजात्यापादकभेदो व्यावर्तकस्य न युक्त एवेत्याह—एवं चेति । 'येभ्यः पटादिभ्यः' पटत्वादियद्धर्मावच्छिन्नेभ्यः, 'तद्विजातीयत्वमपि' तादृशपटत्वादिधर्मानाश्रयत्वमपि । एवं च यत्र यद्धर्मावच्छिन्न-

चन्द्रिका

* अबादेरपि पृथिवीमात्रव्यावर्तकाप्त्वादियोगादेव हि पृथिवीवैजात्यम् ।

प्रकाशः

**योगादेवेति । न तु गन्धाभावादित्यर्थः ।**

---

प्रतियोगिताकभेदबुद्धिजनकत्वं, तत्र तद्धर्मानाश्रयत्वरूपवैजात्यबुद्धिजनकत्वमिति, यत्र यद्धर्माश्रयावृत्तिधर्मान्वयरूपवैलक्षण्यसंपादकत्वं, तत्र तद्धर्मानाश्रयत्वरूपवैजात्यसंपादकत्वमपीति च व्याप्तिस्संस्थानविशेषरूपघटत्वादावेव सुग्रहा । पटत्वावच्छिन्नप्रतियोगिताकभेदबुद्धिजनके पटत्वादिरूपधर्माश्रयावृत्तिधर्मान्वयरूपवैलक्षण्यसंपादकेच घटत्वादौ पटत्वानाश्रयत्वरूपवैजात्यसंपादकत्वस्याक्षतत्वादिति भावः ॥

* एवं यत्र यद्धर्मानाश्रयत्वरूपवैजात्यसंपादकत्वं तत्र तद्धर्माश्रयावृत्तिधर्माश्रयत्वरूपवैलक्षण्यसंपादकत्वमिति विपरीतव्याप्तिश्चास्तीत्याह—अबादेरिति । 'अप्त्वादियोगादेव' इत्येवकारेण 'वह्निमत्त्वादेव धूमवत्त्वं' इत्यादाविव अप्त्वादियोगरूपवैलक्षण्यस्य पृथिवीवैजात्यव्यापकत्वलाभात्तत्संपादकयोरुक्तव्याप्तिर्लभ्यत इति ध्येयम् ॥ अप्त्वादियोगादेव, न तु गन्धाभावादित्यप्येवकारार्थः । तेन गन्धस्य पृथिवीत्वव्याप्यत्वेन व्याप्याभावस्य व्यापकाभावसाधकत्वासंभवात् 'गन्धाभावादपृथिवीत्वं' इति न वक्तुमुचितमित्याह । एतेन—घटत्वस्य पृथिवीमात्रादव्यावर्तकत्वं तद्धर्माभिव्यञ्जकधर्मविरोधित्वेन ज्ञायमानधर्मरूपतद्धर्मावच्छिन्नप्रतियोगिताकभेदव्यवहारकारणाभावनिबन्धनम्, घटत्वस्य पृथिवीत्वाभिव्यञ्जकगन्धवत्त्वसमानाधिकरणत्वेनैव ज्ञायमानतया तद्विरोधित्वेनाज्ञायमानत्वादित्यपि निरस्तम् । उक्तरीत्या घटत्वज्ञानस्य पृथिवीमात्रव्यावृत्तिबुद्धिप्रतिबन्धकत्वेन क्लृप्तेनैव निर्वाहे उक्तकार्यकारणभावकल्पकाभावात् । उक्तकारणाभावेन व्यावृत्तिव्यवहाररूपकार्याभावस्य कथंचिदुपपादनसंभवेऽपि व्यावर्तकत्वाभावस्योपपादनासंभवाच्च । क्लृप्तेन व्यावृत्तिरूपव्यवहर्तव्यतावच्छेदकेनैव तद्व्यवहारनिष्पत्तौ तत्सहभूतोक्तकारणत्वाभिमतस्य व्यवहारं प्रत्यन्यथासिद्धत्वाच्चेत्यलम् ॥

चन्द्रिका

* यस्मात्पृथिवीजातीयात्संस्थानादिना वैजात्यं न सिद्ध्यति, तस्माद्व्यावर्तकत्वमपि संस्थानादेर्नास्ति । प्रकृते तु कारणत्वं जीवादिभ्यो ब्रह्म

प्रकाशः

यद्यतो व्यावर्तकं तत्ततो वैजात्यापादकमित्येतत्संस्थानविशेषे प्रदर्श्य, यद्यतो वैजात्यासम्पादकं तत्ततो व्यावर्तकमपि नेत्येतदपि तत्रैव व्युत्पादयति—**यस्मादिति** । अनेन पराभिमतार्थे दृष्टान्तखण्डनव्याजेन, यद्यतो व्यावर्तकं तत्ततो वैजात्यकरामिति स्वाभिमतव्याप्तिं दृष्टान्तस्थतयोपपाद्य, दार्ष्टान्तिके योजयति–**प्रकृते त्विति**।

---

* यत्र यद्धर्मानाश्रयत्वरूपवैजात्यसंपादकत्वाभावस्तत्र तद्धर्मावच्छिन्नप्रतियोगिताकभेदबुद्धिजनकत्वरूपव्यावर्तकत्वाभावस्तद्धर्माश्रयावृत्तिधर्मान्वयरूपवैलक्षण्यसंपादकत्वाभावश्चेति व्यतिरेकव्याप्तिश्च जागर्तीत्याह—यस्मादिति । 'यस्मात्पृथिवीजातीयात्' पृथिवीसामान्यात्पृथिवीत्वव्याप्यघटत्वाश्रयघटान्नराच्च, घटत्वादिसंस्थानादिना वैजात्यं पृथिवीत्वानन्वयरूपं तद्व्याप्यघटत्वानन्वयरूपंच न सिद्ध्यति, 'तस्माद्व्यावर्तकत्वमपि' पृथिवीसामान्यात्पृथिवीविशेषघटादेश्च व्यावृत्तिबुद्धिसंपादकत्वं पृथिवीत्वघटत्वाश्रयावृत्तिधर्मान्वयरूपवैलक्षण्यसंपादकत्वं च घटत्वादिसंस्थानस्य नास्तीत्यर्थः । तद्व्यक्तित्वादिना विलक्षणयोरपि पृथिवीत्वादिना साजात्यदर्शनाद्वैजात्यानापादकस्य न वैलक्षण्यानापादकत्वनियम श्रेति तु न शङ्क्यम्, तद्व्यक्तित्वेन विलक्षणयोस्तद्व्यक्तित्वेन वैजात्यस्यापि सत्त्वात्, पृथिवीत्वादिना सजातीययोः पृथिवीत्वादिना वैलक्षण्यस्याप्यभावात्, भिन्नधर्मपुरस्कारेण प्रतिवचनस्य च्छलोत्तरत्वात् । वस्तुतस्तु जातिशब्दस्य सामान्यार्थकत्वासंभवस्य ग्रन्थकृतैव वक्ष्यमाणतया जातिलक्षणशब्दयोरनतिभिन्नार्थकत्वेन वैलक्षण्यवैजात्ययोरनर्थान्तरत्वाद्व्यावर्तकत्वेनैकविधमेव लक्षणमिति सर्वं समञ्जसम् ॥

तत्त्वप्रकाशिका

अत्र श्रुत्युक्तब्रह्मणो विष्णुत्वसमर्थनादस्ति शास्त्रसङ्गतिः । श्रुत्यादिसङ्गतिस्तु—"तद्विजिज्ञासस्व तद्ब्रह्म" इति श्रुत्युक्तं ब्रह्म जिज्ञास्यमित्युक्तम्, तस्य विष्णुत्वं यावन्न साध्यते तावत्तस्य गुणपूर्त्यसिद्धचा भेदकाभावेन जिज्ञास्यता न सम्भवतीति । तच्छु-

चन्द्रिका

व्यावर्तयतीति कथं तेनाकारेणेभ्यो जीवादिभ्यो वैजात्यं तदन्तर्भावायोग्यत्वादिरूपं न सिद्धचेत् । तदनिष्ठजातियोगित्वं तु सत्यत्वज्ञानत्वादिना लक्षणान्तरेणापि न सिध्यति, कारणत्ववन्निरुपाधिकसत्यत्वादेरप्यजातिरूपत्वात् । तस्मात्सत्यज्ञानत्वादिवत् कारणत्वमपि स्वेतरसर्वव्यावर्तकमिति । तदेतदभिप्रेत्योक्तमनुव्याख्याने—

अस्योद्भवादिहेतुत्वं साक्षादेव स्वलक्षणम् ।
कृष्णध्यानच्छलेनैव स्वयं भागवतेऽब्रवीदिति ॥

टीकाक्षरार्थस्तु—"भेदकाभावेन जिज्ञास्यता न सम्भवतीति" इत्यत्रेतिशब्दस्य 'इति श्रुत्यादिसङ्गतिः' इति पूर्वेणान्वयः । एवमुत्तरत्रापि द्रष्टव्यम् ।

प्रकाशः

**तदेतदिति** । मतद्वयनिराकरणमपीत्यर्थः । **अस्येति** । 'अस्य' सर्वस्यापि विश्वस्योद्भवादिहेतुत्वं ब्रह्मणस्स्वलक्षणमेवेति सूत्रकारो भागवते दशमस्कन्धे अष्टासप्ततितमेऽध्याये "यत्तत्परं ज्योतिरनन्यमद्वयं" इत्यादिना स्पष्टमेव कृष्णध्यानव्याजेनाब्रवीदित्यर्थः ॥ इतिशब्दस्याऽन्वयाप्रतीतेराह—**भेदकेति** । **उत्तरत्रेति** । अधिकरणान्तरेऽपीत्यर्थः ।

ब्रह्मणो लक्षणमाह ।

## ॥ ओम् जन्माद्यस्य यतः ओम् ॥

तत्त्वप्रकाशिका

त्युक्तं ब्रह्मात्र विषयः । किं विष्णुरुत जीव इति सन्देहः । उभयत्राऽपि ब्रह्मपदप्रयोग एव सन्देहबीजम् । यद्यपि पूर्वाधिकरणे विष्णावेव ब्रह्मशब्दो मुख्य इत्युक्तम्, तथाऽपि स्वकृतव्याख्यानस्थापनाय भाष्यकारैरेवोक्तत्वाद्भवति सन्देहः । जीव एवेदं ब्रह्मेति पूर्वः पक्षः, "बृह जातिजीव" इति ब्रह्मशब्दस्य जीवे रूढत्वात् । यद्यपि ब्रह्मशब्दो विष्णौ प्रवर्तते, तथाऽपि तस्य तत्र योगेनैव प्रवृत्तेः, रूढियोगयोश्च रूढेरेव बलवत्त्वाज्जीववाचित्वमेव मुख्यम् । न च रूढिपरित्यागेन योगाङ्गीकारो युक्तः, बाधकं विना मुख्यार्थत्यागायोगात् । न चात्र तादृशं बाधकमस्ति । तस्मात् जात्यादेर्मुख्यतोऽजिज्ञास्यत्वाद्देहात्मविवेकस्यावश्यकत्वात्* जीव एवेदं ब्रह्म । तस्य च स्वप्रकाशत्वेनासन्दिग्धत्वादजिज्ञास्येतेति । अथ सिद्धान्तयत्सूत्रमवतारयति—**ब्रह्मण इति** । निर्बाधरूढिबलाज्जीवएवेदं ब्रह्मेति प्राप्ते, तन्निराकर्तुं जीवग्रहणे बाधकं श्रुत्युक्तं जिज्ञास्यब्रह्मणो लक्षणमाह सूत्रकार इत्यर्थः । 'अस्य' जगतः, जन्म आदिपदोक्ते स्थितिसंहृती यतः, तद्ब्रह्मेत्यादिप्रतीतिनिरासाय सूत्रं यथावद्व्याचष्टे—

*अत्र 'जात्यादेः' इत्यादिः 'आवश्यकत्वात्' इत्यन्तः ग्रन्थः प्रक्षिप्तइति महान्तः ॥

**सृष्टिस्थितिसंहारनियमनज्ञानाज्ञानबन्धमोक्षाः यतः ।**

**उत्पत्तिस्थितिसंहारा नियतिर्ज्ञानमावृतिः ।**
**बन्धमोक्षौ च पुरुषाद्यस्मात्स हरिरेकराट् ॥**

**इति स्कान्दे ।**

**यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति ।**

तत्त्वप्रकाशिका

**सृष्टीति** । सृष्ट्याद्यष्टकं 'अस्य' जगतः यतो भवति, तदेव जिज्ञास्यं ब्रह्मोच्यते । तल्लक्षणं च विष्णावेव सम्भवति, न जीवे । अतो ब्रह्मशब्दस्य जीवे रूढत्वेऽपि बाधकसद्भावात् "तद्ब्रह्म" इति श्रुत्युक्तं ब्रह्म विष्णुरेवेति युक्तैव प्रागुक्तजिज्ञासेत्यर्थः । यद्यपि विष्णौ ब्रह्मशब्दो विद्वद्बृढियुक्तः, तथाऽप्यभ्युपगम्योक्तिरियमिति ज्ञातव्यम् । 'जन्माद्यस्य' इति तद्गुणसंविज्ञानः । लब्धजन्मनो हि स्थित्यादीत्यतो जन्मन आदित्वम् । ननु जगज्जन्मादिकर्तृत्वं यदि विष्ण्वेकनिष्टम्, तर्हि भवेज्जीवापबाधकम्, तदेव कुत इत्यत आह— **उत्पत्तीति** । 'आवृतिः' अज्ञानं । 'एकराट्' स्वतन्त्रः । नन्वेतल्लक्षणं जिज्ञास्ये नोपलभ्यते, अतः कथं जीवापबाधकमित्यतस्तत्पूर्ववाक्ये कथितमिति तदुदाहरति—**यत इति** । यत्प्रयन्ति प्रलये, यत् 'अभि' स्वेच्छया, सम्यक्प्रविशन्ति मुक्तौ ।

**यउ त्रिधातु पृथिवी मुत द्यामेको दाधार भुवनानि विश्वा ।**
**चतुर्भिस्साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतीरँवीपत् ।**

तत्त्वप्रकाशिका

सृष्ट्यादिकर्तृत्वं प्रत्येकमपि विष्ण्वेकनिष्ठं, किमु सर्वमित्यभिप्रायेण स्थितिकर्तृत्वस्य तदेकनिष्ठत्वे श्रुतिमाह—**य इति** । य एक एव प्रकृतिपुरुषकालाधारकः पृथिवीं द्यां सर्वभुवनानि च दधारेत्यर्थः । तथा नियमनं च तदेककर्तृकमिति श्रुतिमाह—**चतुर्भिरिति** । बृहच्छरीरो मूलरूपो 'चतुर्भिः' वासुदेवादिनामभिः नाममात्रैस्स्वरूपभेदशून्यैः साकं नवतिं विशेषेणाऽधिकान् देवान् वृत्तं चक्रमिव पर्यवर्तयदित्यर्थः । अष्टौ वसवः, एकादश रुद्राः, एकादशादित्याः, दश प्रजापतयः, पञ्चाशन्मरुत इति नवतिः ।

चन्द्रिका

**पर्यवर्तयदिति** । " विप परिवर्तने " इति धातोरिति भावः । **पञ्चाशन्मरुत इति** । एकोनपञ्चाशन्मरुतां मुख्यवायुना सह पञ्चाशत्त्वादितिभावः । **एकादशादित्या इति** । आदित्यानां द्वादशत्वेऽपि

प्रकाशः

' अवीविपत् ' इत्येतत्पर्यवर्तयदिति व्याख्यातम् । तत्राप्रसिद्धेस्तत्त्वप्रदीपोक्तं धातुं पठति—**विप परिवर्तनइति** । ' विप ' इत्यस्माद्धातोर्णिचि, " णिश्रिद्रुस्रुभ्यः " इति चङि, " चङि " इति द्विर्वचने " दीर्घो लघोः " इत्यभ्यासदीर्घत्वे अडागमादौ च सति रूपमित्यर्थः । एकोनपञ्चाशत्त्वप्रसिद्धेः कथं पञ्चाशत्त्वमत आह—**एकोनेति** ।

**परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति ।**

तत्त्वप्रकाशिका

एतान्यपि लक्षणान्यन्यव्याप्तानि नेत्याह—**परइति** । हे विष्णो स्वमूर्त्यैवापरिच्छिन्न त्वं मितेः परोऽस्यतोऽपरिमितत्वात्ते जगत्सृष्टचादिमहिमानं केऽपि नाप्नुवन्तीत्यर्थः ।

चन्द्रिका

विष्णुव्यतिरिक्तानां नियम्यानामेकादशत्वादियमुक्तिः । तत्त्वप्रदीपे तु—

आदित्या वसवो रुद्रा मरुतश्चाश्विनावपि ।
बृहस्पतिश्च कामश्च मनुर्दक्षो विनायकः ॥
भृगुश्चैवानिरुद्धश्च धर्मो निऋतिरेव च ।
कुबेरसहिता देवा नवतिस्सम्प्रकीर्तिताः* ॥
अनन्तो गरुडो वायुश्चत्वारो ब्रह्मणा सह ॥

इति वचनानुसारेणेयं श्रुतिः प्रकारान्तरेण व्याख्याता ।

प्रकाशः

"चतुर्भिस्साकं" इति श्रुतेरर्थान्तरमपि बोध्यमिति भावेनाह—**तत्त्वप्रदीपे त्विति** ।

---

*अत्र यद्यपि द्विनवतिसंख्याका देवाः प्रतीयन्ते । तथाऽपि "अनन्तो गरुडो वायुः" इति पृथग्गृहीतस्य मुख्यवायोर्मरुत्स्वप्रवेशेन, अश्विनोरेकत्वविवक्षया वा, बहुपुस्तकेषु 'मुनिः' इति पाठोपलम्भेन मुनित्वस्य दक्षविशेषणत्वाश्रयणे मनोः परित्यागेन वा नवतित्वसम्भवः।

**न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप । योनः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वेत्यादि च ॥**

तत्त्वप्रकाशः

वर्तमाननिषेधात्स्यादतीतादावतिव्याप्तिरित्यत आह–**नेति** । हे विष्णो देव ते महिम्नः परं 'अन्तं' सीमानं, जायमानो न प्राप्नोति, जातो नाप, जनिष्यमाणो नाप्स्यतीत्यर्थः । जगत्कारणत्वं च ब्रह्मणो न विकारित्वेन, किन्तु पितृवदेवेति श्रुत्या दर्शयति–**यइति** । 'नः' सर्वेषां । न दत्तपुत्र-पितृवत्पिता, किन्तु 'जनिता' जनकः, सर्वाणि भुवनानि तद्गत-धामानि च वेदेत्यर्थः । अतोऽतिव्याप्तच्यादिशून्यविष्णुलक्षणवत्त्वा-द्विष्णुरेव श्रुत्युक्तं ब्रह्म, न जीवोऽतो युक्तैव ब्रह्मजिज्ञासेति स्थितम् ॥

चन्द्रिका

"सृष्टिस्थिति" इत्यादिभाष्ये प्रयोजकव्यापारवाचिना सृष्ट्यादिश-ब्देन प्रयोज्यव्यापारो जन्मादिर्लक्ष्यते । लक्षणाप्रयोजनं च ब्रह्मणः स्रष्टृत्वादिकमेव, नतूपादानत्वमिति प्रदर्शनम् ॥

प्रकाशः

भगवन्निष्ठव्यापारस्यान्याधीनत्वप्रतीतेराह—**सृष्टीति** ॥

इति जन्माधिकरणम्.

चन्द्रिका

## ॥ ओम् शास्त्रयोनित्वात् ओम् ॥

उक्तस्य लक्षणस्य अतिव्याप्तिनिरासाय प्रमाणमुच्यतइत्यनन्तरसङ्गतिः । नन्वेतत् "स्मृत्यनवकाशदोष" इति स्मृत्यधिकप्रकाशः

**ओम् शास्त्रयोनित्वात् ओम्** ॥ सङ्गतिफले आह—उक्तस्येति । पूर्वोक्तमुपजीव्यास्य प्रवृत्तेरुपजीव्योपजीवकभावरूपा वा, एतस्मिन् सति पूर्वप्रमेयसिद्धेर्हेतुहेतुमद्भावरूपा वा, पूर्वोक्तमतिव्याप्तमित्याक्षिप्य समाधीयतइत्याक्षेपिकी वेत्यर्थः । अतिव्याप्तिनिरासश्च फलमित्युक्तं भवति । अतिव्याप्तिप्रकारश्च वक्ष्यतइति भावः । इयं च टीकायां "अन्यनिष्ठत्वनिरासात्" इत्युक्त्या सूचिता, सुधायां कण्ठोक्ता च । यत्तु न्यायविवरणटीकायां—"अतिव्यापकमित्यापाततः । वस्तुतस्तु जीवविशेषे सम्भवान्नालौकिकं कल्पयितुमलम्" इत्यादिना विष्ण्वाख्यधर्म्यपलापेन पूर्वपक्षकरणं, तत्तु पक्षान्तरमभिप्रेत्येति ध्येयम् । अत एव तत्र पूर्वतनग्रन्थे "साधारणं लक्षणम्" इत्यतिव्याप्तिरेव प्रदर्शितेति ध्येयम् । नन्वत्र कारणत्वं विष्णोरेव नान्यस्येत्यत्र सूत्रे न किमपि प्रमाणमुच्यतइति चेन्न, जगत्कारणेऽनुमानं वा दुरागमो वा न मानं, किन्तु शास्त्रशब्दिताः सदागमा एव मानमित्युक्तौ, विष्णुरेव जगत्कारणं, न शिवादिरित्यतिव्याप्तिनिरासः फलिष्यतीति तात्पर्यात् । तथा च जगत्कारणे शास्त्ररूपं प्रमाणमुच्यतइत्यर्थः ।

चन्द्रिका

रणेन पुनरुक्तम्, तत्रेवात्रापि साङ्ख्यपाशुपतादिदुरागमानामपि निरासात्। न चेह कर्तृत्वादिकं विष्णोरन्यस्य वेति सन्देहः, तत्र तु विष्णोः कर्तृत्वादिकं युक्तमयुक्तं वेति, ततो भेद इति वाच्यम्, एकेनैव सिद्धान्तेन सन्देहद्वयनिरासात्, सन्देहप्रकारभेदमात्रेण च अधिकरणभेदे अतिप्रसङ्गात्। न च स्मृत्यनन्तर्गतयुक्तिविरोधपरिहारस्तत्राप्यस्ति। एतेन—तत्र समयविगानं सन्देहबीजम्, अत्र तु पूर्वन्यायप्रसिद्धी इति निरस्तम्।

प्रकाशः

'स्मृत्यधिकरणेन' द्वितीयाध्यायाद्याधिकरणेनेत्यर्थः। सन्देहभेदाद्वा, तद्बीजभेदाद्वा, निरसनीयभेदाद्वा, पूर्वोत्तरपक्षन्यायभेदाद्वा अपौनरुक्त्यमाशङ्क्याद्यं निराह—**नचेति**। 'इह तत्र' टीकायां। तथैव सन्देहोक्तेरिति भावः। एवमग्रेऽपिध्येयम्। **एकेनेति**। विष्णोरेवेदं लक्षणमित्यत्रत्येनैकेन सिद्धान्तेनातिव्याप्त्यसम्भवफलकपूर्वपक्षप्रापकसन्दहद्वयस्यापि निरासस्सम्भवादित्यर्थः। **अतिप्रसङ्गादिति**। पूर्वनयेऽपि ब्रह्मशब्दो जीवो विष्णुर्वेतिवत्, विष्णौ युक्तो न वा इत्यादिसन्देहसम्भवादित्यर्थः। युक्तिपादत्वात्तत्र युक्तिविरोधः परिह्रियते* इत्यत आह—**न चेति**। स्मृतौ शिवादेः कारणत्वोक्तेरित्यादिरूपाया युक्तेरत्रैव तत्रापि निरासादिति भावः। द्वितीयं प्रत्याह—**एतेनेति। पूर्वन्यायेति**। पूर्वत्र कारणत्वस्य विष्णावुक्तत्वादिति

* 'अतो युक्तत्वायुक्तत्वकोटिकसंदेहनिरासो नैतत्सिद्धान्तेन' इत्युपस्कार्यम्.

चन्द्रिका

प्रसिद्धेरपि समयमूलत्वात्। न चात्रागमानामर्थान्निरासः, तत्र तु कण्ठत इत्येतावतैव अपौनरुक्त्यम्, अनुमानस्यापि कारणे प्रामाण्यस्य कण्ठतो निषेधाय अधिकरणान्तरारम्भप्रसङ्गात्। न चेहानुमानस्यापि निरासात् न गतार्थतेति वाच्यम्, आगमांशे गतार्थत्वात्। अनेन

प्रकाशः

भावः। **प्रसिद्धेरपीति**। अत्रापि तदेव बीजमिति भावः। तृतीयेऽपि निरसनीयः किमागम एवोतानुमानसमुच्चितोऽथवाऽनुमानमात्रम्। नाद्यः, आगमस्यात्रापि निरासादित्युक्तत्वात्। तत्र विशेषमाशङ्क्याह—**न चेति**। दुरागमानामित्यर्थः। कारणे शास्त्रं प्रमाणमित्युक्त्या अर्थादुरागमानां निरासः कृतः स्यात्, तत्र तु प्रबलवैष्णवस्मृतीनां निरवकाशतोक्त्या, "इतरेषां चानुपलब्धेः" इत्यनेन विसंवादोक्त्या च कण्ठतो निरास इति भावः। **कण्ठत इति**। इह त्वर्थादिति भावः। "कामाच्च" इति "तर्काप्रतिष्ठानात्" इत्यत्र च तर्कस्याप्रामाण्यं कण्ठत उच्यतइति 'कारणे' 'अधिकरणान्तर' इति चोक्तम्, ॥ तर्ह्यस्तु द्वितीय इत्याशङ्क्य निराह—**न चेति**। तृतीयस्त्वग्रे निरसिष्यते।

शैवाद्यागमसम्प्राप्तदृष्टगेन फलेन तु।
तद्वाक्योपमयाऽन्यच्च प्रमाणत्वेऽनुमीयते॥
ईशवाक्यत्वत इति चेत्तद्गव्यभिचारिणा।
अप्रामाण्यानुमा च स्यात्

चन्द्रिका

अधिकरणेन तस्य गतार्थत्वापरिहाराच्च। न चात्र दृष्टफलेषु संवादेन प्रामाण्ये प्राप्ते दृष्टफलेष्वेव विसंवादेन अप्रामाण्यमिति सिद्धान्तः, तत्र तु सर्वज्ञत्वादिना प्रसिद्धप्रणीतत्वात् प्रामाण्ये प्राप्ते प्रबलस्मृत्यादिविरोधात् विप्रलम्भमूलमप्रामाण्यमिति सिद्धान्त इति वाच्यम्, "इतरेषां चानुपलब्धेः" इति सूत्रेण विसंवादस्य तत्रैवोक्तेः। न च उक्तसिद्धान्तयोर्विनिमयादपौनरुक्त्यम्, अनुव्याख्यानविरोधात्। अत्र ह्यनुव्याख्यानम्—

शैवाद्यागमसंप्राप्तदृष्टफलेन तु।

इति। तत्र तु—"आप्तैः प्रत्यक्षतो दृष्ट्वा" इति।

प्रकाशः

इत्यत्रत्यमनुव्याख्यानं, "आप्तैः प्रत्यक्षतो दृष्ट्वा" इत्यादि तत्रत्यं च हृदि कृत्वा, चतुर्थमाशङ्क्य निराह—**न चेति**। तथा च विसंवादविप्रलम्भमूलत्वादिरूपन्यायभेदाद्भेद इति भावः। ननु तर्हि विसंवादस्तत्र व्युत्पाद्योऽत्र तु विप्रलम्भमूलत्वम्। तावताऽपि न्यायभेदाद्भेदोस्तु। अत एवात्र भाष्यं—

अतोऽन्यो ग्रन्थविस्तारो नैव शास्त्रं कुवर्त्म तत्।

इत्यादीत्याशङ्क्य निराह—**न चेति**। संवादेन प्रामाण्यमिति प्राप्ते विसंवादेनाप्रामाण्यमित्येतदत्रैव अनुव्याख्याने प्रतीयते, तत्र तु "आप्तैः" इति पूर्वपक्षानुव्याख्याने,

इति चेद्यद्यशेषज्ञा रुद्राद्या हरिपूर्वकाः।

चन्द्रिका

न चेह अनुमानमात्रनिरासादगतार्थतेति वाच्यम्, सौत्र-शास्त्रपदेन दुरागमानामपि निरासात् । अस्मिन्नधिकरणे अनुव्याख्याने, "तर्हि पाशुपतादिशास्त्रेण रुद्रादेः कारणत्वं स्यात्" इत्यादिटीकायां च आगमावष्टम्भेनापि पूर्वपक्षयित्वा तन्निरासाच्चेति ॥ उच्यते, तत्र पाशुपतादिस्मृत्या पूर्वपक्षे पञ्च-रात्रादिस्मृत्या सिद्धान्तः, अत्र तु स्मृत्यनुमानाभ्यां पूर्वपक्षे श्रु-

प्रकाशः

किं नाशेषविदः

इति सिद्धान्तानुव्याख्याने च विचार्यमाणे, सर्वज्ञत्वात्प्रामाण्यं, बलवद्विरोधादप्रामाण्यमित्येतत्प्रतयितइति न विनिमयादपौनरुक्त्यमित्यर्थः । तथा च न्यायभेदोऽसिद्ध इति भावः । ननु "अनुमानतोऽन्ये न कल्पनीयाः" इत्यत्रत्यभाष्यानुरोधादनुमानमेवेह निरस्यतइति प्रागुक्ततृतीयमाशङ्क्याह—**न चेति । सौत्रेति** । अनुमानस्य दुरागमानां च निरासाय शास्त्रपदं, तस्याशास्त्रमात्रव्युदासकत्वादिति भावः ॥

चतुर्धा समाधास्यन् पूर्वोत्तरपक्षप्रापकहेतुभेदाद्भेद इति त्रेधा समाधातुमादौ सूत्रपदसूचितसमाधीनाह—**तत्रेति** । स्मृत्यधिकरणइत्यर्थः । आदिपदेन बौद्धार्हतादि । 'पञ्चरात्रादि' इति पुराणभारतादि ग्राह्यम् । **स्मृत्यनुमानाभ्यामिति** । भाष्ये अनुमानपदं **स्मृतेः**, अनुव्याख्याने चागमपदमनुमानस्य उपलक्षणमिति भावः ।

चन्द्रिका

त्यादिरूपेण शास्त्रेण । अत एव तत्र सूत्रे " नान्यस्मृति " इति स्मृतिशब्दः, अत्र तु शास्त्रशब्दः । न च तर्हि इह श्रुत्यादिना सिद्धान्तिते पुनस्तत्र स्मृतिमात्रेण पूर्वपक्षानुदय इति शङ्क्यम्, गुणहीनायाः पिपीलिकालिपिनिभायाः श्रुतेः गुणवत्या पाशुपतादिस्मृत्या विरोधिनान्यपरत्वे वाच्ये, श्रुतिमूलपञ्चरात्रादिस्मृतेरप्यन्यपरत्वम्, पाशुपतादेस्तु शिवादिप्रत्यक्षमूलत्वमिति तत्र पूर्वपक्षे प्राप्ते, तिष्ठन्तु तावच्छ्रुत्यादयः, विष्ण्वादिप्रत्यक्षमूलाभिः पञ्चरात्रादिस्मृतिभिः विवक्षितार्थसिद्धेरिति सिद्धान्तोपपत्तेः * ।

प्रकाशः

**श्रुत्यादीति** । श्रुतिस्मृतिरूपेणेत्यर्थः । शास्त्रपदस्योभयार्थत्वात् । अत एव भाष्ये—

ऋग्यजुस्सामाथर्वाश्च भारतं पञ्चरात्रकम् ।

इत्यादिना स्मृतयश्चोपात्ता इति भावः । **गुणेति** । आप्तोक्तत्वगुणहीनाया इत्यर्थः । अत एव " पिपीलिकालिपिनिभायाः " इति ।

---

* नं च शास्त्रारम्भस्य श्रुतिप्रामाण्योपजीवकतया स्वोपजीव्यश्रुतिप्रामाण्यविरोधिन्यायसंचारोऽत्र शास्त्रे नावकाशं लभतइति शङ्क्यम्, आद्याध्याय निरूपितप्रमेये युक्तिसमयाद्यधीनप्राप्तिकाशेषविरोधपरिहाराय प्रवृत्ते द्वितीयेऽध्याये सञ्चारणीयपूर्वपक्षन्यायानां श्रुतिप्रामाण्याविघातुकत्वनियमस्य सर्वैरपि त्याज्यत्वात् । अन्यथा वेदबाह्यबौद्धार्हतादिपक्षप्रतिक्षेपकतत्रत्याधिकरणानामनारम्भणीयत्वं दुष्परिहरं स्यादिति ॥

चन्द्रिका

यद्वा*—अत्रानुमानेन पूर्वपक्षे तदयोग्यत्वेन सिद्धान्तः, तत्र शैवाद्यागमेन पूर्वपक्षे प्राप्ते तदप्रामाण्येन सिद्धान्त इति भेदः ।

प्रकाशः

वक्ष्यते चानुव्याख्याने—

आप्तैः प्रत्यक्षतो दृष्ट्वा प्रोक्तमर्थं कथं श्रुतिः ।
पिपीलिकालिपिनिभा वारयेत्सर्वगा हि ते ॥

इति । तथा च—

दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा ।
तदाऽपि विपरीतत्वं शिष्टाकोपे यथोदितम् ॥

इति न्यायेन स्मृतेरपि बाधकत्वमिति भाव । ननु समन्वयनये पाशुपतादिस्मृत्या न वेदस्यार्थनिर्णयोऽपि तूपक्रमादिभिरेवेति निर्णीतत्वात्कथं स्मृत्या श्रुतेरन्यार्थवर्णनेन पूर्वपक्ष इति चेन्न, स्मृतेः प्रत्यक्षमूलत्वेन प्रबलतया, तद्विरोधेन निर्मूलश्रुतिप्रामाण्यायोगात् स्मृत्यनुसारेण श्रौतोपक्रमादिकं नेयम्, वक्ष्यते च तत्रैवमेवेत्याशयात् । यद्वेति । अस्मिन् पक्षे भाष्यं नोपलक्षणत्वेन व्याख्ये-

* नन्वस्मिन्नधिकरणे स्मृत्यनुमानाभ्यां पूर्वपक्षइत्युपगमे "अनुमानतोऽन्ये न कल्पनीयाः" इति भाष्येण, "अनुमानेन रुद्रादेरपि कारणतासाधनसौलभ्यात्" इति टीकया च विरोधः । तत्रत्यानुमानपदस्य स्मृत्युपलक्षकत्वाश्रयणं त्वन्याय्यमित्यस्वरसादाह—यद्वेति ॥

चन्द्रिका

अत एवात्र "अनुमानतः" इति भाष्यम्, तत्र तु "तेषां वचनविरोधे" इति । यत्त्वनुव्याख्याने स्मृत्यधिकरणप्रमेयमिह शिष्यहिताय व्यवहृतम्, तदत्र शास्त्रपदेन अनुमानस्य जगत्कारणतायामप्रामाण्ये दृष्टान्तीकृतस्य दुरागमस्य अप्रामाण्यमुपपादयितुम् । अनेनैवाभिप्रायेण अत्र भाष्ये ऋगादिकं शास्त्रं, न तु शैवादिकमित्युक्तम् ।

प्रकाशः

यमिति स्वारस्यमिति भावः । **यत्त्विति** । तथा च तदधिकरणप्रमेयमेवेह दर्शितं, नत्वेतदधिकरणार्थत्वेनेत्युक्तं भवति । कथमनेन शिष्यहिततेत्यतो दृष्टान्तोपपादनेनेत्याह—**तदिति** । **शास्त्रपदेन** अनुमानदुरागमयोरप्रामाण्यं भाति । अनुमानमात्राप्रामाण्ये 'शब्दयोनित्वात्' इत्येव ब्रूयात् । तत्र च दुरागमाप्रामाण्यं स्मृत्यधिकरणसिद्धमिह शास्त्रपदेन सूच्यमानं "सिद्धं साध्यायोपकल्पते" इत्यनुमानाप्रामाण्ये दृष्टान्तत्वेनोपयुज्यते । तदनुपपादने चोक्तोऽर्थो न शिष्यहृद्यारोहतइति तद्गर्भनं शिष्यहितकरमिति भावः । अनेन सौत्रशास्त्रपदप्रयोगस्यापि गतिरुक्ता भवति । **अनेनैवेति** । दृष्टान्ताभिप्रायेणेत्यर्थः । **भाष्यइति** । "ऋग्यजुःसाम" इत्यादिभाष्यइत्यर्थः । यत्तु सुधायामागमानुमानाभ्यां पूर्वपक्षकरणं, तत्तु पक्षान्तरमभिप्रेत्येति भावः । अस्मिन् पक्षे भाष्यानुभाष्यावतारिकाऽप्येवमेव दातव्येति भावः ॥ इदानीं "पाशुपतादिशास्त्रेण रु-

चन्द्रिका

अथवा—तत्र दृष्टफलेषु संवादादिना प्रामाण्ये प्राप्ते, अतिहेयत्वव्युत्पादनाय दृष्टफलेष्वेव बहुलं विसंवादादिना अप्रामाण्यं, क्वचित्संवादस्तु काकताळीय इति आगममात्रासाधारणन्यायव्युत्पादनम्, इह तु दृष्टफलेष्वङ्गीकृत्य प्रामाण्यं, अन्यत्र प्रामाण्यं चेत् कारणत्वेपि प्रामाण्यमिति प्राप्ते, "नावेदवित्" इत्यादिश्रुतेः कारणत्वे न मानमिति अनुमानागमसाधारणन्यायव्युत्पादनम्। अत एवात्र "कारणत्वस्य शास्त्रैकसमधिगम्यत्वात्" इति टीका, तत्रतु "अवैदिकस्मृतीनामप्रमाणत्वात्" इति ।

प्रकाशः

द्रादेः कारणत्वं स्यात्" इति टीकावाक्यस्य, सुधायां च "पूर्वपक्षमारचयति—शैवादीति" इत्युपक्रमस्य, "एवमागमादनुमानाच्चान्येषां जगज्जन्मादिकारणत्वे" इत्युपसंहारादेश्च स्वारस्यानुरोधेन पक्षान्तरमाह—**अथ वेति। अन्यत्रेति** । दृष्टफलइत्यर्थः। 'कारणत्वे, मानं, न' इति पदच्छेदः। उभयत्र सुधायां तथोपलम्भेऽपि, टीकायामनुपलम्भादाह—**अत एवेति**। "शास्त्रैक" इत्येकपदेनानुमानदुरागमयोर्व्यावर्त्यत्वादिति भावः। अस्मिन् पक्षे प्रत्यक्षस्यापि व्यावर्त्यत्वप्रतीतावपि तस्य जगत्कारणे अप्रसक्तेर्न तेनेह पूर्वपक्षः कृतः। एवं च दुरागममात्रनिरासको न्यायस्तत्र, अत्र तु दुरागमानुमाननिरासक इति न्यायभेदाद्भेद इत्युक्तं भवति ।

चन्द्रिका

यद्वा—अत्र विष्णोरन्येषां च कारणत्वमिति समुच्चयेन लक्षणस्याऽतिव्याप्तया पूर्वपक्षे विष्णोरेवेत्यवधारणेन सिद्धान्तः, तत्र तु विष्णोः कारणत्वं नेत्यसम्भवेन पूर्वपक्षे*ऽस्तीति सिद्धान्तः । अत एवात्र टीकायां—"विष्णोरेवान्यस्याप्यस्ति वा" इति सन्देहः, "कारणत्वस्य भगवदेकनिष्ठत्वाभावात्" इति पूर्वपक्षोपसंहारश्च, तत्र तु "युक्तं न वा" इत्येव सन्देहः, "न विष्णोः कारणत्वं सिद्ध्यति" इत्येव पूर्वपक्षोपसंहारश्च । सुधाऽपि अत्र "अतिव्याप्तिमाशङ्क्य" इति, तत्र तु "शिवप्रभृतीनामेव कारणत्वम्" इति । न्यायविवरणं चात्र "न च रुद्रादौ सममेतल्लक्षणम्" इति।

प्रकाशः

फलभेदाद्भेदमाह—**यद्वेति । न च रुद्रादौ सममिति** । साधारणमित्यर्थः । अत्राद्यतृतीयचतुर्थेषु स्मृत्यनुमानाभ्यां पूर्वपक्षोऽभिप्रेत इति टीकाद्वयस्वारस्यं, भाष्यानुव्याख्यानयोरुपलक्षणत्वकल्पनमेकं, द्वितीये

---

* नन्वसंभवनिरासस्य लक्ष्ये लक्षणसत्त्वोपपादनरूपस्य लक्ष्यालक्ष्योभयवृत्तित्वरूपलक्षणातिव्याप्तिनिरूपणोपजीव्यतयाऽतिव्याप्तिनिरासात्प्राथम्यस्य न्याय्यत्वेनासंभवनिरासपरत्वे स्मृतिनयस्य प्राथम्यापत्तिरिति चेत्, सत्यमसंभवोऽतिव्याप्तेः पूर्वं निरसनीय इति । परं तु तथाविधोऽसम्भवो लक्षणाभिधात्रा लक्ष्यस्वरूपादिग्राहकत्वेनाङ्गीकृतान्तरङ्गप्रमाणविरोधादिप्रतिसन्धानाधीनप्रतिपत्तिकएव । स्मृत्यधिकरणनिरसनीयस्तु नैतादृशः, लक्षणाभिधात्रा सिद्धान्तिना लक्ष्यस्वरूपादिग्राहकत्वेनोपगतश्रुत्यतिरिक्तपाशुपतादिविरोधग्रहाधीनप्रतिपत्तिकत्वात् । अतो न स्मृत्यधिकरणस्य प्राथम्यप्रसङ्गः ॥

चन्द्रिका

यद्यपि आगमप्रामाण्यवादिना इहाप्यसम्भवो वक्तुं शक्यः । तथाऽपि वक्ष्यमाणे श्रुतेः स्वतःप्रामाण्यविष्णुपरत्वे, समबलतां चोपेत्य कालादिभेदेन अविरुद्धं द्वयोः कर्तृत्वम्, श्रुत्यादौ तु "इदꣳ सर्वमसृजत" इति विष्ण्वादेः सर्वकारणत्वोक्तिः तत्तत्कालसृज्याभि-

प्रकाशः

तु नोपलक्षकत्वमिति भाष्यस्थानुमानपदस्वारस्यमिति ज्ञेयम् । ननु अन्त्यपक्षे तत्रत्यसिद्धान्तेन विष्णौ कारणत्वसत्त्वमात्रापादकेनात्रत्यपूर्वपक्षनिरासेऽपि अत्रत्येन तत्रत्यपूर्वपक्षनिरासस्सम्भवात् किं तेनेति चेन्न, तेन कारणत्वसत्त्वसिद्धावेव विष्णोरेवान्यस्यापि वेति विचारावसरात् भावार्थनयेन स्वर्गकामनयस्येवानेन तस्यावैयर्थ्यात् । दुरागमस्याप्तोक्तत्वेनाप्रामाण्यासम्भवात्प्रामाण्ये वाच्ये, वेदप्रामाण्यापेक्षयाऽऽगमप्रामाणस्य बलवत्तया पूर्वपक्षे तन्निरासार्थत्वेन च सार्थक्यादिति । **यद्यपीति** । पाशुपताद्यागमानां परमाप्तसर्वज्ञपशुपत्यादिप्रणीतत्वेन प्रमाणत्वात् तत्र रुद्रादेरेव कारणत्वोक्तेः न विष्णोः कारणत्वमिति वा, प्रागुक्तन्यायविवरणटीकोक्तरीत्या वा पूर्वपक्षयितुं शक्यतइत्यर्थः । **वक्ष्यमाणे इति** । "न विलक्षणत्वात्" इत्यत्र स्वतः प्रामाण्यं, "तत्तु समन्वयात्" इत्यादौ विष्णुपरत्वं च वक्ष्यमाणमुपेत्येत्यर्थः । 'समबलतां' पाशुपतादिना । 'श्रुत्यादौ' श्रुत्यागमयोः । **तत्तत्कालेति** । यथा "सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ" इत्यत्र सर्वशब्दः योग्यसर्वकामपरः, तथेति

चन्द्रिका

प्राया, सर्वस्रष्टृत्वयोग्यताभिप्राया वा, त्वन्मतेऽप्यागामिनि 'असृजत' इत्यादिनिर्देशायोगात्। श्रुतौ शिवस्य, आगमे च विष्णोः कारणतानिषेधस्तु, यथा उदितहोमादिनिन्दा अनुदितहोमादिस्तुतिपरा, तथा विष्ण्वादेः कारणताविधिपर इति प्राप्ते, प्रमाणत्वेनाङ्गीकृतश्रुतिपरिगृहीतया "ऋग्यजुः" इत्यादिभाष्योदाहृतया स्मृत्यैव दुरागमाप्रामाण्यमिति सिद्धान्तः।

प्रकाशः

भावः। सङ्कोचापत्तेराह—**सर्वेति**। **त्वन्मतइति**। असङ्कुचितसर्वस्रष्टृत्ववादिमतइत्यर्थः। लङो भूतार्थत्वादिति भावः। **यथा उदितेत्यादि**। द्वितीये "नामरूपधर्मविशेषनिन्दाऽशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनाच्छाखान्तरेषु कर्मभेदः स्यात्" इत्यन्तिमेऽभिकरणे अनेकशाखास्वाम्नातं अग्निहोत्रादिकं भिन्नमभिन्नं वेति विशये, नामरूपादिभेदात्, "प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम्। दिवाकीर्त्यमदिवाकीर्तयन्तः सूर्यो ज्योतिर्न तदा ज्योतिरेषाम्" इति, "यथाऽतिथये प्रद्रुतायान्नं हरेयुस्तादृक्तद्युदिते जुहोति" इति च शाखाभेदेनोदितानुदितहोमनिन्दाश्रवणाच्च भिन्नमिति प्राप्ते, एकस्यां विहितस्य कर्मणः शाखान्तरे पुरुषान्तरं प्रति विधिसम्भवात्, निन्दायाश्च "न हि निन्दा निन्द्यं निन्दितुं प्रवर्तते, अपि तु विधेयं स्तोतुम्" इति तत्तच्छाखाविहितकर्मस्तुतिपरत्वेनोपपत्तेः न कर्मभेद इति सिद्धा-

प्रकाशः

न्तितं "एकत्वेऽपि पराणि" इति सिद्धान्तसूत्रे। तथा च तत्र यथेतरनिन्दा तत्तद्विधेयस्तुतिपरा, तथेहापीत्यर्थः। तथा च पूर्वसूत्रे "अस्य" इत्यस्य विष्णुसृज्यप्रपञ्चमात्रपरताया वाच्यत्वेन कतिपयपदार्थमात्रकर्तृत्वस्य शिवादावपि सत्त्वात् लक्षणमतिव्याप्तमिति वा, वक्ष्यमाणदिशा सर्वकर्तृत्वे असम्भव इति वा पूर्वपक्ष्याशय इति भावः। एतेन "तर्हि पाशुपतादिशास्त्रेण रुद्रादेः कारणत्वं स्यात्" इति टीका, आगमावष्टम्भपूर्वपक्षसुधा चैवमेव वर्णनीयेत्युक्तं भवति। यदत्राह कश्चित्—"सदेव सोम्य" इत्यादिकारणवाक्यस्थावधारणेन कर्त्रन्तरव्यवच्छेदात्, "एकमेवाद्वितीयं" "द्यावाभूमी जनयन् देव एकः" इत्यादावेकत्वोक्त्या नानाकर्तृकत्वस्य जगतो निषेधान्न कालादिभेदेनानेककर्तृकत्वपूर्वपक्षो युक्त इति, तन्न, तस्य श्रौतविष्णुकारणतामात्रपरत्वेन वा, तत्कर्तृकसृष्टिदशायां कर्त्रन्तरनिरासपरत्वेन वोपपत्तेः। अन्यथा निरवकाशस्मृतिप्रामाण्यविरोधादिति। श्रुतीति। श्रुतिसमानार्थत्वं तत्परिगृहीतत्वम्। श्रुतौ हि "न ब्रह्मा न च शङ्करः" "नावेदवित्" इत्यादिना शिवादिकारणत्वं तच्छास्त्रप्रामाण्यं च निरस्यतइति भावः। इदं च स्मृतित्वाविशेषात् कथमनया शैवस्मृतेरप्रामाण्यमिति शङ्काऽपनोदाय प्राबल्यार्थम्। ननु वेदस्य तुल्यबलतां मन्वानः कथं तदनुगृहीतस्मृतेः प्राबल्यं उपेयादिति

चन्द्रिका

तत्र तु स्वप्रयोजकगुणप्रयुक्तस्य प्रामाण्यस्य मुख्यत्वात्, अप्रामाण्यप्रयोजकदोषाभावप्रयुक्तस्य तु जघन्यत्वादागमविरोधे, श्रुते स्तद्गृहीतस्मृतेश्च न स्वार्थपरत्वम्, किन्तु विस्पष्टागमानुसारेण अस्पष्टश्रुत्यादि

प्रकाशः

चेत्, अनेकत्वप्रयुक्तप्राबल्ये तात्पर्यात् । यद्वा—अस्याः स्मृतेरप्रामाण्यशङ्काऽपनोदाय "इतिहासपुराणः पञ्चमो वेदानां वेदः" इति पञ्चमवेदत्वेन श्रुतिपरिगृहीतत्वमुक्तम् । तथा च तुल्यबलत्वेऽपि तदुक्तार्थस्य ग्राह्यत्वात् तत्र च दुरागमाप्रामाण्यस्योक्तत्वान्न तेन रुद्रादेः कारणत्वमिति भावः । ननु "न हि निन्दा" इति न्यायात्प्रागुक्तदिशाऽस्यापि वचनस्य ऋगादिप्रामाण्यविधिपरत्वं, न त्वागमाप्रामाण्यपरत्वमिति चेन्न, कल्पकाभावात् । उदितहोमादौ तु द्वयोरपि विहितत्वेनैकस्यापि बाधायोगात्तथा कल्पनम् । न चागमप्रामाण्यमेव कल्पकम्, तस्य "हेतुदर्शनाच्च" इति जैमिनिसूत्रोक्तन्यायेन विप्रलम्भमूलत्वेनाप्युपपत्तेः । न चैतद्वचनवदागमः श्रुत्यनुगृहीतः, प्रत्युत तद्विरुद्धः । एतदप्याह—**श्रुतिपरिगृहीतयेति** । एवमागमाप्रामाण्येन सिद्धान्ते कथं तत्र तेन पूर्वपक्ष इत्यत आह—**तत्र त्विति** । अत्रोक्तमागमाप्रामाण्यमयुक्तमाप्तोक्तत्वादिति तत्प्रामाण्यमुपेत्य, तत्प्रामाण्यस्य बलवत्त्वेन पूर्वपक्ष इत्यर्थः। **दोषाभावेति** । 'श्रुत्यादेः प्रामाण्यस्य' इति योज्यम् । 'स्मृतेः' "ऋग्यजुः" इत्यादिस्मृतेः । यद्वा—पञ्चरात्रादिस्मृतेश्चेत्यर्थः । तथा

चन्द्रिका

नेयमिति प्राप्ते, प्रामाण्यस्य स्वतस्त्वेन सिद्धान्तः । किञ्चास्य समन्वयप्रस्तावाय उक्तलक्षणे ब्रह्मणि प्रमाणप्रतिज्ञार्थत्वेन स्वपक्षसाधकोपन्यासपरत्वात्, तस्य च समन्वयोपपादकाविरोधव्युत्पादनाय बाधकोद्धारपरत्वात् द्वयमर्थवत् । अनुमानस्य त्वतिदुर्बलत्वान्न पृथङ्निरासः।

प्रकाशः

चागमानुसारेण श्रुत्यादेर्नयने रुद्रादेरेव कारणत्वं प्राप्तं, न विष्णोरित्यसम्भवो लक्षणस्येति पूर्वपक्ष्याशय इति भावः । अस्तु वोभयोरतिव्याप्तिनिरासकत्वं वा असम्भवनिरासकत्वं वा, सर्वथा द्वयमपि सार्थकमित्याह—किञ्चेति । 'प्रस्तावाय' प्रारम्भाय । शास्त्रस्य ब्रह्मणि प्रमाणत्वेनाप्रतिज्ञाने, उपक्रमादिभिरेव ब्रह्मपरत्वमुत्तरसूत्रे प्रतिज्ञाय, प्रतिवाक्यं तत्परत्वव्युत्पादनमग्रेतनमसङ्गतं स्यादिति भावः । एवं च न्यायविवरणटीकायामिहातिव्याप्तचसम्भवाभ्यां पूर्वपक्षकरणं युक्तमिति भावः । नन्वागममूलकातिव्याप्तचसम्भवफलकपूर्वपक्षद्वयनिरासायाधिकरणद्वयवदनुमानमूलकतद्वयफलकपूर्वपक्षद्वयनिरासायाप्यधिकरणद्वयं स्यादित्यत आह—**अनुमानस्य त्विति** । अत एव न्यायविवरणटीकायामागममूलातिव्याप्तिपक्षमुक्त्वा "यद्वा—सह मानेनानुमानेन वर्ततइति समम् । तथा चातिव्यापकमित्यापाततः" इत्यादिनाऽनुमानमूलकासम्भवपूर्वपक्षोऽपीहैवोक्त इति भावः । यद्वा—प्रागुक्तद्वितीयपक्षे अनुमानस्य कारणे स्वातन्त्र्येण प्रामाण्यशङ्कानिरासलाभेऽपि, पक्षान्तरेष्वलाभेन तस्यापि

चन्द्रिका

"रचनानुपपत्तेश्च नानुमानम्" "पत्युरसामञ्जस्यात्" इत्यादौ तु प्रधानस्याचेतनत्वात्, शिवादेश्च जननादिदोषवत्त्वात् न कर्तृत्वयोग्यतेति वक्ष्यते, न तु तत्तदागमाप्रामाण्यमिति न तेनापि पुनरुक्तिः। एवमन्यत्रापि यथासम्भवं पौनरुक्त्याशङ्का समाधेया॥

प्रकाशः

पृथक्प्रमाणत्वात् क्वचिज्जगत्कारणे प्रामाण्यमाशङ्क्य पृथङ्निरसनीयमित्यत आह—**अनुमानस्य त्विति**। नन्वेवमपि साङ्ख्याधिकरणे साङ्ख्यस्मृतेः, पाशुपताधिकरणे पाशुपतस्मृतेः, "उत्पत्त्यसम्भवात्" इत्यत्र शाक्तेयागमस्य प्रामाण्यनिरासात् पौनरुक्त्यमित्यत आह—**रचनेति**। नन्वेवमपि "श्रुतेस्तु शब्दमूलत्वात्" इत्यत्र तर्काप्रामाण्योक्तेस्तेन गतार्थमिदम्, अत्रागमस्यापि निरासेऽप्यनुमानांशे गतार्थत्वापरिहारादनेन तस्य गतार्थत्वाच्चेत्यत आह—**एवमिति**। "श्रुतेस्तु" इत्यत्राप्यनेन पौनरुक्त्याशङ्का, अत्र तर्कस्य साधकत्वनिरासस्तत्र बाधकत्वनिरास इति समाधेयेत्यर्थः। अत एव तत्र भाष्यं—"शब्दमूलत्वाच्च न युक्तिविरोधः" इति। वक्ष्यते च ग्रन्थकृताऽपि "शास्त्रयोनौ ब्रह्मण्यसाधकस्यापि तर्कस्य बाधकत्वात्" इत्यादि। यद्वाऽधिकरणान्तरेष्वपि गतार्थत्वाशङ्कासमाधाने ऊहनीये इत्याह—**एवमिति**। प्रदर्शितश्च पूर्वत्र तत्प्रकारः। उत्तरत्रापि यथास्थानं तत्रतत्र दर्शयिष्यामः।

चन्द्रिका

अत्र जगत्कारणत्वं किमन्यस्यापि किं वा विष्णोरेवेति चिन्ता । तदर्थं किं कारणत्वमनुमानादिविषयत्वयोग्यम् उतायोग्यमिति । आगमावष्टम्भेन पूर्वपक्षः पौनरुक्त्यनिरासस्समयएवोक्तः । अनुमानावष्टम्भेन पूर्वपक्षस्तु—अनुमानेन रुद्रादीनामपि कारणतासिद्धेरतिव्याप्तिः । न च अनुमानमप्रमाणमतिप्रसङ्गादिति युक्तम्, व्याघातात् । न चान्यत्र प्रमाणमपि जगत्कारणे न प्रमाणम्, नि-

प्रकाशः

"तज्जगज्जन्मादिकारणत्वं विषयः" इत्यादिटीकां व्याचष्टे—**अत्रेत्यादिना । अयोग्यमिति** । 'अनुमानादिविषयत्वस्य' इत्यनुषङ्गः । यदि तद्योग्यं, तदा वक्ष्यमाणदिशा रुद्रादेरपि, यद्ययोग्यं तदा विष्णोरेवेति फलफलिभावः । सूत्रे अनुमानाद्ययोग्यत्वे "नावेदवित्" इत्यादिमानानुक्तेः, जगत्कारणं शास्त्रयोग्यमित्येवोक्तेः, टीकादावनुमानाद्ययोग्यत्वे मानाभावादित्याद्यनुक्त्वा, आनुमानिकत्वस्यैव हेतूकृतत्वाच्चिन्ताद्वयमेवोक्तं, न त्वयोग्यत्वे मानमस्त्युत नेत्यादिचिन्ताऽपि । एवमग्रेऽपि । **उक्त इति** । "तथाऽपि वक्ष्यमाणे" इत्यादिनेति भावः । **अनुमानेनेति** । क्षित्यादिकं सकर्तृकं कार्यत्वात् घटिवदित्यनुमानेनेत्यर्थः । **अतिप्रसङ्गादिति** । "वस्तुत्वात्तुरगः शृङ्गी" इत्यादिवक्ष्यमाणदिशेति भावः । **व्याघातादिति** । 'अतिप्रसङ्गात्' इत्यनुमानं प्रमाणं चेत्तर्ह्यनुमानप्रामाण्यमुपेत्य तन्निषेधे स्वक्रियाविरोधात्, अप्रमाणं चेदनुमानाप्रामाण्य[स्य]

चन्द्रिका

यामकाभावात् । न ह्युपमानादिवदनुमानं नियतविषयम् । यद्यपि कार्यत्वाद्यनुमानात् कर्तृमात्रं सिद्ध्यति, न तु शिवादिः कर्तेति । कर्तृमात्रं विष्णोः कर्तृत्वाविरोधि, लोकप्रसिद्ध्यादेरुभयत्र तुल्यत्वात् । तथाऽप्यनुमानं स्वप्रामाण्यनिषेधकश्रुत्युक्ते कर्तरि न पर्यवस्यति, किन्त्वागमोक्ते* कर्तरीत्यतिव्याप्तिः ।

प्रकाशः

'व्याघातात्' विघातादित्यर्थः । नियतविषयत्वमेव नियामकमित्यत आह—**नहीति** । उपमानं हि वाच्यवाचकसम्बन्धएव मानं नान्यत्र, न ह्येवमनुमानमित्यर्थः । अनुमानादुपमानादेर्भेदमुपेत्येयमुक्तिः । सुधोक्तानुमानेषु अनुपपत्तिमाशङ्क्याह—**यद्यपीति** । विमतं कर्म प्रयत्नाधारजं कर्मत्वात्सम्मतवदित्यादितत्रोक्तान्यनुमानान्यादिपदार्थः । प्रसिद्ध्या शिवादिः स्यादित्यत आह—**लोकेति** । **स्वेति** । "नैषा तर्केण" "नावेदविन्मनुते" इत्यादिश्रुतिः विष्णुकर्तृत्वेऽनुमानप्रामाण्यं निषेधतीति तदुक्ते विष्णुकर्तृत्वे न पर्यवस्यति, किन्त्वागमं सहायीकृत्य शिवकर्तृ-

* न च अनुमानस्य स्वप्रामाण्यनिषेधकश्रुत्युक्ते विष्णाविव "न ब्रह्मा नेशानः" इत्यादिश्रुतिनिषिद्धकारणताके शिवेऽपि पर्यवसानायोगादतिव्याप्तिर्न लगतीति शङ्क्यम्, विष्णौ श्रुत्यन्यधर्मिग्राहकमानाभावेन तत्र श्रुतिनिषिद्धप्रामाण्यकस्यानुमानस्य पर्यवसानासम्भवेऽपि आगमगृहीतधर्मिस्वरूपके शिवे अनुमानपर्यवसाने बाधकाभावादित्याशयात् ॥

चन्द्रिका

यद्वा—शिवो जगज्जन्मादिकर्ता, सर्वज्ञत्वादित्यादिव्यतिरेकिणा* तत्सिद्धिः। सर्वज्ञत्वादिकं च आगमसिद्धमित्यागमसहायेन अनुमानेनेह पूर्वपक्षः।

प्रकाशः

त्वं साधयति, "यतो वै" इत्यादिवाक्यं च विष्णुकर्तृत्वमाहेति रुद्रादावतिव्याप्तिरित्यर्थः। एतेन—'इत्याद्यनुमानैर्विश्वोदयस्थितिलयकर्तरि सामान्यतः सिद्धे अस्मदादीनां तदसम्भवाच्छिवएव परिशेषात् कर्ता सिद्ध्यति' इति सुधायां "असम्भवात्" इत्यस्य "अस्मदादि" इत्यादिपदोक्तविष्ण्वाख्ये श्रुत्युक्ते कर्तरि पर्यवसानासम्भवादित्यर्थ उक्तो भवति। सुधायां "परिशेषात्" इति व्यतिरेक्युपलक्षणं इति भावेन व्यतिरेकिप्रकारमाह—**यद्वेति**। सुधायां 'विचित्रकार्यानुगुणः सार्वज्ञ्यादिमानेव सिद्ध्यति' इत्यादिना कर्तृत्वेन सार्वज्ञ्यसाधनं परिशेषपक्षएवेति भावेनाह—**सर्वज्ञत्वादिकं चेति। आगमसिद्धमिति**। शैवागमसिद्धमित्यर्थः। आगमप्रामाण्यं च "शैवाद्यागम" इत्यादेर्व्याख्यावसरे सुधोक्तदिशेत्याशयः। "अनुमानाच्च" इति सुधावाक्यस्यागममूलानुमानाच्चेत्यर्थः।

---

* न च "सर्वज्ञः सुगतो बुद्धः" इति सर्वज्ञत्वेनावगते बुद्धे योगादिशास्त्रसिद्धसार्वज्ञ्येषु योगिषु च व्यभिचारि सर्वज्ञत्वहेतुरिति वाच्यम्, समयप्रसिद्धपर्यायपदसंग्राहकत्वेन कोशस्य बुद्धसर्वज्ञत्वासाधकत्वात्। तस्य पक्षसमत्वाच्च। स्वतस्सर्वज्ञत्वस्य हेतुत्वाद्योगिषु हेतोरेवाभावात्॥

चन्द्रिका

यद्वा —महाकल्पत्वं कल्पत्वव्याप्यधर्मेण स्वाश्रयसमानजातीयकल्पवृत्त्यादिकार्यकर्तृभिन्नकर्तृकादिकार्यवद्वृत्ति, कल्पत्वव्याप्यत्वात्

प्रकाशः

एवं सुधोक्तकार्यत्वाद्यनुमानस्य द्वेधाऽभिप्रायमुक्त्वा, सामान्यानुमानमेवातिव्याप्तिफलकं कर्तृभेदसाधकमिति स्वयमाह—**यद्वेति** । यद्वा—सुधास्थमुपलक्षणं मत्वा, आगमसहायानुमानमूलकमेकं पक्षमुक्त्वा, केवलानुपानमूलकं पक्षद्वयमाह—**यद्वेति** । अत एव टीकायां "अनुमानेन रुद्रादेरपि कारणतासाधनसौलभ्यात्" इति सामान्येनोक्तिः, न्यायविवरणटीकायामपि "रीत्यन्तरेणानुमानमपि रुद्रादेर्जगत्कारणत्वे" इत्युक्तिरिति भावः । 'कल्पत्वव्याप्यधर्मेण' महाकल्पत्वरूपधर्मेण, 'स्वाश्रयसमानजातीयः' महाकल्पत्वाश्रयजातीयो योऽन्यो महाकल्प, तद्वृत्ति यदादिकार्यं, तत्कर्तृभिन्नः कर्ता यस्य तादृशादिकार्यवद्वृत्ति । तत्र विद्यमानमित्यर्थः । महाकल्पोऽन्यमहाकल्पनिष्ठादिकर्तृभिन्नादिकर्तृमानिति निष्कृष्टार्थः । 'महाकल्पः' इत्येव पक्षकरणे महाकल्पत्वावच्छिन्नस्य सर्वस्य पक्षतापत्त्या "समानजातीय" इत्याद्ययुक्तिः । एकस्य पक्षत्वार्थमयमिति विशेषणे नियामकाभावाद्धर्म एव पक्षीकृतः । स्वाश्रयसमानजातीयादेरेवोक्तौ कल्पत्वेन सजातीयस्यावान्तरकल्पस्यापि ग्रहणापत्त्या महाकल्पावान्तरकल्पयोः कर्तृभेदस्याङ्गीकारेण सिद्धसाध

चन्द्रिका

अवान्तरकल्पत्ववत् । एवं महाकल्पभेदेन कर्तृभेदवत्पालकादिभेदोऽप्यनुमेयः । तथा जगत्संहर्तृत्वं न जगत्स्रष्ट्रेकनिष्ठम्, संहारशक्तित्वात् घटसंहारशक्तिवदिति स्रष्टृसंहर्त्रोर्भेदसिद्धिः । तथा महीमहीधरादि नानाकर्तृकम्, विचित्रकार्यत्वात् प्रासादादिवत् ।

प्रकाशः

नताऽतउक्तं "कल्पत्वव्याप्य" इति । "कल्पवृत्ति" इत्यादेरेवोक्तौ स एव दोषः । अतः पूर्वविशेषणम् । 'कल्पवृत्तिकार्य' इत्याद्युक्तावनन्तरकार्यकर्तृकुलालादिभिन्नादिकार्यकर्तृमत्त्वस्य महाकल्पेऽप्यङ्गीकारात् "आदिकार्य" इत्युक्तम् । एतदर्थमेव पश्चात् "आदि" इति विशेषणम् । 'आदिकार्यकर्तृकर्तृक' इत्युक्तौ कर्त्रैक्येनोपपत्तेः 'भिन्न' इत्युक्तिः । **अवान्तरेति** । कल्पत्वव्याप्येनावान्तरकल्पत्वेन साध्यं बोध्यम् । तत्र कर्तृभेदः सिद्ध इति भावः । **एवमिति** । कर्तृपदद्वयस्थाने पातृपदद्वयप्रक्षेपेण पालकभेदः, संहर्तृपदद्वयप्रक्षेपेण संहर्तृभेदः सिद्ध्यतीत्यर्थः । कर्त्रादिनानात्वं कल्पभेदेन प्रसाध्यैकस्मिन्नपि कल्पे कर्त्रपेक्षया संहर्ताऽन्य इत्याह—**तथेति** । 'स्रष्टृनिष्ठं' इत्येवोक्तौ घटस्य स्रष्टैव यदि संहर्ता, तदा तत्र व्यभिचारः स्यादतः 'एक' इत्युक्तम् । **स्रष्टृसंहर्त्रोरिति** । न स्रष्टैव संहर्ता किन्त्वन्योऽपीत्येवं भेदसिद्धिरित्यर्थः । एकस्मिन्नपि कल्पे कर्तृभेदं साधयति—**तथा महीति** । प्रासा-

चन्द्रिका

एवञ्च सर्वजगज्जन्मादिकर्तृत्वं लक्षणं चेदसम्भवः, कतिपयकर्तृत्वं चेदतिव्याप्तिः।यद्वा–सर्वजगन्निर्माणादिशक्तिः स्वमात्रवृत्तिधर्मेण स्वसमानजातीयशक्त्याश्रयभिन्नाश्रिता, निर्माणादिशक्तित्वात् घटनिर्माणादिशक्तिवत्। जगत्कर्तृत्वं विष्ण्वतरवृत्ति, कर्तृत्वव्याप्यत्वात् घटकर्तृत्ववत् ।

प्रकाशः

दप्राकारारामपरिखादिष्वनेककर्तृकत्वदर्शनाद्दृष्टान्तः । एवं नानाकर्त्रादिसिद्धावप्यन्यस्य कृत्स्नकर्तृत्वाप्राप्तचाऽतिव्याप्तिप्रकारस्यास्फुटत्वादाह—**एवं चेति** । पक्षभेदेनातिव्याप्तिमुक्त्वा केवलातिव्याप्तिलाभप्रकारमाह—**यद्वेति** । आदिपदात्पालनादिशक्तिः । फलोपधानस्यानेकेष्वसम्भवाच्छक्तिः पक्षीकृता । 'स्वमात्रवृत्तिर्यो धर्मः' तादृशशक्तित्वमेव, तेन समानजातीया 'शक्तिः' सैव, तदाश्रयो विष्णुः तद्भिन्नमाश्रितेत्यर्थः । यद्वा—तादृशधर्मेण समानजातीया पुरुषान्तरनिष्ठा शक्तिस्तदाश्रयशिवादिभिन्नविष्ण्वाश्रितेत्यर्थः । सर्वजगन्निर्मातृत्वं विष्णोरितरत्रापि वर्ततइति फलितार्थः । 'शक्त्याश्रय' इत्याद्युक्तौ तादृशकुलालभिन्नविष्ण्वाश्रितत्वस्य सिद्धत्वाद्विशेषणम् । 'स्वसमान' इत्याद्युक्तावपि शक्तित्वेन साजात्यमादाय प्रागुक्तदोषः । अतः 'स्वमात्र' इति । **घटेति** । घटत्वावच्छिन्नघटनिर्मातॄणां अनेकत्वादिति भावः । विशिष्याह—**जगत्कर्तृत्वमिति** । सर्वजगज्जननसामर्थ्यमित्यर्थः । एवं सत्यतिव्याप्ति-

चन्द्रिका

इत्याद्यनुमानैरनेकेषां सर्वजन्मादिकर्तृणां साधकैः विष्णिवतर-सर्वजगत्कर्तृसिद्धौ इतरेषां प्रसिद्धशिवादन्यत्वे गौरवादति-व्याप्तिः । यद्वा—कार्यत्वाद्यनुमानेन नित्यज्ञानेच्छाप्रयत्नमात्रवतो

प्रकाशः

प्रकारमाह—**इत्यादीति** । सर्वजगत्पालनसामर्थ्यरूपं पालकत्वं विष्णिवतरवृत्ति पालकत्वव्याप्यत्वात् गोपालकत्ववदित्यादिरादिपदार्थः । विष्णिवतरे सर्वजगत्कर्तारः, तत्सिद्धाविवर्थः । 'शिवाद्यन्यत्वे' शिवहिरण्यगर्भाद्यन्यत्वइत्यर्थः । शिवादन्यत्वे गौरवादिति शैवाः, हिरण्यगर्भादन्यत्वे गौरवादिति हैरण्यगर्भा इत्येवं तत्तद्वादिरीत्येति बोध्यम् । "शिवादन्यत्वे" इति पाठे तु उपलक्षणं बोध्यम् । तेन "रुद्रादीनां" इति नोपक्रमविरोधः । **अतिव्याप्तिरिति** । "सर्वजगन्निर्माण" इत्याद्युक्तानुमानैरितरकर्तृत्वमात्रसिद्धावपि "यतो वै" इत्यादिश्रुतिप्राप्तविष्णुकर्तृत्वस्य निवारणे तेषामशक्तत्वादपवादकान्तराभावाच्च जगज्जननादिसामर्थ्यस्य प्राग्लक्षणत्वेनोक्तस्य त्वया अनेकेषां कृत्स्नजगज्जननादिसामर्थ्यस्य श्रुत्यादिभिर्विष्णाविवोक्तानुमानैश्च हिरण्यगर्भादावपि प्राप्तत्या लक्ष्यालक्ष्यवृत्तित्वेनातिव्याप्तिरित्यर्थः । पूर्वं सुधोक्तं कार्यत्वाद्यनुमानं कर्तृसामान्यपरं सत्, परिशेषादिसहकृतं तद्विशेषपरमित्युक्तम् । इदानीं केवलं तदेव कर्तृविशेषसाधकमित्याह—**यद्वेति** । ज्ञानचिकीर्षाकृतिमज्जन्यमिति साध्यमभिप्रेत्याह—**नित्येति** ।

चन्द्रिका

नित्यप्रयत्नमात्रवतो वा कर्तुः सिद्धेः, त्वया च तस्य विष्णुत्वानङ्गीकारात्, संहर्तृत्वादिना * रुद्रादिशब्दोदिते तस्मिन्नेवातिव्याप्तिः । न च विष्णोरन्यस्य कारणत्वनिषेधकोदाहृतश्रुतिविरोधः,

प्रकाशः

नित्यत्वं पक्षधर्मताबललभ्यं त्रयाणां विशेषणम् । ननु कार्यत्वं कृतिमात्रमाक्षिपति, न तु ज्ञानेच्छे इत्यत आह—**नित्यप्रयत्नेति** । 'त्वया' सिद्धान्तिना । विष्णोरनन्तगुणत्वादिति भावः । एतेन– "अस्मदादीनां तदसम्भवात्" इति सुधावाक्यस्य "अस्मदादि" इत्यादिपदोक्तविष्णोस्तदसम्भवात् ज्ञानेच्छाप्रयत्नादिमात्रवत्त्वरूपकर्तृत्वासम्भवादित्यप्यर्थ उक्तो भवति । तावता शिवः कुत इत्यत आह—**संहर्तृत्वादिना निमित्तेनेति** । रोदयति सर्वानिति रुद्र इति संहर्तृत्वलाभ इति भावः । आदिपदाज्जगज्जननपालनादिना भवशङ्करादिशब्दोदितइति ग्राह्यम् । इदं च टीकागतरुद्रपदार्थवर्णनमिति बोध्यम् । **अतिव्याप्तिरिति** । प्रागुक्ताशयो ध्येयः । एवं जगज्जननादिना विरिञ्चादिशब्दोदिते तस्मिन्नेव अतिव्याप्तिरित्यादिरूपेण हैरण्यगर्भादीनामपि प्रत्यवस्थानं ध्येयमिति भावः । इयता ग्रन्थेन "अनुमानेन" इत्यादि टीका विवृता । "न चोदाहृत" इत्यादिटीकां विवृणोति—**न चेति** । "एको दाधार" "न ते महित्वं" "यो नः पिता जनिता" "एक एव" इत्यादि-

* टिप्पण्यां धृतत्वादत्र 'निमित्तेन' इति पदं मूलस्थमिति वा, 'संहर्तृत्वादिना' इति तृतीयार्थकथनमिति वा बोध्यम् ॥

चन्द्रिका

तासां युक्तिविरोधेन विष्णोः कारणत्वविधिपरत्वादिति केवलानुमानेनैव पूर्वपक्ष इति । तदेतदभिप्रेत्योक्तं टीकायां "अनुमानेन रुद्रादेरपि कारणता"इत्यादि ॥

सिद्धान्तस्तु—

प्रकाशः

श्रुतिविरोध इत्यर्थः । **कारणत्वविधीति** । उदितहोमादिनिन्दावत् "नहि निन्दा निन्द्यं" इति न्यायेनेति भावः । अनेन—'युक्तिविरुद्धार्थे' शिवादिकारणतानिषेधे तात्पर्यायोगादिति टीकार्थ उक्तो भवति । **केवलेति** । महाकल्पत्वमित्यादिपक्षत्रयोक्तेतिभावः । एतेन—ज्ञानेच्छाप्रयत्नमात्रवतो विष्णुत्वाभाववत् शिवादित्वमपि न युक्तं, तस्यापि शैवाद्यागमेनानन्तगुणत्वात् । उक्तं च सुधायां—"शिवस्य जगज्जन्मादिकारणत्वसार्वज्ञ्यसर्वशक्तित्वाद्यशेषगुणपूर्णत्वं निरवद्यत्वं च प्रतिपादयन्ति" इतीति निरस्तम् । आगममनादृत्य केवलानुमानेनैव पूर्वपक्षात् । इयता कृतं प्रतिपादनं कस्य व्याख्यानमित्यत आह—**तदेतदिति** । आगमसहायानुमानेन केवलानुमानेन च कृतं पूर्वपक्षद्वयमित्यर्थः ॥

सङ्ग्रहस्तु—

आगमादनुमानाद्वा कर्तृत्वं विष्णुभिन्नगम् ।
अतिव्याप्तमतो नैतद्विष्णोरेव स्वलक्षणम् ॥ इति ।

चन्द्रिका

चक्षुरादि यथाऽशक्तं रसगन्धादिवस्तुषु ।
अनुमाऽपि तथाऽशक्ता धर्मब्रह्मादिवस्तुषु ॥

"न हि धर्मादिनिश्चयोऽनुमानेन" इति टीकयैव "महाकल्पत्वं" इत्याद्यनुमानेषु श्रुतिविरोधादेः, "शशादीनां विषाणित्वादौ च कर्तुं शक्यत्वात्" इति टीकयैवातिप्रसङ्गस्य उक्तत्वात्, अनुव्याख्याने च—

प्रकाशः

अनुमानावलम्बिपूर्वपक्षनिरासकं "यदि कारणमानुमानिकं स्यात्" इत्यादिसिद्धान्तठीकाप्रमेयं संगृह्णाति—**चक्षुरादीति** । 'अशक्तं' इति छेदः । यथा धर्मादावशक्ता तथा ब्रह्मणीति धर्मादेर्दृष्टान्तत्वेनोक्तिः । तस्य चोदनैकप्रमाणकत्वं "चोदनालक्षणोऽर्थो धर्मः" इति जैमिनिसूत्रसिद्धमिति भावः । स्वातन्त्र्येचणाशक्तेत्यर्थः । तेन न मीमांसाव्याघातः । प्रागुक्तानुमानानि टीकादावेव निरस्तानीति भावेन तद्वाक्यानि पठति—**नहीति** । **श्रुतीति** । अयोग्यत्वोक्त्या तत्र प्रवर्तमानानां बाधितत्वादिति भावः । आदिपदेन व्याप्तयादिशून्यत्वसोपाधिकत्वादिग्रहः । श्रुतेर्नित्यनिर्दोषत्वेन स्वतः प्रामाण्येन च

प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम् ।

इति वचनसिद्धं प्राबल्यमिति भावः । कथमतिप्रसङ्ग इत्यत आह—**अनु-**

चन्द्रिका

वस्तुत्वात्तुरगः शृङ्गी पुष्पवत् खं सुतैर्युता ।
चित्रिणी च रसष्षष्ठो रसत्वात्सोत्तरो भवेत् ॥

इति अतिप्रसङ्गस्य प्रपञ्चितत्वात्, अन्यत्र कार्यत्वादिहेतूनां सप्रपञ्चं निरासात् "नावेदविन्मनुते" इत्यादिश्रुत्या जगत्कारणेऽनुमानप्रामाण्यनिषेधाच्च, नानुमानं जगत्कारणे प्रमाणमिति ॥ आगमाश्रयपूर्वपक्षनिरासस्तु पौनरुक्त्यपरिहारावसरएव विवृतः ॥

प्रकाशः

**व्याख्याने चेति** । 'खं' आकाशम् । 'चित्रिणी' वन्ध्या । षष्ठोरसः 'सोत्तरः' सप्तमरसोपेत इत्यर्थः । रसत्वात् पूर्वरसवत् । रसमात्रस्य पक्षत्वे पूर्वरसमादाय सिद्धसाधनता । अतः 'षष्ठ' इति । ननु वस्तुत्वं घटादौ व्यभिचारीति चेन्न, तस्यापि पक्षत्वात् । न च प्रत्यक्षादिबाधः, क्षित्यादिकर्तुरपि साम्यात् । स चायोग्यश्चेत्, शृङ्गमपि तथास्तु । शृङ्गं महत्त्वे सत्युद्भूतरूपवच्चेति चेत्, कर्ताऽपि कुलालादिरिव तादृग्देहवानिति कथमयोग्यः । अदेहोऽसाविति चेत्, शृङ्गमपि रूपहीनं स्यात् । शृङ्गं रूपवदेवेति चेत्कर्ताऽपि देहवानेवेति भावः । एवमन्यान्यपि समर्थनीयानि । **अन्यत्रेति** । तत्त्वनिर्णयतर्कताण्डवादावित्यर्थः । "नावेदवित्" इत्यादिश्रुत्यर्थदीकायां स्पष्टः । **नानुमानमिति** । तथा चातिव्याप्त्यभावाद्विष्णोरेवेदं लक्षणं सिद्धमिति भावः ॥

प्रकाशः

यदत्र कश्चिदाह—त्वन्मते अनुमानस्य स्वतो जगत्कर्त्रसाधकत्वेऽपि तात्पर्यलिङ्गत्वात्, श्रुतेरेक एवार्थ इति नियमाभावाच्चोक्तनानाकर्तृसाधकानुमानानुरोधेन सृष्टिवाक्यानां रुद्रादिनानाकर्त्रर्थकत्वोपपत्तौ नानुमाननिरासो युक्तः। शब्दानां व्यवस्थितैकार्थत्वमौत्सर्गिकं, वक्तृविवक्षाविनियोगाद्यपवादादिनाऽनेकार्थत्वमिति सर्वतान्त्रिकमर्यादामुल्लङ्घ्य, स्वकल्पितानेकार्थत्वसिद्धैय स्वेच्छयैव श्रुतिषु योगरूढ्यादिभिरनेकार्थत्वमुपगच्छतः वसन्तादिवाक्येष्विव अन्यथापदविभागादिना सर्वत्रानेकार्थत्वमनिवार्यमिति स्यादेव अनेकस्रष्टृपरत्वं सृष्टिवाक्यानामिति, तन्न, प्रत्यक्षाद्यमूलानामनुमानानामदृष्टार्थासाधकत्वे तात्पर्यधीहेतुत्वस्यापि दूरापास्तत्वात्। टीकाद्युक्तरीत्या श्रुतिबाधितानां तद्विरुद्धार्थानां तात्पर्यलिङ्गत्वस्याशक्यशङ्कत्वाच्च। "शुष्कतर्कं तु वर्जयेत्" "तस्मात्साऽनपगा श्रुतेः" "कामाच्च" इत्यादिस्मृतिसूत्रैः शुष्कतर्काणां तात्पर्यालिङ्गत्वस्योक्तत्वाच्च। "श्रुतिस्मृतिसहायं यत्" इत्यादिस्मृत्या च प्रमाणान्तरमूलकयुक्तेरेव तल्लिङ्गत्वोक्तेः। उक्तं च टीकायां—"सत्यमस्त्येवानुमानस्यौपनिषदपदार्थनिश्चायकत्वं श्रुत्यादिसहकारियुक्तस्य, न तु नियतप्रामाण्यं स्वातन्त्र्येणादृष्टार्थनिश्चायकत्वम्। तादृशं च प्रकृतमिति" इति। न चैतान्यनुमानानि श्रुत्यादिपरिगृहीतानि, प्रत्युत "एकमेवाद्वितीयं" "एको दाधार" इत्यादि श्रुतिस्मृतिविरुद्धानि। तादृशै-

प्रकाशः

स्तर्कैः श्रुतितात्पर्यं कल्पयतः तवैवेयं शोभा, न तु परीक्षकाणाम् । यत्तु—श्रुतेरेकार्थकत्वनियमाभावादित्यादि, तन्न, प्रमाणवशेन क्वचिदेनेकार्थत्वे सर्वत्र तथात्वापादकाभावात् । मानवशेनानेकार्थत्वस्य "ज्योतिरुपक्रमात्" इत्यत्र वक्ष्यमाणदिशा सर्वतान्त्रिकसिद्धत्वात् । अपूर्वपदविभागस्यापि तत्रोक्तमानपूर्वकत्वात् । न हि सृष्ट्यादिवाक्यानामनेककर्त्रर्थत्वे प्रमाणमस्ति । प्रत्युत—"एकमेवाद्वितीयं" "द्यावाभूमी जनयन् देव एकः" "एको दाधार" "यो नः पिता जनिता" "एक एव" "न ब्रह्मा न च शङ्करः" "एकः पुरस्ताद्य इदं बभूव" "तस्मात्स हरिरेकराट्"

स्रष्टा पाता तथैवात्ता निखिलस्यैक एव तु ॥

इत्यादि श्रुतिस्मृतिविरोधः । सर्वेषां स्वातन्त्र्यास्वातन्त्र्ययोरन्योन्यनियमनायोगेनैकमत्यायोगात्, जगत्सृष्ट्यादिप्रतिहतिरित्यादियुक्तिविरोधश्च । हरेरन्येषां पारतन्त्र्याद्यनेकदोषयुक्तायाः कर्तृत्वादिविरोधिन्याः पत्युरादिनयोक्तानेकमानसिद्धत्वाच्च । यत्तु—कर्त्रैक्यश्रुतिरेकैकस्यैव कर्तुः "बहु स्याम्" इत्यादिश्रुतिप्रसक्तानेकभवननिरासेनार्थवतीति नानेककर्तृविरोधिनी । अत एव त्वयाऽपि निष्प्रपञ्चब्रह्मापलापव्यसनिना 'नेह नाना" इत्यादिश्रुतिर्विष्ण्ववयवगुणकर्मरूपभेदशङ्कावारणेनार्थवतीत्युक्तमिति, तदपि न, "एकमेवाद्वितीयं" "जनिता" "एक एव" इत्यादिसावधारणश्रुत्युक्तकारणैकत्वस्य स्वाश्रयप्रतियोगिकभेदासामानाधिकरण्यरू-

प्रकाशः

पतया तद्विरोधिनानेककर्तृसिद्धेरेवायोगेनैकैकस्यानेकभवनशङ्काऽनुदयात् । "नेह नाना" इत्यादौ न्यायामृताद्युक्तरीत्या गुणकर्मादिभेदस्य प्राकरणिकप्रसक्तिवत् "एको दाधार" इत्यादावेकैकस्य बहुभवनप्रसक्तेरभावाच्च । कर्तुः बहुभवनस्य "यदेकमव्यक्तमनन्तरूपं" इत्यादिश्रुत्युक्तत्वेन तन्निरासायोगाच्च । "न ब्रह्मा न च शङ्करः" "अन्येऽल्पस्य वा न वा" इति विशिष्य कर्त्रन्तरनिषेधाच्च । अत एव–"आत्मेत्येवोपासीत" इत्यादिविधौ तत्तदधिकारिविशेषं प्रति तत्तद्योग्यगुणप्रतीतिवत् सृष्टिवाक्येऽपि शैववैष्णवाद्यधिकारिविशेषं प्रति शिवादिनानास्रष्टृधीरस्त्विति निरस्तम् । आत्मनि तत्तद्योग्यगुणानां सत्त्ववत् नानास्रष्टृसत्त्वाभावात् । तत्तदीयानादिमिथ्याज्ञानवासनया तवेवान्यस्यापि शिवादिषु स्रष्टृत्वप्रतीतावपि तस्या अनेकमानविरोधेन भ्रान्तित्वकल्पनावश्यम्भावाच्च । तत्तत्पुरुषं प्रति शिव एव जगत्कर्ता नान्य इत्यादिबोधने पुरुषभेदेनानुष्ठानवद्वस्तुस्वरूपभेदायोगेनाप्रामाण्यापाताच्च । ननु त्वन्मते पुराणेषु रामकृष्णादिरूपभेदोक्तेर्लौकिकभ्रान्तिसिद्धभेदानुवादित्ववत्तत्तदनादिसमयसिद्धशिवादिकर्त्रैक्यानुवादित्वेनापि कर्त्रैक्यश्रुतिर्युक्तेति न कर्तृनानात्वविरोधिनी । न चैवं तत्रैव कर्त्रैक्यश्रुतावप्यसदर्थत्वप्रसङ्ग इति वाच्यं, त्वन्मते यस्य यावद्दर्शने योग्यता तं प्रति तावन्तमेव सातिशयं ब्रह्मानन्दैकदेशं निरतिशयतया भूमब्रह्मादिशब्दो वक्ती-

चन्द्रिका

अत्र परेषां भाष्ये शास्त्रस्य योनिरिति विग्रहमाश्रित्य

प्रकाशः

त्यभ्युपगमवच्छैववैष्णवादीन् प्रति विरुद्धनानाकर्तृबोधकत्वं सृष्टिवाक्येषूपगम्यतामिति चेत्, सम्यक्तव मूर्धानमध्यारोहदुन्मादः, यदविद्यमानान्यप्रामाण्यकराणि पूर्वोत्तरानुसन्धानहीनान्येव बहुलमभाषथाः । सातिशयं निरतिशयत्वेन भूमादिशब्दो वक्तीत्यस्यैवासत्त्वादित्यलमियता । अन्यदपि तदुर्भाषणनिराकरणं गुरुपादकृतकण्टकोद्धारादौ बोध्यम् ॥

शास्त्रं योनिः प्रमाणमस्येति भाष्योक्तं बहुव्रीहिं समर्थयितुं परोक्तं दूषयति—**अत्रेति** । समस्यमानपदार्थत्यागेनान्यपदार्थप्रधानबहुव्रीह्यपेक्षया तत्पुरुषस्य तदत्यागेनोत्तरपदार्थप्रधानस्य बलवत्त्वादितिभावः । अत्रेदमधिकरणशरीरं—"अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः" इत्यादिवाक्यं ब्रह्मणो वेदकर्तृत्वेन सर्वज्ञत्वं न साधयत्युत साधयतीति संशये, ब्रह्मणो वेदकर्तृत्वे वेदस्य सापेक्षत्वेनाप्रामाण्यप्रसङ्गात् न साधयतीति प्राप्ते, साधयत्येवेति सिद्धान्तः । तथा हि—कर्तृमत्त्वेन वेदस्य सापेक्षत्वं किं पुरुषनिर्वर्त्यत्वमात्रादभिनवानुपूर्वीरचनाद्वा, मानान्तरोपलब्धार्थविषयरचनाद्वा, कतिपयकालविरतसर्वसम्प्रदायस्य वेदस्यैकपुरुषनिस्मरणाद्वा । नाद्यः, तवापि सम्मतत्वात् । नित्यानां विभूनां वर्णानां कालतो देशतो वा पौर्वापर्ययोगेन अभिव्यक्तिधर्म्यानुपूर्व्याः कृ-

चन्द्रिका

ऋगादिकारणत्वं ब्रह्मण इहोच्यते, पूर्वसूत्रेऽर्थलब्धस्य सार्वज्ञचस्य संरक्षणार्थमित्युक्तम् । तन्न, लक्षणानन्तर-मवश्यापेक्षितप्रमाणपरत्वसम्भवे * अन्यपरत्वायोगात् ।

प्रकाशः

तत्वात् । द्वितीये क्रमान्यत्वं वा, विसदृशक्रमत्वं वा । नाद्यः, अध्यापकोच्चरितानुपूर्वीसदृशानुपूर्व्या एव माणवकेनानुकरणेन तवापि सम्मतत्वात् । न द्वितीयः, मयाप्यनङ्गीकारात् । अत एव न तृतीयः । चतुर्थस्तूपेयते । न चैतावता सापेक्षत्वमस्तीति । तदे-तदधिकरणशरीरमग्रे निरसिष्यतः सूत्रार्थं तावन्निरसितुमयमनुवादः । तत्रैव वक्ष्यमाणत्वेऽपि वक्ष्यमाणसूत्रार्थदूषणस्य सुज्ञानायात्रैव अ-धिकरणशरीरमवोचाम । शिष्याणां धर्मशासनाच्छास्त्रमिति भामत्युक्तं योगं हृदि कृत्वाह—**ऋगादीति** । पूर्वासङ्गतिं निराह । **पूर्वेति** । विचित्रजगत्कृतिः सार्वज्ञचं विना न युक्तेत्यर्थादाक्षिप्तं सार्वज्ञचमिह समर्थ्यतइत्यर्थः । एवमपि पूर्वासङ्गतिरित्याह—**लक्षणेति** । लक्षण-प्रमाणाभ्यां वस्तुसिद्धचा लक्षणानन्तरं तद्विशिष्टे प्रमाणं जि-ज्ञासितमिति मद्रीत्या तथैव वाच्यमित्यर्थः ॥

* न च "यतो वै" इत्यादिश्रुतिरूपं प्रमाणं पूर्वसूत्रएवोक्तमिति प्र-माणजिज्ञासा नोदेयेव । स्वेनापि शिवादावतिव्याप्तिवारकतयैव सूत्रस्यावतारित-त्वेन प्रमाणपरत्वं नाङ्गीकृतं चेति शङ्क्यम्, श्रुतिप्रमापितस्यापि कारणत्व-स्य प्रमाणान्तरबलेनातिव्याप्तयादौ शाङ्कत तत्समाधानाय जगत्कारणे श्रुतिरेव प्रमाणं नान्यदिति प्रतिपादयतोऽस्य सूत्रस्य प्रमाणपरताया दुरपह्नवत्वात् ॥

चन्द्रिका

त्वदभिमतभ्रमाधिष्ठानत्वरूपकारणत्वेन*सार्वज्ञ्यलाभाच्च । पूर्वसूत्रेऽ-र्थलब्धसर्वशक्त्यादित्यागेन सार्वज्ञ्यस्यैव स्फोरणे निमित्ताभावाच्च ।

प्रकाशः

सत्यं प्रमाणं जिज्ञासितमिति, तथाऽपि सार्वज्ञ्यमपि समर्थनीयम् । अन्यथा प्रागुक्तकारणत्वस्यैवासिद्धेः । न ह्यल्पज्ञस्यैवंविधविश्वनिर्माणं शक्यमिति चेत्, किं कारणत्वेनाक्षिप्तं सार्वज्ञ्यं जिज्ञासितशुद्धस्योत विशिष्टस्येश्वरस्य । नाद्य इत्याह—**त्वदभिमतेति** । शुद्धस्य कारणत्वं नामोपादानत्वं, तच्च न परिणामित्वं, निर्विकारश्रुतिव्याकोपात्, किन्तु विवर्ताधिष्ठानत्वं, न तु तत्सार्वज्ञ्याक्षेपकमित्यर्थः । भावसाधनः कर्मसाधनश्च भ्रमशब्दः । द्वितीयआह—**पूर्वेति** । त्वङ्माप्ये हि "जन्मस्थितिभङ्गं यतः सर्वज्ञात्सर्वशक्तेः कारणाद्भवति" इत्युक्त्या सर्वशक्तेरप्युपक्षिप्तत्वात्, भामत्यां च "परिमितज्ञानशक्तिभिर्ज्ञातुं कर्तुं अशक्यत्वात्" इत्युक्तेरिति भावः । एतेन—"तत्रार्थलब्धशक्त्याद्यस्फुटीकृत्य सार्वज्ञ्यमात्रस्फुटीकरणे विशेषकारणाभावात्" इति टीकार्थ उक्तः । तत्र "अथ जगत्कारणत्वं प्रधानादिव्युदासेन ब्रह्मण्येव साधयितुं हेतुत्वेनोक्तं सार्वज्ञ्यं शास्त्रयोनित्वेन साध्यतइति चेन्न, असिद्धिप्रसङ्गात् । न हि ब्रह्मणो जगत्कारणत्वमनङ्गीकुर्वाणो वेदकारणत्वमङ्गीक-

* कर्तृत्वसहितस्यैव भ्रमाधिष्ठानत्वस्य लक्षणतया मदभिमतत्वात्तेन सार्वज्ञ्यलाभो भवत्येवेति चेत्, कर्तृत्वस्य शुद्धे, भ्रमाधिष्ठानत्वस्य विशिष्टे चायोगेनासम्भवस्य दुर्वारतया कर्तृत्वसहितस्य लक्षणताभिमातस्त्वया दुष्करैव ॥

चन्द्रिका

साङ्ख्याभिमताचेतनकारणतायाश्च * चेतनत्वमात्रेण निषेधसम्भवात्, साङ्ख्यानङ्गीकृतेन † शास्त्रयोनित्वेन सार्वज्ञ्यस्य साधनायोगाच्च । श्रुत्या शास्त्रयोनित्वम्, तेन सार्वज्ञ्यं प्रसाध्य, तेन प्रधानस्य कारणतानिषेधात् वरं श्रुत्यैव तन्निषेधः ।

प्रकाशः

रोति" इति सुधोक्ते शङ्कोत्तरे आह—**साङ्ख्येति** । सार्वज्ञ्यस्यापि चेतनत्वार्थत्वादिति भावः । "असिद्धि" इति सुधास्थमुपलक्षणं बोध्यम् । **अयोगाच्चेति** । असिद्धिप्रसङ्गादिति भावः । "आगमेन साध्यतइति चेत्तर्हि जगत्कारणत्वमेतेन किं न साध्यते" इति सुधां विवृणोति—**श्रुत्येति** । "अस्य महतः" इत्यादिश्रुत्येत्यर्थः । उपलक्षणमेतत् । ईक्षत्यधिकरणेन जन्माधिकरणस्य गतार्थत्वं च सुधोक्तं ज्ञेयम् । "अनन्तज्ञगन्निर्माणोक्तचाऽस्फुटी-

---

* भाष्यादौ एतदधिकरणस्य साङ्ख्याभिमताचेतनकारणतानिरासपरत्वं नोक्तमित्यनुक्तोपालम्भोऽयमिति न शङ्कनीयम्, "सर्वकारणत्वं ब्रह्मलक्षण सूत्रयता प्रधानादावतिव्याप्तिनिरासाय तद्बललब्ध सर्वज्ञत्वमर्थादुक्तं, तदेवात्र साध्यते" इत्यानन्दगिरीयादिभाष्यव्याख्यनोक्तदूषणत्वेनाप्यनुक्तोपालम्भत्वाभावात् ॥

† 'साङ्ख्यानङ्गीकृतेन' जगत्कारणवृत्तितया साङ्ख्यानुपगतेनेत्यर्थः । तेन वेदकर्तृत्वस्य जगत्कारणत्वानधिकरणे पुरुषविशेषे तेनाभ्युपगमेऽपि न क्षतिः ॥

चन्द्रिका

जगन्निर्माणेनास्फुटीकृतस्य सार्वज्ञचस्य तदेकदेशशास्त्रनिर्माणेन स्फुटीकरणायोगाच्च ॥ अत्र भामतीविवरणयोः—जगत्कारणत्वेन सिद्धे सार्वज्ञचे शास्त्रयोनित्वं हेत्वन्तरमुच्यते । वेदः स्वविषयादधिकविषयज्ञानवत्प्रणीतः, वाक्यप्रमाणत्वात् पाणिन्यादिशास्त्रवत् इत्युक्तम् ।

प्रकाशः

भूत" इत्यादिटीकार्थमाह—**जगन्निर्माणेनेति** । यथाश्रुतं भाष्यं निरस्य व्याख्यातृमतमनूद्य निराह—**अत्रेति** । **हेत्वन्तरमिति** । तथा च न पुनरुक्तिरिति भावः । उक्तं च भामत्यादौ "न केवलं जगद्योनित्वादस्य भगवतः सर्वज्ञता, शास्त्रयोनित्वादपि बोद्धव्या" इत्यादि । कथमनेन सार्वज्ञचलाभ इत्यतः कल्पतरूक्तमनुमानप्रकारमनुवदति—**वेदइति** । स्वस्य यावान्विषयस्तावद्विषयज्ञानवता ततोऽधिकविषयज्ञानवता च प्रणीत इति साध्यार्थः । प्रमाणवाक्यत्वादिति हेत्वर्थः । यद्यपि तत्र "ब्रह्म वेदविषयादधिकविषयज्ञं, तत्कर्तृत्वात्, यो यद्वाक्यप्रमाणकर्ता स तद्विषयादधिकविषयज्ञः, यथा पाणिनिः" इत्येवोक्तम्, न तु वेदपक्षकं, सुधायामपि तथैवोदाहरणोपनयनिगमनानुवादात् । तथाऽप्यर्थभेदात् बोधसौकर्यायैवमुक्तम् । यद्वा यत्तस्यानुमानान्तरं" अयं घटःएतदन्यासर्ववित्कर्तृकत्वानधिकरणेतदन्यावेदत्वानधिकरणसकर्तृकान्यः*, घटत्वात् घटान्तरवत्" इति, तस्यापि सङ्ग्रहायोभयानुमानतात्पर्यलब्धमिदमिति न दोषः ।

* साध्ये एतत्पदद्वयं पक्षीभूतघटपरम् । अनधिकरणान्तद्वयं सकर्तृकस्य

चन्द्रिका

तन्न, एकार्थमात्रज्ञेन प्रयुक्तस्यानेकार्थस्य शब्दस्याबाधितानेकार्थ-

प्रकाशः

हेतोस्सर्वविषयकवेदरूपपक्षधर्मताबलात् सार्वज्ञ्यलाभ इति भावः। **एकार्थेति**। "गौरस्त्यक्षमस्ति" इत्यादिवाक्यस्येत्यर्थः। साध्याभावात्तत्र व्यभिचार इति भावः।'अबाधित' इति प्रमाणवाक्यत्वरूपहेतुसद्भावार्थमुक्तम्। ननु यावान् स्वतात्पर्यविषयः, तज्ज्ञानवता ततोऽधिकज्ञानवता

---

विशेषणम् । तत्राद्यस्य एतदन्यश्चासावसर्ववित्कर्तृकश्च तत्त्वानधिकरणेति, द्वितीयस्य च एतदन्यश्चासाववेदश्च तत्त्वानधिकरणेत्यर्थः । इत्थं च एतदन्यत्वविशिष्टासर्ववित्कर्तृकत्वाभाववदेतदन्यत्वविशिष्टावेदत्वाभाववत्सकर्तृकान्य इति साध्यपर्यवसानम् । उक्तविशिष्टाभावद्वयवत्सकर्तृकं पक्षीभूतघटः, तत्र असर्ववित्कर्तृकत्वरूपस्य अवेदत्वरूपस्य च विशेष्यस्य सत्त्वेऽपि एतदन्यत्वरूपविशेषणाभावेनोक्तविशिष्टाभावद्वयसत्त्वात् । तदन्यत्वेन दृष्टान्ते साध्यसिद्धिः । पक्षेतूक्तसकर्तृकपदेन पक्षीभूतघटस्योपादाने तदन्यत्वस्य पक्षे बाधाद्वेदएव धर्तव्यः । तत्र च एतदन्यत्वरूपविशेषणस्य सत्त्वेन असर्ववित्कर्तृकत्वरूपस्य अवदत्वरूपस्य च विशेष्यस्याभावेनैव विशिष्टाभावद्वये वक्तव्ये वेदस्य सर्ववित्कर्तृकत्वमन्तर्भाव्यैव साध्यपर्यवसानादिष्टसिद्धिः । अत्र सकर्तृकात्पटादन्यत्वेन सिद्धसाधनवारणाय द्वितीयं विशेषणम् । तेन वेदात्मकसकर्तृकादन्यत्वसिद्धावपि वेदस्य सर्ववित्कर्तृकत्वासिध्याऽर्थान्तरवारणाय प्रथमविशेषणम् । वेदस्याकर्तृकत्वेनार्थान्तरवारणाय सकर्तृकेति विशेष्यम् । विशेषणद्वयेऽप्येतदन्यत्वं प्रतियोगिविशेषणं दृष्टान्ते साध्यप्रसिध्यर्थम् । इति कल्पतरुपरिमलोक्तसङ्ग्रहः ॥

चन्द्रिका

बोधकत्वदर्शनात् । नन्वन्योऽर्थो न तात्पर्यविषय इति चेत्, तर्हि प्राशस्त्यपरार्थवादप्रतीतवायुक्षेपिष्ठादिसंसर्गज्ञं ब्रह्म न स्यात्, पदार्थज्ञानं विना पदप्रयोगायोगेऽपि संसर्गज्ञानासिद्धेः । मानान्तरप्राप्ते संसर्गे अवान्तरतात्पर्यस्याप्यभावात् । किञ्च—वेदस्यातत्त्वे तात्पर्ये प्रामाण्यायोगात्, तत्त्वे चिन्मात्रे तात्पर्यात् ब्रह्मापि तन्मात्रज्ञं स्यात् । किञ्च—प्रत्यक्षादिसिद्धस्य घटादेर्निष्प्रयोजनस्य गङ्गावालुकेयत्तादेश्च शास्त्राविषयत्वात् तज्ज्ञं ब्रह्म न

प्रकाशः

च प्रणीतइति साध्यार्थो विवक्षितः । उक्तस्थले चैकार्थस्यैव तात्पर्यविषयतया तज्ज्ञानवत्प्रणीतत्वस्य सत्त्वान्न व्यभिचार इति शङ्कते—**नन्विति** । एवं तर्ह्यर्थवादानां प्राशस्त्यएव तात्पर्यात् संसर्गे तात्पर्याभावात्तज्ज्ञानं ब्रह्मणो न स्यात् । तथा च सार्वज्ञ्यासिद्धिरित्याह—**तर्हीति** । अन्यथाऽनुपपत्त्या तज्ज्ञानसिद्धिः पदार्थज्ञानवदित्यत आह—**पदार्थेति** । ननु संसर्गज्ञानाभावे आनुपूर्वीविशेषविशिष्टतया पदप्रयोगो न युक्त इति चेन्न, त्वयाऽर्थमुपलभ्य रचितत्वस्यानङ्गीकारात् । बहुकालविरतानुपूर्वीविशेषस्यादिकाले **उच्चारण**मात्रमित्यङ्गीकारेण तत्र संसर्गज्ञानस्यानुपयोगात् । 'तात्पर्यविषय' इति विवक्षायां सार्वज्ञ्यासिद्धिं प्रकारान्तरेणाह—**किञ्चेति । प्रत्यक्षेति** । अप्राप्ते शास्त्रमर्थवदिति भावः । **गङ्गेति** । सप्रयोजनस्यैव शास्त्रार्थत्वादिति भावः । एवं "स्ववि-

चन्द्रिका

स्यात् । अपि च—न तावदर्थमुपलभ्योच्चारयितृत्वं प्रणेतृत्वं, पौरुषेयत्वापातात् । नाप्यध्यापकवदुच्चारयितृत्वमात्रं, तेन सार्वज्ञचासिद्धेः । किञ्च—स्वव्यतिरिक्तोपदेश्यपुरुषगोचरस्य भ्रमस्य भ्रान्तिसिद्धशरीरादेश्चाभावे उच्चारणायोगात् तस्य चासार्वज्ञचं विनाऽसम्भवात् शास्त्रयोनित्वमसार्वज्ञचएव हेतुः ॥

विवरणे तु—यथा दीपगता प्रकाशनशक्तिस्तदुपादाने वह्नौ, तथा वेदगता सर्वप्रकाशनशक्तिस्तदुपादाने ब्रह्मणि, कार्योपादानयोरेकशक्तित्वादित्युक्तम् । तन्न, कारणे अदृष्टस्यापि शक्तिविशेषस्य कार्ये दर्शनात् ।

प्रकाशः

षयादधिकविषयज्ञानवत्" इत्यंशपर्यालोचनया सार्वज्ञचासिद्धिमुक्त्वेदानीं प्रणीतत्वांशपर्यालोचनेनापि "किञ्चेदं शास्त्रस्य" इत्यादिटीकाद्युक्तदिशा तदसिद्धिमाह—**अपि चेति** । एतेन शास्त्रयोनित्वमर्थमुपलभ्य रचयितृत्वं चेदसिद्धिः, उच्चारयितृत्वं चेदप्रयोजकमित्युक्तं भवति । टीकाद्युक्तमुपलक्षणमिति भावेन शास्त्रयोनित्वं सार्वज्ञचविरुद्धं चेत्याह—**किञ्चेति** । **असार्वज्ञचमिति** । विशेषादर्शनजन्यत्वाद्भ्रमस्येति भावः । 'एव' इति साध्याभावव्याप्तत्वमाह ॥

**अदृष्टस्येति** । मृत्पिण्डे अदृष्टस्य जलाहरणसामर्थ्यस्य घटादौ दर्शनादिति भावः । वेदोपादानत्वेन ब्रह्मणस्सर्वप्रकाशनशक्तिमत्त्वरूपं सार्वज्ञचंचेदन्धकारोपादानत्वादसार्वज्ञच-

चन्द्रिका

किञ्च———त्वन्मते अन्धकारदहनादेरपि ब्रह्मोपादानत्वात् तद्गतप्रकाशनदाहादिशक्तिमद्ब्रह्म स्यात् । अविद्याऽपि शास्त्रोपादानमिति साऽपि सर्वज्ञा स्यात् । किञ्च—परिणामिपरिणामयोरेकशक्तित्वेऽपि कथमधिष्ठानाध्यस्तयोस्तत् । एतेन—अधिष्ठानस्य ब्रह्मणो विज्ञानशक्तिविवर्तरूपं शास्त्रमिति निरस्तम् । अविद्याऽऽकाशादेरपि तद्विवर्तत्वेन शास्त्रवत्सर्वप्रकाशकत्वापातात् । रज्ज्वामपि भयकम्पादिशक्तेः ब्रह्मण्यप्यावरणविक्षेपादिशक्तेः प्रसङ्गाच्च । बाह्यागमानामपि ब्रह्मविवर्ततया तदर्थज्ञत्वे ब्रह्मणो भ्रान्तत्वप्रसङ्गाच्च । अपि च—त्वया कार्योपादानयोरेकशक्तिकत्वस्य

प्रकाशः

मपि स्यात् । एवं च त्वदुक्तिर्व्याहतेति भावेनाह—**किञ्चेति** । **दाहादीति** । तथा च ब्रह्मणो विभुत्वेन सर्वदाहप्रसङ्ग इति भावः । उपादानत्वस्य त्वन्मतेऽधिष्ठानत्वरूपत्वात्तत्र च नैवमुक्तिर्युक्तेत्याह—**किञ्चेति** । एतेन "रज्जौ भुजङ्गवत् ब्रह्मण्यारोपितो वेद इति चेत्" इति सुधावाक्यात्पूर्वं परिणामपक्षदूषणमपि योज्यमित्युक्तं भवति । "कथं चैवं सति सार्वज्ञचसिद्धिः" इत्यादिसुधावाक्यं हृदि कृत्वाऽऽह—**एतेनेति** । तदेवाह—**अविद्येति** । विवरणमतेऽपि शास्त्रयोनित्वं सार्वज्ञचे विरुद्धमित्याह—**बाह्येति** । प्रकारान्तरेण विरुद्धत्वमुपपादयन् "किञ्च वेदे ज्ञानकरणत्वशक्तिः" इत्यादिसुधोक्तमाह—**अपि चेति** । "जग-

चन्द्रिका

उक्तत्वात्, वेदः स्वयमज्ञ एव जीवान् प्रति प्रकाशक इति ब्रह्मापि तथा स्यात् । तथा च सार्वज्ञ्यार्थं यत्ने अत्यन्ताज्ञत्वमेवापन्नम् । किञ्च—जन्मादिकारणत्वेनैवोपलक्षणेनोपलक्ष्यस्वरूपसिद्धेः किं निर्विशेषत्वप्रतिकूलसार्वज्ञ्यस्फोरणादिना । ननु तर्हि पूर्वसूत्रोक्तसर्वकारणत्वाक्षेपे तत्साधनार्थमिदमस्तु । उक्तं हि कल्पतरौ—

अथवा वेदनित्यत्वात् ब्रह्मणो विश्वयोनिता ।
नेति शङ्कामपाकर्तुं शास्त्रयोनित्वमुच्यते ॥ इति ।

इति चेन्न, अस्य श्रुतीनां परस्परविरोधपरिहारेण "यावद्विकारं" इत्यादिसूत्रोक्तैः भिन्नत्वादिसाधारणहेतुभिर्ब्रह्मेतरसर्वानित्यत्वप्रतिपा-

प्रकाशः

त्कारणत्वेन सर्वज्ञत्वं न सिध्यति, वेदाकर्तृत्वादित्याशङ्क्येदमुक्तमिति चेत्" इत्यादिसुधावाक्यं विवृण्वानः पक्षान्तरमाशङ्कते—**नन्विति** । तथा च नोक्तदोष इति भावः । **यावदिति** । "यावद्विकारं तु विभागो लोकवत्" इति वियदधिकरणसूत्रे विक्रियमाणं सर्वं कार्यं विभागः विभक्तत्वात् भिन्नत्वाल्लोकवत् घटवत् इति त्वन्मते व्याख्यातत्वादिति भावः । आदिपदेन "आकाशस्य ब्रह्मकार्यत्वाभावे तद्व्यतिरेकापत्त्या एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाहानिः । प्रतिज्ञा हि "यथा सोम्यैकेन मृत्पिण्डेन" इत्यादिशब्दैरव्यतिरेकाभिप्राया" इत्यादिना "प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः" इत्यादिसूत्रोक्तप्रतिज्ञाहान्यादिहेतवो ग्राह्याः ।

चन्द्रिका

दके वियत्पादे वक्तव्यत्वात्। किञ्च—अध्यापकेऽपि पूर्वपूर्वसदृशानुपूर्वीरचयितृत्वस्य भावात्, अभिनवानुपूर्वीरचयितृत्वादेश्च ब्रह्मण्यप्यभावात्, अध्यापकादधिकस्य शास्त्रयोनित्वस्य ब्रह्मण्यसिद्धिः। ननु बहुकालविरतसम्प्रदायस्य वेदस्य सर्गादावेकस्मान्निस्सरणं ब्रह्मण्यधिकमिति चेन्न, जन्मादिसूत्रे 'अस्य' इत्यनेन शास्त्रस्यापि विवक्षायां घटादिकं प्रति प्रसिद्धकर्तृत्वस्य आकाशादीन् प्रतीव, लौकिकप्रमाणवाक्यं प्रति प्रसिद्धकर्तृत्वस्य शास्त्रं प्रति वक्तव्यतया निस्सरणावधित्वस्यानुक्तत्वेनेह तत्समर्थनायोगात्। एतेनैव—"अस्य महतः" इत्यादिवेदवाक्यं ब्रह्मणो वेदकर्तृत्वेन सर्वज्ञत्वं न साधयति, वेदस्य सापेक्षत्वप्रसङ्गादिति पूर्वपक्षे,

प्रकाशः

**वियत्पादइति**। अन्यथा वियदादावप्येवमाशङ्कायामत्रैव तन्निरासस्स्यादिति भावः। अत्र यत्केन चिदुक्तं, तदग्रे निरसिष्यते। उपलक्षणमेतत्, 'वेदकर्तृत्वे सूत्रे प्रमाणानुक्तेः "शास्त्रयोनित्वात्" इति प्रतिज्ञामात्रत्वप्रसङ्गात्' इति सुधोक्तमपि ध्येयम्। सुधोक्तमुपलक्षणमिति मत्वा दोषान्तरमाह—**किञ्चेति**। **असिद्धिरिति**। तथा च कथं तेनोक्तशङ्कानिरास इति भावः। तत्सिद्धान्तोक्तमाशङ्क्य निराह—**नन्विति**। एवं सूत्रार्थं निरस्य तदधिकरणशरीरमपि निराह—**एतेनेति**। "लक्षणानन्तरमवश्यापेक्षित" इत्यादिनोक्तदूषणजातेनेत्यर्थः। विस्तृतं प्राक् तदधि

चन्द्रिका

साधयति, अर्थमुपलभ्य रचयितृत्वस्याभावात्, उच्चारयितृत्वमात्रस्य च सापेक्षत्वानापादकत्वादिति परेषामधिकरणमपास्तम् । "अस्यमहतः" इत्यादेरनुमानरूपत्वाभावाच्च ॥

केचित्तु—जगत्कारणं न वेदवाक्यप्रतिपाद्यम्, अनुमानेन सिद्धेः । तथा च वाक्यानामनुमानप्राप्तानुवादित्वेनाविचार्यत्वमिति प्राप्ते, अत्यन्तातीन्द्रियत्वेन प्रत्यक्षाद्यविषयत्वात्, कार्यत्वाद्यनुमानानां दुष्टत्वेनेश्वरासाधकत्वाच्च, वेदान्तवेद्यत्वमित्यननुवादकानां वेदान्तानां विचार्यत्वमिति सिद्धान्त इत्याहुः । तत्र ब्रूमः—"यतो वै" इत्यादिवाक्यं प्रसिद्धार्थयच्छब्दयोगात् वाक्यान्तरसिद्धकारणत्वानुवादेन तस्य लक्षणत्वविधायकमिति हि ते मतम् ।

प्रकाशः

करणशरीरमस्माभिः । सिद्धान्तमनुवदति—**साधयतीति** । "अस्य महतः" इत्यादिवाक्यं वेदकर्तृत्वेन सर्वज्ञत्वमनुमानविधया साधयतीत्यर्थः ॥

रामानुजमतं निराह—**केचिदिति** । "यतो वै" इत्यादिवाक्यं किं ब्रह्मणि प्रमाणमुत नेत्यादिश्रुतप्रकाशोक्तसंशयो ध्येयः । **अनुमानेनेति** । कार्यत्वाद्यनुमानेनेत्यर्थः । अप्राप्तएव शास्त्रमर्थवादिति भावः । **दुष्टत्वेनेति** । जीवानामेव विचित्रज्ञानशक्तिमनां प्रत्येकं कृत्स्नजगन्निर्मातृत्वासम्भवेऽपि प्रसादादिकर्तृणामिवैकैकदेशनिर्माणेन मिलित्वा कृत्स्नजगन्निर्मातृत्वोपपत्त्यादिना

चन्द्रिका

यथोक्तम्—"यच्छब्दयोगात्कारणत्वमनूद्यते" इति, "ब्रह्मलक्षणत्वमेव अस्य वाक्यस्य विधेयम्" इति च । एवं च कारणत्वस्य चानुमानिकत्वेऽपि तदनुवादेन लक्षणत्वविधायकस्य "यतो वै" इत्यादेरनुवादकत्वासिद्धेस्तत्सिद्ध्यर्थं कारणत्वस्य ब्रह्मलक्षणत्वमानुमानिकमिति पूर्वपक्षयितव्यम्, तदेव च शास्त्रयोनीति सिद्धान्तयितव्यं स्यात् । किञ्च—कारणवाक्यस्यानुवादकत्वेऽपि "सत्यकामः सत्यसङ्कल्पः हिरण्यश्मश्रुर्हिरण्यनखः" इत्यादीनामकारणवाक्यानां विचारः पूर्वपक्षेऽपि सेत्स्यत्येव । न च जिज्ञासासूत्रे

प्रकाशः

दुष्टत्वेनेत्यर्थः । **यथोक्तमिति** । 'श्रुतप्रकाशे' इति शेषः । **असिद्धेरिति** । अन्यथा "सर्वकामो यजेत" इत्यादेरनुवादकत्वं स्यात्स्वर्गेशे अनुवादादिति भावः । अस्तु वा कथं चित्कारणवाक्यानामनुवादकत्वं, तथाऽपि न विचाराक्षेपो युक्त इत्याह—**किञ्चेति । विचार इति** । जीवो वा ब्रह्म वेत्यादिविचार इत्यर्थः । न च तत्र विचारप्रसक्तिरेव नेतिवाच्यं, दहराधिकरणे सत्यकामवाक्यस्यान्तराधिकरणे हिरण्यश्मश्रुवाक्यस्य त्वन्मते विचारयिष्यमाणत्वात् । न च कारणत्ववत्सत्यकामत्वादिकमप्यानुमानिकमिति पूर्वः पक्षः, त्वया कारणत्वएव पूर्वपक्षितत्वात् । कारणत्वे कार्यत्वादिवत्सत्यकामत्वादिव्याप्यलिङ्गाभावाच्चेति भावः । **न च जिज्ञासेति** । तथात्वे अन्तराद्यधिकरणायोगादिति भावः ।

चन्द्रिका

कारणवाक्यस्यैव विचारः प्रतिज्ञातः, येनेह पूर्वपक्षे स आक्षिप्येत । किञ्चास्य सूत्रस्य जन्मादिसूत्रस्य च कारणवाक्यमात्रविचारसाधकत्वे कारणाकारणवाक्यविचारसाधकाद्यचतुर्थसूत्रमध्यस्थत्वमयुक्तम् ॥

एतेनैवाद्वैतिनां शास्त्रं योनिर्ज्ञप्तिकारणमस्येति विग्रहाश्रयणेन पूर्वोक्तलक्षणस्यानुमानतोपमर्दनेन आगमोपदर्शनार्थमिदमधिकरणम् इति वर्णकान्तरं निरस्तम्, प्रमेये विशेषाभावेन प्रमाणे विवादायोगात् । किञ्च—आद्यसूत्रे ब्रह्मशब्देन बृहत्त्वादिधर्मवत्तया, द्वितीयसूत्रे च कारणत्वादिधर्मवत्तयोक्ते, उत्तरत्रापि "ईक्षतेर्नाशब्दम्" "अन्तस्तद्धर्मोपदेशात्" "आकाश-

प्रकाशः

ननु जन्मादिसूत्रे कारणवाक्यमात्रविचारसाधनादत्रापि तन्मात्रमाक्षिप्य समाधीयतइत्यत आह—**किञ्चेति** ॥

"अथ वा यथोक्तमृग्वेदादिशास्त्रं 'योनिः' कारणं प्रमाणं यस्य ब्रह्मणः" इत्यपि परभाष्योक्तं निराह—**एतेनेति** । अतिव्याप्त्यादिरूपफलाभावेनेत्यर्थः । तदेव व्यनक्ति—**प्रमेयइति** । आनुमानिकत्वे वेदान्तानां अनुवादकत्वेनाविचार्यत्वं प्राप्तं, तन्निरसितुमिदमित्यनृशयेनाह—**किञ्चेति** । परस्य शुद्धएव शास्त्रयोनित्वाङ्गीकारेऽपि विशिष्टकल्पोपन्यासः सम्भावितत्वेन वा, विशिष्टएव शास्त्रयोनित्वं त्वयाऽपि वाच्यं, तस्यैवाध्यायचतुष्टयार्थत्वान्न

चन्द्रिका

स्तल्लिङ्गात्" इत्यादौ ईक्षितृत्वादिभिस्तैस्तैरसाधारणधर्मैः कारणत्वादिविशिष्टतया तत्तद्वाक्यार्थत्वेन वक्ष्यमाणे ब्रह्मणि शास्त्रं प्रमाणं वा, किं वा बृहत्त्वादिधर्मरहिते पञ्चमाध्यायसिद्धे त्वदभिप्रेते शून्यब्रह्मणि । नाद्यः, तस्यातात्त्विकत्वात् । न च तत्त्वजिज्ञासुं प्रति आदित एव शास्त्रस्य अतत्त्वावेदकत्वं वक्तुं युक्तम् । अन्त्ये तु पूर्वोत्तराविरोधाय 'न ब्रह्मजिज्ञासा, न जन्माद्यस्य यतः, अनीक्षतेः' इत्यादिसूत्रविन्यासः स्यात् ॥

उक्तञ्च अनुव्याख्याने—

सर्वधर्मोज्झितस्यास्य किं शास्त्रेणाधिगम्यते ।
मिथ्याधर्मविधातुश्च वेदस्येवाप्रमाणता ॥ इति ।

किञ्च—यत्सत्यं नैव तद्वेद्यं यद्वेद्यं तच्च नैव सत् ।
इति ते समयस्तत्र कुत्रार्थे शास्त्रमानता ॥

प्रकाशः

तु शुद्धइति युक्तिसूचनार्थं वेति ध्येयम् । अत एव 'विशिष्टे शुद्धे वा शास्त्रं प्रमाणं' इत्येव वक्तव्ये तस्य प्रपञ्चः । 'पञ्चम' इत्युपहासः । **वक्तुमिति** । 'सूत्रकृता' इति शेषः । **पूर्वोत्तरेति** । 'अस्य सूत्रस्य' इति शेषः । ब्रह्मशब्दस्य विशिष्टार्थत्वादिति भावः । **उक्तं चेति** । 'उक्तं' पक्षद्वयदूषणं आद्यस्य चतुर्थपादे उक्तमित्यर्थः । अत एव तत्र निरस्तप्रायत्वादेवेह टीकाद्वये न तद्वर्णकान्तरं निरस्तम् । **नैव तद्वेद्यमिति ।**

चन्द्रिका

आधुनिकरीत्या फलव्याप्यत्वं दृश्यत्वमिति कल्पने प्रतिवाद्यसिद्धिः, नित्यातीन्द्रियेषु वाद्यसिद्धिरप्रयोजकता च। अपि च—शास्त्रपदेन अनुमानवत् दुरागमस्यापि निरासप्रतीतेः नानुमानमात्रनिरासपरं सूत्रम् ॥ यादवप्रकाशीये तु—"यतो वै" इत्यादिवाक्येन कारणत्वमनूद्य ब्रह्मज्ञानं विधेयम्, अन्यथा वाक्यभेदापातात्। तच्चायुक्तम्, कारणत्वस्य मानान्तरेणाप्राप्तेरिति शङ्कायां, "सदेव सोम्य" इत्यादिशास्त्रान्तरेण प्राप्तिरस्तीति वक्तुं शास्त्रयोनि-

प्रकाशः

अन्यथा दृश्यत्वस्य व्यभिचारापत्तेरिति भावः। ननु सत्यस्य शुद्धस्य वृत्तिविषयत्वरूपवेद्यताऽङ्गीकारान्न दोषः। न च दृश्यत्वस्य व्यभिचारः, तस्य फलव्याप्यत्वरूपत्वात्, वृत्तिप्रतिफलितचैतन्यस्य फलत्वात्, तस्य शुद्धे अभावादित्यत आह—**आधुनिकेति**। **प्रतिवादीति**। प्रपञ्चे तस्य सत्त्ववादिभिरनङ्गीकारादिति भावः। **वादीति**। उभयवाद्यसिद्धिरित्यर्थः। **अप्रयोजकतेति**। फलस्य कल्पितत्वेनाधिष्ठानत्वायोगेन दृग्दृश्ययोः सम्बन्धान्तरानुपपत्त्या आध्यासिकसम्बन्धसिद्धिरित्याद्यनुकूलतर्कस्य फलव्याप्यत्वपक्षे अयोगादिति भावः। **नानुमानमात्रेति**। अन्यथा 'शब्दयोनित्वात्' इत्येव ब्रूयात्सार्धमात्रालाभेन लाघवादिति भावः। अयं च दोषो मतद्वयेऽपि समः। **अन्यथेति**। जगत्कारणत्वस्य ब्रह्मज्ञानस्य च विधौ वाक्यभेदादित्यर्थः।

चन्द्रिका

सूत्रमित्युक्तम् । तन्न, लक्षणानन्तरमत्यन्ताकाङ्क्षितप्रमाणपरत्वसम्भवेऽन्यपरत्वायोगादित्युक्तत्वात् । शास्त्रयोनित्वहेतोः पूर्वसूत्रोक्तब्रह्मकारणत्वरूपसाध्यान्वयसम्भवेऽनुवादकत्वरूपाध्याहृतसाध्यान्वयायोगाच्च । अयञ्च दोषो मतान्तरेऽपि समः, अद्वैतिमते पूर्वसूत्रे कण्ठोक्तकारणत्वत्यागेन अर्थादाक्षिप्तसार्वज्ञ्यान्वयात्, केषां चित्पक्षे व्यवहिताद्यसूत्रोक्तविचारकर्तव्यताऽन्वयात् ॥

प्रकाशः

'समः' इत्युक्तमेवाह—अद्वैतीति ॥

यत् कश्चिदाह—"यतो वै" इत्यादिवाक्यमनुमानप्राप्तकारणानुवादित्वादमानमिति प्राप्ते, शास्त्रप्रामाण्यादेव जगज्जन्मादिकारणं ब्रह्म, न त्वनुमानप्रामाण्यादिति व्यवस्थापयितुमिदं सूत्रम् । तदर्थश्च योनिपदस्य ज्ञप्तिहेत्वर्थकत्वेऽपि षष्ठीतत्पुरुषो न बहुव्रीहिः, समासप्राबल्यात् । शास्त्रस्य योनित्वं तस्माच्छास्त्रस्य प्रामाण्यात् जगज्जन्मादिलक्षणं ब्रह्म भवतीति । तथा 'शास्त्रयोनित्वात्' वेदस्य कर्तृत्वात्सर्वज्ञं ब्रह्मेत्यद्वैत्युक्तम् वर्णकान्तरमप्यत्र ग्राह्यमिति, तन्न, सौत्रशास्त्रपदेन दुरागमस्यापि निरासप्रतीत्या अनुमानमात्रनिरासस्य सौत्रशास्त्रपदाविरुद्धत्वात् । सूत्रे तत्पुरुषाश्रयणे पक्षधर्मताया अलाभेन 'काकस्य काष्ण्यार्द्धवलः प्रासादः' इतिवद्वैयधिकरण्यापत्त्या तदर्थं बहुव्रीहेरेवावश्यमाश्रयणीयत्वात् । योनित्वशब्दस्य गुणवाचित्वेन, तेन "पूरणगुण" इत्यादि-

प्रकाशः

सूत्रेण षष्ठीसमासनिषेधाच्च । गत्यन्तरे सति "संज्ञाप्रमाणत्वात्" इत्यादिज्ञापकेन समाधानस्य क्लिष्टत्वाच्च । जगत्कारणत्वरूपप्रकृतसाध्येनान्वयसम्भवे 'जन्मादिलक्षणं ब्रह्म' इति साध्याध्याहारायोगाच्च । किञ्चानुमानं "यतो वै" इत्यादिवाक्योक्तमेव कर्तारमनुमापयति, अतोऽन्यं वा । आद्ये विरोधो नेतीयं चिन्ता व्यर्था, तस्य श्रुत्यनुग्राहकत्वेन दार्ढ्यहेतुत्वात् । नान्त्यः, अनुवादकत्वाप्राप्तेश्च श्रुत्यप्रमाण्यायोगेन ग्रन्थकृदुक्तरीत्याऽतिव्याप्तेश्चादिना पूर्वपक्षस्योचितत्वाच्च । "आत्मैकस्तु जनार्दनः"

दत्तं दूर्वाससं सोममात्मेशब्रह्मसम्भवान् ।
आत्मब्रह्मादयश्शब्दास्तमृते विष्णुमव्ययम् । न सम्भवन्ति,
स्वातन्त्र्यात् स्व इति प्रोक्त आत्माऽयं चाततत्वतः ।
आततत्वाच्च मातृत्वादात्मेति परमो हरिः ॥

इत्यादिश्रुतिस्मृतिभिः "आत्मभूः" इति चतुर्मुखजनकविष्णौ प्रसिद्धात्मपदघटित "नावेदवित्" इत्यादिश्रुतेः शिवस्य शास्त्रैकगम्यत्वे उदाहरणत्वायोगेन सिद्धान्तस्यानुदयाच्च । उक्तं चानुव्याख्याने—

विष्णावेवात्मशब्दस्य रूढत्वान्न शिवादिकान् ।
श्रुतिर्वक्ति, इति ॥

"सर्वोत्कर्षे देवदेवस्य विष्णोः" "ततो वेदास्तत्परा स्सर्वएव"

प्रकाशः

इत्यादिश्रुतिभिः, "नारायणपरा वेदाः" "वेदैश्च सर्वैरहमेव वेद्यः" "वेदे रामायणे चैव"

यो मामेवमसंमूढो जानाति पुरुषोत्तमम् । स सर्ववित्,
मुख्यं च सर्ववेदानां तात्पर्यं श्रीपतेः परम् । उत्कर्षे तु,
सर्वज्ञं सर्वकर्तारं नारायणमनामयम् ।
सर्वोत्तमं ज्ञापयन्ति महातात्पर्यमत्र हि ॥
सर्वेषामेव वेदानां,

इत्यादिस्मृतिभिः, "ऋगाद्या भारतं चैव" इत्युपक्रम्य "ज्ञेय एतैः सदा युक्तैः" "केवलागमविज्ञेयः" इति पठितया स्पष्टस्मृत्या च, प्रत्यधिकरणभाष्योक्तश्रुत्यादिभिर्विष्ण्वेकनिष्ठश्रुतिलिङ्गादिन्यायैश्च विरुद्धत्वाच्च । "ईशानस्सर्वविद्यानां" इत्यादावीशानादिनाम्नः "शब्दादेव" इतिसूत्रोक्तरीत्या "यो देवानां नामधाः" इतिश्रुत्या "अजस्य नाभौ" इति पद्मनाभत्वलिङ्गेपेतया विष्णुपरत्वोपपत्तेरिति दिक् । अद्वैत्युक्तवर्णकान्तराङ्गीकरणं तु ग्रन्थकृदुक्तानेकदूषणपराहतम् । यदत्र कल्पतरूक्तकल्पे आनुषङ्गिकार्थत्वान्न पृथक्सङ्गत्यपेक्षेति, वियत्पादे निवेश इति दूषणमसङ्गतमिति भाषणं, तन्न, सूत्रार्थत्वेनैव वर्ण्यमानस्यानुषङ्गिकत्वाभावादिति ।

अनुमानतोऽन्ये न कल्पनीयाः—

## ॥ ओम् शास्त्रयोनित्वात् ओम् ॥

"नावेदविन्मनुते तं बृहन्तं सर्वानुभुमात्मानꣳ सांपराये"

तत्त्वप्रकाशिका

अत्र जन्मादिकारणत्वस्यान्यनिष्ठत्वनिरासादस्ति शास्त्रसङ्गतिः । जगज्जन्मादिकर्तृत्वस्य जिज्ञास्ये ब्रह्मणि श्रवणात् विष्णुरेव ब्रह्मेत्युक्तम् । जन्मादिकर्तृत्वस्य च यदाऽन्यनिष्ठता निवार्यते, तदैव तेन विष्णुत्वनिश्चयस्स्यादिति । तज्जन्मादिकारणत्वं विषयः । किं विष्णोरेवाऽन्यस्याप्यस्ति वेति सन्देहः । पूर्वोक्तन्यायः प्रसिद्धिश्च संशयबीजम् । अन्येषामप्यस्तीति पूर्वः पक्षः, अनुमानेन रुद्रादेरपि कारणतासाधनसौलभ्यात् । न चोदाहृतश्रुतिविरोधः, तासां युक्तिविरुद्धार्थे प्रमाण्यायोगात् । तथा च जन्मादिकारणत्वस्य भगवदेकनिष्ठताऽभावान्न तस्यैव तेन जिज्ञास्यब्रह्मतानिश्चय इति । सिद्धान्तयति—**अनुमानतइति** । 'कारणत्वेन' इति शेषः । तत्र हेत्वाकांक्षायां सूत्रमुपन्यस्यति—**शास्त्रयोनित्वादिति** । भवेदनुमानतोऽन्येषां कारणत्वकल्पना, यदि कारणमानुमानिकं स्यात् । न चैतदस्ति, शास्त्रैकसमधिगम्यत्वात्कारणस्य । न हि धर्मादिनिश्चयोऽनुमानेनेति सूत्रार्थः । कारणस्य शास्त्रैकवेद्यत्वं कुत इत्यत आह—**नेति** । तं पूर्णं सर्वज्ञं सर्वकर्तारं सर्वस्वामिनं मोक्षायाऽवेदविन्न जानाति, पुरुषो ज-

"औपनिषदः पुरुषः" इत्यादिश्रुतिभ्यः । न चानुमानस्य नियतप्रामाण्यम् ।

श्रुतिसाहाय्यरहितमनुमानं न कुत्र चित् ।
निश्चयात्साधयेदर्थं प्रमाणान्तरमेव च ॥
श्रुतिस्मृतिसहायं यत्प्रमाणान्तरमुत्तमम् ।
प्रमाणपदवीं गच्छेन्नात्र कार्या विचारणा ।
पूर्वोत्तराविरोधेन कोऽत्रार्थोऽभिमतो भवेत् ।
इत्याद्यमूहनं तर्कः शुष्कतर्कं तु वर्जयेत् ॥

तत्त्वप्रकाशिका

गत्कर्ता उपनिषदेकसमधिगम्य इत्यर्थः । औपनिषदस्यापि कारणस्यानुमानेन सिद्धिः किं न स्यात्, स्वातन्त्र्यादिहेतुना पूर्णत्वादिसिद्धयङ्गीकारादित्यत आह—न चेति । सत्यमस्त्येवाऽनुमानस्यौपनिषदपदार्थनिश्चायकत्वम् श्रुत्यादिसहकारियुक्तस्यैव, न तु 'नियतप्रामाण्यम्' स्वातन्त्र्येणादृष्टार्थनिश्चयकत्वम्, प्रतिपक्षादिसम्भवात् । तादृशं च प्रकृतमिति भावः । अत्रैव स्मृतिसम्मतिमाह—श्रुतीति । 'कुत्र चित्' अदृष्टे, यथेश्वरो न स्वतन्त्रश्चेतनत्वादिति । 'प्रमाणान्तरं' प्रत्यक्षम्, यथा रामकृष्णादिदोषग्राहि । तर्हि कीदृशस्य प्रत्यक्षादेः अदृष्टार्थनिश्चायकत्वमिति तत्राह—श्रुतीति । अत्राऽपि 'प्रमाणान्तरं' प्रत्यक्षम्, यथा यशोदायाः प्रत्यक्षम् । 'तर्कः प्रमाणपदवीं गच्छेत्' इत्यन्वयः । यथा विष्णुस्स्वतन्त्रः पूर्णत्वादिति ।

इत्यादि महाकौर्मे । शक्यत्वाच्चानुमानानां सर्वत्र ।

सर्वत्र शक्यते कर्तुमागमं हि विनाऽनुमा ।
तस्मान्न सा शक्तिमती विनाऽऽगममुदीक्षितुम् ॥

इति वाराहे ।

रेतो धातुर्वटकणिका घृतधूमाधिवासनम् ।

---

तत्त्वप्रकाशिका

केवलानुमानस्य प्रामाण्येऽतिप्रसङ्गं चाह—**शक्यत्वाच्चेति** । श्रुत्यादिसाहित्यहीनानुमानस्य 'सर्वत्र' जगत्कारणाभावादौ शशादीनां विषाणित्वादौ च कर्तुं शक्यत्वान्नानुमानस्य नियतप्रामाण्यमित्यर्थः । तत्रैव प्रमाणमाह—**सर्वत्रेति** । 'उदीक्षितुं' अर्थमुदीक्षयितुम् । तस्मात्केवलानुमानस्यानिर्णयकत्वाच्छास्त्रेणैव कर्तृत्वनिश्चयइति स्थितम् । नन्वतीन्द्रियार्थाभावेन प्रत्यक्षेतरस्याप्रामाण्यात् कथं शास्त्रादीश्वरसिद्धिरिति नास्तिकवादं मोक्षधर्मवचनेन निराचष्टे—**रेतइति** । रेतोधात्वादि अतीन्द्रियार्थसत्त्वेऽनुमानादिप्रामाण्ये च 'प्रमाणं' प्रमापकमिति निश्चयः । तथा हि—रेतश्शरीरयोः कार्यकारणभावोऽस्ति । न चासौ प्रत्यक्षः । अतोऽन्वयव्यतिरेकित्वाख्यानुमानस्य मानत्वसिद्धिः । मृतशरीरे सिक्तस्याकारणत्वेन यदधिष्ठिते परिणमते, तज्जीवसिद्धिः । न च जीवत्सर्वशरीरे पतितं कार्यकरम् । अतस्तत्प्रेरकेश्वरादृष्टसिद्धिः ।

जातिस्मृतिरयस्कान्तः सूर्यकान्तोऽम्बुभक्षणम् ॥

प्रेत्य भूताप्ययश्चैव देवताऽभ्युपयाचनम् ।
मृते कर्मनिवृत्तिश्च प्रमाणमिति निश्चयः ॥

इतिमोक्षधर्मवचनान्न नास्तिक्यवादो युज्यते ।

तत्त्वप्रकाशिका

ततस्तत्प्रतिपादकागमप्रामाण्यसिद्धिः । एवं वातादिधातुरपथ्याद्विक्रियते । नापि मृतशरीरे, न जीवच्छरीरेषु सर्वेषु । वटकणिकातो वट उत्पद्यते । न च भर्जितायाः, नाप्यभर्जिताभ्यस्सर्वाभ्यः । घृतेन पीनता जायते । न मृतशरीरे, नापि जीवत्सर्वशरीरेषु । धूमाविवासनेन वृक्षेषु पुष्पादिसम्पत्तिर्जायते । न च शुष्केषु, नाप्यशुष्केषु सर्वेषु । साधनविशेषाज्जातिस्मृतिर्भवति । न चेतनाभावे सा युक्ता । न चास्ति सर्वेषाम् । अयस्कान्तेनायो भ्रमति । न चाचेतने चेष्टकत्वम्, न च सर्वचेतनानाम् । सूर्यकान्तेनाग्निर्जायते । न चासौ शक्तिरचेतने युक्ता । अम्बुभक्षणेन तृष्णा निवर्तते । न च तन्मृतशरीरे पच्यते, न च जीवत्सर्वशरीरेषु । मरणेन देहस्य भूतेष्वव्ययो भवति । न च जीवतः, न स्वेच्छया । देवताऽभ्युपयाचनेन सम्पदादिकं भवति । न च सर्वेषाम् । मरणेन चेष्टानिवृत्तिर्भवति । न पुनस्स्वेच्छया । एतैः प्रमापकैरनुमानजीवेश्वरागमादृष्टादिसिद्धेर्न नास्तिक्यवादो युज्यतइत्यर्थः ।

दर्शनाच्च तपआदिफलस्य ।

ऋग्यजुस्सामाथर्वाश्च भारतं पञ्चरात्रकम् ।
मूलरामायणं चैव शास्त्रमित्यभिधीयते ॥
यच्चानुकूलमेतस्य तच्च शास्त्रं प्रकीर्तितम् ।
अतोऽन्यो ग्रन्थविस्तारो नैव शास्त्रं कुवर्त्म तत् ॥

इतिस्कान्दे ।

साङ्ख्यं योगः पाशुपतं वेदारण्यकमेव च ।

---

तत्त्वप्रकाशिका

इतश्चासौ न युज्यतइत्याह—**दर्शनाच्चेति** । अत्युत्कटतपःपापाभ्यां प्रत्यक्षत एव फलं दृश्यते । न च तत्र कारणान्तरमस्ति । अतस्तत्कार्यकारणभावोऽनुमानवेद्य इति तन्मानत्वसिद्धिः । तपआदीनां वैदिकत्वादागममानत्वसिद्धिः । ततश्चेश्वरादिसिद्धिरिति न नास्तिक्यवादो युज्यते । तस्माच्छास्त्रादेवेश्वरादिसिद्धिरिति युक्तमेवेति भावः । नन्वेवमनुमानस्यानिश्चायकत्वेन शास्त्रादेव कारणत्वसिद्धिश्चेत्तर्हि पाशुपतादिशास्त्रेण रुद्रादेः कारणत्वं स्यादित्यत आह—**ऋगिति** । इतश्च पाशुपतादिकं कुवर्त्मेत्याह—**साङ्ख्यमिति** ।

पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणस्स्वयम् ।
ज्ञानेष्वेतेषु राजेन्द्र सर्वेष्वेतद्विशिष्यते ॥ इति

मोक्षधर्मेष्वपि साङ्ख्यादिषु प्रकृतेषु पञ्चरात्रस्यैव प्रामाण्यमुक्तम् ।

**इत्यारभ्य वेदपञ्चरात्रयोरैक्याभिप्रायेण पञ्चरात्रस्यैव प्रामाण्यमुक्तमितरेषां भिन्नमतत्वं प्रदर्श्य मोक्षधर्मेष्वपि ।**

तत्त्वप्रकाशिका

अतः पाशुपतादिकं अमानमेवेत्यर्थः । अनेन पञ्चरात्रप्रामाण्यमेव भवेन्नान्याप्रामाण्यमित्यत आह—**इतरेषामिति ।**

साङ्ख्यं योगः पाशुपतं वेदारण्यकमेव च ।

ज्ञानान्येतानि भिन्नानि नात्र कार्या विचारणा ॥ इति

परस्परविरुद्धतयोक्तानामेकप्रामाण्योक्तौ अन्याप्रामाण्यं लभ्यतइति भावः । तर्हि वेदारण्यकस्याप्यप्रामाण्यं स्यादित्यत आह—**वेदेति ।** पञ्चरात्रस्य वेदार्थत्वेन तत्प्रामाण्योक्तौ वेदप्रामाण्यमेवोक्तं भवति । ऐक्याभिप्रायाभावे पञ्चरात्राधिक्यकथनमसङ्गतं स्यादिति भावः ।

चन्द्रिका

टीकाक्षरार्थस्तु—**ऐक्याभिप्रायाभावे पञ्चरात्राधिक्यकथनमिति ।** वेदारण्यकशब्देन पञ्चरात्रस्याविवक्षायां 'एतेष्वेतद्विशिष्यते' इति निर्धारणायोगः, पञ्चरात्रस्य प्रागनिर्देशात् ।

प्रकाशः

पञ्चरात्राधिक्योक्तौ कथं वेदपञ्चरात्रयोरैक्यलाभ इत्यत आह—**ऐक्येति । निर्धारणेति ।**

ज्ञानेष्वेतेषु राजेन्द्र सर्वेष्वेतद्विशिष्यते ।

इत्यत्र 'एतेषु' इति निर्धारणार्थकसप्तम्यन्तैतच्छब्दपरामृष्टानां मध्यएव किञ्चिदेतच्छब्देन परामृश्य 'विशिष्यते' इत्यतिशयित-

चन्द्रिका

वेदविरुद्धतया निर्दिष्टसाङ्ख्याद्यैक्यमभिप्रेत्य साङ्ख्यादिशब्देन पञ्चरात्रविवक्षायान्तु पञ्चरात्रादेः वेदादप्याधिक्यमुक्तं स्यात् । न च तद्युक्तं, वेदविरोधेनालब्धप्रामाण्यस्य तस्य वेदादाधिक्यस्य दूरनिरस्तत्वात् । वेदारण्यकशब्देन पञ्चरात्रविवक्षा तु वेदारण्यकैक्याभिप्रायं विना न युक्तेत्यर्थः । यद्वा—अदृष्टविषगस्य पौरुषेयवाक्यस्य पञ्चरात्रस्य वेदैकार्थत्वरूपवेदमूलत्वाभावे, प्रामाण्यरूपमाधिक्यं न स्यादित्याधिक्योक्तचन्यथाऽनुपपत्त्या वेदमूलत्वसिद्धिरित्यर्थः ।

प्रकाशः

त्वेन वाच्यतया पञ्चरात्रस्य पृथक्प्रागनिर्देशेन वेदारण्यकपदेनाप्यग्रहणे निर्धारणार्थकसप्तम्ययोग इत्यर्थः । ननु साङ्ख्याद्यैक्यबुद्ध्या साङ्ख्यादिपदेनैव पञ्चरात्रविवक्षाऽस्त्वित्यत आह—वेदेति । 'पञ्चरात्रादेः' पञ्चरात्रसाङ्ख्यादेः । ऐक्येति । एकार्थत्वाभिप्रायं विनेत्यर्थः । पूर्वं निर्धारणान्यथाऽनुपपत्त्या वेदारण्यकपदेन पञ्चरात्रस्य ग्रहणं, तदन्यथाऽनुपपत्त्या तयोरैक्यसिद्धिरित्युक्तम् । इदानीमाधिक्योक्तचन्यथाऽनुपपत्त्यैव तत्सिद्धिरित्याह—यद्वेति । 'वेदमूलत्व' इति ऐक्यपदार्थविवरणम् । "वेदस्यैव प्रामाण्यं किं नोच्यते पञ्चरात्रप्रामाण्यसिद्ध्यर्थं" इत्येतत्सर्वं चोद्यवाक्यमिव भाति । तदयुक्तं, वेदप्रामाण्येऽपि पञ्चरात्रप्रामाण्यस्य निर्बीजत्वेन चोद्यानवकाशात् । अग्रे परिहारानुक्तेश्च । वेदप्रामाण्ये पञ्चरात्रप्रामाण्य-

तत्त्वप्रकाशिका

वेदस्यैव प्रामाण्यं किं नोच्यते। पञ्चरात्रप्रामाण्यसिद्ध्यर्थम्। पञ्चरात्रप्रामाण्योक्तौ तु वाक्यार्थान्यथाऽनुपपत्त्या वेदप्रामाण्योहसम्भवादिति। धर्मबहुत्वाद्बहुवचनम्। तस्मात्कारणस्य वेदादिशास्त्रैकसमधिगम्यत्वान्नानुमानेनान्यकारणत्वं शङ्क्यमिति न जिज्ञास्यस्य विष्णुत्वनिश्चयायोग इति॥

चन्द्रिका

किं नोच्यतइति प्रश्नस्योत्तरमाह—**पञ्चरात्रप्रामाण्यसिद्ध्यर्थमिति**। वेदप्रामाण्योक्तौ तु न पञ्चरात्रप्रामाण्यसिद्धिः। न ह्यदृष्टविषयस्यापि वेदस्य अपौरुषेयस्य प्रामाण्यं पञ्चरात्रप्रामाण्यं विनाऽनुपपन्नम्। न च मूलप्रामाण्योक्तौ मूलिनोऽपि तत्सिद्धिः, वेदपञ्चरात्रयोर्मूलमूलिभावस्य अद्याप्यसिद्धेरिति भावः। **पञ्चरात्रप्रामाण्योक्ताविति**। पञ्चरात्रस्यावेदमूलत्वे, मूलस्य वेदस्य अप्रामाण्ये वा, प्रामाण्यायोगात्, पञ्चरात्रप्रामाण्योक्तौ वेदप्रामण्यसिद्धिरित्यर्थः।

प्रकाशः

सिद्धिप्रकाररूपं परिहारमनुक्त्वा पञ्चरात्रप्रामाण्येन वेदप्रामाण्योपपादनासङ्गतेश्चेत्यतः, इदमेव प्रश्नोत्तरत्वेन भिन्नवाक्यमभिप्रेत्य व्याचष्टे—**किं नोच्यतइति**। किंशब्दमात्रं हित्वा पूर्ववाक्यं सर्वमुत्तरत्रानुषञ्जनीयम्। परिहारांशं व्यनक्ति—**वेदेति**। वेदप्रामाण्येन पञ्चरात्रप्रामाण्यं किमर्थापत्त्या, उत मूलस्योक्तं मूलिनोऽपि सेत्स्यतीति व्याप्तिबलात्। न द्वयमपि सम्भवतीत्याह—**न हीति**। ननु यदि वेदप्रामाण्येन पञ्चरात्रप्रामाण्यं न सिद्ध्येत्, तर्ह्येतत्प्रामाण्येन कथं वेदस्य तत्सिद्धिरित्यतः प्रवृत्तं—'पञ्चरात्र' इत्यादि। तद्व्यनक्ति—

**शास्त्रं योनिः प्रमाणमस्येति 'शास्त्रयोनि' ॥३॥**

तत्त्वप्रकाशिका

सूत्रं व्याख्यायाथ यत्परेणोक्तं शास्त्रस्य योनिरिति, तदयुक्तमिति भावेनाह—**शास्त्रमिति** । शास्त्रं योनिर्ज्ञप्तिकारणं प्रमाणमित्येव शास्त्रयोनि, न शास्त्रस्य योनिरिति भावः । समासप्राबल्यात्कुतो नासावर्थइति चेद्वेदादिकर्तृत्वकथनस्योक्तानुपयुक्तत्वात् । न हि जन्मादिकर्तृत्वे शास्त्रयोनित्वं हेतुः, वैपरीत्यस्यैवोचितत्वात् । जगत्कारणत्वोक्त्याऽर्थलब्धं सार्वज्ञ्यमेव शास्त्रयोनित्वोक्त्या स्फोरयतीति चेन्न, तत्रार्थलब्धशक्त्याद्यस्फुटीकृत्य सार्वज्ञ्यमात्रस्फुटीकरणे विशेषकारणाभावात् । अनन्तजगन्निर्माणोक्त्याऽस्फुटीभूतं सार्वज्ञ्यं तदेकदेशनिर्माणोक्त्या कथमाविर्भवेत् । किञ्चेदं शास्त्रस्येश्वरनिर्मितत्वमर्थमुपलभ्य रचितत्वं वा निस्सृतत्वमात्रं वा । नाद्यः, कणादचरणानुसरणप्रसङ्गात् । श्रुत्यादिविरोधाच्च । न द्वितीयः, शास्त्रयोनित्वस्य सार्वज्ञ्यसाधकत्वाभावप्रसङ्गात् । अतोऽर्थान्तरमुक्तानुपयुक्तमयुक्तं चेत्युक्त एव सूत्रार्थइति ॥३॥

चन्द्रिका

**समासप्राबल्यादिति** । समस्यमानपदार्थत्यागेनान्यपदार्थप्रधानाद्बहुव्रीहेः तत्पुरुषस्य तदत्यागेनोत्तरपदार्थप्रधानस्य प्राबल्यमिति भावः ॥

प्रकाशः

**पञ्चरात्रेति** । बहुव्रीहेरन्यपदार्थे लाक्षणिकत्वात्तत्पुरुषसमासे तदभावात्ततोऽपि प्राबल्यमिति भाति, बहुव्रीहौ लक्षणायास्तर्कताण्डवे निरासात् । अतोऽन्यथा प्राबल्यं उपपादयति—**समस्यमानेति** । उत्तरपदार्थप्रधानत्वात्तत्पुरुषस्येति भावः ॥

इति शास्त्रयोनित्वाधिकरणम् ॥

# शोधनपत्रिका.

| पृष्ठम् | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| 4 | 18 | माधन | साधन |
| 10 | 6 | व्याख्येय | व्याख्येय |
| 11 | 3 | व्याख्य | व्याख्या |
| 18 | 15 | त्यर्थ | त्यर्थः |
| 32 | 10 | विद्यक | विद्यिक |
| 33 | 17 | वृत्तत्व | वृतत्व |
| 38 | 7 | आविद्यक | आविद्यिक |
| 40 | 4 | आविद्यक | आविद्यिक |
| 46 | 11 | औपोद्धातकी | औपोद्धातिकी |
| ,, | 12 | औपोद्धातकी | औपोद्धातिकी |
| ,, | 14 | अन्यथा | अन्यथागुण |
| ,, | 15 | अध्यायसंगति | अध्यायासंगति |
| 47 | 19 | औपोद्धातकी | औपोद्धातिकी |
| 49 | 1 | तस्मिन्नपि | तस्मिन्नपि |
| 53 | 11 | त्यादि | इत्यादि |
| 56 | 1 | आत्मनश्च | आत्मनश्चा |
| 67 | 4 | तन्न— | तन्न, |
| 68 | 14 | प्यश्रीय | प्याश्रीय |
| 77 | 16 | वासया | वाक्या |
| 83 | 15 | द्भिन्न | द्भिन्न |
| 88 | 13 | लघीय | लघीयः |
| 89 | 12 | णमन्त्रेणन | णामन्त्रणेन |
| 91 | 3 | असांहतया | असंहितया |
| 92 | 1 | प्रकृत | प्राकृत |

| पृ | प | अशु | शु |
|---|---|---|---|
| 93 | 7 | छिनति | छिनत्ति |
| 101 | 5 | भर्याथत्वम् | भयार्थत्वम् |
| 114 | 5 | कामनाया | कामनायाः |
| 116 | 13 | तदुल्लङ्घने | तदुल्लङ्घने |
| 130 | 11 | कांरोक्त | कारोक्त |
| 134 | 7 | वियक | विधिक |
| 140 | 14 | समंधा | सम्बन्धा |
| 143 | 21 | श्रुत्यर्धो | श्रुत्यर्थो |
| 146 | 3 | ‘परीक्ष्य | “परीक्ष्य |
| 148 | 12 | केनचिदुक्तं, | केनचिदुक्तं— |
| 160 | 18 | राति | रिति |
| 163 | 3 | यमेवैष | यमेवैष |
| 166 | 17 | अत् | अत |
| 173 | 13 | हरति | हरति — |
| 176 | 19 | सारि | सारि। |
| 178 | 3 | ब्रह्म | ब्रह्म |
| 179 | 17 | स्यार्थः— | स्यार्थः। |
| 181 | 6 | व्युत्व | व्युत्प |
| ,, | 16 | भावः | भावः। |
| ,, | ,, | धर्मे | धर्म |
| 184 | 19 | च्छुभं | ञ्छुभं |
| 185 | 9 | अभ्यासात्’ | ‘अभ्यासात्’ |
| 194 | 5 | षष्ठी | षष्ठी |
| ,, | 10 | षष्ठी | षष्ठी |
| ,, | 17 | षष्टयाः | षष्ठ्याः |
| ,, | 18 | षष्ठी | षष्ठी |
| 195 | 19 | षष्ठी | षष्ठी |
| ,, | ,, | षष्टया | षष्ठ्या |

| पु | प | अशु | शु |
|---|---|---|---|
| 196 | 5 | षष्टचा | षष्ठचा |
| 196 | 6 | पारंम्पर्येण | पारम्पर्येण |
| ,, | 8 | इत्युक्तं | इत्युक्तं" |
| ,, | 9 | षष्ठी | षष्ठी |
| ,, | 9 | समर्थयते | समर्थयते— |
| 197 | 19 | तोक्तयै | तोक्तये |
| 198 | 14 | हेतुमाह | हेतुमाह— |
| ,, | 19 | द्योतयितुं— | द्योतयितुं |
| 199 | 18 | अथवेति | अथवेति |
| ,, | 21 | यत्रेति | यत्नेति |
| 200 | 11 | एवं रूप | एवंरूप |
| ,, | 14 | कर्तव्यत्तो | कर्तव्यतो |
| ,, | 20 | ' इतिपक्षे | ' इतिपक्षे ' |
| 204 | 7 | गोणो | गौणो |
| 209 | 8 | दध्रे | दध्रे |
| 218 | 18 | ब्रह्म | ब्रह्म |
| 223 | 17 | विशेष | विशेषे |
| 232 | 3 | नीधान | नाधीन |
| ,, | 7 | ब्रह्मार्कि | ब्रह्म किं |
| ,, | 12 | प्रकारा | प्रकारा |
| 233 | 2 | यतोवा | यतोवै |
| 235 | 8 | बाधिप्यत | बाधिष्यत |
| 240 | 2 | ब्रह्म | ब्रह्म |
| ,, | 5 | रूढत्या | रूढ्या |
| 247 | 12 | तेन्न | तन्न |
| 252 | 2 | यार्त् | र्यात् |
| 255 | 11 | वक्तव्ये | वक्तव्ये |
| 256 | 11 | स्यन | स्यान |

| पृ | प | अशु | शु |
|---|---|---|---|
| 256 | 13 | सि ार्थ | सितार्थ |
| 260 | 10 | दक्षिणं | दक्षिणा |
| 263 | 15 | त्वा | त्वा |
| 266 | 19 | कतर्या | कर्तर्या |
| 267 | 5 | शब्दस्य | शब्दस्य |
| 272 | 18 | 'सिद्धान्तः' | सिद्धान्तः |
| ,, | 19 | प्रासादा | प्रसादा |
| ,, | 20 | पूर्वक्ष्य | पूर्वपक्ष्य |
| 277 | 20 | च्छदेक | च्छेदक |
| 280 | 7 | स्थयस | स्थस |
| 284 | 5 | भवान् | भव त् |
| 286 | 16 | तेपां | तेषां |
| 294 | 15 | ब्रह्म | ब्रह्म |
| ,, | 17 | सयुदाये | समुदाये |
| 296 | 9 | अभ्यस्ते | अभ्यस्तम् |
| 297 | I9 | वचनात | वचन.त् |
| 300 | 15 | इत्यर्थेः | इत्यर्थः |
| 304 | 14 | रि न्न | रिभिन्न |
| 304 | 15 | सभव | सम्भव |
| 307 | 10 | अनङ्गा | अनङ्गी |
| 309 | 14 | धाय | धायि |
| 311 | 15 | पारच्छेद | परिच्छेद |
| 316 | 10 | मत्तं | मतं |
| ,, | 16 | पृ:धि | पृथि |
| 323 | 2 | रवीप | रवीपि |
| 331 | 14 | भाण्य | माण्य |
| 342 | 16 | घटि | घट |
| 344 | 18 | यदप्र | यप्र |
| ,, | ,, | पर्याप | पर्यायप |

| पु | प | अशु | शु |
|---|---|---|---|
| 345 | 11 | कल्प | कल्पः |
| 346 | 17 | भदे | भेद |
| 347 | 17 | निर्मार्तृणां | निर्मातृणां |
| 357 | 17 | देयेव | देत्येव |
| ,, | 19 | शाङ्कित | शङ्किते |
| 358 | 19 | विशिष्ट | विशिष्टे |
| ,, | 20 | मात | मति |
| 361 | 15 | सध्य | साध्य |
| 367 | 18 | प्रसादादिकतृ | प्रासादादिकर्तृ |
| 368 | 10 | सर्व | स्वर्ग |

# ग्रन्थोदाहृत वचनाकरसूची.


| | | |
|---|---|---|
| ऐ. आ. 2-3-8-7 | .... | अः इति ब्रह्म, 150 |
| भाग. ता. 10-2 | .... | अकर्माऽक्लिष्टकारित्वात्, 251 |
| आप. श्रौ. सू. 8-1-1 | ... | अक्षय्यं ह वै चातुर्मास्ययाजिनः, 179 |
| ब्र. सू. 1-3-10 | ... | अक्षरमम्बरान्तधृतेः, 293 |
| तै. सं. 1-1-4 | .... | अग्नये जुष्टं निर्वपामि, 91 |
| तै. सं. 2-2-4 | .... | अग्नये पवमानाय, 62 |
| तै. ब्रा. 3-5-6 | .... | अग्निर्वृत्राणि जंघनत्, 63 |
| तै. सं. 1-5-9 | .... | अग्निहोत्रं जुहोति यवागूं पचति, 128 |
| तै. सं. 3-5-1 | .... | अग्नीनादधीत, 137 |
| तै. सं. 1-8-1 | .... | अग्नीषोमीयमेकादशकपालं, 63 |
| तै. सं. 1-1-5 | .... | अच्छिद्रेण पवित्रेण, 95 |
| पा. सू. 4-1-4 | .... | अजाद्यतः, 296 |
| अनुव्या. 1-1-1 | .... | अतोऽधिकारिविषयफल, 36 |
| ब्र. सू. 1-2-9 | .... | अत्ता चराचरग्रहणात्, 293 |
| अथर्वशिरश्श्रुति— | | अथ कस्मादुच्यते ब्रह्मेति, 161 |
| भाग. 11-2 | .... | अथ भागवतं ब्रूत, 111 |
| बृ. उ. 6-10 | .... | अथ वेशांतान्पुष्करिण्यः, 250 |
| म. भाष्य 1-1-1 | .... | अथ शब्दानुशासनं, 110 |
| जै. सू. 1-1-1 | ... | अथातो धर्मजिज्ञासा, 29 |
| पा. सू. 1.1-2 | .... | अदेङ्गुणः, 297 |

| | | |
|---|---|---|
| ब्र. सू. 2-1-23 | .... | अधिकं तु भेदनिर्देशात्, 220. |
| भाग. ता. 1-1- | .... | अधिकारं फलंचैव प्रतिपाद्यं च, 19 |
| कल्पतरु— | .... | अध्ययनविधिना इत्यादि, 51 |
| अ. को. धीवर्ग. | ... | अध्याहारस्तर्कऊहः, 97 |
| मा. खं. मू. | .... | अनतिरेके स्वप्रकाशत्वादात्मनः, 71 |
| ब्र. सू. 4-4-23 | .... | अनावृत्तिः शब्दात्, 42 |
| ब्र. सू. 1-1-20 | .... | अन्तस्तद्धर्मोपदेशात्, 369 |
| तै. उ. 2-1 | ... | अन्नाद्वै प्रजाःप्रजायन्ते, 254 |
| ब्र. सू. 2-2-9 | ... | अन्यथानुमितौ च ज्ञशक्तिवियोगात्, 247 |
| तै. सं. 1-2-4 | ... | अन्वेनं माता, 100 |
| पा. सू. 2-1-12 | .... | अपपरिबहिरञ्चवः पञ्चम्या, 144 |
| तै. सं. 5-2-9 | ... | अपशवो वा अन्ये गोअश्वेभ्यः, 250 |
| पा. सू. 6-1-189 | ... | अभ्यस्तानामादिः, 297 |
| पा.सू.काशिका.1-4-57 | ... | अमानोनाःप्रतिषेधे, 18 |
| आथ. उ. 4 | ... | अमृतस्यैष सेतुः, 248 |
| मा. उ. 1 | ... | अयमात्मा ब्रह्म, 43 |
| ऋ. ब्रा. 4-4 | .... | अयं वैलोकः प्रथमा महानाग्नि, 153 |
| तै. सं. 6-1-6-10 | .... | अरुणया पिङ्गाक्ष्यैकहायन्या, 140 |
| पा. सू. 3-3-169 | .... | अर्हे कृत्यतृचश्च, 73 |
| पा. सू. 5-4-136 | .... | अल्पाख्यायाम्, 4 |
| तै. सं. 5-1-2 | .... | अश्वाभिधानीमादत्ते, 76 |
| आप. श्रौ. | .... | आग्निनं ग्रहं गृहीत्वा, 129 |
| ब्र. सू. 2-1-18 | .... | असद्व्यपदेशान्नेतिचेन्न धर्मान्तरेण, 250 |
| शं. भा. 1-1-1 | .... | अस्मत्प्रत्ययगोचरेत्यादि, 38 |
| बृ. उ. 2-4-10 | .... | अस्य महतो भूतस्य, 356 |

| | | |
|---|---|---|
| ब्र. सू. 1-1-22 | ... | आकाशस्तल्लिङ्गात्, 369 |
| सुधा. जि. अ. | ... | आगमस्तु कार्यनिष्ठो, 67 |
| तै. सं. 1-8-19 | .... | आग्नेयमष्टाकपालं निर्वपति, 205 |
| बृ. उ. 6-4-23 | .... | आत्मन्येवात्मानं पश्येत्, 73 |
| तै. ना. 6-11 | ... | आत्मा नारायणः परः, 248 |
| म. मु. म. 1-1-1 | .... | अत्मा ब्रह्मेत्यधीतः स्फुरति स तु सदा, 44 |
| बृ. उ. 6-5-5 | .... | आत्मावाअरे द्रष्टव्यः, 163 |
| ब्र. सू. 1-1-12 | .... | आनन्दमयोऽभ्यासात्, 185 |
| तै. उ. 3-5 | .... | आनन्दाद्ध्येव, 279 |
| पा. सू. 6-3-46 | .... | आन्महतस्समानाधिकरणजातीययोः, 152 |
| ब्र. सू. 2-1-22 | .... | इतरव्यपदेशात्, 247 |
| ब्र. सू. 2-1-2 | .... | इतरेषां चानुपलब्धेः, 328 |
| तै. सं. 4-2-11 | .... | इन्द्राग्नी रोचना दिवः, 139 |
| तै. सं. 1-1-1 | .... | इषे त्वा, 92 |
| ब्र. सू. 1-1-5 | .... | ईक्षतेर्नाशब्दम्, 185 |
| मा. उ. 2-1 | .... | ईशानः प्रभुरव्ययः, 305 |
| स्कान्दपुराण– | .... | उत्पत्तिस्थितिसंहाराः, 246 |
| आप. श्रौ. सू. 9-11-9 | ... | उपरि हि देवेभ्यो धारयति, 78 |
| तै. सं. 2-6-6 | .... | उपांशुयाजमंतरा यजति, 63 |
| पा. सू. 2-3-66 | ... | उभयप्राप्तौ, 196 |
| पा. सू. 6-1-5 | .... | उभे अभ्यस्तं, 296 |
| पा. सू. 5-4-74 | .... | ऋक्पूरब्धूःपथामानक्षे, 12 |
| ऋग्भा. 1-6-3 | .... | ऋचस्स ऋचउद्धृत्य, 21 |
| तै. सं. 1-8-6 | .... | एक एव, 349 |
| आयुस्सूक्तम् | .... | एकः पुरस्ताथ इदं, 354 |

| | | |
|---|---|---|
| छां. उ. 6-2-1 | .... | एकमेवाद्वितीयं, 338 |
| ऋ. सं. 1-154-4 | .... | एको दाधार, 349 |
| अनुव्या. 1-1-1 | .... | एतत्सर्वं तर्कशास्त्रे, 164 |
| पा. सू. 5-3-5 | .... | एतदोऽश्, 158 |
| ब्र. सू. 2-1-13 | .... | एतेन शिष्टपरिग्रहा अपि, 247 |
| भारत. ता. 10 | .... | एवं ज्ञानं पुनः प्राप्तुः, 28 |
| बृ. उ. 6-4-23 | .... | एष नित्यो महिमा, 314 |
| कठ. 2-3 | .... | एषोऽश्वत्थः सनातनः, 132 |
| तै. सं. 2-5-4 | .... | ऐन्द्रं दध्यमावास्यायां, 63 |
| तै. सं. 2-5-3 | .... | ऐन्द्रं पयोऽमावास्यायां, 63 |
| मनुस्मृति– | .... | ओंकारश्चाथशब्दश्च, 121 |
| अनुव्या. 1-1-1 | .... | ओतत्ववाचीह्योंकारो, 90 |
| तै. उ. 1 | .... | ओमिति ब्राह्मणः प्रवक्ष्यन्नाह, 107 |
| छां. उ. 1-1-1 | ... | ओमित्येतदक्षरमुद्गीथ, 216 |
| पा. सू. 6-4-146 | .... | ओर्गुणः, 15 |
| ,, 3-3-117 | .... | करणाधिकरणयोश्च, 68 |
| ब्र. सू. 2-3-33 | ... | कर्ता शास्त्रार्थवत्वात्, 247 |
| पा. सू. 2-3-65 | .... | कर्तृकर्मणोः कृति, 27 |
| ,, 2-3-18 | .... | कर्तृकरणयोस्तृतीया, 313 |
| भाग. 3-33-12 | .... | कर्तृत्वात्सगुणं ब्रह्म, 293 |
| पा. सू. 2-2-14 | .... | कर्मणि च, 196 |
| ब्र. सू. 1-1-18 | .... | कामाच्च नानुमानापेक्षा, 328 |
| माण्डू. उ 2-11 | ... | कार्यकारणबद्धौ तौ, 85 |
| अधि. सा. 1-1-1-27 | .... | कार्ये व्युत्पत्तिराद्या, 41 |
| पा. सू. 3-3-95 | .... | कृत्याः, 73 |

| | | |
|---|---|---|
| पा. सू. वार्तिक. 2-2-9... | | कृत्योगलक्षणा कर्मणि षष्ठी समस्यते, 197 |
| तै. सं. 6-1-4 | .... | क्रीते सोमे मैत्रावरुणाय, 104 |
| धातुपाठे भ्वादि– | .... | गडि वदनैकदेशे, 233 |
| पा. सू. 4-2-128 | .... | गहादिभ्यश्च, 7 |
| ,, 3-1-5 | .... | गुप्तिङ् किद्भ्यस्सन्, 209 |
| पा. सू. 4-1-1 | .... | ङ्याप्प्रातिपदिकात्, 95 |
| ,, 2-4-54 | .... | चक्षिङः ख्याञ्, 152 |
| ,, 6-1-11 | .... | चङि, 323 |
| ऋ. सं. 1-155-6 | ... | चतुर्भिस्साकं, 246 |
| तै. सं. I-2-1 | .... | चित्पतिस्त्वा पुनातु, 95 |
| न्याया. स्वप्र. भं. | .... | चित्सुखेन तत्स्वभावस्यापि, 71 |
| ब्र. सू. 1-4-17 | .... | जगद्वाचित्वात्, 297 |
| पा. सू. 1-4-30 | .... | जनिकर्तुः प्रकृतिः, 313 |
| तै. सं. 2-6-10 | .... | जामिवा एतद्यज्ञस्य क्रियते, 73 |
| न्यायविवरण 1-1-1 | .... | जीवव्यतिरिक्तेश्वराभावादित्यादि, 60 |
| श्वे. उ. 1-17-7 | ... | ज्ञाज्ञौ द्वावजावीशानीशौ, 44 |
| ब्र. सू. 2-3-18 | .... | ज्ञोऽतएव, 60 |
| ,, 1-4-10 | .... | ज्योतिरुपक्रमात्, 354 |
| पा. सू. 1-3-51 | .... | ज्ञो विदर्थस्य करणे, 197 |
| ,, 4-1-15 | .... | टिड्ढाणञ्, 18 |
| ,, 3-1-48 | .... | णिश्रिद्रुभ्यः, 323 |
| देवमीमांसा— | .... | तं ब्रह्मेत्याचक्षते, 255 |
| ब्र. सू. 1-1-4 | .... | तत्तु समन्वयात्, 336 |
| छां. उ. 6-8-7 | .... | तत्त्वमसि, 217 |
| चित्सु. टी. | .... | तत्परत्वात्परत्वाच्च, 39 |

| | | |
|---|---|---|
| चित्सु. | .... | तत्प्रातिपदिकार्थता, 307 |
| अनुव्या. 1-1-1 | .... | तत्र ताराथमूलत्वं, 90 |
| जै. सू. 1-4-23 | ... | तत्सिद्धिजातिसारूप्यप्रशंसा, 250 |
| अनुव्या. 1-1-1 | ... | तदभावे कुतोऽन्वयः, 49 |
| म. ना. उ. 1-6 | .... | तदेव ब्रह्म परमं कवीनां, 236 |
| म. ना. उ. 1-6 | .... | तदेवर्तं तदु सत्यमाहुः, 184 |
| छां. उ. 2-23 | .... | तद्यथा सर्वाणि पर्णानि, 106 |
| छां. उ. 8-1- | .... | तद्यथेह कर्मचितो लोकः, 177 |
| तै. उ. 3-1- | .... | तद्विजिज्ञासस्व, 73 |
| पा. सू. 7-2-117 | ... | तद्धितेष्वचामादेः, 14 |
| याज्ञिकी. 1 | ... | तन्नो रुद्रः, 184 |
| म. ना. उ. 3-16 | .... | तन्नो विष्णुः, 184 |
| तै. उ. 3-2 | .... | तपसा ब्रह्म विजिज्ञासस्व, 86 |
| तै. आ. 3-12 | .... | तमेवं विद्वानमृत इह भवति, 163 |
| अथर्व. उ. 4 | .... | तमेवैकं जानथ, 248 |
| ब्र. सू. 2-1-12 | .... | तर्काप्रतिष्ठानात्, 328 |
| पा. सू. 3-1-96 | .... | तव्यत्तव्यानीयरः, 73 |
| बृ. उ. 3-5-1 | .... | तस्माद्ब्राह्मणः पांडित्यं, 76 |
| बृ. उ. 6-4-23 | .... | तस्मादेवंविच्छान्तोदान्तः, 128 |
| पा. सू. 6-3-74 | .... | तस्मान्नुडचि, 17 |
| ,, 5-1-124 | .... | (एकदेशः) तस्य कर्माणि, 261 |
| ,, 4-3-120 | ... | तस्येदं, 15 |
| आ. धर्मसू. | .... | त्रिभिरनश्नन् पारायणैः, 100 |
| मा. उ. 1-5 | .... | त्रिषु धामसु यद्भोज्यम्, 44 |
| तै. ब्रा. 2-1-5 | .... | दक्षेन्द्रियकामस्य, 209 |

| | | |
|---|---|---|
| आ. श्रौ. सू. | .... | दर्शपूर्णमासाभ्यां स्वर्गकामो, 63 |
| पा. सू. 7-4-94 | .... | दीर्घोलघोः, 323 |
| न्यायामृत– | .... | दुर्बलस्य प्रमाणस्य, 332 |
| तै. सं. 1-1-4 | .... | देवस्य त्वा, 92 |
| मांडू. उ. 2-9 | .... | देवस्यैष स्वभावो यं, 312 |
| गी. भा. 6-8 | .... | देवादीनां तु यज्ज्ञानं, 136 |
| ऋ. सं. 10-81-3 | ... | द्यावापृथिवी जनयन् देवएकः, 338 |
| ब्र. सू. 1-3-1 | .... | द्युभ्वाद्यायतनं स्वशब्दात्, 248 |
| पा. सू. 7-3-4 | .... | द्वारादीनां च, 7 |
| ,, 4-1-21 | .... | द्विगोः, 50 |
| ,, 6-2-197 | .... | द्वित्रिभ्यां पद्धन्मूर्धसु, 12 |
| ,, 3-1-7 | .... | धातो कर्मणः समान, 212 |
| पा. सू. 6-3-77 | .... | नगोऽप्राणिष्वन्यतरस्याम्, 16 |
| सौपर्णश्रुतिः— | .... | न तादृशी प्रीतिरीड्यस्य विष्णोः 159 |
| तै. ब्रा. 2-8-3 | .... | न ते महित्वं, 349 |
| न्यायसुधा. 1-1-1 | .... | नन्वहं कर्ता भोक्ता, 56 |
| ,, ,, | .... | नन्वात्मा शरीरातिरिक्तो, 68 |
| पा. सू. 3-3-114 | .... | नपुंसके भावे क्तः, 18 |
| म. ना. उ. | .... | न ब्रह्मा न च शङ्करः, 338 |
| पा. सू. 6-3-75 | .... | नभ्राण्नपात्, 16 |
| ,, 2-3-16 | .... | नमस्स्वस्ति, 4 |
| पा. सू. 6-3-73 | .... | नलोपो नञः, 16 |
| ब्र. सू. 2-1-4 | .... | न विलक्षणत्वात्, 336 |
| ब्र. सू. 3-2-1 | .... | न स्थानतोपि हि परस्योभयलिङ्गं, 252 |
| बृ. उ. 6-3-23 | .... | न हि द्रष्टुर्दृष्टेर्विपरि लोपो, 292 |

| | | |
|---|---|---|
| छां. उ. 6-3 | ... | नामरूपे व्याकरोत्, 251 |
| तै. ना. 6-11 | .... | नारायणपरोज्योतिः, 248 |
| म. ना. उ. 11-3 | .... | नारायणं महा ज्ञेयं, 265 |
| तै. ब्रा. 3-12-9 | ... | नावेदवित्, 344 |
| ऋ. सं. 10-129-1 | .... | नासदासीन्नोसदामीत्, 250 |
| आथ. उ. 2 | .... | नास्त्यकृतः कृतेन, 143 |
| अनुव्या. 1-1-1 | .... | निर्विशेषे स्वयंभाते, 30 |
| मा. उ. 2-9 | .... | निवृत्तेस्सर्वदुःखानां, 306 |
| कठ. 2-4-11 | ... | नेहनाना, 132 |
| कठ. 1-2-9 | .... | नैषातर्केण, 343 |
| भाग. 2- | .... | नैषांमामाहमितिधीः, 240 |
| ब्रं. सू. 2-2-27 | .... | पत्युरसामजस्यात्, 193 |
| ,, 4-3-12 | .... | परं जैमिनिर्मुख्यत्वान्, 224 |
| श्वे. उ. 6-8 | .... | परास्यशक्तिः, 292 |
| अथा. उ. 2-12 | .. | परीक्ष्य लोकान् कर्मचितान्, 43 |
| पा. सू. 1-2-67 | .... | पुमान् स्त्रिया, 129 |
| सुधा. 1-1-1 | .... | पुरुषदोषोयं, 64 |
| सुधा. 1-1-2 | .... | पुरुषो हि प्रयोजनेन प्रयुक्तः, 64 |
| पा. सू. 5-1-128 | .... | पुरोहितादिभ्यो यक्, 261 |
| पा. सू. 2-2-11 | .... | पूरणगुण, 372 |
| ,, 8-4-3 | .... | पूर्वपदात्संज्ञायामगः, 18 |
| ,, 5-4-38 | .... | प्रज्ञादिभ्यश्च, 14 |
| ,, 2-3-6 | ... | प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः, 365 |
| पा. स. वा. 2-2-10 | ... | प्रतिपदविधाना षष्ठी समस्यते, 197 |
| कल्पतरु 1-1-1 | .... | प्रथमसूत्रस्य समन्वयेत्यादि, 47 |

| | | |
|---|---|---|
| मा. उ. 2- | .... | प्रपञ्चोपशमं, 305 |
| आथ. 2-13 | .... | प्रशान्तचित्ताय शमान्विताय, 145 |
| पा. सू. 5-1-1 | ... | प्राक् क्रीताच्छः, 7 |
| आप. श्रौ. सू. 8-1-5 | ... | प्राचीनप्रवणे वैश्वदेवेन, 205 |
| ब्र. सू. 1-3-4 | .... | प्राणभृच्च, 220 |
| भ. गी. 7-17 | .... | प्रियो हि ज्ञानिनोऽत्यर्थं, 163 |
| अनुव्या. 1-1-2 | .... | प्रीत्या मोक्षपरत्वाच्च, 64 |
| तै. ब्रा. 3-2-9 | .... | प्रोक्षणीरासादय, 234 |
| अनुव्या. 1-1-1 | .... | बन्धमिथ्यात्वं नैव मुक्तिरपेक्षते, 38 |
| पा. सू. 1-1-23 | .... | बहुगणवतुडतिसङ्ख्या, 102 |
| छां. उ. 6-2-3 | .... | बहु स्यां, 66 |
| उ. सू. पा. 4 | .... | बृहेरम् नलोपश्च, 84 |
| धा. पा, भ्वादि. | .... | बृहि वृद्धौ, 191 |
| तै. उ. 2-1 | .... | ब्रह्मविदाप्नोति परं, 117 |
| पा. सू. वा. 5-2-84 | .... | भूमनिन्दाप्रशंसासु, 28 |
| पा. सू. 1-3-1 | ... | भूवादयो धातवः, 18 |
| अ. को. 3-नानार्थ | .... | मङ्गलानन्तरारम्भ, 111 |
| बृ. उ. 4-4-5 | .... | मन्तव्यः, 73 |
| धा. पा. भ्वादि. | .... | मान विचारणे, 202 |
| पा. सू. 3-1-6 | .... | मानबधदानशान्भ्यो दीर्घश्चाभ्यासस्य, 202 |
| ,, 1-2-3 | .... | मृडमृद, 179 |
| बृ. उ. 5-7-3 | .... | य आत्मानमन्तरो यमयति, 283 |
| भ. गी. 18-68 | .... | य इमं परमं गुह्यं, 173 |
| ऋ. सं. 1-154-4 | .... | य उ त्रिधातु पृथिवीमुत द्यां, 246 |
| तै. सं. 1-6 | .... | य एवं विद्वान् पौर्णमासीं, 63 |

| | | |
|---|---|---|
| ऋ. सं. 8-7-11 | ... | यं कामये, 230 |
| तै. सं. 1-7-4 | .... | यजमानः प्रस्तरः, 35 |
| अनुव्या. 1-1-1 | .... | यजमानप्रस्तरत्वं, 36 |
| तै. उ. 3-1-1 | ... | यतो वा इमानि भूतानि जायन्ते, 162 |
| तै. ब्रा. 2-1 | .... | यथातिथये प्रद्रुतायान्नं, 33 |
| छां. उ. 6-1 | ... | यथा सोम्यैकेन मृत्पिण्डेन, 376 |
| तै. सं. 3-6-3 | ... | यदाग्नेयोऽष्टाकपालो, 63 |
| मन्दारमञ्जरी— | .... | यद्यपि परैः स्वग्रन्थेषु, 71 |
| याज्ञिकी. 2 | ... | यदेतदव्यक्तमनन्तरूपं, 355 |
| तै. ब्रा. 1-4-10 | .... | यद्विश्वेदेवाः समयजन्त, 206 |
| म. ना. उ. 1-3 | .... | यमन्तः समुद्रे, 237 |
| कठ. 1-2-23 | .... | यमेवैष वृणुते, 159 |
| तै. सं. 2-2-5 | .... | यस्मिन् जात एकामिष्टिं, 137 |
| आथ. 3-6 | .... | यस्मिन् द्यौः, 281 |
| तै. सं. 2-2-2 | .... | यस्य गृहान् दहत्यग्नये क्षामवते, 139 |
| पा. सू. 6-4-148 | .... | यस्येति च, 14 |
| तै. ब्रा. 3-7-1 | .... | यस्योभयं हविरार्तिमार्छेत्, 88 |
| तै. सं. 1-3-11 | .... | याते अग्ने अयाशया, 95 |
| ब्र. सू. 2-3-7 | ... | यावद्विकारं तु, 365 |
| उपाधिखण्डनमूल— | .... | योगः शशनृश्रृङ्गयोः, 37 |
| अ. को. 3- गांत | ... | योगस्तन्नहनोपाय, 9 |
| ऋ. सं. 10-82- 3 | .... | यो देवानां, 230 |
| ,, ,, | .... | यो नः पिता जनिता, 349 |
| ब्र. सू. 2-2-1 | .... | रचनानुपपत्तेश्च नानुमानं, 341 |
| पा. सू. 8-4-1 | ... | रषाभ्यां नो णः समानपदे, 18 |

पा. सू. वा. 5-1-128.... राजाऽसे, 261

पा. सू. 6-3-72 .... रात्रेः कृति विभाषा, 16

आप.श्रौ. सू.19-16-6.... लोहितोष्णीषा ऋत्विजः प्रचरन्ति, 104

पा. सू. 3-3-115 .... ल्युट्च, 18

पा. सू. वा. 1-1-75 .... वा नामधेयस्य वृद्धसंज्ञा, 15

तै. सं. 2-1-1 .... वायुर्वै क्षेपिष्ठा देवता, 62

तै. सं. 2-5-2 .... वार्त्रघ्नी पौर्णमास्यां, 63

बृ. उ. 5-9-28 .... विज्ञानमानन्दं ब्रह्म, 312

तै. उ. 3-3 .... विज्ञानाद्ध्येव, 279

ऐ. आ. 1- .... विदा मघवन्, 153

ब्र. सू. 3-3-48 .... विधैव तु, 54

पा. सू. 1-4-2 .... विप्रतिषेधे परं, 108

याज्ञिकोपनिषत्— .... विश्वाधिको रुद्रः, 228

पा. सू. 4-2-114 .... वृद्धाच्छः, 15

पा. सू. 1-1-73 .... वृद्धिर्यस्याचामादिस्तद्वृद्धं, 15

तै. सं. 1-8-2 .... वैश्वदेवीमामिक्षां, 205

तै. ब्रा. 1-4-10 ... वैश्वदेवेन यजेत, 205

तै. सं.2-2-5 .... वैश्वानरं द्वादशकपालं, 137

अनुव्या. 3-2-1 .... व्यभिचार्यपवादेन मानमेव, 297

पा. सू. 3-3-98 ... व्रजयजोर्भावे क्यप्, 273

तै. ब्रा. 3-7-5 .... व्रीहीणां मेध सुमनस्यमानः, 92

अनुव्या. 1-1-1 .... शक्तिश्चैवान्विते स्वार्थे,

ब्र. सू. 3-4-27 .... शमदमाद्युपेतःस्यात्, 143

पा. सू. 6-3-120 .... शरादीनां च, 28

ब्र. सू. 1-2-20 .... शारीरश्चोभयेपि हि भेदेनैनमधीयते, 220

| | | |
|---|---|---|
| जै. सू. 1-3-5 | ... | शास्त्रस्थावा तन्निमित्तत्वात्, 252 |
| ब्र. सू. 1-3-34 | .... | शुगस्य तदनादरश्रवणात्, 144 |
| ब्र. सू. 2-1-18 | ... | श्रुतेस्तु शब्दमूलत्वात्, 341 |
| बृ. उ. 4-4-5 | ... | श्रोतव्यः. 72 |
| पा. सू. 1-1-24 | .... | ष्णान्ता षट्, 102 |
| सुधा. 3-2-11 | .... | सकलश्रुतिस्मृतीतिहासपुराणानां, 85 |
| ,, 1-3 | .... | सङ्गतिस्तावद्विविधा, 47 |
| पा. सू. परि 6-4-146.... | | सं ज्ञापूर्वको विधिरनित्यः, 15 |
| पा. सू. 1-2-53 | ... | संज्ञाप्रमाणत्वात्, 373 |
| ,, 8-2-11 | .... | संज्ञायां, 28 |
| तै. सं. 1-3-8 | .... | सं यज्ञपतिराशिषा, 92 |
| पा. सू. 8-2-43 | .... | संयोगादेरातो धातोर्यण्वतः, 296 |
| छां. उ.6-2-1 | ... | सदेव सोम्येद, 338 |
| पा. सू. 2-4-17 | .... | स नपुंसकम्, 314 |
| जै. सू. 1-4-18 | .... | सन्दिग्धेषु वाक्यशेषात्, 253 |
| ब्र. सू. 3-2-1 | .... | सन्ध्ये सृष्टिराह हि, 253 |
| तै. ब्रा. 1-3-4 | .... | सप्तदश प्राजापत्यान् पशूनालभते, 129 |
| ब्र. सू. 1-4-16 | .... | समाकर्षात्, 262 |
| तै. सं. 2-6-5 | ... | समिधो यजति तनूनपातं यजति, 128 |
| छां. उ. 3-14-1 | .... | सर्वं खल्विदं ब्रह्म, 187 |
| ब्र. सू. 1-2-1 | .... | सर्वत्र प्रसिद्धोपदेशात्, 243 |
| ,, 3-3-1 | .... | सर्ववेदान्तप्रत्ययं, 200 |
| तै. ब्रा. 3-3-5 | .... | सर्वस्मै वा एतद्यजाय, 63 |
| दे. मी. अन्त्यसूत्रं– | ... | सविष्णुराह हि, 255 |
| बृ. उ. 6-3-10 | .... | सहि कर्ता, 250 |

| | | |
|---|---|---|
| पा. सू. 1-2-4 | ... | (योगविभागः) सुप्सुपा, 18 |
| तै. सं. 2-3-2 | .... | सौर्यं चरुं निर्वपेत्, 91 |
| पा. सू. 4-1-87 | .... | स्त्रीपुंसाभ्यां, 16 |
| ब्र. सू. 2-3-5 | .... | स्याच्चैकस्य ब्रह्मशब्दवत्, 244 |
| सुधा. 1-1-1 | .... | स्वप्रकाशतया वा, 60 |
| ब्र. सू. 3-3-3 | .... | स्वाध्यायस्य तथात्वे न हि, 79 |
| तै. आ. 2-15-1 | .... | स्वाध्यायोध्येतव्यः, 29 |
| पा. सू. 4-1-2 | ... | स्वौजसमौट्छस्टाभ्यांभिस्, 95 |
| छा. बृ. तै. उ. भा. | .... | हनुशब्दो ज्ञानवाची, 28 |
| पा. सू. 7-4-2 | .... | हलः, 296 |
| ,, 1-1-7 | .... | हलोनन्तराः संयोगः, 126 |
| तै. सं. 6-3-10 | ... | हृदयस्याग्रेऽवद्यति अथ जिह्वाया, 128 |